॥ अथ मध्वसिद्धांतसारप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ लक्ष्मीनारायणंवंदेपूर्णबोधंगुरूनपि ॥ जयार्यान्व्यासराजांश्चमद्गुरूनपिसादरं ॥ वेदगर्भकुलीनेनपद्मनाभेनधीमता ॥ मध्वसिद्धांतसारोयंतन्यतेसेव्यतांबुधैः ॥ इहखलुजगदुदयादिनिमित्तत्वेनपरमात्मतत्त्वज्ञानंमोक्षसाधनमित्यवांतरानेकभेदभिन्नपदार्थनिरूपणंकुर्वन्ग्रंथादौमंगलमाचरति ॥ लक्ष्मीपतिमिति ॥ १ ॥ ननुनैयायिकादिभिरेवपदार्थनिरूपणस्यकृतत्वाद्व्यर्थएवायंग्रंथइत्यतआह ॥ अंजसेति ॥ नैयायिकादिनिरूपितपदार्थमध्येकस्यचित्स्वरूपतएवाभावात्केषांचिच्छास्त्रविरुद्धतयानिरूपणात्तस्यांजस्यमेवनास्तीतिभावः ॥ ननुभवन्निरूपणस्यापिशास्त्रविद्धरुत्वेतद्वदनुपादेयतास्यादित्यतआह ॥ शास्त्रतइति ॥ ल्यब्लोपनिमित्तापंचमी शास्त्रमनुसृत्येत्यर्थः ॥ तत्रसामान्यतःपदार्थान्निरूपयति ॥ तत्रेति ॥ २ ॥ पदार्थनिरूपणस्यावश्यकत्वइत्यर्थः ॥ ननुभगवत्पादैरेवतत्त्वसंख्यानेस्वतंत्रास्वतंत्रभेदेनद्वैविध्यस्य बृहद्भाष्ये ईश्वरःप्रकृतिर्जीवोजडंचेतिचतुष्टयं ॥ पदार्थानांसमुद्दिष्टंतत्रेशोविष्णुरुच्यतइतिचातुर्विध्यस्यचोक्तेर्दशपदार्थाइत्येतच्छास्त्रविरुद्धमितिचेदुच्यते ॥ अस्यग्रंथस्यतार्किकादिसमयनिरासायप्रवृत्तत्वेनतद्विभागमनुसृत्यकेषांचित्पदार्थानामावापःकेषांचिदुद्धारःक्रियतइतिनतद्विरोधः ॥ तत्त्वसंख्यानादौचसामान्यविस्तराभ्यांपदार्थतत्त्वज्ञानंमोक्षसाधनमित्यभिप्रायेणप्रवृत्तंविभागद्वयमितिनदोषः ॥ तत्रविशिष्टांशिशक्तिसादृश्यानांतार्किकैःपदार्थांतरत्वेनानंगी

---

१ लक्ष्मीपतिंसंप्रणम्यसर्वज्ञादिगुरूनपि ॥ पदार्थानांसंग्रहोयंक्रियतेशास्त्रतोंजसा ॥ २ तत्रद्रव्यगुणकर्मसामान्यविशेषविशिष्टांशिशक्तिसादृश्याभावादशपदार्थाः ॥

कारात्तन्निरासायविभागेप्रक्षेपः ॥ समवायस्याप्रामाणिकस्योद्धापः ॥ तार्किकांगीकृतद्रव्यगुणादिष्वपिबहुव्यत्यासोस्ति ॥ तत्स र्वंतत्तत्पदार्थनिरूपणप्रस्तावेदर्शयिष्यामः ॥ प्रमेयत्वंपदार्थसामान्यलक्षणंस्फुटतयोपेक्ष्यविभागएवादौकृतः ॥ द्रव्यसामान्य लक्षणस्योत्तरत्रवक्ष्यमाणत्वात्प्रथमोद्दिष्टंद्रव्यंविभजति ॥ **तत्रद्रव्याणीति** ॥ ३ ॥ अस्यविंशतिरेवेत्यनेनसंबंधः ॥ ए वकारेणतार्किकोक्तविभागोप्रामाणिकः प्रमाणविरुद्धश्चेतिसूचयति ॥ प्रकृतिगुणत्रयादीनांप्रामाणिकत्वेनदुरपह्नवत्वात्पृथि व्यादिनवद्रव्येष्वंतर्भावासंभवाच्चपृथग्द्रव्यत्वंयुक्तमितिभावः ॥ तदुक्तंवैशेषिकाधिकरणसुधायां ॥ यदुक्तंवैशेषिकादिभिः पृथिव्यादिनवैवद्रव्याणीति तदसत् ॥ महदहंकारादीनामपिसत्त्वादिति ॥ एतेषांचयथाद्रव्यत्वंतथातत्तदवसरेवक्ष्यामः ॥ गुणंविभजति ॥ **रूपेति** ॥४॥ शास्त्रेगुणत्वेनव्यवहारविषयत्वंगुणसामान्यलक्षणं ॥ नचदुःखद्वेषाधर्मेष्वव्याप्तिरितिवाच्यं॥ सज्जनक्लेशंनिरीक्ष्यस्वगतदुःखस्य तमोयोग्येषुद्वेषस्य महतांप्रीत्यर्थमधर्मस्यच शास्त्रेतत्रतत्रगुणत्वेनव्यवहारात् ॥ केचित्तुसा मान्यवानसमवायिकारणमस्पंदात्मागुणइतिगुणसामान्यलक्षणमाहुः ॥ तन्न ॥ समवायस्यनिराकरिष्यमाणत्वेनायुक्तत्वात् ॥ किंचगगनादिगतमहत्परिमाणेपरमाणुपरिमाणेचाव्याप्तिः ॥ ननुगुणक्रियादीनांगुण्याद्यभिन्नत्वाद्विभागानुपपत्तिः ॥ तस्यभे

३ तत्रद्रव्याणि ॥ परमात्मलक्ष्मीजीवाव्याकृताकाशप्रकृतिगुणत्रयमहत्तत्त्वाहंकारतत्त्वबुद्धिमनइंद्रियमात्राभूतब्रह्मांडाविद्यावर्णांधकारवासनाका लप्रतिबिंबभेदाद्विंशतिरेव ॥ ४ रूपरसगंधस्पर्शसंख्यापरिमाणसंयोगविभागपरत्वापरत्वद्रवत्वगुरुत्वलघुत्वमृदुत्वकाठिन्यस्नेहशब्दबुद्धिसुखदुःखे च्छाद्वेषप्रयत्नधर्माधर्मसंस्कारालोकशमदमकृपातितिक्षाबलभयलज्जागांभीर्यसौंदर्यधैर्यस्थैर्यशौर्यौदार्यसौभाग्यप्रभृतयोनेकेगुणाः ॥

दसाध्यत्वादितिचेन्न ॥ अयावद्द्रव्यभाविनांभेदाभेदस्य यावद्द्रव्यभाविनांचाभेदेपिभेदप्रतिनिधिविशेषस्यचस्वीकृतत्वेनविभा गोपपत्तेः ॥ तदुक्तं ॥ खंडितेभेदऐक्यंचयावद्वस्तुन भेदवत् इतितत्त्वविवेके ॥ तथासामस्त्योच्छेदिनोन्यत्रधर्माउभयरूपकाः॥ भावेतएवचोच्छेदात्तदन्येचसमस्तशइत्यनुव्याख्यानेच ॥ एवंचचतुर्विंशतिगुणाइतिविभागोनयुक्तः ॥ गांभीर्यादीनामपि गुणत्वेनशास्त्रेव्यवहारात् ॥ अतस्तदपलापोनयुक्तइतिभावः ॥ कर्मविभजते ॥ **विहितेति** ॥ ५ ॥ साक्षात्परंपरयावापुण्यपा पासाधारणकारणंकर्मेतिकर्मसामान्यलक्षणं ॥ उत्क्षेपणादीनामपिपरंपरयाधर्माधर्महेतुत्वान्नाव्याप्तिः ॥ नकुर्यान्निष्फलंकर्मे तिश्रुतेर्व्यर्थकर्मणोपिपापसाधनत्वमितिभावः ॥ केचित्तुगुणभिन्नत्वेसत्यसमवायिकारणत्वंकर्मलक्षणमाहुः ॥ तत्तुच्छं ॥ सम वायस्यनिराकरिष्यमाणत्वात् ॥ ईश्वरक्रियायामव्याप्तेश्च ॥ नचतस्याअपिप्रदेशांतरसंयोगासमवायिकारणत्वमितिवाच्यं ॥ सर्वदासर्वदेशसंयोगस्येश्वरेसत्त्वेनपुनर्जननायोगात् ॥ विधिचोदितंयज्ञादि विहितंकर्म ॥ नकलंजंभक्षयीतेत्यादि निषिद्धं ॥ विहितविभागमाह ॥ **विहितमपीति** ॥ ६ ॥ फलेच्छयाकृतंकर्मकाम्यं ॥ ईश्वरप्रसादार्थंकृतंकर्माकाम्यमित्यर्थः ॥ तदुभय कर्मणोराश्रयमाह ॥ **तच्चेति** ॥ ७ ॥ ननुब्रह्मवायुसरस्वतीभारतीनांभगवज्ज्ञानभक्तीविनान्यत्रकामनैवनास्ति ॥ तथाहि ॥ महाभारततात्पर्यनिर्णये ॥ ज्ञानभक्तीहरेस्तृप्तिंविनाविष्णोरपिक्वचित् ॥ नाकांक्ष्यंकिमुतान्येभ्योह्यस्त्रंकाम्यफलप्रदं ॥ शु द्धेभागवतेधर्मेनिरतोयद्वृकोदरः ॥ नकाम्यकर्मकृत्तस्मान्नायाचद्देवमानुषान् ॥ नहरिश्चार्थितस्तेनकदाचित्कामलिप्सया ॥ अ

५ विहितनिषिद्धोदासीनभेदेनत्रिविधंकर्म ॥ ६ विहितमपिकाम्याकाम्यभेदेनद्विविधं ॥ ७ तच्चब्रह्मादिसर्वजीवानां ॥

न्वेनमेवतद्धर्मेकृष्णैकासंस्थितासदा ॥ धृतराष्ट्रादपिवरंततोनात्मार्थमग्रहीत् ॥ तस्मादेकोवायुरेषधर्मेभागवतेस्थितः ॥ ल
क्ष्मीःसरस्वतीचेतिपरशुक्लत्रयंस्मृतमिति ॥ अतःकथंब्रह्मादिचतुर्णांकाम्यकर्मेतिचेदुच्यते ॥ ब्रह्मणःसत्यलोकाधिपत्यरूपंपदं
वायोश्चवायुपदंप्रारब्धकर्मफलं ॥ अन्यथाज्ञानोदयानंतरमेवमुक्तिस्स्यात् ॥ प्रारब्धकर्मचकाम्यमेव ॥ नतुनिवृत्तंकर्म ॥ त
स्यापरोक्षज्ञानहेतुत्वेनचरितार्थत्वात् ॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइतिगीतोक्तेः ॥ तद्भाष्येपिनिवृत्तादीनिकर्माणिह्यप
रोक्षेशदृष्टये ॥ अपरोक्षदृशिश्चैवमुक्तौकिंचिन्नमार्गतइति॥प्रारब्धस्यकाम्यकर्मत्वंचकर्मक्षयाधिकरणटीकायामुक्तं॥ तथाहितत्र
टीका॥अत्राप्यस्तिविशेषः॥पूर्वतनंकाम्यपुण्यंद्विविधं॥प्रारब्धमप्रारब्धंचेति॥प्रारब्धस्यनास्तिनाशः॥अप्रारब्धंचाद्विविधं॥ इष्टम
निष्टंच॥तत्रेष्टमपिननश्यतीत्यादि ॥नचब्रह्मणोब्रह्मपदंवायुत्वावस्थायांहनुमदवतारेरामसेवाफलत्वेनभीमावतारेजरासंधहनन
राजसूयादिकर्मफलत्वेनचनिर्णयोक्तेर्नप्रारब्धकर्मफलमितिवाच्यं॥प्रारब्धेनैवराजसूयस्यापिकरणसंभवात् ॥ प्रारब्धकर्मणैवक्लृ
प्तफलसूचकत्वेनेदानींतनकर्मणउपयोगस्यवक्ष्यमाणत्वाच्च ॥ अतोब्रह्मणोपिकाम्यकर्मास्त्येव॥नचोक्तप्रमाणविरोधः ॥ केवलमा
त्मभोगार्थमितरपुरुषवद्ब्रह्मणोनकामना॥ किंतुसत्यलोकाधिपत्यंजगत्सर्जनादिनाभगवत्प्रीतयेस्यादित्येवंरूपेणकामनासद्भावेबा
धकाभावात् ॥ अतएवस्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिंचितामेतिततःपरंहिमामितिविरिंचिपदस्यकर्मफलत्वोक्तिर्भागवते ॥
अतएवचभीमसेनस्यभगवदाज्ञयाकाम्यास्त्रस्वीकारोनिर्णयेप्रतिपादितः ॥ आज्ञयैवहरेर्द्रौणेरस्त्रैरस्त्राण्यशामयत् ॥ अदृश्यो
लंबुसोभग्नोनान्यत्रचकथंचनेति ॥ तथाचभगवदाज्ञयैवब्रह्मवाय्वोःकाम्यकर्मकरणसंभवान्नकोपिविरोधः ॥ तदुक्तंतृतीयस्कं

धतात्पर्ये ॥ आधिकारिकदेवानांस्वाधिकाराभिकामनं ॥ भवतिप्रीतयेविष्णोर्भक्त्याद्यैरपियत्सदेति ॥ द्वितीयस्कंधतात्पर्येपि ॥ येषांपदांतरापेक्षावाय्वादीनांमहात्मनां ॥ आवृत्यतेपुनर्यातीति ॥ एवंब्रह्मादावपिकाम्यकर्मसद्भावे नकंचनविरोधंपश्यामः ॥ ननुकृष्णरुक्मिण्योःपुत्रार्थंरुद्रंप्रतितपःकरणंपुराणादौश्रूयते॥ तत्कथंकाम्यंकर्मसर्वजीवानामेवेत्युक्तमित्यतआह ॥ लक्ष्मीनारायणयोस्त्विति ॥८॥ तुशब्दोजीवाद्विशेषंद्योतयति ॥ तमेवविशेषमाह ॥ लीलयेति ॥ दैत्यजनमोहायैवतपआदिकर्मभगवतोनतुस्वप्रयोजनाय ॥ तदुक्तंनिर्णये ॥ ययौकैलासमद्रींशंचकारेवतपोत्रच॥शार्वंतपःकरोतीवमोहनायसुदुर्जनान्॥ पूर्वंतेनोदितंयत्तुलोकान्मोहयतांजसा ॥ शर्वप्रतितवाहंतुकुर्यांद्वादशवत्सरं ॥ तपोसुराणांमोहायसुराःसंतुगतज्वराइति ॥ एतेनऋषभनारायणाद्यवतारेष्वपिमोहायसज्जनशिक्षायैचतपःकरणमितिध्येयं ॥ निषिद्धकर्मणःस्थानमाह ॥ निषिद्धमिति ॥ ९ ॥ मनोवाक्कायैःस्वोत्तमापराधाद्यनुष्ठानंनिषिद्धंकर्म ॥ रुद्रस्यतुरामेणसहयुद्धायोद्यमः ॥ तदुक्तंनिर्णये ॥ ततोहियुद्धायरमेशशंकरौव्यवस्थितौतेधनुषीप्रगृह्येति॥ तथास्वोत्तमेनभीमसेनेनयुद्धकरणं ॥ तदुक्तंनिर्णये ॥ सव्याघ्ररूपीकपिलात्मिकामुमांपरीक्षयन्हंतुमिवाद्रवद्द्रुतं ॥ समेयुद्धेविजितोमूर्च्छितश्चगदाप्रहारादासलिंगांतरस्थः ॥ व्याघ्रेश्वरंनामलिंगंपृथिव्यांख्यातंतथातद्वदन्यत्रयुद्धमित्यादि॥ तथाकृष्णावतारेरुद्रोश्वत्थामाभूत्वाकृष्णाज्ञामुल्लंघ्यतदसंमतोत्तरागर्भकृंतनायापांडवेयास्त्रममुचत्॥ तदुक्तंनिर्णये ॥ यादवेशोपिगौतम्याःसुतमाहैकसंततेः ॥ वाचानिवर्तयास्त्रंतदित्युक्तोद्रौणिरब्रवीत् ॥ पक्षपातादिच्छसित्वंभागि

---

८ लक्ष्मीनारायणयोस्तुलीलयामोहनायवा ॥ ९ निषिद्धंकर्मरुद्रादीनां ॥

नेयस्यसंततिं ॥ तत्रैवपातयाम्यस्त्रमुत्तरागर्भकृंतनइति ॥ एवंभीमाभावायापांडवेयास्त्रममुचत् ॥ तदप्युक्तंनिर्णये ॥ तदस्त्रंप्रज्वलदृष्ट्वाऽपांडवत्वविधित्सया ॥ धरायांद्रौणिनामुक्तंकृष्णेनप्रेरितोर्जुनइति ॥ तथाऽपांडवत्वविधित्सयादुर्योधनभार्यासंभोगेनतत्रपुत्रोत्पत्तिप्रतिज्ञाकृताद्रौणिना ॥ तदुक्तंनिर्णये ॥ तदैवहार्दिक्यकृपान्वितोयात्सुयोधनंद्रौणिरमुंशयानं ॥ प्रभग्नसक्थिश्वसृगालभूतैःसंभक्ष्यमाणंददृशेश्वसंतं ॥ सदुःखशोकाभिहतोविनिंद्यपार्थान्मयाभूपकिमत्रकार्यं ॥ इत्याहनिष्पांडवतांकुरुष्वेत्यमुंव्यधात्पांस्वभिषेकिणंनृपः ॥ उच्छिद्यसंततिंपांडोःकृत्वास्वक्षेत्रसंततिं ॥ तयाभूरक्षणहृदासोभिषिक्तस्तथेत्यगादिति ॥ द्रोणकर्णद्रौणिकृपाःकृष्णाभावेमनोदधुः ॥ देवाश्शिवाद्याअपितुविरोधंचक्रिरेक्वचित् ॥ एवंशेषस्यापिबलरामावतारेकृष्णवैमनस्येनकृष्णंपरित्यज्यान्यत्रगमनमभूत् ॥ तदुक्तंनिर्णये ॥ स्यमंतकार्थेरामोपिकृष्णस्यविमनाभवत् ॥ अविश्वासात्सतुसक्रोधएवययौविदेहानवसत्पंचचाब्दानिति ॥ तथायुद्धकालेभीमनिंदामकरोत् ॥ तदुक्तंनिर्णये ॥ पुनःपुनश्चतद्वीक्ष्यचुक्रोधमुसलायुधः ॥ चुक्रोशनैवधर्मोयमित्यसावूर्ध्वबाहुकः ॥ पुनःक्रोधाभिताम्राक्षआदायमुसलंहलं ॥ अभिदुद्रावभीमंतंनचचालवृकोदरइति ॥ इंद्रोपिपारिजातहरणकालेकृष्णेनयुद्धमकरोत् ॥ अर्जुनावतारेपिकृष्णावज्ञांचकार ॥ तदुक्तंनिर्णये ॥ तदाजगादफल्गुनोसुरैर्विदूषितात्मना ॥ नविप्रतादृशोस्म्यहंयथैवकेशवादयः ॥ अवमेनेर्जुनःकृष्णंविप्रस्वशिशुरक्षणइति ॥ भीष्मस्तुभार्गवंराममवमेनेयुयोधचेत्यादि ॥ तस्माद्रुद्रादीनांनिषिद्धंकर्मास्तीतिसाधूक्तं ॥ ननुभीमसेनस्यापिहिडिंबीसंभोगरूपंनिषिद्धंकर्मास्ति ॥ तत्कथंरुद्रादीनामेवनिषिद्धंकर्मेत्युक्तमितिचेन्न ॥ तस्यस्वोत्तमापराधरूपत्वाभावात् ॥ तस्यापिव्यासाज्ञयाकृतत्वेनानि

षिद्धत्वाभावाच्च ॥ तदुक्तंनिर्णये ॥ तान्भक्तिनम्रशिरसस्समुदीक्ष्यकृष्णोभीमंजगादनतआशुहिडिंबयाच ॥ एतांग्रहाणयुवतींसुरसद्मशोभांजातेसुतेसहसुताप्रतियातुचैषा ॥ एवंब्रुवत्यगणितोरुगुणेरमेशेओमित्युदीर्यकृतवांश्चतथैवभीमइति ॥ उदासीनकर्मस्वरूपंनिरूपयति ॥ उदासीनमिति ॥ १० ॥ विधिनिषेधाभ्यांभिन्नंकर्मेत्यर्थः ॥ तद्विभागमाह ॥ उत्क्षेपणेति ॥ ॥ ११ ॥ ऊर्ध्वप्रक्षेपउत्क्षेपणं ॥ अधःप्रक्षेपोपक्षेपणं ॥ मुकुलीकरणमाकुंचनं ॥ विस्तारकरणंप्रसरणं ॥ गमनादिकंचप्रसिद्धमेव ॥ ननुभ्रमणागमनादीनांगमनरूपत्वान्नपार्थक्यमितिचेन्न ॥ भ्रमतीत्युक्तेगच्छतीतिप्रत्ययस्यगच्छतीत्युक्तेभ्रमतीतिप्रत्ययस्यचाभावेनोभयोर्भिन्नत्वात् ॥ नचगमनविशेषोभ्रमणादिकं ॥ तर्ह्युत्क्षेपणादीनामपिगमनविशेषत्वात्तेषामपिपृथङ्निर्देशोनस्यात् ॥ तस्मात्कर्माण्यनेकान्येवनतुपंचविधानीतिभावः ॥ उदासीनकर्मणामाश्रयमाह ॥ यथायोगमिति ॥ १२ ॥ ननुचेतनमात्रस्यव्याप्तत्वात्कथंचेतनेषुक्रियेतिचेन्न ॥ परमात्मनिअणुत्वादिनानापरिमाणस्यजीवेऽणुपरिमाणस्यचवक्ष्यमाणत्वेनगमनादिक्रियांगीकारेबाधकाभावात् ॥ पुनःक्रियाविभागमाह ॥ पुनर्द्विविधइति ॥ १३ ॥ नित्यस्योदाहरणमाह ॥ नित्यइति ॥ १४ ॥ ईश्वरेसृष्टिसंहारगमनादिक्रियाःस्वरूपभूताः ॥ जीवेगमनादिक्रियाःस्वरूपभूताःमुक्तौसम्यगभिव्यज्यंते ॥ नन्वीश्वरेतावत्क्रियाअनित्याक्रियात्वात् ॥ अचेतनक्रियावदित्यनुमानविरुद्धंक्रियानित्यत्वं ॥ किंचसृष्टिसंहारादिक्रियाणांनित्यत्वेसर्वदासृष्टिसंहारा

१० उदासीनंकर्मतुपरिस्पंदः ॥ ११ सचोत्क्षेपणापक्षेपणाकुंचनप्रसरणगमनागमनभ्रमणवमनवपनभोजनविदारणाद्यनेकविधः ॥ १२ यथायोगंचेतनाचेतनयोर्धर्मः ॥ १३ पुनर्द्विविधः ॥ नित्योऽनित्यश्च ॥ १४ नित्यईश्वरादिचेतनस्वरूपभूतः ॥

दिविरुद्धक्रियासमावेशःस्यात् ॥ गमनस्यापिनित्यत्वेसर्वदागमनंस्यादितिचेन्न ॥ सृष्ट्यादीनांशक्तिव्यक्तिस्वीकारात् ॥ सृष्टि
कालेसृष्टिक्रियाव्यक्तयात्मनावर्तते ॥ अन्यदातुशक्तयात्मना ॥ एवंसंहारक्रियापि ॥ गमनमपितथेतिनविरोधः ॥ तदुक्तमनु
व्याख्याने ॥ अनित्यत्वात्क्रियाणांतुकथमेवस्वरूपता ॥ इतिचेत्सविशेषोपिक्रियाशक्तयात्मनास्थिरः ॥ शक्तिताव्यक्तिताचे
तिविशेषोपिविशेषवानिति ॥ बृहद्भाष्येपि ॥ क्रियाणांचननाशोस्तितच्छक्तेःपूर्वकालतः ॥ विशेषएवोपरतिःक्रियायास्समुदी
रिता ॥ करोतिनकरोतीतिविशेषव्यवहारकृत् ॥ व्यक्तिभावंगतायातुकरोतीतिस्वरूपिणी ॥ शक्तिरूपस्थितासैवक्रियाशक्तिरु
दीर्यतइति ॥ अनित्यत्वानुमानंतु स्वाभाविकीज्ञानबलक्रियाच ॥ ज्ञानंनित्यंक्रियानित्याबलंनित्यंपरात्मनइत्यादिप्रमाणबा
धितत्वादप्रमाणं ॥ अन्यथापरपक्षेपीश्वरेच्छायास्सर्वदासत्वात्सर्वदासृष्ट्याद्यापत्तिः ॥ नचसिसृक्षयासृष्टिः संजिहीर्षयासंहारः॥
तेचनसर्वदेतिवाच्यं ॥ तत्किंसिसृक्षासंजिहीर्षाचेच्छातिरिक्ता उतेच्छास्वरूपभूता ॥ नाद्यः ॥ अष्टगुणत्वव्याघातेनापसि
द्धांतापातात् ॥ द्वितीयेपूर्वोक्तदोषानिस्तारः ॥ कालविशेषरूपसहकारिविरहान्नसर्वदासृष्ट्यादिरितिचेत्सममस्मत्पक्षेपि ॥ मु
क्तानांक्रियातुगमनादिरूपा ॥ सतत्रपर्येतिजक्षन्क्रीडन्रममाणःस्त्रीभिर्वायानैर्वेत्यादिश्रुतिसिद्धा ॥ उक्तंचबृहद्भाष्ये ॥ एवं
विमुक्तजीवानांस्वरूपैस्स्वगुणैरपि ॥ स्वक्रियाभिस्सदैवैक्यंनित्यंस्वावयवैरपीति॥नचसोत्पत्तिविनाशवतीतिवक्तुंशक्या॥प्रकृति
संबंधाभावेनोपादानाभावात्॥ संसारिणांतुकिंमयाकार्यमित्यादिचिंतनादिक्रियाणामनित्यत्वं जीवेनभेदाभेदः ॥मुक्तावुच्छेद
दर्शनात्॥ तदुक्तंबृहद्भाष्ये॥ एवंमुक्तक्रियानित्यानान्येषांभ्रांतिसंभवात्॥ मुक्तावुच्छेदतश्चैवनिश्शेषेणाखिलस्यच॥ अनित्या

नांक्रियायाश्चमुक्तावपिसमास्थिताः॥ अभिन्नाअपिताज्ञेयाअभिव्यक्तेःपुनःपुनः॥ चिंतनादिक्रियाणांतुमुक्तावुच्छेदतस्सदा॥ किं
मयाकार्यमादीनांभेदाभेदउदीरितः॥ भेदाभेदस्तुबद्धानांगुणैस्स्वैःकर्मभिस्तथेति॥ अनित्यक्रियायास्स्थानमाह॥ अनित्यइति
॥१९॥शरीराद्यनित्यवृत्तिक्रियेत्यर्थः॥ नन्वनित्यक्रियासद्भावेमानाभावः॥ नचगच्छतीतिप्रत्यक्षप्रतीतिरेवमानमितिवाच्यं॥
पूर्वदेशविभागोत्तरदेशसंयोगयोरेवगच्छतीतिप्रत्ययविषयत्वोपपत्तेः॥ नचशरीरादौक्रियाभावेउत्तरदेशसंयोगोत्पत्तिरेवनसंभव
तीतिवाच्यं॥जीवप्रयत्नेनैवतदुत्पत्त्युपपत्तेरितिचेन्न॥ प्रयत्नस्यजीवगतत्वेनशरीरोत्तरदेशसंयोगजनकत्वासंभवात्॥अन्यथास्थि
तिकालेपिताद्दशप्रयत्नसंभवेनगमनप्रसंगादित्यलं॥ अधिकंतुसुधायांद्रष्टव्यं॥ नन्वथापिगमनादिनप्रत्यक्षं॥ किंत्वनुमानगम्यं॥
नचेंद्रियान्वयव्यतिरेकानुविधानाद्गमनंप्रत्यक्षमितिवाच्यं॥ शरीररूपाश्रयग्रहणोपक्षीणत्वेनचरितार्थत्वादितिचेन्न॥ घटरूपा
देरपिप्रत्यक्षत्वाभावप्रसंगात्॥ क्रियातुल्यत्वात्॥ ननुशरीरक्रियानप्रत्यक्षा॥ क्रियात्वात्॥ परमाणुक्रियावदितिचेन्न॥घटरूपंन
प्रत्यक्षं॥ रूपत्वात्॥ परमाणुरूपवदित्यपिवक्तुंशक्यत्वात्॥ किंचयोग्यद्रव्यवृत्तित्वेनसामान्यवत्प्रत्यक्षत्वंक्रियायायुक्तमेव॥
ननुशरीरपरिस्पंदोनप्रत्यक्षः॥ परिस्पंदत्वात्॥ तरणिपरिस्पंदवदितिचेन्न॥ दूरस्थत्वदोषेणतरणिपरिस्पंदस्याप्रत्यक्षत्वेपिशरी
रक्रियायाःसमीपस्थत्वेनप्रत्यक्षत्वसंभवात्॥ अन्यथापरिमाणरूपजात्यादीनांदूरस्थेऽप्रत्यक्षत्वेनसमीपस्थेपिदेवदत्तादावप्रत्यक्ष
त्वप्रसंगादित्यादिसुधायांद्रष्टव्यं॥ तस्मादनित्यक्रियासिद्धिः॥ इतिकर्मप्रकरणं॥ ॐ॥ ॐ॥ ॐ॥ क्रमप्राप्तंसामान्यंविभजति॥

---

१९ अनित्योऽनित्यगतः॥

नित्यमिति ॥ १६ ॥ पुनर्विभजति ॥ जातिरिति ॥ १७ ॥ नचजातिव्यतिरेकेणोपाधिसद्भावेमानाभावइतिवाच्यं ॥ प्रमेयत्वादीनामितरनिरूप्यत्वेनजातित्वासिद्धेः ॥ तदुक्तंतर्कतांडवे ॥ तरतमत्वादेरपिअतिशयविशिष्टोपाधित्वात् ॥ नहिजातिः सापेक्षेति ॥ न्यायामृतेपि ॥ आत्मत्वस्यजातित्वेलाघवं ॥ उपाधित्वेगौरवमिति ॥ शास्त्रीयजातिव्यवहारविषयोजातिरिति जातिसामान्यलक्षणं ॥ ब्राह्मणत्वादेर्जातित्वेनव्यवहारोबृहद्भाष्यादौदृष्टः ॥ तथाहि ॥ विष्णोर्ब्राह्मणजातिस्सन्ब्रह्माजज्ञे चतुर्मुखः ॥ इतोग्रेजगतस्तस्मात्क्षत्रजातिरजायत ॥ वायुःसदाशिवोनंतोगरुडःशक्रएवच ॥ कामश्चवरुणश्चैवसोमसूर्यौ यमस्तथा ॥ एवमाद्याःक्षत्रियास्तुदेवानांब्रह्मनिर्मिताः ॥ श्रेयसीसर्वजातिभ्यःक्षत्रजातिरितिश्रुतिः ॥ नैवक्षत्रात्पराजातिर्ब्रह्मजातिंविनाक्वचित् ॥ रुद्रादन्येतथारुद्रावायोरन्येचवायवः ॥ अग्नेरन्येचवसवोवैश्याइत्येवकीर्तिताः ॥ अश्विनौ पृथिवीचैवकालामृत्यवएवच ॥ शूद्रदेवास्समुद्दिष्टादेववर्णाइतिस्मृताइति ॥ केचित्तु ॥ नित्यमेकमनेकानुगतंसामान्यमितिजातिलक्षणमाहुः ॥ तद्दूषयति ॥ प्रतिव्यक्तीति ॥ अननुगतमित्युपलक्षणं ॥ क्वचिदनित्यमपीत्यपिद्रष्टव्यं ॥ तथाचब्राह्मणत्वादिजातेर्नित्यत्वाभावादेकत्वाभावादनुगतत्वाभावाच्चत्वदुक्तंलक्षणमसंभवीतिभावः ॥ ननुजातिमात्रंनित्यमेव ॥ अनित्यत्वेप्रमाणाभावात् ॥ नचमनुष्योत्पत्तौमनुष्यत्वस्योत्पत्तिः तन्नाशेतन्नाशःप्रत्यक्षसिद्धः ॥ अन्यथाभूतलवदुपलब्धिप्रसंगइतिवाच्यं ॥ मनुष्यनाशेपिमनुष्यत्वस्यनाशाभावात् ॥ तदाकालवृत्तित्वेनप्रत्यक्षेणानुपलंभादितिचेन्न ॥ रूपादीनामप्युत्पत्ति

१६ नित्यमनित्यंचेतिसामान्यंद्विविधं ॥ प्रतिव्यक्त्यननुगतं ॥ पुनर्द्विविधं ॥ १७ जातिरुपाधिश्चेति ॥

विनाशाभावप्रसंगात् ॥ घटादिनाशेप्यविनष्टस्यैवरूपादेः कालवृत्तित्वोपपत्तेः ॥ नचरूपादेःकालवृत्तित्वेकालस्यप्रत्यक्षत्वापत्तिः ॥ महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्यप्रत्यक्षत्वप्रयोजकत्वादितिवाच्यं ॥ दैशिकसंबंधेनरूपवत्त्वस्यप्रत्यक्षत्वप्रयोजकत्वेन कालिकसंबंधस्याप्रयोजकत्वात् ॥ अन्यथात्वन्मतेपिकालस्यजगदाधारत्वेनरूपाधारत्वेप्रत्यक्षत्वप्रसंगात् ॥ मनुष्यत्वादिजात्याश्रयत्वेमनुष्यत्वादिप्रसंगाच्च ॥ नचतेजस्संयोगादिनारूपोत्पत्तेः ॥ पूर्वरूपस्यचविनाशावगमान्नरूपादिकंनित्यमितिवाच्यं ॥ विश्वामित्रस्यवरादिनाब्राह्मण्योत्पत्तेः क्षत्रियत्वस्यचविनाशावगमाद्ब्राह्मणत्वादिकमपिननित्यमित्यपिवक्तुंशक्यत्वात् ॥ सुरापानादिनाब्राह्मण्यनाशस्यपुराणादिप्रसिद्धत्वाच्च ॥ जन्मनाजायतेशूद्रःकर्मणाजायतेद्विजइत्यादिप्रमाणेनब्राह्मणत्वस्योपनयनादिसंस्कारजन्यत्वावगमाच्च ॥ तदुक्तमनुव्याख्याने ॥ कुतोभस्मत्वमाप्तस्यनरत्वंपुनरिष्यतइति ॥ नन्वथापिजातिरेकासर्वत्रांगीकार्या ॥ घटोयंघटोयमित्येकाकारप्रत्ययात् ॥ नचैकाकारप्रत्ययोव्यक्तिविषयकः ॥ व्यक्तीनामनंतत्वादिति चेन्न ॥ अयंरूप्ययंरूपीत्यनुगताकारप्रत्ययबलेनरूपगंधादीनामप्यैकैकत्वापत्तेः ॥ नचरूपवत्त्वगंधवत्त्वाद्यनुगतोपाधिबलादनुगतप्रत्ययोपपत्तिरितिवाच्यं ॥ गंधत्वेनानुगतीकृतानांगंधत्वाद्युपाधीनामनुगमसंभवादित्यादित्वदीयव्यवहारविरोधेनोपाधेरनुगतत्वास्वीकारात् ॥ नन्वनुगतधर्माभावेधूमादौव्याप्तिग्रहः गवादिपदेषुशक्तिग्रहः दंडादौकारणताग्रहः अनागतपाकादौचिकीर्षाचनस्यात् ॥ नहिपुरोवृत्तिधूमेव्याप्तिग्रहादगृहीतव्याप्तिकेनपर्वतीयधूमेनानुमितिःसंभवति ॥ नवाएकव्यक्तौशक्तिग्रहाद्व्यक्त्यंतरलाभः ॥ नापिसिद्धपाकज्ञानादनागतपाकेचिकीर्षा ॥ अतोधूमत्वादिसामान्यप्रत्यासत्त्यासर्वानुगततयासर्वधूमाद्युपसंहा

रेणव्याप्त्यादिग्रहेऽनुमानादिप्रवृत्तिरितिचेन्न ॥ अनुगतधर्मंविनापिसादृश्येनसर्वत्रव्याप्त्यादिग्रहसंभवात् ॥ अयंधूमएतत्सदृशाश्चवह्निव्याप्याइत्येवंक्रमेणव्याप्तिग्रहः ॥ एवमियंगौरेतत्सदृशाश्चगोशब्दवाच्याइत्येवशक्तिग्रहः ॥ एवंकारणताग्रहादिकमपि ॥ तदुक्तंवैशेषिकाधिकरणानुव्याख्याने ॥ इतिव्युत्पत्तिरपिहिसादृश्येनैवगम्यतइति ॥ भक्तिपादीयानुव्याख्यानेपि ॥ किंचित्सादृश्यविज्ञानादखिलस्यापिवस्तुनः ॥ शब्दशक्तिग्रहश्चस्यात्तत्तत्सादृश्यमानतः ॥ शक्तिःसादृश्यगायतइतिच ॥ नच सादृश्यस्यानुगतत्वेकिमपराद्धंसामान्येनेतिवाच्यं॥ एकनिरूपितापराधिकरणवृत्तित्वेनत्रिविक्रमन्यायेनतत्स्वीकारात्॥प्रतियोगित्वानुयोगित्वादिवत् ॥ एतेनसादृश्येनैवैकाकारप्रत्ययस्समाहितोभवति ॥ अन्यथा भिन्नाश्चभिन्नधर्माश्चपदार्थानिखिलाअपि ॥ नरत्वादिकमप्येवंतत्तद्धर्मतयेयते ॥ नसर्वधर्मएकोस्तीतिवैशेषिकाधिकरणानुव्याख्यानोदाहृतप्रमाणविरोधप्रसंगादित्यलं ॥ नित्यजातेरुदाहरणमाह ॥ जीवत्वादीति ॥१८॥ शरीरनाशेपिजीवनाशाभावेनजीवत्वस्यनित्यत्वात् ॥ आदिपदेनदेवत्वादिसंग्रहः ॥अनित्यस्योदाहरणमाह ॥ ब्राह्मणत्वेति ॥१९॥ ननुब्राह्मणत्वमनुष्यत्वादिजातीनांजीवानांमुक्तावप्यनुप्रवेशोस्ति ॥ अन्यथामुक्तौमनुष्योत्तमस्यापकर्षतारतम्यावधित्वंनस्यादितिचेदुच्यते ॥ ब्राह्मण्यादिकंद्विविधंशरीरोपाधिकंस्वाभाविकंचेति ॥ तत्रशरीरोपाधिकस्योत्पत्तिविनाशौ ॥ स्वाभाविकस्यमुक्तावप्यनुस्यूतिः ॥ तदुक्तंगीतातात्पर्ये ॥ विप्रत्वाद्यास्तत्रपुण्याःस्वाभाव्याएवमुक्तिगाइति ॥ तथा वर्णाश्रमाचाररतामनुष्याधर्ममनुंसोपिसमेतिकालइत्युत्क्रांतिपादीयानुव्याख्यानसुधा

१८ जीवत्वादियावद्वस्तुभाविनित्यं ॥ १९ ब्राह्मणत्वमनुष्यत्वाद्ययावद्वस्तुभाव्यनित्यं ॥

यां वर्णाश्रमाचाररतामनुष्याइत्यनेनमनुष्याणांमुक्तौवर्णाश्रमवत्त्वमस्तीतिसूचयतीत्युक्तं ॥ तृतीयस्कंधतात्पर्येपि ॥ पशुवृक्षादिभेदेनजीवाएवस्वतःस्थिताः ॥ संसृतौव्यत्ययस्तेषांमुक्तौतत्तत्स्वरूपता ॥ तत्रस्थावरमुक्तेभ्योवराजंगममुक्तिगाः ॥ तेभ्योमानुषमुक्ताश्चविप्रमुक्तास्ततोधिकाइति ॥ भाष्येपि ॥ मुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यवस्थितिरिति ॥ जातिन्यायमुपाधावतिदिशति ॥ **सर्वज्ञत्वप्रमेयत्वाद्युपाधिरपीति** ॥ २० ॥ सर्वज्ञत्वंपरमात्मनिनित्यं ॥ प्रमेयत्वंघटादावनित्यमित्यर्थः ॥ गोत्वादेरन्यनिरूपणाधीनानिरूपणत्वाज्जातित्वं ॥ प्रमेयत्वादेश्चप्रमाविषयादिनिरूपणाधीननिरूपणकत्वादुपाधित्वं ॥ तथाचेतरनिरूपणाधीननिरूपणकत्वमुपाधिलक्षणं ॥ अतएवोपाधिखंडनमंदारमंजर्यां प्रवाहतोनादित्वस्योपाधित्वमुक्तं ॥ नन्वस्मदादिज्ञानविषयत्वमीश्वरेस्तिनवा ॥ नेतिपक्षेतत्प्रतिपादकशास्त्रश्रवणवैयर्थ्यं ॥ आद्येअस्मदादिज्ञाननाशेतद्घटितविषयत्वस्यापिनाशप्रसंगः नचेष्टापत्तिः ॥ नित्यस्यानित्यधर्माभेदायोगात् ॥ नचपरमात्मनाभेदाभेदः ॥ मृत्योस्समृत्युमाप्नोति यइहनानेवपश्यतीतीवशब्देनभेदाभेदनिषेधात् ॥ तदुक्तंकाठकभाष्ये ॥ अतोनानेवेतीवशब्दोल्पविषयोभेदाभेदविषयश्चेति ॥ अनुव्याख्यानेपि ॥ इतिश्रुताविवेत्यस्माद्भेदाभेदनिराकृतिः ॥ इवोभयेचसादृश्यइतिवाक्शब्दनिर्णयइति ॥ बृहद्भाष्येपि ॥ नानेवेतिभेदाभेदनिराकरणार्थं ॥ विरुद्धोभयसंयोगइवशब्दःप्रयुज्यतइति ॥ अतोस्मदादिज्ञानविषयत्वरूपधर्मईश्वरेकथमितिचेन्न ॥ सर्वज्ञानविषयत्वस्येश्वरेसर्वदासत्त्वात् ॥ नचज्ञाननाशेकथंतत्सत्त्वमितिवाच्यं ॥ तस्यज्ञानोपाधिकत्वाभावात् ॥ अस्मदादिज्ञा

२० सर्वज्ञत्वप्रमेयत्वाद्युपाधिरपितद्वत् ॥

नाद्यज्यतइत्यंगीकारात् ॥ अतोनविरोधः ॥ इतिसामान्यनिरूपणं ॥ ७ ॥ ७ ॥ ७ ॥ क्रमप्राप्तंविशेषंनिरूपयति ॥ भेदा
भावेपीति ॥ २१ ॥ अत्रभेदाभावेपिभेदव्यवहारहेतुत्वंलक्षणं ॥ अनंताएवविशेषाइतिलक्ष्यनिर्देशः ॥ भेदेऽतिव्याप्तिवार
णायभेदाभावेपीतिविशेषणं ॥ ननुविशेषोनपदार्थांतरं ॥ तत्सद्भावएवमानाभावादितिचेन्न ॥ घटादिगुणिनांरूपादिगुणा
नांचपरस्परमभेदपक्षेभेदपक्षेभेदाभेदपक्षेचविशेषस्यावश्यंवाच्यत्वात् ॥ तथाहि ॥ अभेदपक्षेतावद्घटेरूपमितिभेदप्रत्ययः
रूपनाशेपिघटस्यानाशः घटशब्दस्यरूपाबोधकत्वं रूपशब्दस्यघटाबोधकत्वं नीलोघटइतिसहप्रयोगः घटरूपशब्दयोरपर्यायत्वं
घटेज्ञातेपिरूपादिसंदेहश्च ॥ एतेनुभवसिद्धाः भेदंविनाऽनुपपद्यमानास्तत्प्रतिनिधिंविशेषंकल्पयंति ॥ नचैतेप्रत्ययाभ्रमाः ॥
कदापिबाधानुपलंभात् ॥ किंचनीलघटयोरभेदोनीलघटाभ्यामभिन्नउतभिन्नोभिन्नाभिन्नोवा ॥ नाद्यः ॥ नीलघटयोरभेदइ
तिभेदव्यवहारोनस्यात् ॥ घटपदेननीलाभेदप्रत्ययादिप्रसंगाच्च ॥ नद्वितीयः ॥ तर्हिनीलघटाभेदन्यायेननीलघटयोरपिभेद
संभवेऽभेदांगीकारायोगात् ॥ अतएवनतृतीयः ॥ अतोभेदव्यवहारनिर्वाहायाभेदवादिभिर्विशेषोंगीकार्यः ॥ तदुक्तंजन्मा
धिकरणानुव्याख्याने ॥ भेदहीनेत्वपर्यायशब्दांतरनियामकः ॥ विशेषोनामकथितःसोस्तिवस्तुष्वशेषतइति ॥ एवंगुणगुणि
नोर्भेदपक्षेपिविशेषोभ्युपगंतव्यः ॥तथाहि। नीलघटयोर्भेदः किंभेदिभ्यांनीलघटाभ्यांभिन्नोऽभिन्नोभिन्नाभिन्नोवा ॥ नाद्यः ॥
तस्यापिभेदस्यभेदादिविकल्पेसतिभेदपक्षस्यैवस्वीकर्तव्यत्वेनानवस्थापत्तेः ॥ नद्वितीयः ॥ नीलघटयोरभेदःकिमभेदिभ्यांभि

२१ भेदाभावेपि भेदव्यवहारनिर्वाहका अनंताएवविशेषाः ॥

न्नोऽभिन्नोभिन्नाभिन्नोवा ॥ नाद्यः ॥ भेदपरंपरयानवस्थानात् ॥ तन्न्यायेननीलघटयोर्भेदस्यचभेदोपपत्तावभेदाभ्युपगमवै
यर्थ्यात् ॥ नद्वितीयः ॥ अभेदपरंपरापत्तेः ॥ अभेदस्याभेदिभ्यामभेदइतिभेदव्यवहारानुपपत्तेः ॥ अतएवनतृतीयः ॥ प
क्षद्वयोक्तदोषापत्तेः ॥ अतोभेदवादिभिरप्यनवस्थादिपरिहारार्थंविशेषबलान्नीलघटभेदएवस्वस्यभेदिभ्यांभेदइतिस्वीकर्तव्यं ॥
तथाचभेदपक्षेपिविशेषोंगीकर्तव्यः ॥ एवंभेदाभेदवादिभिरप्येकत्रद्वयोर्विरोधपरिहारार्थंविशेषोंगीकर्तव्यः ॥ भेदाभेदादिवि
कल्पदोषप्रसंगश्च ॥ तदुक्तमनुव्याख्याने ॥ एतादृशेविशेषेस्मिन्कोद्वेषोवादिनांभवेदिति ॥ किंचपरमात्मनिविशेषस्तावत्स्वी
कर्तव्यः ॥ तथाहि ॥ आनंदंब्रह्मणोविद्वानित्यादिश्रुत्यानंदादिधर्माभगवतिप्रसिद्धाः ॥ विज्ञानमानंदंब्रह्मेत्यानंदादेर्ब्रह्मात्म
कत्वंचोक्तं ॥ तथा ॥ यथोदकंदुर्गेवृष्टंपर्वतेषुविधावति ॥ एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥ मृत्योस्समृत्युमाप्नोतिय
इहनानेवपश्यतीतिभेदपक्षस्यभेदाभेदपक्षस्यचनिंदाकृता ॥ अतोत्यंताभेदंस्वीकृत्यभेदव्यवहारोविशेषेणसमर्थनीयः ॥ तदु
क्तमृग्भाष्ये ॥ उक्त्वाधर्मान्पृथक्त्वस्यनिषेधादेवमेवहि ॥ विशेषोज्ञायतेश्रुत्याभेदादन्यश्चसाक्षितइति ॥ अपिचघटादेस्तावज्ज
निःप्रत्यक्षसिद्धा ॥ साजनिर्नित्याऽनित्यावा ॥ नाद्यः ॥ सर्वदाघटस्यजन्मापत्तेः ॥ नद्वितीयः ॥ तर्हिजनेरपिजनिरंगीकर्त
व्या ॥ तथाचतत्राप्येवमित्यनवस्थापातात् ॥ अतोघटजनिरेवविशेषबलाज्जनेरपिजनिरितिस्वीकर्तव्या ॥ गत्यंतराभावात् ॥ त
दुक्तंबृहद्भाष्ये ॥ यथाजनेर्जनिर्नान्यातस्यावस्तुजनिर्जनिरिति ॥ सचविशेषएकस्मिन्वस्तुन्येकएवेतिननियमः ॥ किंत्वनंताइत्या
ह ॥ अनंताइति ॥ अनंताइत्यनेकत्वोपलक्षणं ॥ यस्मिन्वस्तुनियावंतस्संभाविताास्तावंतस्स्वीकर्तव्याः ॥ परमेश्वरेऽनंतावा ॥

तथैवसुधोक्तेः ॥ आश्रयमाह ॥ सर्वेति ॥ २२ ॥ ननुविशेषस्यद्रव्यमात्रनिष्ठत्वमंगीकर्तव्यं ॥ नतुसर्ववस्तुनिष्ठत्वमपि ॥ द्रव्यनिष्ठविशेषस्यैवद्रव्यगतगुणक्रियादिषुभेदव्यवहारजनकत्वसंभवात् ॥ तदुक्तं गीतातात्पर्ये ॥ अभावोयत्रभेदस्यप्रमाणावसितोभवेत् ॥ विशेषोनामतत्रैवविशेषव्यवहारवान् ॥ द्रव्यात्मनासानित्योपिविशेषात्मैवजायतइति ॥ अनुव्याख्यानेपि ॥ द्रव्यमेवततोनंतविशेषात्मतयासदा ॥ नानाव्यवहृतेर्हेतुरनंतत्वंविशेषतइति ॥ नच सोस्तिवस्तुष्वशेषतइतिसर्वपदार्थनिष्ठत्वंजन्माधिकरणानुव्याख्यायामुक्तमितिवाच्यं ॥ तत्रवस्तुपदस्यद्रव्यपरतयाजन्माधिकरणसुधायांव्याख्यातत्वात् ॥ तथाहितत्रसुधावाक्यानि ॥ अशेषद्रव्येषुसविशेषोंगीकर्तव्यः ॥ विशेषाश्चाशेषतोवस्तुषु अनंतेषुद्रव्येषुअनंताएवसंति ॥ नपुनरेकएवसर्वत्र ॥ तथा प्रतिद्रव्यमनेकत्वेविशेषाणांपरस्परं ॥ भेदेनभाव्यमित्यादीनि ॥ अतःकथंसर्वपदार्थनिष्ठत्वमितिचेदुच्यते ॥ द्रव्यनिष्ठगुणक्रियादिषुभेदव्यवहारस्यद्रव्यगतविशेषेणनिर्वाहेप्यभावेषुविचित्रव्यवहारस्यद्रव्यगतविशेषातिरिक्तविशेषेणैववक्तव्यत्वात् ॥ तथाहि ॥ अत्यंताभावादयस्तावद्भावभिन्नाअनुभवसिद्धाः ॥ तेषुप्रमेयत्वादिभावधर्माः भावभिन्नत्वादयोऽभावधर्माश्चसंति ॥ तेचाभावस्वरूपभूताः ॥ नत्वतिरिक्ताः ॥ तदुक्तमनुव्याख्याने ॥ भावाभावस्वरूपास्तुविशेषाएववस्तुनः ॥ अभिन्नाएवसंग्राह्याव्यवहारप्रसिद्धयइति ॥ तैत्तिरीयभाष्येपि ॥ प्रतियोगिताप्यभावस्याप्यस्त्यभावतयास्फुटं ॥ नह्यभावोप्यधर्मात्मानतुस्याद्भावधर्मयुक् ॥ अभावस्यास्तितानामस्यादेवाभावरूपिणी ॥ अभावतापिसैवस्यान्नतुस्याद्भावरूपिणीति ॥ त

२२ सर्वपदार्थनिष्ठाः ॥

थाचाभावेभावप्रतियोगित्वास्तित्वादीनामभावस्वरूपत्वेभेदव्यवहारनिर्वाहार्थंतत्रापिविशेषस्यस्वीकार्यत्वात् ॥ नचद्रव्यमात्र
निष्ठत्वप्रतिपादकप्रमाणविरोधइतिवाच्यं परमात्मादिद्रव्याणामेवतत्रप्रकृतत्वेनतदभिप्रायेणवा द्रव्यगतगुणादिषुद्रव्यनिष्ठ
विशेषातिरिक्तोनविशेषोंगीकर्तव्यइत्यभिप्रायेणवा सुधादौद्रव्यपदोपपत्तेरितिदिक् ॥ ननुविशेषबलादेवगुणगुण्यादीनांभेद
व्यवहारनिर्वाहेविशेषेपिविशेषत्वादिधर्माणांसत्त्वात्तत्रभेदव्यवहारनिर्वाहायविशेषांतरंकल्प्यंस्यात् ॥ तथाचानवस्थास्यादित्य
तआह ॥ स्वनिर्वाहिकाश्चेति ॥ २३ ॥ भवेदेवेयमनवस्था यदिविशेषेविशेषांतरंस्यात् ॥ नैतदस्ति ॥ किंनाम द्रव्यगतो
विशेषएवस्वस्मिन्नपिविशेषव्यवहारहेतुरित्यभ्युपगमात् ॥ तदुक्तमनुव्याख्याने ॥ विशेषास्तेप्यनंताश्चपरस्परविशेषिणः ॥ स्व
निर्वाहकतायुक्ताःसंतिवस्तुष्वशेषतइति ॥ बृहद्भाष्येपि ॥ विशेषस्यविशेषोन्योनचैवास्तिकथंचन ॥ स्वस्यापितुविशेषश्चस्वयमे
वभविष्यतीति ॥ गीतातात्पर्येपि ॥ विशेषोपिस्वरूपंसस्वनिर्वाहकएवचेति ॥ विशेषंविभजंति ॥ तइति ॥ २४॥ ईश्वरादिनि
त्यद्रव्याणांविनाशाभावेननाशकाभावात्तद्गताविशेषानित्याइतिभावः ॥ घटादीनांविनाशेनतद्गतधर्माणांविनाशेविशेषोपिन
श्यतीत्यपिध्येयं ॥ तदुक्तंगीतातात्पर्ये ॥ नित्यएवविशेषश्चकश्चिदेवंद्विधैवसः ॥ वस्तुस्वरूपमस्त्येवेत्येवमादिप्रभेदिनइति ॥ नै
यायिकास्तु ॥ नित्यद्रव्यवृत्तयोविशेषास्त्वनंताएवेत्याहुः ॥ तन्न घटाद्यनित्यद्रव्येष्वपिविशेषस्यव्यक्तत्वात् ॥ किंचगगनादिनि
त्यद्रव्येकुतोविशेषोंगीकर्तव्यः ॥ प्रयोजनाभावात् ॥ ननुगगनंतावद्विभु ॥ तस्यसकलमूर्तद्रव्यसंयोगोवक्तव्यः ॥ सचनैकदेशाव

२३ स्वनिर्वाहकाश्च ॥ २४ तेद्विविधाः ॥ नित्याअनित्याश्च ॥ नित्याईश्वरादिनित्यद्रव्यगताः ॥ घटाद्यनित्यद्रव्यगताअनित्याः ॥

च्छेदेन॥ तस्याखंडत्वेनैकदेशाभावात्॥ नापिकात्स्न्र्येनसंयोगः॥ संयोगस्यस्वात्यंताभावसमानाधिकरणत्वरूपाव्याप्यवृत्तित्वभं
गप्रसंगात्॥ नहिसर्वत्रसंयोगेतत्रसंयोगात्यंताभावस्यावकाशोस्ति॥ तदुक्तं॥ यत्रसंयोगोनतत्रतदभावइति॥ अतोगगनादिविभु
द्रव्यस्यघटादिनासंयोगतदभावोभयनिर्वाहकोविशेषोऽनन्यगत्यास्वीकरणीयः॥ किंचगगनादौसर्वव्यावृत्तिरस्ति॥ साचव्याव
र्त्तकधर्मव्याप्या॥ घटपटादौतथानुभवात्॥ गगनादावितरव्यावर्तकोनकोपि॥ नचाकाशत्वंव्यावर्तकं॥ तस्यशब्दाश्रयत्वरूपत्वे
नशब्दनाशेतन्नाशाद्व्यावृत्त्यभावप्रसंगात्॥ नचतद्गतंपरिमाणंव्यावर्तकं॥ तस्यकालदिसाधारणत्वेनाव्यावर्तकत्वात्॥ सामा
न्यगुणत्वाच्च॥ अतएवनसंयोगादयोपिव्यावर्तकाः॥ परमाणुषुयद्यपिपरमाणुत्वजातिरितरव्यावृत्तिहेतुरस्ति॥ तथापिपरमा
ण्वंतरादिसंयोगेतदभावसिध्यर्थंविशेषस्यावश्यकत्वात्॥ अनित्यद्रव्येष्वपिनविशेषस्स्वीकार्यः॥ तेषामवयववत्त्वेनप्रदेशभेदे
नसंयोगतदभावयोरुपपत्तेः॥ द्रव्यविशेषगुणक्रियादिभ्यइतरव्यावृत्तिसंभवाच्च॥ दंडिनिद्रव्येणदंडादिनाऽदंडिव्यावृत्तिः॥
गंधादिविशेषगुणेनपृथिवीत्वादिजात्याचपृथिव्यादीनामितरव्यावृत्तिः॥ पाचकादीनांतुपाचकादिक्रिययाऽपाचकादिव्यावृ
त्तिः॥ अतएवद्रव्यगुणादीनांव्यावर्तकानामभावेंतेविशेषःस्वीकृतइतितस्यांविशेषइतिसंप्रदायइतिचेदत्रोच्यते॥ गगनपर
माण्वादीनामपिसावयत्वेनसंयोगतदभावयोःसंभवात्॥ नचसावयवत्वेघटादिवदनित्यत्वापत्तिः॥ अनारंभकावयवानां
सत्त्वात्॥ अन्यथा इहपक्षीनेहपक्षीत्यादिप्रत्यययोनस्यात्॥ नचेहेतिप्रत्ययआलोकविषयकोनत्वाकाशावयवविषयकइतिवा
च्यं॥ इहालोकइहालोकाभावइतिप्रत्यययोरघटनाप्रसंगात्॥ आलोकाभावदशायामपीहेतिप्रत्ययसत्त्वाच्च॥ अंधस्या
पीहेतिप्रत्ययसंभवाच्च॥ तस्मादाकाशादीनांसावयवत्वंस्वीकृत्य प्रदेशभेदेनसंयोगतदभावावंगीकर्तव्यौ॥ तदुक्तमनुव्या
ख्याने॥ नचानवयवंवस्तुक्वचित्स्यान्मानगोचरमिति॥ छांदोग्यभाष्येपि॥ आकाशाअप्यतस्त्वेतेह्यनंताअप्कणादिवदि
ति॥ नचपरमाणोरवयववत्त्वेपरमाणुत्वभंगप्रसंगइतिवाच्यं॥ अन्यापेक्षयापरमाणुत्वेपिस्वावयवापेक्षयामहत्त्वोपपत्तेः॥
तदुक्तमनुव्याख्याने॥ अणुत्वंचमहत्त्वंचयतोवस्तुव्यपेक्षया॥ तारतम्यस्थितायस्मात्पदार्थास्सर्वएवचेति॥ किंचपरमाणोरव
यवानंगीकारेतस्यदशदिक्ष्वभिसंबंधोनस्यात्॥ अतोवयवोंगीकार्यः॥ तदुक्तमनुव्याख्याने॥ अतःसर्वपदार्थानांभागास्स्युं
त्येवसर्वदा॥ सर्वदिक्ष्वभिसंबंधादविभागःपराणुतेति॥ अतोनसंयोगतदभावान्यथानुपपत्त्याविशेषसिद्धिः॥ नापिव्यावृ
त्त्यन्यथानुपपत्त्याविशेषसिद्धिः॥ गगनेगगनत्वेनैवेतरव्यावृत्त्युपपत्तेः॥ नचतस्योपाधित्वेनशब्दाश्रयत्वादिरूपत्वादनित्यत्व
मितिवाच्यं॥ तस्यजातित्वेनोपाधित्वाभावात्॥ नचव्यक्त्यभेदान्नगगनत्वंजातिरितिवाच्यं॥ अननुगतधर्मस्यैवजातित्वेन
व्यक्तिबाहुल्यस्याप्रयोजकत्वात्॥ अस्तुवाऽखंडोपाधित्वमभावत्ववन्नित्यत्वंच॥ जातिरेवव्यावर्तिकेतिव्यासेरभावत्वेभग्न
त्वात्॥ त्वयैवद्रव्यगुणादीनांव्यावर्त्तकत्वोक्तेश्च॥ परमाणौतुनव्यावृत्त्यन्यथानुपपत्त्याविशेषसिद्धिरितित्वयैवोक्तमितिनता
र्किकमतेऽन्त्यविशेषसिद्धिरिति॥ इतिविशेषनिरूपणं॥ ५॥ ५॥ ननुसमवायोनामपदार्थांतरमस्ति॥ तत्कथंदशैवेतिपदार्थ
विभागइत्यतआह॥ **समवायस्त्विति**॥ २५॥ तुशब्दोप्रामाणिकत्वप्रमाणविरुद्धत्वरूपविशेषद्योतकः॥ ननुकथंसमवाये

२५ समवायस्तुस्वरूपतएवनास्ति॥

प्रमाणाभावः ॥ इहतंतुषुपटसमवायइतिप्रत्यक्षस्यैवप्रमाणत्वादितिचेन्न ॥ तादृशप्रतीतेरेवासिद्धेः ॥ अथेहतंतुषुपटइतिप्रत्य
यः संबंधपूर्वकः इहप्रत्ययत्वात् इहकुंडेबदराणीतिप्रत्ययवत् ॥ शुक्लःपटइतिविशिष्टज्ञानं विशेषणविशेष्यसंबंधविषयकं
विशिष्टज्ञानत्वात् दंडीदेवदत्तइतिज्ञानवदित्याभ्यामनुमानाभ्यांसंबंधःसिद्ध्यन्संयोगबाधेसमवायमादायैवसिद्ध्यति ॥ नहि
तंतुपटयोःशुक्लपटयोःसंयोगोवक्तुंशक्यः ॥ कुंडबदरवद्विविक्ततयानुपलंभादितिचेन्न ॥ इहतंतुषुपटसमवायइतिप्रत्ययस्यत्व
यास्वीकृतत्वेनतंतुपटसमवाययोरपिसमवायापत्तेः ॥ इहभूतलेघटाभावइतिप्रत्ययसंभवेनभूतलघटाभावयोरपिसमवायापत्ते
श्च ॥ नचाभावसमवाययोर्विशेषणविशेष्यभावसंबंधेनविशिष्टप्रत्ययनिर्वाहइतिवाच्यं ॥ तस्यत्वयासंबंधत्वेनानंगीकारात् ॥
अंगीकारेवातंतुपटयोःशुक्लपटयोरपिविशेषणविशेष्यभावसंबंधसंभवेनसमवायासिद्धिप्रसंगात् ॥ नचसमवायेसमवायांगीकारे
तत्रापिसमवायांतरापत्त्यानवस्थाप्रसंगोबाधकइतिवाच्यं ॥तर्हिसंबंधंविनापिसमवायविशिष्टप्रत्ययवत्तंतुपटयोरपिसंबंधंविनावि
शिष्टप्रत्ययोपपत्तेः ॥ अभावेसमवायांगीकारेबाधकाभावाच्च ॥ नचाभावेसमवायांगीकारेघटध्वंसस्यापिकपालेनसमवायस्यव
क्तव्यत्वेनसमवायिनाशेस्वसमवेतकार्यनाशस्यघटनाशजन्यतद्रूपनाशस्थलेदृष्टत्वेनकपालनाशेघटध्वंसस्यापिनाशेनघटोन्मज्ज
नप्रसंगोबाधकइतिवाच्यं ॥ समवायिकारणनाशस्यैवस्वसमवेतकार्यनाशप्रयोजकत्वसंभवेनकपालस्यघटध्वंसंप्रतिसमवायि
कारणत्वाभावेनतन्नाशस्यतन्नाशाप्रयोजकत्वात् ॥ समवायिनाशस्यस्वसमवेतभावकार्यनाशप्रयोजकत्वाद्वानदोषः ॥ नचपक्ष
द्वयेपिविशेषणप्रक्षेपेगौरवं ॥ अभावविशिष्टप्रत्ययान्यथानुपपत्त्यासमवायस्यकल्प्यत्वेनफलमुखप्रामाणिकगौरवस्यादोषत्वात्॥

नचेष्टापत्तिरितिवाच्यं ॥ अपसिद्धांतात् ॥ नन्वयंपटएतत्तंतुसंबद्धः ॥ एतदाश्रितत्वात् एतत्तंतुसंबद्धतृणादिवदित्यनुमानेन समवायसिद्धिरितिचेन्न ॥ पटस्यतंत्वभिन्नत्वेनतदाश्रितत्वाभावात् ॥ तदुक्तंगीतातात्पर्ये ॥ तंतुभ्योन्यःपटःसाक्षात्कस्यदृष्टिपथंगतइति ॥ किंचाभावोभूतलसंबद्धः एतदाश्रितत्वात् कुंडबदरवदित्यनुमानेनाभावेपिसमवायसिद्धिःस्यादित्यलं ॥ अधिकंतुसुधायांद्रष्टव्यं ॥ सूत्रकारेणापिसमवायाभ्युपगमाच्चसाम्यादनवस्थितेरितिसमवायोनिराकृतः ॥ इतिसमवायप्रकरणं ॥ ॥ क्रमप्राप्तंविशिष्टंनिरूपयति ॥ **विशेषणेति** ॥ २६ ॥ विभजति ॥ **तद्विविधमिति** ॥ २७ ॥ आद्यमाह ॥ सार्वज्ञादीति सर्वज्ञत्वादेरनागंतुकत्वेनतदभावेतदभावस्याभावात्तद्विशिष्टस्यनित्यत्वमितिभावः ॥ द्वितीयमाह ॥ दंडादीति ॥ २८ ॥ दंडादेरागंतुकत्वेनतदभावेदंडिनोविशिष्टस्यविनाशइतिभावः ॥ ननुविशिष्टंनपदार्थांतरं ॥ दंडीत्यादौविशेषणविशेष्यतत्संबंधातिरिक्तस्याभावात् ॥ किंच ॥ तस्योत्पत्त्यादिमत्त्वेउपादानकारणंवाच्यं ॥ निरुपादानकसृष्टेरभावात् ॥ उपादानंचकिंदंडपुरुषाभ्यामन्यत्किंवादंडपुरुषावेव ॥ नाद्यः ॥ अनुपलंभात् ॥ द्वितीयेपि दंडमात्रंवा पुरुषमात्रंवा उभयंवा नाद्यद्वितीयौ ॥ एकैकमात्रस्यद्रव्योपादानत्वासंभवात् ॥ पटादौबहूनामेवतंतूनामुपादानत्वदर्शनात् ॥ नतृतीयः ॥ मिलितयोरुपादानत्वेतदारब्धद्रव्येदंडत्वपुरुषत्वयोःसमावेशापत्त्याजातिसांकर्यस्यात् ॥ किंच ॥ रूपीघटइत्यत्ररूपविशिष्टद्रव्यस्यरूपघटोभयारब्धत्व

---

२६ विशेषणसंबंधेनविशेष्यस्ययआकारस्तद्विशिष्टं ॥ २७ तद्विविधं ॥ नित्यमनित्यंच ॥ नित्यंसार्वज्ञादिविशिष्टंपरब्रह्मादि ॥ २८ द्वितीयंदंडादिविशेषणसंबंधेनपरिणतंदंड्यादि ॥

मंगीकर्तव्यं ॥ नचतद्युक्तं ॥ गुणस्यद्रव्यारंभकत्वादर्शनात् ॥ द्रव्यत्वगुणत्वयोर्जातिसांकर्यापत्तेश्च ॥ दंडपुरुषयोःप्रत्येकमुपादानत्वेविशिष्टद्वयापत्तिः ॥ तथाचमूर्तद्वयस्याल्पप्रदेशेऽवस्थानापत्तिः ॥ अपिचविशेष्येणवाविशेषणेनवाऽऽरब्धंद्रव्यंचेतनोचेतनोवा ॥ नाद्यः ॥ अचेतनस्यचेतनंप्रत्युपादानत्वानुपपत्तेः ॥ नद्वितीयः ॥ अहंदंडीतिज्ञानाभावप्रसंगादित्यादिदोषाःप्रसरंतीतिचेदुच्यते ॥ विशिष्टंविशेषणविशेष्यतत्संबंधातिरिक्तमवश्यमंगीकर्तव्यं ॥ दंडीतिविशिष्टव्यवहारस्यविशिष्टज्ञानसाध्यत्वात् ॥ विशिष्टज्ञानविषयस्यैवविशिष्टत्वात् ॥ नचदंडपुरुषतत्संबंधज्ञानादेवविशिष्टव्यवहारइतिवाच्यं ॥ दंडपुरुषतत्संबंधाइतिसमूहालंबनज्ञानाद्दंडीतिव्यवहारापत्तेः ॥ समूहालंबनाद्विशिष्टज्ञानस्य समूहालंबनजन्यव्यवहाराद्विशिष्टज्ञानजन्यव्यवहारस्यभेदाभावप्रसंगात् ॥ किंच ॥ एकोदंडीत्येकत्वोल्लेखिप्रत्ययोनस्यात् ॥ दंडपुरुषतत्संबंधानांबहुत्वात् ॥ नचपुरुषगतमेकत्वंभासतइतिवाच्यं ॥ दंडपुरुषतत्संबंधानांत्रयाणांप्रतीतिविषयत्वेपुरुषगतैकत्वमात्रभानेमानाभावात् ॥ एकःपुरुषइतिप्रतीत्यापत्तेश्च ॥ नचपुरुषगतमेकत्वंदंडिनिभासतइतिवाच्यं ॥ दंडिनएवाभावेतत्रान्यगतैकत्वभानायोगात् ॥ किंच ॥ प्रतियोगिभेदेनात्यंताभावभेदःस्वीकृतः ॥ तथाचदंड्यभावप्रतियोगीनपुरुषोनवादंडः ॥ तयोर्दंडपुरुषाभावप्रतियोगित्वात् ॥ अतोविशि
ष्टाभावप्रतियोगित्वेनविशिष्टमन्यदंगीकर्तव्यं ॥ यच्चोक्तमुपादानाभावादित्यादि ॥ तत्तुच्छं ॥ विशेष्यसन्निधानेनविशेषणस्यै ॥ ११ ॥
वविशिष्टोपादानत्वात् ॥ विशेष्यसन्निधानंचनिमित्तकारणं ॥ नचैकस्यारंभकत्वानुपपत्तिः ॥ एकेनैवदीर्घतंतुनापटारंभदर्शनात् ॥ एकस्यद्रव्यस्यघटादेरूपादिगुणोपादानत्ववद्द्रव्योपादानत्वसंभवाच्च ॥ नचैकस्यैवोपादानत्वेउपादानद्वयसंयोगाभावेनासम

वायिकारणाभावइतिवाच्यं ॥ सर्वमपिकार्यमसमवायिकारणजन्यमितिनियमाभावात् ॥ सर्गाद्यकालीनपरमाणुक्रियायांव्यभिचारात् ॥ अस्तुवातन्नियमः ॥ विशेषणविशेष्यसंबंधस्यैवासमवायिकारणत्वात् ॥ नचरूपविशिष्टद्रव्येरूपस्यगुणत्वादारंभकत्वानुपपत्तिः ॥ सत्तासाक्षाद्व्याप्यजातिमत्त्वेनद्रव्यवद्गुणस्याप्यारंभकत्वसंभवात् ॥ अथवा ॥ विशेषणसन्निधानेनविशेष्यमेवविशिष्टोपादानमस्तु ॥ बाधकाभावात् ॥ यद्वा ॥ विशेषणविशेष्ययोरुभयोरपिप्रत्येकंविशिष्टोपादानत्वमस्तु ॥ नचविशिष्टद्वयापत्तिः ॥ इष्टापत्तेः ॥ नचदंडकुंडलादिनानाविशेषणस्थलेनानाविशिष्टापत्त्यामूर्तानामल्पप्रदेशेऽवस्थानानुपपत्तिर्विशिष्टानिसंतीतिप्रतीत्यापत्तिश्चेतिवाच्यं ॥ विशिष्टानांपरस्परमभिन्नत्वेनाल्पप्रदेशेवस्थानस्य विशिष्टेबहुत्वप्रत्ययाभावस्यचोपपत्तेः ॥ किंच ॥ ईश्वराचिंत्यशक्त्यामूर्तानामपिबहूनामल्पप्रदेशेसत्त्वोपपत्तेः ॥ पांडवैरानीतबहुयोजनसुवर्णरत्नपर्वतानामिंद्रप्रस्थेल्पप्रदेशेऽवस्थानवत् प्राग्ज्योतिषनगरात्समाहृतबहुद्रव्याणांद्वारकायामल्पप्रदेशेवस्थानवत् परमाणुप्रदेशेनंतप्राणिराशिवच्च ॥ तदुक्तंनिर्णये ॥ सुवर्णरत्नगिरयश्चतुर्भिस्तैस्समार्जिताः ॥ चत्वारोयोजनानांहिदशत्रिंशच्छतंतथा ॥ चतुःशतंचक्रमशउच्छ्रयाद्गिरयोर्जिताः ॥ प्रतीच्याद्यपसव्येनक्रमादेभ्यःसमार्जिताः ॥ विश्वकर्मकृतत्वात्तुपरस्याल्पेपिचस्थले ॥ अंतर्गतास्तेगिरयस्तदद्भुतमिवाभवदिति ॥ तथा ॥ चतुर्दंतान्षट्सहस्रान्करींद्रान्पयोब्धिजान्प्राहिणोद्द्वारवत्यै ॥ नराधिपान्देवगंधर्वनागान्जित्वानीतंहेमरत्नोच्चराशिं ॥ शतद्वयंयोजनानांसमृद्धंसमंततःप्राहिणोत्स्वांपुरींसइति ॥ तथाविष्णुतत्वनिर्णयेपि ॥ परमाणुप्रदेशेपिह्यनंताःप्राणिराशयः ॥ सूक्ष्मत्वादीशशक्त्यैवस्थूलाअपिचसंस्थिताः ॥ सहस्रयोजनसभांप्रभावाद्विश्व

कर्मणः ॥ अनंताराशयोनंताःप्रजानामधिसंस्थिताइति ॥ यद्वा ॥ विशेषणविशेष्येमिलित्वैकविशिष्टोपादानेभवतः ॥ नचैवं जातिसांकर्यप्रसंगः ॥ द्रव्यत्वगुणत्वयोःपरस्परप्रतिबंधेनपरस्परानुस्यूतेरभावात् ॥ अतएवरूपादिविशिष्टस्थलेपिनजातिसांकर्यं ॥ विशिष्टस्यद्रव्यगुणाभ्यामन्यत्वात् ॥ अतएवविशिष्टंपदार्थांतरमितिसिद्धांतः ॥ एतेनदंडादिविशिष्टस्यद्रव्यत्वाद्गुणत्वादिविशिष्टस्यगुणादित्वान्नविशिष्टंपदार्थांतरमितिपरास्तं ॥ गुणादिविशिष्टस्यद्रव्यगुणाभ्यामतिरिक्तत्वात् ॥ यच्चोक्तं दंडादिनापरिणतोदंडीचेतनोवाचेतनोवेत्यादि ॥ तदप्ययुक्तं ॥ अचेतनत्वांगीकारात् ॥ दंडादिसंबंधेनाचेतनस्यैवशरीरस्य विशिष्टोपादानत्वात् ॥ केवलशरीरेपुरुषप्रवेशवद्विशिष्टशरीरेचेतनप्रवेशसंभवात् ॥ अहंदंडीत्यादिप्रत्ययस्तुस्थूलोहंकृशोहंमनुष्योहमित्यादिप्रत्ययवदुपपन्नः ॥ एतत्सर्वमुपाधिखंडनमंदारमंजर्यांसम्यगुपपादितं ॥ सुधायामपि ॥ विशिष्टाकारो नविशेषणं॥नापिसंबंधः॥किन्नामविशेष्यं॥नचतन्मात्रं॥द्विविधोहिविशिष्टाकारः॥यावद्विशेष्यभाव्ययावद्विशेष्यभावीच॥ तत्राद्योविशेष्येणात्यंताभिन्नः ॥ यथेश्वरस्स्वरूपेणसर्वज्ञः ॥ एवंयत्रयत्रविशेषणसंबंधोयावद्द्रव्यभावीतत्रतत्रविशिष्टाकारोपितथाभूतोविशेष्येणात्यंताभिन्नोद्रष्टव्यः ॥ यथाहिसंयोगसचिवास्तंतवःपटाकारेणपरिणमंतेतथाऽऽगंतुकविशेषणसंबंधाद्विशेष्यस्वरूपंविशिष्टाकारेणपरिणमतइति ॥ तथातत्वनिर्णयटीकायामपि ॥ नदंडादिनादेवदत्तस्यभेदःक्रियते ॥ किंतुदंडादि विशेषणसंबंधेनदेवदत्तोविशिष्टरूपंद्रव्यांतरंउत्पादयतीति ॥ तथोपाधिखंडनटीकायामपि ॥ दंडकुंडलसंबंधाद्विशिष्टद्वयस्यैवोत्पत्तेरिति ॥ तथातत्वविवेके॥ विशिष्टशुद्धयोश्चैवेति॥ तट्टीकायामपि॥ विशिष्टस्यविशेष्यस्वरूपस्यचभेदाभेदौ॥ अभेद

श्चेतिज्ञातव्यं ॥ पर्वतस्याग्निमतश्चभेदाभेदौ ॥ पर्वतसद्भावेप्यग्निमतोऽभावात् ॥ विष्णोस्सर्वज्ञस्यचात्यंताभेदएव ॥ एवकारे णविशिष्टस्यैवानभ्युपगमं सर्वत्रभेदाभ्युपगमंचव्यावर्तयतीति ॥ नन्वीश्वरस्यचक्रादिसंबंधेचक्रीत्यादिव्यवहारःकथं ॥ चक्रा दिनामागंतुकत्वेनतत्संबंधाद्विशिष्टोत्पत्तेरभावात् ॥ एवंमुक्तानामपीतिचेन्न ॥ चक्रादिविशेषणानामेवविशेष्यसंन्निधानेनाचिं त्यशक्त्याविशिष्टात्मनापरिणामेनविशेष्यस्यशुद्धत्वांगीकारात् ॥ यद्वा ॥ परमात्मनःसर्वाधारत्वंस्वरूपं ॥ अतश्चक्राद्याधार त्वमपिस्वरूपमेव ॥ परंत्वागंतुकचक्रादिसन्निधानेनाभिव्यज्यते ॥ यथा ॥ सर्वदाविद्यमानंजगदाधारत्वंजगत्सर्जनेनाभिव्यज्यत इत्यलं ॥ इतिविशिष्टप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ क्रमप्राप्तमंशिनंनिरूपयति ॥ अंशीत्विति ॥ २९ ॥ तुशब्दस्त्वनंगीकार वादिनंनिराचष्टे ॥ ननुतंतुव्यतिरेकेणपटस्यांशाःनसंतीतिचेन्न ॥ हस्तवितस्त्यादिपरिमितानामेवावयवानांप्रत्यक्षसिद्धत्वेना पलापायोगात् । नचतएवपटस्योपादानं नतंतवइतिवाच्यं ॥ अनुभवविरोधात् ॥ तंत्वन्वयव्यतिरेकानुविधानाच्च ॥ नचतं तूनांपटावयवहेतुत्वं तेषांपटहेतुत्वमस्त्वितिवाच्यं ॥ यावदवयवोत्पत्त्यनंतरंपटोत्पत्तेरदर्शनात् ॥ अन्यथापटस्यकंथात्वापत्तेः ॥ नचतंतूनांपटोपादानत्वेअवयवानांनिरुपादानत्वप्रसंगइतिवाच्यं ॥ अंशविशिष्टपटस्यैवतंतुजन्यत्वांगीकारात् ॥ नचैवंतंतुषुप टतदवयवयोरुभयोरपिसत्त्वापत्तिः ॥ तंतुजन्यत्वाविशेषादितिवाच्यं ॥ इष्टापत्तेः ॥ मूर्तानामेकत्रसत्त्वस्योभयोरभेदेनविशि ष्टप्रकरणएवोपपादितत्वादवयवैरभिन्नस्यपटस्यतंतुवृत्तित्वेबाधकाभावात् ॥ तदुक्तंतत्वविवेके ॥ तथैवांशांशिनोरपीति ॥ तद्वी

२९ अंशीतुहस्तवितस्त्याद्यतिरिक्तः पटादिर्गगनादिश्चानुभवसिद्धः ॥

काच ॥ एवकारः कारणातिरिक्तांशाभावात्किमस्यपृथग्ग्रहणेनेत्यस्यापाकरणार्थः ॥ प्रत्यक्षतएवपटाद्यंशिनांतंत्वादिव्यतिरि
क्तांशप्रतीतेरिति ॥ तत्वनिर्णयटीकायामपि ॥ उपादानव्यतिरिक्तोप्येकदेशोस्मन्मतेंगीक्रियते ॥ पटस्योपादानंतंतवस्तद्व्यति
रिक्ताहस्तवितस्त्यादिपरिमिताएकदेशाइति ॥ सुधायामपि ॥ तंतवएवव्यतिषंगविशेषविशिष्टाःपटात्मनापरिणमंतइति ॥
आकाशादौत्वनारंभकांशास्संति ॥ अतोंऽश्याकाशः ॥ अन्यथाऽऽकाशेविहगशरीरतदभावयोस्सत्वाभावप्रसंगात् ॥ तदुक्तंत
त्वविवेकटीकायां ॥ तथाहितद्वाक्यानि ॥ आकाशस्यांशास्संतीत्यंगीकार्यं ॥ अन्यथाऽऽकाशेविहगशरीरतदभावौनस्यातां ॥
नचाकाशस्योपादानमस्ति ॥ तस्मात्कार्यकारणव्यतिरिक्तावंशांशिनावंगीकार्याविति ॥ भाष्येपि यथाकाशस्त्वनंतोपिव्यामोह
स्तावधिस्तथा ॥ प्रादेशोपिहिसत्येनतथैतेषांमतानित्विति ॥ तथाचाकाशादिर्नित्यांशी पटादिरनित्यांशीत्यंशिविभागस्य
स्फुटत्वान्नोक्तः ॥ अत्रयद्यपिपटाद्यंशिनोद्रव्यत्वान्नांशिनःपृथक्पदार्थत्वेनपरिगणनंयुक्तं ॥ तथापिज्ञानानंदबलक्रियाश
क्त्यादीनांसांशत्वात्तदपेक्षयापृथग्ग्रहणंयुक्तं ॥ अंशातिरिक्तोंशीनास्तीतिमतनिरासायवापृथग्ग्रहणं ॥ इत्यंशिप्रकरणं ॥
॥ ७ ॥ ७ ॥ ७ ॥ क्रमप्राप्तांशक्तिंविभजति ॥ **शक्तिरिति** ॥ ३० ॥ अचिंत्यक्तेराश्रयमाह ॥ **तत्राचिंत्यशक्तिरिति** ॥
॥ ३१ ॥ अघटितघटनापटीयस्यचिंत्यशक्तिः ॥ सापरमात्मनिलक्ष्मीब्रह्माद्यपेक्षयानिरवधिकेत्यर्थः ॥ नचपरमात्मन्यचिंत्य ॥ १३ ॥
शक्त्याघटनीयकार्याभावइतिवाच्यं ॥ आसीनस्यैवदूरगमनं युगपदेवाणुत्वमहत्त्वे बहुदामसंचयाबाह्यस्यैकवत्सपाशबंधनमि

---

३० शक्तिश्चतुर्विधा ॥ अचिंत्यशक्तिराधयेशक्तिस्सहजशक्तिःपदशक्तिश्चेति ॥ ३१ ॥ तत्राचिंत्यशक्तिःपरमेश्वरेसंपूर्णा ॥

त्यादीनां विरुद्धधर्माणांप्रमाणप्रमितत्वात् ॥ तथाहि ॥ आसीनोदूरंव्रजतिशयानोयातिसर्वतः ॥ दूराद्दूरतरंयच्चुतदेवांतिकमं
तिकात् ॥ अणोरणीयान्महतोमहीयानितिकाठकोपनिषत् ॥ नचक्रमेणोभयोस्संभवः ॥ तस्यसर्वपुरुषसाधारणत्वेनपरमात्म
निमाहात्म्यापादकत्वाभावात् ॥ आसीनोदूरंव्रजतीतिलटोभयोरेककालीनत्वावगतेः ॥ अतोचिंत्यशक्त्यैवैतद्घटनीयं ॥ तदु
क्तंकाठकभाष्ये ॥ ऐश्वर्यादेवासीनोदूरंव्रजतीत्यादि ॥ आसीनोदूरंव्रजतिशयानोयातिसर्वतः ॥ ऐश्वर्याद्भगवान्विष्णुर्विरुद्धंघ
टयत्यसाविति॥ निर्णयेपि॥मात्रोपालब्धईशोमुखविवृतिमकरोर्नांबमृद्भक्षिताहंपश्येत्यास्यांतरेतुप्रकृतिविकृतियुक्साजगत्पर्यप
श्यत् ॥ इत्थंदेवोप्यचिंत्यामपरदुरधिगांशक्तिमुच्चांप्रदर्श्यप्रायोज्ञातात्मतत्वांपुनरपिभगवानावृणोदात्मशक्तिमिति ॥ तथा। सम
स्तदामसंचयःसुसंधितोप्यपूर्णतां ॥ ययावनंतविग्रहेशिशुत्वसंप्रदर्शके ॥ अबंधयोग्यतांप्रभुःप्रदर्श्यलीलयापुनः ॥ सएकवत्स
पाशकांतरंगतोखिलंभरइति ॥ तथा चक्रेसार्धमुहूर्तेनसमागम्यपुनर्मखमितिसार्धमुहूर्तेनपंचविंशत्कोटिदूरस्थानंतासनंगत्वावि
प्रसुतानादायपुनरागमनमुक्तंनिर्णये ॥ इत्याद्यनंतमाहात्म्यमीश्वरेऽचिंत्यशक्त्यातत्रतत्रोक्तान्यनुसंधेयानि ॥ आत्मनिचैवं
विचित्राश्चहि ॥ विचित्रशक्तिःपुरुषःपुराणः ॥ गुणाःश्रुतास्सुविरुद्धाश्चदेवे ॥ विज्ञानशक्तिरहमासमनंतशक्तेरित्यादिसूत्रश्रु
तिस्मृतयःशतशस्संति ॥ रमाब्रह्मादावप्यचिंत्यशक्तिमाह ॥ अन्यत्रयथायोग्येति ॥ ३२ ॥ परमात्मशक्त्यपेक्षयानंतांश
न्यूनालक्ष्मीशक्तिः ॥ तच्छक्त्यपेक्षयाकोटिगुणन्यूनाब्रह्मवायुशक्तिरित्यादितारतम्यानुसारेणज्ञेयेत्यर्थः ॥ तदुक्तंगीताभाष्ये ॥

---

३२ अन्यत्रयथायोग्या ॥

सत्यंसत्यंपुनःसत्यंशपथैश्चापिकोटिभिः ॥ विष्णुमाहात्म्यलेशस्यविभक्तस्यचकोटिधा ॥ पुनश्चानंतधातस्यपुनश्चापिह्यनंतधा ॥
नैकांशसममाहात्म्याःश्रीशेषब्रह्मशंकराइति ॥ अनुव्याख्यानेपि ॥ सर्वेल्पशक्तयश्चैवपूर्णशक्तिःपरोहरिरिति ॥ भाष्येपि ॥
नाहंनचशिवोन्येचतच्छक्त्येकांशभागिनः ॥ बालःक्रीडनकैर्यद्वत्क्रीडतेस्माभिरच्युतइति ॥ देवऋष्यादीनामप्येवंशक्तयोज्ञात
व्याः ॥ तदुक्तंभाष्ये ॥ पृथिव्याद्यभिमानिन्योदेवताःप्रथितौजसः ॥ अचिंत्याःशक्तयस्तासांदृश्यंतेमुनिभिश्चताः ॥ ताश्चस
र्वगतानित्यंवासुदेवैकसंश्रयाइति ॥ अगस्त्यादीनांसमुद्रपानादिसामर्थ्यंपुराणादौप्रसिद्धं ॥ नन्वीश्वरादौबलातिरिक्तशक्तिस
द्भावेमानाभावइतिचेन्न ॥ परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेतिबलस्यपृथगुक्तेः ॥ नन्वेवमपिविरुद्धका
र्यस्याचिंत्यशक्त्यैवोपपत्तौविशेषांगीकारोव्यर्थः ॥ विशेषेणैवसर्वनिर्वाहोपपत्तौशक्तेर्वावैयर्थ्यमितिचेन्न ॥ भेदहीनेत्वपर्यायश
ब्दांतरनियामकइत्यादिप्रमाणेनविशेषस्यभेदप्रतिनिधित्वेनैवधर्मिग्राहकप्रमाणसिद्धत्वात् ॥ अचिंत्यशक्तेश्चाघटितघटनारूप
त्वेनैवप्रमाणसिद्धत्वात् ॥ उभयोःप्रमाणसिद्धत्वेनान्यतरेणान्यतरापलापासंभवात् ॥ अस्तुवोभाभ्यामप्युभयव्यवहारः ॥
यदुक्तंगीतातात्पर्ये ॥ एकंरूपंहरेर्नित्यमचिंत्यैश्वर्ययोगतः ॥ बहुसंख्यागोचरंचविशेषादेवकेवलमिति ॥ अन्यथाचक्षुरादिपर
मात्मेंद्रियाणांसर्वेषांरूपरसादिसर्वग्राहकत्वस्यवक्ष्यमाणत्वेनतत्रैकैकमात्रेंद्रियस्वीकारापत्त्याऽनेकेंद्रियवैयर्थ्यप्रसंगादितिदिक्॥
जडेप्यचिंत्यशक्तिःप्रमाणसिद्धा ॥ यदिदंचक्षुषिसर्पिर्वोदकंवासिंचतिवर्त्मनीएवगच्छतीत्यादिस्थानशक्तिरितिभाष्योक्तेः ॥
सूर्यादिप्रतिबिंबेनसूर्यकांतादेरग्निजनकत्वंस्थानशक्त्याबिंबशक्त्याचभवतीतितत्वप्रकाशिकोक्तेः ॥ श्यमंतकमाणिक्यस्यबहुभा

रसुवर्णप्रापकत्वशक्तेर्भारतादौप्रतिपादनात् ॥ अक्षयपात्रमृतसंजीविनीचिंतामणिकालकूटविषादीनांमहासामर्थ्यस्यनिर्णया दौप्रतिपादनात् ॥ अयस्कांतस्यायोभ्रामकत्वदर्शनाच्च ॥ नचतत्रतत्रजडेष्वभिमानिदेवतादिसामर्थ्यादेतद्भवति ॥ नतुश क्त्या ॥ औषधादिस्थितादेवाअज्ञेदृष्टफलप्रदाइतिच्छांदोग्यभाष्योक्तेरितिवाच्यं ॥ स्थानशक्तेरप्यावश्यकत्वात् ॥ अन्यथा तथाश्मानस्तृणकाष्ठाश्चसर्वेदिष्टक्षयेस्वांप्रकृतिंभजंतइत्यैतरेयभाष्योक्तेर्लोष्टकाष्ठादीनामपिदेवताद्यभिमन्यमानत्वेनतैरपिमहा कार्यप्रसंगात् ॥ पर्वतास्सिकताश्चैवनद्यःकूपास्सरांसिच ॥ हविःकपालायूपाद्यादेवताएवसर्वशइतिबृहद्भाष्योक्तेः ॥ नादेवं किंचिदिष्यतइतिच्छांदोग्यभाष्योक्तेश्च ॥ तस्मादचिंत्यशक्तिसिद्धिः ॥ सहजशक्तिंनिरूपयति ॥ **कार्यमात्रेति** ॥३३॥ दंडा दिषुघटादिकार्यानुकूलातींद्रियाशक्तिरंगीकर्तव्येत्यर्थः ॥ ननुतत्तत्कार्यप्रतितत्तत्कारणानांकारणत्वंतावत्सिद्धं ॥ तथाचतदति रिक्तशक्तिसद्भावेमानाभावइतिचेन्न ॥ स्फोटादिकार्यजननशक्तिमानपिदहनोदेहसंयोगादिसहकारिविरहान्नतज्जनयतीतिव्य पदेशस्यदुरपह्नवत्वात् ॥ तत्रशक्तिशब्देननवह्निस्वरूपमुच्यते ॥ मतुपोवैयर्थ्यात् ॥ नापिवह्नित्वं ॥ तत्किंप्रत्यक्षमप्रत्यक्षंवा ॥ नाद्यः ॥ दहनदर्शनेस्फोटजननशक्तिजिज्ञासानस्यात् ॥ नद्वितीयः ॥ अपसिद्धांतात् ॥ योग्यवृत्तिजातेःप्रत्यक्षत्वात् ॥ ना पिकारणत्वं ॥ तस्यकारणस्वरूपत्वेनातिरिक्तत्वाभावात् ॥ स्वरूपस्यान्वयव्यतिरेकगम्यत्वाभावाच्च ॥ यदिकारणत्वंकारण स्वरूपातिरिक्तमन्वयव्यतिरेकगम्यमतींद्रियमंगीक्रियते तर्हिसिद्धंनःसमीहितं ॥ तस्यैवशक्तिपदार्थत्वात् ॥ किंचबीजादेर्भर्ज

---

३३ कार्यमात्रानुकूलास्वभावरूपासहजशक्तिः ॥

रसुवर्णप्रापकत्वशक्तेर्भारतादौप्रतिपादनात् ॥ अक्षयपात्रमृतसंजीविनीचिंतामणिकालकूटविषादीनांमहासामर्थ्यस्यनिर्णया दौप्रतिपादनात् ॥ अयस्कांतस्यायोभ्रामकत्वदर्शनाच्च ॥ नचतत्रतत्रजडेष्वभिमानिदेवतादिसामर्थ्यादेतद्भवति ॥ नतुश क्त्या ॥ औषधादिस्थितादेवाज्ञेदृष्टफलप्रदाइतिच्छांदोग्यभाष्योक्तेरितिवाच्यं ॥ स्थानशक्तेरप्यावश्यकत्वात् ॥ अन्यथा तथाश्मानस्तृणकाष्ठाश्चसर्वेदिष्टक्षयेस्वांप्रकृतिंभजंतइत्यैतरेयभाष्योक्तेर्लोष्टकाष्ठादीनामपिदेवताद्यभिमन्यमानत्वेनतैरपिमहा कार्यप्रसंगात् ॥ पर्वतास्सिकताश्चैवनद्यः कूपास्सरांसिच ॥ हविःकपालायूपाद्यादेवताएवसर्वशइतिबृहद्भाष्योक्तेः ॥ नादैवं किंचिदिष्यतइतिच्छांदोग्यभाष्योक्तेश्च ॥ तस्मादचिंत्यशक्तिसिद्धिः ॥ सहजशक्तिंनिरूपयति ॥ **कार्यमात्रेति** ॥३३॥ दंडा दिषुघटादिकार्यानुकूलातींद्रियाशक्तिरंगीकर्तव्येत्यर्थः ॥ ननुतत्तत्कार्यंप्रतितत्तत्कारणानांकारणत्वंतावत्सिद्धं ॥ तथाचतदति रिक्तशक्तिसद्भावेमानाभावइतिचेन्न ॥ स्फोटादिकार्यजननशक्तिमानपिदहनोदेहसंयोगादिसहकारिविरहान्नतज्जनयतीतिव्य पदेशस्यदुरपह्नवत्वात् ॥ तत्रशक्तिशब्देननवह्निस्वरूपमुच्यते ॥ मतुपोवैयर्थ्यात् ॥ नापिवह्नित्वं ॥ तत्किंप्रत्यक्षमप्रत्यक्षंवा ॥ नाद्यः ॥ दहनदर्शनेस्फोटजननशक्तिजिज्ञासानस्यात् ॥ नद्वितीयः ॥ अपसिद्धांतात् ॥ योग्यवृत्तिजातेःप्रत्यक्षत्वात् ॥ ना पिकारणत्वं ॥ तस्यकारणस्वरूपत्वेनातिरिक्तत्वाभावात् ॥ स्वरूपस्यान्वयव्यतिरेकगम्यत्वाभावाच्च ॥ यदिकारणत्वंकारण स्वरूपातिरिक्तमन्वयव्यतिरेकगम्यमतींद्रियमंगीक्रियते तर्हिसिद्धंनःसमीहितं ॥ तस्यैवशक्तिपदार्थत्वात् ॥ किंचबीजादेर्भर्जं

३३ कार्यमात्रानुकूलास्वभावरूपासहजशक्तिः ॥

ने बहुकालव्यवधानसद्भावेप्यंकुरजनकत्वापत्तिः ॥ नियतपूर्ववृत्तित्वरूपकारणत्वस्यानपायात् ॥ शक्तिपक्षेचशक्तेर्विनाशा न्नांकुरोत्पत्तिः ॥ नचभर्जनादीनांप्रतिबंधकत्वान्नांकुरोत्पत्तिरितिवाच्यं ॥ तर्हिप्रतिबंधकाभावस्यापिकारणत्वापत्तेः ॥ नचेष्टा पत्तिरितिवाच्यं ॥ उत्सर्गापवादयोरभावप्रसंगात् ॥ नहिंस्यादित्युत्सर्गस्याग्नीषोमीयंपशुमालभेतेत्यपवादाभावसाहित्येनैवप्रयो जकत्वेपवादस्यप्रतिबंधकत्वाभावप्रसंगात् ॥ तस्मात्कारणत्वातिरिक्तशक्तिसिद्धिः ॥ तदुक्तमत्तृत्वाधिकरणसुधायां ॥ ततोतीं द्रियमेवमृदादीनांकारणत्वमतिरिक्तमंगीकरणीयं ॥ तदेवशक्तिरितिशक्तिवादिभिरभ्युपेयतइति ॥ तत्वनिर्णयटीकायांद्वितीयपरिच्छेदेपि ॥ कार्योत्पत्त्यनुकूलोऽतींद्रियःकारणधर्मविशेषःशक्तिरिति ॥ अचिंत्यशक्तिभिन्नाचसहजशक्तिः ॥ कारणत्वरूपत्वात् ॥ तस्याश्चाघटितघटकशक्तित्वादिति ॥ साकारणशक्तिःपारिमांडिल्यभिन्नसर्ववस्तुनिष्ठा ॥ तदाहुःपारिमांडिल्यभि न्नानांकारणत्वमुदाहृतमितितार्किकाः ॥ तान्दूषयति ॥ **सर्वपदार्थेति** ॥ ३४ ॥ नचपरमाणुपरिमाणरूपपारिमांडिल्यस्या कारणत्वात्कथंतत्रकार्यानुकूलशक्तिरितिवाच्यं ॥ मृत्पिंडपरिमाणस्यघटपरिमाणहेतुत्ववत्परमाणुपरिमाणस्यापिद्व्यणुकपरिमा णहेतुत्वेबाधकाभावात् ॥ अन्यथाद्व्यणुकपरिमाणस्याकस्मिकत्वापत्तेः ॥ नचपरमाणुसंख्याद्व्यणुकपरिमाणहेतुरितिवाच्यं ॥ द्व्यणुकसंख्यायाआकस्मिकत्वापत्तेः ॥ गुणानांसजातीयगुणजनकत्वस्वाभाव्यात् ॥ अन्यथापरमाणौरूपाद्यनेकगुणांगीकारो नस्यात् ॥ एकेनैवगुणेनद्व्यणुकादावनेकगुणोत्पत्तिसंभवादित्यलं ॥ **अनित्यगतेति** ॥ ३५ ॥ बीजादिगतशक्तेःबीजनाशेन

३४ सर्वपदार्थनिष्ठा ॥ नित्यानित्यभेदेनद्विविधा ॥ नित्यगतानित्या ॥ ३५ अनित्यगताऽनित्या ॥

नाशाद्बीजानाशेपिभर्जनादिविरोधिसमवधानेननाशाच्चेतिभावः ॥ नचदावदग्धवेत्रबीजस्यकदलीकांडजननशक्तिरस्ति सा चागंतुका नसहजेतिवाच्यं ॥ वेत्रबीजजन्यभस्मनएवजनकत्वेनबीजस्याजनकत्वात् ॥ तदुक्तंजिज्ञासाधिकरणसुधायां ॥ नचव क्तव्यंदावदहनदग्धवेत्रबीजानांकदलीकांडजननंप्रतिसामर्थ्यमुपलब्धमिति ॥ पाकेनद्रव्यांतरोत्पत्तेस्तेषामबीजत्वादिति ॥ आधेयशक्तिंनिरूपयति ॥ **अन्याहितेति** ॥ ३६ ॥ उदाहरति ॥ **साचेति** ॥ ३७ ॥ प्रतिष्ठितंपूजयेदित्यादिनाप्रतिष्ठितायाएव प्रतिमायाःपूजाविहिता ॥ तत्रप्रतिष्ठारूपक्रिययाप्रतिमायांपूर्वमविद्यमानमेवदेवतासन्निधानंजायते ॥ तदेवाधेयशक्तिरित्य र्थः ॥ तदुक्तंतंत्रसारे ॥ पूर्वोक्तविधिनाभ्यर्च्यप्रतिमांशिष्यमेववा ॥ स्नापयेत्पूर्वमर्चायांजपोनूनस्सहस्रतः ॥ प्रतिमायांसन्निधि कृच्छिष्येमाहात्म्यकृद्भवेदिति ॥ पूर्वमीमांसायामपिव्रीहीन्प्रोक्षति व्रीहीनवहंति पुरोडाशंपर्यग्नीकरोति यूपंतक्षति यूपमष्टा स्रीकरोति पदपांसुनाजमनक्ति सप्तमंपदमध्वर्युरंजलिनागृह्णाति बर्हिषिहवींष्यासादयति आज्यमुत्प्लावयतीत्यादीनांसंस्कारक र्मत्वोक्तेः ॥ एवंकामिनीचरणाभिघातदोहलादिसंबंधेनाशोकवृक्षेऽकालिककुसुमोत्पत्तिः माघभूकर्षणजनितपाकजरूपपरंप राविशेषाद्धैमंतिकसस्योत्पत्तिः औषधलेपनेनकांस्यपात्रस्यधावनं धूमादिवासनेनमालतीलतायाःकुसुमोत्पत्तिश्चदृश्यते ॥ नचैतेतत्तत्पदार्थमात्राद्भवंति ॥ अतआधेयशक्तिसिद्धिः ॥ नचसर्वत्रप्रतिष्ठादिध्वंसएवकारणमस्त्वितिवाच्यं ॥ यागात्स्वर्गइत्या दावपियागध्वंसस्यैवकारणत्वापत्त्याऽपूर्वासिद्धिप्रसंगात् ॥ नचयागादितिपंचम्यास्वर्गसाधनत्वमवगतं ॥ तस्याशुविनाशिनःका

३६ अन्याहितशक्तिराधेयशक्तिः ॥ ३७ साचप्रतिष्ठादिनाप्रतिमादौ ॥

यांतरकालांतरभाविस्वर्गजनकत्वानुपपत्त्यामध्येव्यापारःकल्पनीयः ॥ सचनध्वंसः ॥प्रतियोगितदभावयोरेकत्राजनकत्वात् ॥ अतोमध्येऽपूर्वकल्प्यते ॥ प्रतिष्ठितंपूजयेदित्यत्रभूतार्थकक्तप्रत्ययेनध्वंसस्यैवकारणत्वावगमादितिवाच्यं ॥ तत्त्वज्ञानान्निश्रेयसाधिगमइत्यादौपंचम्याःप्रयोजकत्ववद्यागात्स्वर्गइत्यादावपिप्रयोजकत्वेपंचम्युपपत्तौकारणत्वस्यतदर्थत्वासंभवात् ॥ तथा चयागस्यध्वंसजनकत्वं ध्वंसस्यस्वर्गजनकत्वमस्तु ॥ किंचभावाभावयोर्मध्येभावोलघीयानितिन्यायेनभावकल्पनमेवलघु ॥ प्रतिष्ठितमित्यत्रक्तप्रत्ययस्तुदेवतासन्निधानात्पूर्वकालीनत्वमाहप्रतिष्ठायाः ॥ नतुध्वंसस्यकारणत्वमपि ॥ असामर्थ्यात् ॥ तस्मात्प्रतिमादौसन्निधानरूपाधेयशक्तिसिद्धिः ॥ सन्निधानंतुसामर्थ्यव्यंजनं ॥ तदुक्तं ॥ सन्निधानंतुतत्प्रोक्तंसामर्थ्यव्यंजनं हरेरिति ॥ पदशक्तिंनिरूपयति ॥ **पदपदार्थयोरिति** ॥ ३८ ॥ गवादिपदानिगवादिरूपार्थज्ञानजनकानिदृश्यंते ॥ अन्यथा तत्पदप्रयोगवैयर्थ्यप्रसंगात् ॥ परबोधनेप्रकारांतराभावाच्च ॥ पदेनपदार्थज्ञानंचसंबंधंविनानुपपन्नं ॥ अन्यथाऽतिप्रसंगापत्तेः ॥ अतःपदार्थबोधानुकूला वाचकत्वशक्तिः पदपदार्थसंबंधरूपा गवादिपदेष्वंगीकर्तव्येत्यर्थः ॥ नन्वस्मात्पदादयमर्थोबोद्धव्य इतीश्वरेच्छारूपा पदेषुशक्तिः ॥ नतुपदार्थांतरं ॥ मानाभावादितिचेन्न ॥ ईश्वरेच्छायाःकार्यमात्रसाधारणकारणत्वेनशाब्द ज्ञानमात्रहेतुज्ञानविषयशक्तित्वानुपपत्तेः ॥ नचेच्छात्वेनसामान्यकारणता शक्तित्वेनविशेषकारणतेतिवाच्यं ॥ अस्मात्पदाद यमर्थोबोद्धव्यइतीश्वरेच्छाविषयत्ववत्तज्ज्ञानविषयत्वस्यापिशक्तित्वापत्तेः ॥ कालादृष्टादीनामपिविशेषधर्मेणपदशक्तित्वापत्ते

३८ पदपदार्थयोर्वाच्यवाचकभावसंबंधः पदशक्तिः ॥

श्च ॥ निरीश्वरवादिनांशक्त्यभावप्रसंगाच्च ॥ नचतेषामपभ्रंशवच्छक्तिभ्रमइतिवाच्यं ॥ भ्रांतेरभ्रांतिपूर्वकत्वनियमेनशक्ति प्रमायाःक्वाप्यभावेतेषांशक्तिभ्रमानुपपत्तेः॥तवैवाशक्तिरूपायामीश्वरेच्छायांशक्तित्वारोपेणभ्रांतत्वसंभवाच्च ॥ ननुपदपदार्थ योर्यदिशक्तिरौत्पत्तिकीस्यात्तदाऽविदितशक्तिकस्यापिपदादन्वयबोधःस्यात् ॥ स्वाभाविकशक्तेरनपायात्॥ नह्यग्निरविदितश क्तिर्नदहतीतिचेन्न ॥ धूमस्यवह्निनास्वाभाविकसंबंधसद्भावेपिज्ञातस्यैववह्न्यनुमितिजनकत्वं नाज्ञातस्य तद्वदुपपत्तेः ॥ तस्मा त्पदपदार्थयोःस्वाभाविकसंबंधएवशक्तिः ॥ तदुक्तमनुव्याख्याने॥ नित्ययोगोपिशब्दानामर्थैर्नैवविदुष्यतइति ॥ प्रत्यक्षवच्चप्रा माण्यंस्वतएवागमस्यहीति ॥ सुधायांच ॥ स्वतएवेति ॥ स्वाभाविकेनैवसंबंधेनेत्यर्थः॥ जैमिनिरप्याह ॥ औत्पत्तिकस्तुशब्द स्यार्थेनसंबधइतीति ॥ तस्याःस्थानमाह ॥ साचेति ॥ ३९ ॥ ननु वाचकत्वंपदधर्मः कथमुदात्तादिस्वरधर्मः कथंवाभेर्यादि ध्वनिधर्मइतिचेन्न ॥ पदवत्स्वरवर्णध्वनीनांवाचकत्वेबाधकाभावात् ॥ तदुक्तमृग्भाष्ये ॥ दार्ढ्यमेवानुदात्तार्थःउदात्तस्योच्चता र्थता ॥ नीचतास्वरितस्यार्थःप्रचयस्ययथास्थितिः ॥ समाहारेखिलाअर्थाःस्वरार्थानामियंस्थितिः ॥ कंपोशेषग्रहेक्वापिलज्जा यांवापुरातनइति ॥ ननूदात्तानुदात्तादिस्वराणांवर्णधर्मत्वेनशब्दरूपत्वाभावात्कथंवाचकत्वं ॥ उक्तंचशाब्दिकैः ॥ उदात्तत्वा नुदात्तत्वेवर्णधर्मावितीतिचेन्न ॥ नदीवृध्यादिसंज्ञावद्ध्वनीनामेवोदात्तादिसंज्ञाकरणात् ॥ अतएवछांदोग्यभाष्ये ॥ देवा दिस्वरस्यध्वनित्वमुक्तं ॥ तथाहि ॥ विष्णोःस्वरोवृषभवन्मेघनादवदेववा ॥ स्त्रीपशुस्वरवद्ब्रह्मेर्गंभीरोनुपमोविभोः ॥ ब्रह्मण

३९ साचस्वरध्वनिवर्णपदवाक्यमात्रगता ॥

स्त्वथसोमस्यसाक्षाद्घंटानिनादवत् ॥ मृदुमेघस्वरोवायोरिंद्रस्यस्तनयित्नुवत् ॥ बृहस्पतेःक्रौंचवच्चवरुणस्यतुविस्वरः ॥ एकस्य पादवर्षस्यस्वरोविष्णोरुदाहृतः ॥ वायोर्विंशतिवर्षस्यब्रह्मणस्तुतदंतरेति ॥ अस्तुवोदात्तादिस्वराणांवर्णधर्मत्वं ॥ उदाहृतऋग्भाष्यबलेनवाचकत्वस्याप्यंगीकार्यत्वात् ॥ ऐतरेयभाष्येपि ॥ समुद्रमेघवृक्षपतनभेरीताडनादिसर्वघोषाअपितस्यैवनामानीतियथायोग्यंयोजनीयानि ॥ हुंकारेणसहैवाब्धिःसर्वाभिभवशक्तितां ॥ विष्णोर्वक्तियतोहुंहिपराभिभववाचकः ॥ ओमितिस्वनतेनित्यंवायुर्मेघेषुसंस्थितः ॥ बलवन्नादसंयुक्तोह्यधिकोच्चत्वमस्यतु ॥ ॐकारस्यार्थउद्दिष्टउक्तार्थाधिक्यमेवच ॥ नादोबलीप्रवदतितथाभेरीध्वनिःप्रभोः ॥ अनुदात्तस्वरूपत्वादौदार्यवदतीशितुः॥ तदपेक्षयान्यनीचत्वंघंटाद्याःस्वरितात्मकाः॥ उच्चस्थितिमुदात्तश्चस्वर्णचंच्वादिकःस्वरः ॥ विष्णोर्वक्तितथामंद्रश्वासादिःप्रणवात्मकः ॥ एकप्रकारतांविष्णोःसदाचाल्पंवदत्यपि ॥ इत्यादयःसर्वघोषाःविष्णोरेवगुणोन्नतिं ॥ वदंतिकिमुवेदाद्यामार्जाराद्यभिधास्तथेति ॥ ऐतरेयभाष्यांतेपि ॥ सर्वैश्चवैदिकपदैरपिलोकशब्दैर्मेघाग्निवारिधितलादिरवैश्चसर्वैः ॥ एकोभिधेयपरिपूर्णगुणःप्रियोलंनारायणोममसदैवसतुष्टिमेत्विति ॥ तावाएतास्सर्वाऋचःसर्वेवेदास्सर्वेघोषाइतिश्रुतेश्च ॥ वर्णानांवाचकत्वंचतंत्रसारेचोक्तं ॥ अहमेकोखिलगुणोवाचकःप्रणवोमम॥ अकाराद्यतिशांतांतःसोयमष्टाक्षरोमतः ॥ सविश्वतैजसप्राज्ञतुरीयात्मांतरात्मनां ॥ परमात्मज्ञानात्मयुजांमद्रूपाणांचवाचकः ॥ तद्रूपभेदाःपंचाशन्मूर्तयोममचापराः ॥ पंचाशद्वर्णवाच्यास्तावर्णास्तारार्णभेदिताः ॥ नृसिंहःक्षस्यदेवतेति ॥ अनुव्याख्यानेपि ॥ वासुदेवादिरूपेणचतुर्मूर्तिश्चसर्वशः ॥ अथवापंचमूर्तिस्सप्रोक्तोधिकरणंप्रति ॥ प्रतिसूत्रंप्रतिपदंप्रत्यक्षरमथापिवेति ॥ भाष्येपि ॥ अकारःसर्ववागात्मापरब्रह्माभिधायकः ॥ तथौप्राणात्मकौप्रोक्तौव्याप्तिस्थितिविधायकाविति ॥ अइतिब्रह्म ॥ कंब्रह्मखंब्रह्मेति णकारोबलंषकारःप्राणआत्मेत्याद्याःश्रुतयः ॥ णोहिनिर्वृतिवाचकइतिस्मृतिश्चात्रप्रमाणं ॥ ननुशक्तेःपदधर्मत्वात्कथंवाक्येशक्तिरितिचेन्न ॥ पदवद्वाक्यस्यापिवाक्यार्थेशक्तत्वेबाधकाभावात् ॥ तथाहिसूत्रंभाष्यंच ॥ वाक्यान्वयात् वाक्यस्याप्येवमन्वयोयुज्यतइति ॥ सुधायामपिद्वितीयाध्याये ॥ परेब्रह्मणिनारायणेस्वरवर्णवाक्यमहावाक्यरूपस्यसमस्तशास्त्रस्यसाक्षात्परममुख्ययावृत्त्यासमन्वयःप्रथमाध्यायेसमर्थितइति ॥ अणुभाष्येपि ॥ अव्यक्तःकर्मवाक्यैश्चवाच्यएकोमितात्मकइति ॥ पाणिनिरप्याह ॥ श्रोत्रियश्छंदोधीते वाक्यार्थेचपदसमन्वयः देवानांप्रियइतिचमूर्खे मस्करमस्करिणौवेणुपरिव्राजकयोः अनेकमन्यपदार्थइत्यादि ॥ तस्मात्स्वरादीनामपिपदवद्वाचकत्वंसिद्धं ॥ पदशक्तेर्विभागमाह ॥ **मुख्येति**॥४०॥ उभयोःस्थानमाह ॥ **सर्वेत्यादिना** ॥ ४१ ॥ इंद्रादिशब्दानांपुरंदरादौयोगरूढिभ्यांवृत्तिर्मुख्या ॥ परमैश्वर्यरूपप्रवृत्तिनिमित्तेनाज्ञरूढ्याचप्रवृत्तेः ॥ परमात्मनितुपरमैश्वर्यरूपप्रवृत्तिनिमित्तस्यनिरवधिकत्वादिंद्रादिगतैश्वर्यस्वामित्वाद्विद्वद्रूढिसद्भावाच्चपरममुख्यवृत्तिरित्यर्थः ॥ अत्रवक्तव्यंयत्तत्सर्वमुत्तरत्रवक्ष्यामः ॥ इतिशक्तिनिरूपणं ॥ ७ ॥ ७ ॥ ७ ॥ क्रमप्राप्तंसादृश्यंनिरूपयति ॥ **सादृश्यंचेति** ॥ ४२ ॥ तार्किकमतंनिराकरोति ॥ **नत्विति** ॥ ४३ ॥ ननुसादृश्यंनपदार्थांतरं ॥ गोसदृशो

४० मुख्यापरममुख्याचेतिद्विविधा ॥ ४१ सर्वशब्दानांपरमात्मनिपरममुख्यवृत्तिः ॥ अन्यत्रमुख्यवृत्तिः ॥ ४२ सादृश्यंचपदार्थांतरं ॥ ४३ नतुतद्भिन्नत्वेसतितद्गतभूयोधर्मवत्त्वं ॥

गवयइत्यादिप्रतीतिव्यवहारयोस्तद्गतभूयोधर्मविषयकत्वोपपत्तेरितिचेन्न ॥ गोगतानांधर्माणांगवयेऽभावेनसादृश्याभावप्रसंगात् ॥ नतावद्गोत्वंगवयवृत्ति ॥ गवयस्यापिगोत्वापत्तेः ॥ नापिपशुत्वादिकं ॥ उष्ट्रादावपिगोसादृश्यप्रतीतिप्रसंगात् । नापि करचरणादिकं ॥ भिन्नभिन्नत्वात् ॥ अतोगोगतधर्मातिरिक्तमेवगवयेसादृश्यं ॥ किंचगोसदृशोगवयः ॥ गवयसदृशीगौरिति परस्परप्रतियोगितासादृश्येप्रतीयते ॥ नचोभयगतधर्मस्यपशुत्वादेःपरस्परप्रतियोगितासंभवति ॥ अपिचप्रतियोगिज्ञानानंतर मेवापरत्रसादृश्यज्ञानंजायते ॥ नचधर्मज्ञानंतथा ॥ नचगोधर्मसदृशधर्मवत्त्वमेवगोसादृश्यमितिवाच्यं ॥ धर्मयोस्सादृश्यस्याप्यनिरूपणात् ॥ तस्मात्सादृश्यंपदार्थांतरं ॥ प्राभाकरास्तु॥सर्वेषुगोगवयादिषुसादृश्यमेकमनुगतं॥ अनेकत्वेप्रमाणाभावात्॥ अनयोस्सादृश्यमित्येकत्वप्रतीतेश्च ॥ एकत्वेसंभवतिनानात्वस्यगौरवपराहतत्वाच्चेत्याहुः ॥ तद्दूषयति ॥ **यमलादिष्विति** ॥ ४४ ॥ ननुपूर्वोक्तदोषइत्यतआह ॥ **एकनिरूपितमपरवृत्तीति** ॥ ४५ ॥ अयमाशयः ॥ अयमनेनसदृशः सोमुनासदृशइतिपरस्परप्रतियोग्यनुयोगिभावोनुभूयते ॥ सचसादृश्यस्यानेकत्वंविनानुपपन्नः ॥ नहिप्रतियोग्येवाधिकरणं नवाअधिकरणमेवप्रतियोगि ॥ अभावादौतथादर्शनात् ॥ अतोयमलयोःसादृश्यंद्वयमेव ॥ अनयोस्सादृश्यमितिप्रतीतेश्चविप्राणांभोजनमितिप्रतीतिवन्नानासादृश्यविषयत्वोपपत्तेः ॥ अयंतत्सदृशोयंतत्सदृशइत्यनुगतप्रतीतेश्चशुक्लोघटःशुक्लःपटःइत्यादिप्रत्ययवदुपपत्तेः ॥ तस्माद्भिन्नभिन्नंसादृश्यमितिसिद्धं ॥ तदुक्तंवैशेषिकाधिकरणानुव्याख्याने॥ एतादृशंचसादृश्यंपदार्थेषु

४४ यमलादिषुनाना ॥ ४५ एकनिरूपितमपरवृत्ति॥ नत्वनुगतं ॥

पृथक्पृथगिति ॥ सुधायांच ॥ अस्तितावत्साद्दश्यंनामपदार्थांतरं ॥ गोसद्दशोगवयइत्याद्यध्यक्षसिद्धत्वात् ॥ तेनैवचोपपद्यते व्युत्पत्त्यादिकमिति ॥ तद्विभागमाह ॥ **तद्विविधमिति** ॥ ४६ ॥ परमात्मरूपाणांजीवानांचपरस्परसाद्दश्यंनित्यं ॥ नाशकाभावात् ॥ गोगवयादीनांचसाद्दश्यमनित्यं ॥ आश्रयनाशेनतन्नाशसंभवादितिभावः ॥ इतिसाद्दश्यप्रकरणं ॥ ७ ॥ ७ ॥ ७॥ अवशिष्टमभावंविभजति॥ **अभावश्चतुर्विधइति** ॥४७॥ प्रथमप्रतिपत्तौनेतिबोध्यमानत्वमभावसामान्यलक्षणं ॥ प्रागभावस्वरूपमाह ॥ **कार्योत्पत्तेरिति** ॥ ४८ ॥ ननुप्रागभावसद्भावेमानाभावः ॥ पटोत्पत्तेःपूर्वंपटोनास्तीतिप्रतीतेः पटात्यंताभावविषयकत्वोपपत्तेः ॥ नचाकाशादीनामप्युत्पत्तिप्रसंगइतिवाच्यं ॥ भावरूपकारणाभावादेवोत्पत्त्यभावोपपत्तेरितिचेन्न ॥ पटादिप्रागभावानंगीकारेउत्पन्नस्यपटस्यपुनरुत्पत्तिप्रसंगात् ॥ प्रागभावेतरसकलकारणसद्भावात् ॥ किंच ॥ घटोभविष्यतीतिप्रत्ययस्य निर्विषयत्वापत्तिः ॥ नचघटात्यंताभावस्तद्विषयः ॥ तस्यसर्वदासत्त्वेनघटोत्पत्त्यनंतरमपिभविष्यतीतिप्रत्ययापत्तेः ॥ अपिच ॥ घटेपाकेनरूपरसाद्युत्पत्तिरस्ति ॥ तत्रघटाग्निसंयोगकालादिकारणानांरूपरसादिसाधारणत्वेनसामग्रीभेदाभावेनरूपरसादीनां भेदोनस्यात् ॥ सामग्रीभेदनियतत्वात्कार्यभेदस्य ॥ नचपूर्वरूपरसादीनामेवोत्तररूपरसादिकंप्रतिहेतुत्वमितिवाच्यं ॥ तेषांतेजस्संयोगेनध्वस्तत्वेनाकारणत्वात् ॥ नचपूर्वरूपध्वंसएवकारणमितिवाच्यं ॥ ध्वंसस्यक्वापिभावकार्यप्रतिकारणत्वानंगीकारात् ॥

---

४६ तद्विविधं ॥ नित्यमनित्यंचेति ॥ नित्यगतंनित्यं ॥ अनित्यगतमनित्यं ॥ ४७ अभावश्चतुर्विधः ॥ प्रागभावःप्रध्वंसाभावोऽन्योन्याभावोऽत्यंताभावश्चेति ॥ ४८ कार्योत्पत्तेः प्राग्विद्यमानोऽभावःप्रागभावः ॥ महदादिकार्यमात्रस्य ॥

प्रागभावांगीकारेतुप्रागभावभेदात्कार्यभेदस्यसंभवात् ॥ नचादृष्टभेदात्कार्यभेदः ॥ दृष्टसामग्र्यैकोन्नेयत्वाददृष्टस्य ॥ तस्मात्प्रागभावसिद्धिः ॥ प्रध्वंसाभावस्वरूपमाह ॥ उत्पत्त्यनंतरमेवेति ॥४९॥ एवकारोन्योन्याभावव्यावृत्त्यर्थः ॥ अन्योन्याभावस्वरूपमाह ॥ सार्वकालिकइति ॥ ५० ॥ सार्वकालिकइत्यनेनोत्पत्तेःपूर्वमेवोत्पत्त्यनंतरमेवेतिनियमंव्यावर्तयति ॥ नतुसर्वकालवृत्तित्वरूपंनित्यत्वं ॥ घटनाशेतन्निष्ठपटादिभेदनाशाभ्युपगमात् ॥ यथाप्रागभावध्वंसात्यंताभावानांधर्म्यतिरिक्तत्वं न तथान्योन्याभावस्येत्याह ॥ पदार्थस्वरूपमेवेति ॥ ५१ ॥ ननुभेदोनधर्मिस्वरूपं ॥ पटनाशेतन्निष्ठघटादिभेदस्यापिनाशप्रसंगात् ॥ नचेष्टापत्तिः ॥ घटपटयोरभेदप्रसंगात् ॥ भेदाभावेऽभेदस्यन्यायप्राप्तत्वात् ॥ नष्टानामपिवस्तूनांभेदोनैवविनश्यतीतितैत्तिरीयभाष्यविरोधप्रसंगाच्चेतिचेदुच्यते ॥ घटपटयोर्भेदस्तावन्नैकः । किंतुघटप्रतियोगिकः पटाधिकरणकएकोभेदः । तथापटप्रतियोगिकोघटाधिकरणकोभेदोपरः ॥तथाचघटनाशेनघटाधिकरणकपटप्रतियोगिकभेदनाशेपिघटप्रतियोगिकपटाधिकरणकभेदस्यानाशात् ॥ एवंचघटनाशेसतिपटस्यसत्त्वेनतत्रनष्टघटभेदस्यापिसत्त्वेनघटाभेदानुपपत्तेः ॥ घटस्यचनष्टत्वेनपटभेदापादानासंभवाच्च ॥यदपिचोक्तंनष्टानामपिवस्तूनामित्यादिभाष्यविरोधइति ॥तन्न॥ तस्याज्ञानिमतत्वेनज्ञानिमतत्वाभावात्॥ ज्ञानिमतेतुभेदस्यविनाशएव॥ तदुक्तंतत्रैवतैत्तिरीयभाष्ये॥ इत्याहुः केचिदज्ञानात्तत्राहुःसूक्ष्मदर्शिनः॥ सत्यंभेदस्तुवस्तूनांस्वरू

४९ उत्पत्त्यनंतरमेवविद्यमानोऽभावःप्रध्वंसः ॥ सोपिकार्यमात्रस्य ॥ ५० सार्वकालिकोऽभावोन्योन्याभावः ॥ ५१ पदार्थस्वरूपमेव ॥ नित्यात्मकोनित्यः ॥ अनित्यात्मकोऽनित्यः ॥

पंनात्रसंशयः ॥ तस्माद्वस्तुविनाशेतुतद्भेदोनास्तिकुत्रचित् ॥ अविनष्टस्यतस्मात्तुभेदोस्त्येवस्वरूपतः॥ एवंभावादभावस्यनभेदोभावरूपवानित्यादि ॥ नन्वेवमपिभेदस्यनाशांगीकारेपंचभेदस्यनित्यत्वप्रतिपादकप्रमाणविरोधः ॥ तथाहिनिर्णये ॥ जीवेशयोर्भिदाचैवजीवभेदःपरस्परं ॥ जडेशयोर्जडानांचजडजीवभिदातथा ॥ पंचभेदाइमेनित्याःसर्वावस्थासुनित्यशइति ॥ तत्त्वनिर्णयेपि ॥ जीवेश्वरभिदाचैवजडेश्वरभिदातथा ॥ जीवभेदोमिथश्चैवजडजीवभिदातथा ॥ मिथश्चजडभेदोयंप्रपंचोभेदपंचकः ॥ सोयंसत्योह्यनादिश्चसादिश्चेन्नाशमाप्नुयात् ॥ नचनाशंप्रयात्येषनचासौभ्रांतिकल्पितइति ॥ तथाचभेदस्यननाशइतिचेदुच्यते ॥ नतावत्पंचभेदाइमेनित्याइतिनित्यपदाद्भेदस्योत्पत्तिविनाशाभावसिद्धिः ॥ इमेनित्याः सत्याः नतुमिथ्याभूताः ॥ यद्वानित्याःस्वाभाविकाःनत्वौपाधिकाइतिव्याख्यानसंभवात् ॥ सत्यनित्यशब्दयोरेकार्थत्वस्याचार्यैरेवोक्तत्वात् ॥ मृत्तिकेत्येवसत्यमित्यत्रमृत्तिकेतिसंस्कृतंनामसत्यंनित्यमित्यर्थइति ॥ किंच ॥ निर्णयएवैतत्पूर्वत्र सत्याविष्णोर्गुणाः सर्वेसत्याजीवेशयोर्भिदा ॥ सत्योमिथोजीवभेदःसत्यंचजगदीदृशं ॥ जगत्प्रवाहःसत्योयंपंचभेदसमन्वितइतिपंचभेदस्यसत्यत्वमभिधाय तत्रजीवेश्वरभिदाचैवेतिप्रमाणोदाहरणमित्यभिप्रायकल्पनात् ॥ नचपूर्वत्रपरमात्मगुणानांपंचभेदानांचसत्यत्वमभिधायोत्तरत्रनित्यत्वमुच्यतइत्यभिप्रायएवास्त्वितिवाच्यं ॥ अथापिनित्यपदेननित्यगतभेदपरतयातेषांनित्यत्वोपपत्तेः ॥ तथाहि ॥ जीवेश्वरभेदोनित्यः ॥ जीवानांपरस्परंभेदोनित्यः ॥ प्रकृत्यव्याकृताकाशवर्णानांपरस्परंभेदोनित्यः ॥ प्रकृत्यादिजडेभ्यः परमात्मनिष्ठभेदोनित्यः ॥ प्रकृत्यादिभ्योजीवनिष्ठभेदोनित्यः ॥ एतावतापिपंचानांभेदानांनित्यत्वोपपत्तेर्नानित्यघटादि

निष्ठभेदनित्यत्वसिद्धिः ॥ तदुक्तंप्रकृत्यधिकरणसुधायां ॥ अतःप्रपंचोभेदपंचकः ॥ सचजीवेश्वरप्रकृत्यादिनित्यस्वरूपभूतोनादिनित्यएवेतिनोक्तदोषइति ॥ नापिसोयंसत्योह्यनादिश्चसादिश्चेन्नाशमाप्नुयादितितत्त्वनिर्णयोदाहृतप्रमाणबलेनसर्वस्यापिभेदस्यनित्यत्वसिद्धिः ॥ तस्यनित्यगतभेदविषयत्वेनाप्युपपत्तेः ॥ अधिकंतुसुधायां तत्वनिर्णयटीकायांचद्रष्टव्यं ॥ तस्मान्नित्यगतभेदोनित्यः ॥ अनित्यगतस्त्वनित्यइतिसिद्धं ॥ धर्मिस्वरूपत्वेभेदस्यप्रमाणानितु ॥ पदार्थस्वरूपत्वाद्भेदस्येतितत्वनिर्णयोक्तिः ॥ भावाभावस्वरूपत्वान्नान्योन्याभावतापृथगितितत्वविवेकोक्तिः ॥ भेदस्तुसर्ववस्तूनांस्वरूपंनैजमव्ययमितितैत्तिरीयभाष्यं ॥ संयोगश्चविभागश्चभेदश्चैवपृथक्पृथगित्यनुव्याख्यानं घटपटादिभेदानामननुगतत्वेप्रमाणं ॥ पद्मनाभतीर्थचरणास्तु ॥ नित्यानित्यवस्तुगतानांसर्वेषामपिभेदानांनित्यत्वमाहुः ॥ तदुपपादितंप्रकृत्यधिकरणसुधायां ॥ तथाहितद्वाक्यानि ॥ टीकाकारास्तुमन्यंते ॥ भेदोनामान्योन्याभावः ॥ सचान्योन्यतादात्म्यापत्त्यैवनिवर्तनीयः ॥ प्रतियोग्यापत्तेरेवाभावनिवर्तकत्वस्यप्रागभावेदृष्टत्वात् ॥ नचकदापिपदार्थानामन्योन्यतादात्म्यमस्तीत्यनित्यानामपिभेदोनित्यएवेत्याहुरिति ॥ प्रकृत्यधिकरणसन्न्यायरत्नावल्यामपि ॥ विनाशिनोपिघटादेर्धर्मरूपोभेदःपरवाद्यभ्युपगतघटत्वादिजातिवन्नित्योभ्युपगंतव्यः ॥ कालत्रयेपिवस्त्वंतरतापत्त्यभावादिति ॥ नन्वेवंभेदस्यवस्तुस्वरूपत्वांगीकारेप्रागभावप्रध्वंसयोरपिवस्तुस्वरूपत्वापत्तिः ॥ तयोरपिधर्मिगतत्वाविशेषादितिचेदुच्यते ॥ अनादिप्रागभावस्यसादिनातंत्वादिनाऽभेदोनुपपन्नः ॥ नचप्रागभावस्यापिसादित्वमितिवाच्यं ॥ घटप्रागभावोत्पत्तेःपूर्वंघटोनास्तिघटोभविष्यतीत्यादेर्निर्विषयत्वापत्तेः ॥ किंच ॥ तंतूत्पत्तेःपूर्वंपटप्रागभावस्य

कालप्रकृत्यादिवृत्तित्वंस्यात् ॥ नचेष्टापत्तिरितिवाच्यं ॥ कालादिनाप्रागभावस्याभेदापत्तेः ॥ तंतुनैवाभेदोनकालादिनेत्यत्र नियामकाभावात् ॥ अतोऽअधिकरणातिरिक्तएवप्रागभावः ॥ एवंपटध्वंसस्यापिनतंत्वात्मकत्वं ॥ तंतुनाशेतद्रूपादिनाशवद्ध्वंसस्यापिनाशापत्त्यापटोन्मज्जनप्रसंगात् ॥ प्रागभावादिवदन्योन्याभावस्यनप्रतियोगिनियमइत्याह ॥ **भावाभावेति** ॥ ५२ ॥ भावप्रतियोगिकान्योन्याभावोऽभावेऽसतिच ॥ अभावप्रतियोगिकान्योन्याभावोभावेऽसतिच ॥ असत्प्रतियोगिकान्योन्याभावश्चभावाभावयोरितिविवेकः ॥ ननुतत्वविवेकेप्राक्प्रध्वंससदात्वेनत्रिविधोभावइष्यतइत्यन्योन्याभावबहिर्भावेनैवाभावस्य त्रित्वमुक्तं ॥ कथमत्रचातुर्विध्यमुक्तमितिचेदयमाशयः ॥ अन्योन्याभावस्वरूपमेवनास्तीत्यभिप्रायेणतत्वविवेकेत्रैविध्यकथनं न ॥ किंतुतस्यधर्मितोभिन्नत्वाभावाभिप्रायेणैव ॥ अन्यथापुनर्भावाभावस्वरूपत्वान्नान्योन्याभावतापृथगितितत्स्वरूपमंगीकृत्यगुणक्रियादिवद्धर्मिस्वरूपत्वकथनमुत्तरत्रासंगतंस्यात् ॥ अत्रतुगुणक्रियादिवत्पृथङ्निरूप्यपश्चाद्धर्मिस्वरूपत्वमुक्तमितिफलतोनकश्चिद्विशेषः ॥ इदानीमत्यंताभावस्वरूपंनिरूपयति ॥ **अप्रामाणिकेति** ॥ ५३ ॥ अत्यंतासत्प्रतियोगिकाभावइत्यर्थः ॥ नन्वत्यंताभावोनशशशृंगाद्यत्यंतासत्प्रतियोगिकः ॥ तथात्वेत्यंताभावज्ञानमेवनस्यात्प्रतियोगिनिशशशृंगादौप्रमाणप्रवृत्तेरभावेनप्रतियोगिज्ञानाभावादितिचेन्न ॥ शशशृंगमित्यादिशब्देनशशशृंगस्यापिज्ञानसंभवात् ॥ तदुक्तं ॥ अत्यंतासत्यपिह्यर्थेज्ञानंशब्दःकरोतिहीति ॥ अन्यथाघटादावसद्वैलक्षण्यज्ञानाभावप्रसंगात् ॥ शशशृंगादौसद्वैलक्षण्यज्ञानाभा

---

५२ भावाभावासत्प्रतियोगिकश्च ॥ ५३ अप्रामाणिकप्रतियोगिकाभावोत्यंताभावः ॥

वप्रसंगाच्च ॥ तदुक्तमनुव्याख्याने ॥ असद्विलक्षणज्ञप्त्यैज्ञातव्यमसदेवहि ॥ तस्मादसत्प्रतीतिश्चकथंतेननिवार्यतइति ॥ तत्व
निर्णयेपि ॥ असतःख्यात्ययोगादितिवदतोसतःख्यातिरभून्नवा ॥ यदिनाभून्नतत्ख्यातिनिराकरणं ॥ यद्यभूत्तथापीति ॥ न
नुभूतलेघटोनास्तीतिप्रतीत्याघटादिप्रामाणिकप्रतियोगिकात्यंताभावस्यापिसत्त्वात्कथमप्रामाणिकप्रतियोगिकोत्यंताभावइत्य
तआह ॥ **नत्विति** ॥ ९४ ॥ अयमाशयः ॥ घटादेरत्यंताभावइतिकोर्थः ॥ नास्तिनासीन्नभविष्यतीतित्रैकालिकनिषेधोवा
निषेधमात्रंवा ॥ नांत्यः ॥ इष्टापत्तेः ॥ अन्योन्याभावादेःस्वीकृतत्वात् ॥ नाद्यः ॥ घटादेरत्यंतासत्त्वापत्तेः ॥ त्रैकालिकनि
षेधप्रतियोगित्वातिरिक्तस्यात्यंतासत्त्वस्यशशशृंगादावभावात् ॥ नचत्रैकालिकनिषेधोत्यंताभावः ॥ त्रैकालिकसत्त्वनिषेधस्त्व
त्यंतासत्त्वमितिवाच्यं ॥ देशकालसंबंधातिरिक्तसत्त्वस्यैवानिरूपणात् ॥ नचसत्ताजातिरेवसत्त्वमितिवाच्यं ॥ सामान्याभावा
दीनांसत्त्वाभावप्रसंगात् ॥ सामान्यादिकंनिस्सामान्यमित्यंगीकारात् ॥ नचसामान्यादौदेशकालसंबंधित्वमेवसत्त्वमितिवा
च्यं ॥ तर्हिद्रव्यगुणादिष्वपिदेशकालसंबंधित्वरूपसत्त्वेनैवप्रतीतिव्यवहारयोरुपपत्तौसत्ताजातिस्वीकारानुपपत्तेः ॥ त्रैकालिक
निषेधप्रतियोगित्वस्यैवसर्वत्रात्यंतासत्त्वरूपत्वोपपत्तौसत्त्वनिषेधस्यगौरवेणाप्रयोजकत्वात् ॥ तदुक्तमनुव्याख्याने ॥ देशका
लानपेक्षाहिनसत्ताक्वापिदृश्यतइति ॥ तस्मादत्यंतासत्प्रतियोगिकएवात्यंताभावः ॥ तदुक्तंतत्वनिर्णयटीकायां ॥ अस्यपटस्यैत
त्तंतुनिष्ठात्यंताभावप्रतियोगित्वसाधनमप्यत्यंताभावस्यनिष्प्रतियोगित्वेनबाधितमिति ॥ न्यायामृतेपि ॥ त्रिकालसर्वदेशीयनिषे

९४ नतुप्रामाणिकप्रतियोगिकः ॥ सचनित्यः ॥

धाप्रतियोगिता ॥ सत्तोच्यतेऽध्यस्ततुच्छेतंप्रतिप्रतियोगिनीइति ॥ सुधाचंद्रिकादावपिसर्वत्रत्रैकालिकनिषेधप्रतियोगित्वंमि
थ्यात्वमित्यंगीकारेत्यंतासत्त्वापादनमुक्तं ॥ तर्कतांडवेपि । गगनादेरत्यंताभावप्रतियोगित्वरूपावृत्तित्वांगीकारेऽत्यंतासत्त्वाप
त्तिरितिदूषणमुक्तं ॥ नन्वत्यंताभावस्याप्रामाणिकप्रतियोगिकत्वेनिर्दोषत्वंपरमात्मलक्षणंनस्यात् ॥ अप्रामाणिकदोषात्यंताभा
वस्यजीवेपिसत्त्वात् ॥ जीवगतदोषाणांचसत्त्वेनात्यंताभावाप्रतियोगित्वादितिचेन्न ॥ जीवेप्रामाणिकदोषवत्यप्रामाणिकदो
षात्यंताभावस्याभावात् ॥ अत्यंताभावस्यप्रतियोगिप्रधानेनैवविरोधांगीकारात् ॥ प्रतियोगिसदृशंतथ्यवस्तुप्रधानमित्युच्य
ते ॥ तथाचजीवेऽप्रामाणिकदोषात्यंताभावविरोधिनोदोषस्यसत्त्वान्नदोषात्यंताभावः ॥ परमात्मनितुदोषाभावेनविरोध्यभा
वान्निर्दोषत्वसिद्धिः ॥ यद्वादोषिभिन्नत्वमेवनिर्दोषत्वं ॥ तच्चजीवादौनास्तीतिनातिव्याप्तिः ॥ केचित्तु ॥ स्वसंसर्गिदोषात्यंता
भाववत्त्वंनिर्दोषत्वं ॥ परमात्मनिस्वसंसर्गिदोषस्याप्रामाणिकत्वात्तदभावः ॥ जीवेतुस्वसंसर्गिदोषस्यप्रामाणिकत्वान्नतदभावइ
त्याहुः ॥ ननुतर्हिघटोनास्तीतिप्रतीतेःकागतिरित्यतआह ॥ **घटाद्यभावस्त्विति** ॥ ९५ ॥ घटोत्पत्तेःपूर्वंघटोनास्तीतिप्रतीते
र्घटप्रागभावविषयकत्वं ॥ ध्वंसानंतरंचध्वंसविषयकत्वं ॥ घटसत्ताकालेतुघटोनास्तीतिप्रतीतिरेवनास्तीत्यर्थः ॥ ननुघटसत्ताका
लएवायंघटोत्रभूतलेनास्तीतिप्रतीतेरनुभवसिद्धत्वात्तस्याःकागतिरितिचेन्न ॥ एतद्भूतलसंसर्गावच्छिन्नघटप्रतियोगिकाभाववि
षयकत्वात् ॥ एतद्भूतलघटसंसर्गश्चाप्रामाणिकः ॥ अतस्तदवच्छिन्नघटोप्यप्रामाणिकइतिनदोषः ॥ अतएवसंसर्गावच्छिन्नप्रति

९५ घटाद्यभावस्तुयथायथंप्रागभावादिरूपएव ॥

योगिकोभावोत्यंताभावइतिप्रवादः ॥ नचैवंघटसंसर्गोनास्तीतिप्रतीत्यापत्त्याघटोनास्तीतिप्रतीतिःक्वापिनस्यादितिवाच्यं ॥ घट
संसर्गोनास्तीतिप्रतीतेःसंसर्गसंसर्गाभावविषयकत्वेनकेवलसंसर्गाभावविषयत्वाभावात्॥अत्यंताभावस्यप्रसज्यप्रतिषेधरूपत्वात्॥
नन्वेवमन्योन्याभावस्यापितादात्म्यावच्छिन्नप्रतियोगिकाभावत्वेनघटपटादितादात्म्यस्यात्यंतासत्त्वादन्योन्याभावोप्यप्रामा
णिकप्रतियोगिकएवास्त्वितिचेत्सत्यं ॥ घटादिप्रतियोगिकात्यंताभावस्यांगीकारेऽत्यंतासत्त्वापादानवद्घटादिप्रतियोगिकान्यो
न्याभावांगीकारेऽत्यंतासत्त्वापादानरूपदोषाभावात्केवलघटप्रतियोगिकोप्यन्योन्याभावः ॥ तथाचघटःपटोनभवतीत्यत्रोभय
तादात्म्यावच्छिन्नप्रतियोगिकएकोन्योन्याभावः ॥ घटत्वावच्छिन्नप्रतियोगिकोप्येकोन्योन्याभावोपरः ॥ घटोनास्तीत्यत्यंताभा
वप्रतीतिस्थलेतुसंसर्गावच्छिन्नघटप्रतियोगिकएकएवात्यंताभावइतिविवेकः ॥ अत्रध्वंसस्यकार्यत्वान्निरुपादानकसृष्टेरभावाद्ध्वंसा
पादानंनास्माभिर्बुद्धं ॥ महांतःप्रष्टव्याः ॥ तमोगुणेननाशइतिभागवतादावुक्तेःसर्वत्रतमोगुणएवध्वंसोपादानमितिकेचिदाहुः॥
इतिश्रीवेदगर्भकुलीनपद्मनाभसूरिविरचितेपदार्थसंग्रहव्याख्यानेश्रीमन्मध्वसिद्धांतसारेपदार्थनिरूपणंसमाप्तं ॥ ७ ॥ ७ ॥ ७ ॥
पूर्वसूचीकटाहन्यायेनकर्मसामान्यादेर्निरूपितत्वादवशिष्टद्रव्यगुणयोर्विशेषाकारेणनिरूपणंचिकीर्षुर्गुणाश्रयत्वेनद्रव्यस्यप्राधा
न्यादादौद्रव्यलक्षणमाह ॥ द्रवणप्राप्यत्वमिति ॥ ५६ ॥ अहंपूर्वमहंपूर्वमितिविवदमानयोःपुरुषयोर्यद्धावनप्राप्यंतद्द्रव्य
मित्यर्थः ॥ तदुक्तंद्वितीयस्कंधतात्पर्ये । द्रव्यंतुद्रवणप्राप्यंद्वयोर्विवदमानयोः ॥ पूर्ववेगाभिसंबंधादाकाशस्तुप्रदेशतइति ॥

५६ द्रवणप्राप्यत्वंद्रव्यसामान्यलक्षणं ॥ द्रवणंचगमनं ॥

अनेनाव्याकृताकाशप्रकृतिकालवर्णानांव्याप्तानामपिप्रदेशतोगमनप्राप्यत्वमितिनाव्याप्तिरितिबोध्यं ॥ लक्षणांतरमाह ॥ उपादानेति ॥ ५७ ॥ वाशब्दोव्यवस्थितविकल्पार्थः ॥ तमेवाह ॥ उपदानत्वंचेति ॥ ५८ ॥ अत्रप्रकृतिमारभ्यब्रह्मांडपर्यंतंतथाविद्याकालांधकारवासनाप्रतिबिंबानांचपरिणामः ॥ तत्रापिप्रकृतेर्महदाद्यात्मनापरिणामः ॥ स्वयंचनान्येनपरिणता ॥ महदादेस्तुस्वयंपरिणतत्वमहंकारादिपरिणामहेतुत्वंच ॥ ब्रह्मांडस्यपरिणतत्वमात्रं । अविद्यायाउभयं । अंधकारवासनाकालप्रतिबिंबानांचपरिणतत्वमितिबोध्यं ॥ परमात्मलक्ष्मीजीवाव्याकृताकाशवर्णानामभिव्यक्तिरितिव्यवस्थेत्यर्थः ॥ परमात्मनोनंतावताराभिव्यंजकत्वं ॥ लक्ष्म्याअपिसीतारुक्मिण्याद्यनंतावताराभिव्यक्तिमत्त्वं ॥ जीवानांसांशानामंशाभिव्यंजकत्वं । निरंशानांपराधीनशरीरादिभिरभिव्यक्तिमत्त्वं । अव्याकृताकाशस्यपराधीनमूर्तसंबंधरूपविशेषवत्त्वेनाभिव्यक्तत्वं ॥ एतच्चप्रथमभागवतेस्पष्टं ॥ एतन्नानावताराणांनिधानंबीजमव्ययमिति ॥ एतच्चवियदधिकरणसुधानुव्याख्यानयोरपिस्पष्टं ॥ वर्णानामपिवर्णांतराभिव्यंजकत्वं ॥ तदुक्तंतंत्रसारे ॥ पंचाशद्वर्णवाच्यास्तावर्णास्तारार्णभेदिताः ॥ नारायणाष्टाक्षराच्चव्याहृतिभ्यस्तथैवच ॥ विभेदोद्वादशार्णानांकेशवाद्याश्चदेवताः ॥ नारायणाष्टाक्षराच्चव्याहृतित्रिगुणात्पुनः ॥ वेदमातातुगायत्रीद्विगुणाद्वादशाक्षरादिति ॥ अत्रायंसंप्रदायः ॥ प्रलयकालेसर्वेपिवर्णाःपरस्परंनिबिडतयासंबद्धाः ॥ नानादीपालोकवत् ॥ सृष्टिकालेप्राप्तेपरमात्मातत्तद्वर्णानुच्चारणेनविभजति ॥ तत्रताराष्टाक्षरविभागकालेनारायणाष्टाक्षरसंबद्धां

५७ उपादानकारणत्वंवाद्रव्यत्वं ॥ ५८ उपादानत्वंचपरिणामोऽभिव्यक्तिश्चेतिद्विविधं ॥

स्ताराष्टाक्षरानुच्चारणेनविभजति ॥ ततस्ताराष्टाक्षरेभ्योनारायणाष्टाक्षरानुच्चारणेनोद्धरति ॥ एवंनारायणाष्टाक्षरादपि ॥ दीपादीपांतरवत् ॥ तदुक्तंतंत्रसारे । वर्णानांदेवतानांचनित्यत्वान्नक्रमःस्वतः ॥ व्यक्तिक्रमंब्रह्मबुद्धावपेक्ष्यक्रमउच्यतइति ॥ तत्रादौसर्वोत्तमत्वेनप्रधानंपरमात्मानंनिरूपयति ॥ **तत्रपरमात्मेति** ॥ ५९ ॥ परमात्मनोद्रव्यत्वंचोपासनापादीयानुव्याख्याने गुणसामान्यतोरुद्रोद्रव्यसामान्यतःपरइत्युक्तं ॥ द्रव्यंभगवानितिसुधा ॥ अत्रपरिपूर्णपदस्यादावपिसंबंधः ॥ तथाच परिपूर्णानंतगुणपरिपूर्णत्वं परमात्मनोलक्षणमित्यर्थः ॥ अनंतानामपिगुणानांपरिपूर्णत्वंचप्रत्येकंनिरवधिकत्वं निरतिशयत्वंच ॥ लक्ष्म्यादिगतज्ञानाद्यपेक्षयापरमात्मगतज्ञानानंदादिकमनंतगुणितं एकैकमप्यनंतमितिसजातीयानंत्यं ॥ तथाज्ञानानंदबलशक्त्यादीनामप्यानंत्यमितिविजातीयानंत्यंचविवक्षितं ॥ तदुक्तंनिर्णयेषष्ठभागवते च ॥ मय्यनंतगुणेनंतेगुणतोनंतविग्रहइति ॥ षष्ठतात्पर्येपि ॥ गुणतोनंते ॥ प्रत्येकशोगुणानांतुनिस्सीमत्वमुदीर्यते ॥ यदानंत्यंतुगुणतस्तेचानंताहिसंख्यया ॥ अतोनंतगुणोविष्णुर्गुणतोनंतएवचेति ॥ भाष्यादावपि ॥ गुणाःश्रुताःसुविरुद्धाश्चदेवेसंत्यश्रुताअपीत्यनेनविजातीयानंत्यमपि ॥ परमात्मज्ञानस्यलक्ष्म्यादिज्ञानापेक्षयाऽपरिमितत्वंचोत्क्रांतिपादीयानुव्याख्यानेप्रतिपादितं ॥ बहुलाचातिविशदास्पष्टाचैवश्रियोमतिः ॥ महाशुद्धचितित्वेनततोप्यतिमहाचितिः ॥ अशेषोरुविशेषाणामतिस्पष्टतयादृशिः ॥ नित्यमेकप्रकाराचनारायणमतिःपरा ॥ सूर्यप्रभावदखिलंभासयंतीनिरंतरा ॥ निर्लेपावीतदोषाचनित्यमेवाविकारिणी॥ विशेषांस्तद्गतांस्त्यक्त्वाप्राय

५९ तत्रपरमात्मानंतगुणपरिपूर्णः ॥

स्तल्लक्षणाश्रियः ॥ तथैवस्पष्टताभावात्तत्तंत्रत्वाच्चकेवलं ॥ नतादृशीब्रह्मणस्तुप्रायएवंश्रियोयथा ॥ मुक्तानांतुतदन्येषांसमुद्रतरलोपमा ॥ अग्निज्वालावदेवस्यात्स्तुतिगानांदृशोभवइति ॥ तथाज्ञानपादीयानुव्याख्यानेपि ॥ सुसूक्ष्मैरप्यशेषैश्चविशेषैस्सहपश्यति ॥ स्वात्मानंभगवान्विष्णुःसर्वरूपोपिसर्वदा ॥ सर्वत्रचान्यदप्येवंतेनादृष्टंनहिकिंचित् ॥ सर्वत्रसर्वेदेवेशंपश्यत्येवरमापितु ॥ नतुसर्वैर्विशेषैस्तंपश्यंत्यप्यन्यतोधिकं ॥ स्वात्मानमन्यच्चाशेषंपश्यत्येवहिसर्वदेति ॥ एवमानंदादीनामप्यमितत्वं ॥ तदुक्तंनिर्णये ॥ क्षीराब्धौनागभोगेशयितमनुपमानंदसंदोहदेहं ॥ ऊचुःपरंपुरुषमेकमनंतशक्तिंसूक्तेनतेब्जजमुखाअपिपौरुषेणेति। लक्षणांतरमाह ॥ **सृष्ट्यादीति** ॥६०॥ जगतइतिशेषः ॥ तदुक्तंभाष्ये ॥उत्पत्तिस्थितिसंहारानियतिर्ज्ञानमावृतिः ॥ बंधमोक्षौचपुरुषाद्यस्मात्सहरिरेकराडिति ॥ तत्वसंख्यानेऽपि ॥ सृष्टिःस्थितिःसंहृतिश्चनियमोऽज्ञानबोधने॥ बंधोमोक्षःसुखंदुःखमावृतिर्ज्योतिरेवचेति ॥ अनुव्याख्यानेपि ॥ सृष्टिःस्थितिश्चसंहारोनियतिर्ज्ञानमावृतिः॥ बंधमोक्षावपिह्यासुश्रुतिषूक्ताहरेस्सदेति ॥ सृष्ट्यादिकर्तृत्वंसर्वज्ञानंविनानुपपन्नमित्यतआह॥ **सर्वज्ञइति**॥६१॥यःसर्वज्ञःसर्वविदित्याद्याःश्रुतयोत्रमानं॥ ननुपरमात्मनःसकलगुणपरिपूर्णत्वंकथंघटतइत्यतआह ॥ **परममुख्ययेति** ॥६२॥ तथाचसर्वेषांशब्दानांपरमात्मनिमहायोगवृत्त्यैवप्रवर्तमानत्वेनसकलपदप्रवृत्तिनिमित्तवत्त्वाद्गुणपरिपूर्णइतिभावः॥ तदुक्तमणुभाष्ये। अवांतरंकारणंचप्रकृतिःशून्यमेवच। इत्याद्यन्यत्रनियतैरपिमुख्येतयोदितः ॥ शब्दैरतोनंतगुणोयच्छब्दायोगवृत्तयइति ॥ ननुनपरमात्मनोनंतगुणपरिपूर्णत्वंयुक्तं ॥ तस्याल्पगुणजी

६० सृष्ट्याद्यष्टकर्ता ॥ ६१ सर्वज्ञः ॥ ६२ परममुख्ययावृत्त्याशकलशब्दवाच्यः ॥

वाभिन्नत्वादित्यआह ॥ **जडजीवेति** ॥६३॥ जडंप्रकृत्यादि ॥ ब्रह्मादयोजीवाः ॥ प्रकृतिर्महालक्ष्मीः ॥तेभ्योत्यंतविलक्षणःपरमा
त्मेत्यर्थः॥अत्रप्रमाणंतु।द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच।क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते ॥ उत्तमःपुरुषस्त्वन्यःपरमा
त्मेत्युदाहृतइतिगीता ॥ तथा ब्रह्माशिवःसुरेशाद्याःशरीरक्षरणात्क्षराः॥ लक्ष्मीरक्षरदेहत्वादक्षरातत्परोहरिरितितत्वनिर्णयोदा
हृतश्रुतिश्चतत्रक्षराक्षरपदाभ्यांजडमप्युपलक्ष्यते ॥ ननुनपरमात्मनोजगत्कर्तृत्वंयुक्तं ॥ शरीराभावात्॥ शरीरवत्त्वेऽनित्यत्वाप
त्तिरित्यतआह ॥ **ज्ञानानंदादीति** ॥६४॥ तथाचशरीरवानेवभगवान्॥ नचानित्यत्वापत्तिः ॥ ज्ञानानंदाद्यात्मकशरीरवत्त्वा
त्॥ प्राकृतदेहस्यैवविनाशवत्त्वात्॥ननुज्ञानादिदेहवत्त्वेप्यंधपंग्वादित्वेसर्वकर्तृत्वानुपपत्तिरितआह ॥ कल्याणेति ॥ सकलेंद्रिय
पाटववानित्यर्थः ॥ अत्रप्रमाणंतु तस्मादानंदचिद्देहंचिदानंदशिरोमुखं ॥ चिदानंदभुजंज्ञानसुखैकपदसांगुलिं ॥ आकेशादान
खाग्रेभ्यःपूर्णचित्सुखशक्तिकमितिबृहद्भाष्यं ॥ सज्ज्ञानानंदशीर्षोसौसज्ज्ञानानंदबाहुकः ॥ सज्ज्ञानानंददेहश्चसज्ज्ञानानंदपाद
वानितीशावास्यभाष्यं । तथा तानिरूपाणिसर्वाणिपूर्णानंदमयानितु ॥ चेतोमुखानिसर्वाणिपूर्णज्ञानस्वरूपतः ॥ मुखशब्दस्तु
सर्वस्यदेहस्याप्युपलक्षकइतिमांडूकभाष्यं ॥ विष्णोर्विमुक्तवायोश्चलोमाद्यंतुचिदात्मकमित्यैतरेयभाष्यं ॥ ब्रह्मरुद्रादिवदस्यन
पराधीनत्वमित्याह ॥ **सर्वस्वतंत्रइति** ॥६५॥ अत्रमानंतु स्वातंत्र्यपारतंत्र्याभ्यांसंभोगोनेशजीवयोरितिभाष्यं ॥ स्वतंत्रोभ
गवान्विष्णुरितितत्वसंख्यानं ॥ परमात्मसमोधिकोवान्योनास्तीत्याह॥ **एकएवेति**॥६६॥एकमेवाद्वितीयमितिश्रुतिस्तत्रमानं॥

६३ जडजीवप्रकृतिभ्योत्यंतविलक्षणः ॥ ६४ ज्ञानानंदाद्यात्मककल्याणविग्रहवान् ॥ ६५ सर्वस्वतंत्रः ॥ ६६ एकएव ॥

तथा केशवस्यसमोस्तीतिकेशवोस्म्यहमित्यपि ॥ तस्यापिपरतंत्रत्वविज्ञानंचतदुत्तमः ॥ अस्तीतियामतिस्तस्यवशादन्यस्यकस्य चित् ॥ अस्तीतिभावनेत्याद्याअवज्ञासंप्रकीर्तितेति ॥ नहरेरीश्वरःकश्चित्कदाचित्कापिविद्यते ॥ नानामानविरुद्धंहिस्वातंत्र्यंज गतःसदा ॥ स्वतंत्रोभगवान्विष्णुरेकएवनसंशयइत्येकादशतातपर्यं ॥ मत्तःपरतरंनान्यत्किंचिदस्तिधनंजयेतिगीता ॥ तात्पर्यनिर्ण येपि ॥ साम्यंनचास्यपरमेणचकेनचाप्यंमुक्तेनचक्कचिदतस्त्वभिदाकुतोस्य ॥ प्राप्येतचेतनगणैःसततास्वतंत्रैर्नित्यस्वतंत्रवपुषः परमात्परस्य ॥ नास्तिनारायणसमंनभूतंनभविष्यति ॥ यस्मिन्परेन्येप्यजजीवकोशानाहंपरायुर्नमरीचिमुख्याः ॥ जानंतिय द्गुणगणान्नरमादयोपिनित्यःस्वतंत्रउतकोस्तितदन्यईशः ॥ बलमिंद्रस्यगिरिशोगिरिशस्यबलंमरुत् ॥ बलंतस्यहरिःसाक्षान्नहरेर्बल मन्यतइत्यादि ॥ द्वादशस्तोत्रमपि ॥ हरिरेवपरोहरिरेवगुरुर्हरिरेवजगत्पितृमातृगतिः ॥ नततोस्त्यपरंजगतीड्यतमंपरमात्परतः पुरुषोत्तमतइत्यादि ॥ निरंशजीववदेकरूपोन किंतुबहुरूपइत्याह ॥ **नानारूपइति** ॥६७॥ अत्रप्रमाणंतु वासुदेवःसंकर्षणः प्रद्युम्नोनिरुद्धोहंमत्स्यःकूर्मोवराहोनारसिंहोवामनोरामोरामःकृष्णोबुद्धःकल्किरहंशतधासहस्रधाहममितोहमनंतोहंनैवैतेजायं ते नम्रियंतेनैषामनुज्ञानबंधोनमुक्तिःसर्वएतेपूर्णाअजराअमृताःपरमाःपरानंदाइतिभाष्योदाहृतश्रुतिः ॥ गीताभाष्यमपि ॥ अनंतपादंतमनंतबाहुमनंतवक्त्रंपुरुरूपमेकं ॥ एकत्रत्वनंतान्यस्यरूपाणीत्यनंतरूपः ॥ परात्परंयन्महतोमहांतं ॥ यदेकमव्य क्तमनंतरूपं ॥ असंख्याताज्ञानकास्तस्यदेहाःसर्वेपरीमाणविवर्जिताश्चेति ॥ बृहद्भाष्यमपि ॥ सएवदशधाप्रोक्तोविष्णु

६७ नानारूपः ॥

मत्स्यादिरूपकः ॥ शतंनारायणाद्यात्माविश्वाद्यात्मासहस्रकः ॥ परादिरूपोबहुधासोनंतात्माऽजितादिकइति ॥ गीतापि ॥ वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूपेति ॥ इंद्रार्जुनादिवद्भगवद्रूपाणांनविशेषइत्याह ॥ **सर्वाण्यपीति** ॥ ६८ ॥ तदुक्तंबृहद्भाष्ये ॥ विष्णोःसर्वगुणैःपूर्तिरपिमत्स्यादिरूपिणः ॥ अजेयत्वमभेद्यत्वमच्छेद्यत्वंचसर्वशः । सर्वावताररूपाणामपि चित्सुखरूपता ॥ अवताराहिविष्णोश्चसर्वेपूर्णाःप्रकीर्तिताः ॥ पूर्णंचतत्परंरूपंपूर्णात्पूर्णाःसमुद्गताः ॥ नदेशकालसामर्थ्यैःपारावर्यंकथंचनेति ॥ प्रथमस्कंधतात्पर्येपि ॥ सर्वेसर्वगुणैःपूर्णाःसर्वेभेदविवर्जिताः ॥ अन्यूनानधिकाश्चैवगुणैस्सर्वैश्चसर्वतइति ॥ काठकभाष्येपि ॥ मूलरूपश्चयोविष्णुःप्रादुर्भावादिकश्चसः ॥ गुणतःस्वरूपतोवापिविशेषंयोत्रपश्यति ॥ अत्यल्पमपिमत्वासतमोंधंयात्यसंशयमिति ॥ अनुव्याख्यानेपि ॥ अंशिनोयत्तुसामर्थ्यंयत्स्वरूपंयथास्थितिः ॥ सएवचेत्स्वरूपांशःप्रादुर्भावाहरेर्यथेति ॥ अतोनंतगुणात्मैकोभगवानेकएवतु ॥ उच्यतेसर्ववेदैश्चतेचाखिलविलक्षणाः ॥ सर्वेसर्वगुणात्मानःसर्वकर्तारएवच ॥ तथापिसविशेषाश्चविद्वद्व्युत्पत्तितोपिचेति ॥ आनंत्यंच देशतःकालतोगुणतश्च ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ कालकोटिविहीनत्वंकालानंत्यंविदुर्बुधाः ॥ देशकोटिविहीनत्वंदेशानंत्यंतथैवच ॥ गुणानामप्रमेयत्वंवस्त्वानंत्यंविदोविदुः ॥ आनंत्यंत्रिविधंनित्यंहरेर्नान्यस्यकस्यचित् ॥ तस्यसर्वस्वरूपेष्वप्यानंत्यंतुत्रिलक्षणं ॥ तथापिदेशतस्तस्यपरिच्छेदोपिविद्यते ॥ गुणतःकालतश्चैवपरिच्छेदोनकुत्रचिदिति ॥ ननुरामावतारेबलस्यकथंपरिच्छेदः ॥ तथाहिनिर्णये ॥ यावद्बलेनन्यहनत्खरादिकान्नतावतैवन्यपतत्स

६८ सर्वाण्यपिरूपाणिपूर्णानि ॥

राक्षसः ॥ अथप्रहस्यात्मबलैकदेशंप्रदर्शयन्बाणवरान्मुमोचेति ॥ अत्रखरदूषणादिवधेप्रयुक्तस्यबलस्यकुंभकर्णवधसामर्थ्याभावःप्रतीयते ॥ अतोबलस्यापूर्णत्वमितिचेन्न ॥ अल्पबलेल्पबलंप्रयोक्तव्यं ॥ नत्वधिकबलं ॥ अविवेकित्वापत्तेः ॥ अतःखरादिहननंयावद्बलप्रयोगेणालंतावत्पूर्वंप्रयुक्तं ॥ कुंभकर्णहननेत्वधिकंप्रयोक्तव्यं ॥ तावतापूर्वप्रयुक्तबलस्यनासामर्थ्यं ॥ तथैवेश्वरसंकल्पत्वान्नदोषः ॥ पटादिभिःपटाद्यवयवगुणक्रियाणांयथाभेदोनतथाभगवदवयवादीनांभगवतेत्याह ॥ **स्वरूपगुणावयवेति** ॥ ६९ ॥ परमात्मनोमत्स्यकूर्मादिस्वावतारैःकरचरणाद्यवयवैर्ज्ञानानंदादिगुणैर्जगत्सर्जनादिक्रियाभिश्चात्यंताभेदइत्यर्थः ॥ अत्रप्रमाणंतु ॥ विष्णोरेवस्वरूपाणांतद्गुणानांतथैवच ॥ तस्यैवशिरआदीनांनैवभेदोस्तिकश्चन ॥ विष्णोःक्रियाश्चयाःकाश्चिदभेदस्तैरपिध्रुवमितिबृहद्भाष्यं ॥ मत्स्यकूर्मादिरूपाणांगुणानांकर्मणामपि ॥ तथैवावयवानांचभेदंपश्यतियःक्वचित् ॥ भेदाभेदौचयःपश्येत्सयातितमएवतु ॥ पश्येदभेदमेवैषांबुभूषुःपुरुषस्ततः ॥ सर्वतःपाणिपादादिर्यतःपाण्यादिशक्तिमान् ॥ केशवादिष्वपिसर्वत्रकृष्णकेशोहियादवः ॥ अणोरणुतरैरूपैःपाणिपादादिसंयुतैः ॥ सर्वत्रसंस्थितत्वाद्वासर्वतःपाणिपादवानितिगीतातात्पर्यं ॥ इतिपरमात्मप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ अथलक्ष्मीस्वरूपमाह ॥ **परमात्मभिन्नेति** ॥७०॥ तस्याद्रव्यत्वंचवैशेषिकाधिकरणसुधायामुक्तं ॥ ईश्वरइतिपरममहत्त्वाश्रयद्रव्योपलक्षणमिति ॥ परमात्मभिन्नत्वेसतिपरमात्ममात्राधीनत्वंलक्ष्म्याःलक्षणं ॥ परमात्मनोपिपरमात्माधीनत्वात्तत्रातिव्याप्तिवारणायपरमात्मेति ॥ तावन्मात्रस्यब्रह्मादावतिव्याप्तिरित्यतउक्तं त

६९ स्वरूपगुणावयवक्रियादिभिरत्यंताभिन्नः ॥ ७० परमात्मभिन्नातन्मात्राधीनालक्ष्मीः ॥

न्मात्राधीनत्वमिति ॥ ब्रह्मादेर्लक्ष्मीपरमात्मोभयाधीनत्वेनपरमात्ममात्राधीनत्वाभावान्नातिव्याप्तिः ॥ ननुब्रह्मादेरस्वतंत्र
त्वात्परमात्माधीनत्वमस्तु ॥ नतुलक्ष्म्यधीनत्वमपि ॥ मानाभावादितिचेन्न ॥ लक्ष्म्यधीनपदवत्त्वात्तत्पुत्रत्वेनतदवरत्वात्प्रल
येतल्लयवत्त्वाच्चतदधीनत्वात् ॥ लक्ष्म्यधीनपदवत्त्वेप्रमाणंतु ॥ यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधामितिश्रुतिः ॥
द्वादशस्तोत्रंच ॥ विश्वस्थितिप्रलयसर्गमहाविभूतिवृत्तिप्रकाशनियमावृतिबंधमोक्षाः ॥ यस्याअपांगलवमात्रतऊर्जितासाश्रीर्य
त्कटाक्षबलवत्यजितंनमामि ॥ ब्रह्मेशशक्ररविधर्मशशांकपूर्वगीर्वाणसंततिरियंयदपांगलेशं ॥ आश्रित्यविश्वविजयंविसृजत्य
चिंत्याश्रीर्यत्कटाक्षबलवत्यजितंनमामि ॥ शेषाहिवैरिशिवशक्रमनुप्रधानचित्रोरुकर्मरचनंयदपांगलेशं ॥ आश्रित्यविश्वमखिलं
विदधातिधाताश्रीर्यत्कटाक्षबलवत्यजितंनमामीति ॥ बृहद्भाष्यमपि ॥ हिरण्यगर्भायेतीतायेभाव्यायश्चवर्तते ॥ सर्वेविष्णुव
शानित्यंविमुक्तेरप्यनंतरं ॥ तेभ्यःश्रीस्तुविमुक्तेभ्योगुणैःकोटिगुणोत्तरा ॥ विष्णोःप्रियत्वेतद्भक्तौतज्ज्ञानेचश्रियस्तुते ॥ मु
क्ताअप्यवरानित्यंसर्वेकोटिगुणेनचेतिलक्ष्म्यवरत्वेमानं ॥ ब्रह्मादीनांलक्ष्म्यांलयेप्रमाणंतुतृतीयस्कंधतात्पर्यं ॥ यमःकालोम
नुष्याणांतस्यकालःसुदर्शनः ॥ तस्यापिरुद्रस्तत्कालोब्रह्मादुर्गापितस्यच ॥ साब्रह्मप्रलयेदेवीवर्ततेचक्ररूपिणीति ॥ प्राणस्तेज
सितेजःपरस्यांदेवतायामितिश्रुतिः ॥ प्राणस्यतेजसिलयोमार्गमात्रमुदाहृतमितिभाष्यं ॥ ब्रह्मणोलक्ष्मीपुत्रत्वेमानंतु नारायणा
ख्यःपरमःशेतेलक्ष्म्यान्वितोलये ॥ सएवपुरुषाख्यंतुद्वितीयंरूपमात्मनः ॥ कृत्वारमायांपुरुषनामानंचचतुर्मुखमित्येकादशता
त्पर्यं ॥ व्यूढश्चतुर्धाभगवान्सएकोमायांश्रियंसृष्टिविधित्सयार ॥ रूपेणपूर्वेणसवासुदेवनाम्नाविरिंचंसुषुवेथसातइत्यादिनि

र्णये ॥ ननुब्रह्मादिवल्लक्ष्म्याःपरमात्माधीनत्वेसंसारित्वापत्तिरित्यतआह ॥ परमात्मवदिति ॥ ७१ ॥ ननुपरमात्मनो नित्यमुक्तत्वंनामकिं ॥ तत्रप्रमाणंवाकिमितिचेदुच्यते ॥ अविद्याचैवविद्याचगुणास्सत्वादिकाअपि ॥ देहोत्पत्तिःसुखंदुःखं सर्वमेतन्मदिच्छया ॥ अतोहंबंधमोक्षाभ्यांराहितोनित्यमेवतु ॥ मुक्तशब्दोदितोबंधराहित्यान्नविमोक्षतः ॥ मुक्तस्यतुनमेमो क्षोबंधाभावात्कथंचन ॥ मुक्तइत्यपिनामैतद्दीप्यतेसौदिवाकरः ॥ नित्यमुक्तत्वतोविष्णुर्मुक्तनामासदोदितः ॥ अबद्धत्वादमो क्षोपिदीप्यतेसौरविर्यथेत्येकादशतात्पर्ये ॥ लक्ष्म्यानित्यमुक्तत्वेतु भाष्यंप्रमाणं ॥ यथाश्रीर्नित्यमुक्तापिप्राप्तकामापिसर्वदा ॥ उपास्तेनित्यशोविष्णुमेवंभक्तोहरेर्भवेदिति ॥ अनादिकालेभगवत्संबंधित्वाद्युज्यतेनित्यमुक्तत्वंतस्याः ॥ द्वावेतावनादिनित्या वनादियुक्तौनित्यमुक्तावनादिकृतावित्यादि ॥ संसारानुपक्रमात्स्वतएवामृतत्वंतस्याः ॥ द्वौवावसृत्यनुपक्रमौ प्रकृतिश्चपर मश्च द्वावेतौनित्यमुक्तौ नित्यौचसर्वगतौच तौज्ञात्वाविमुच्यतइति ॥ ननुलक्ष्म्याःस्त्रीत्वात्कःपतिः परमात्मनोवापुंस्त्वात्का भार्येत्यतआह ॥ परमात्मेति ॥ तदुक्तंगीतातात्पर्ये ॥ उपासितासामुक्तिदासद्यएवसर्वस्येशानाजगतोविष्णुपत्नी ॥ याश्री र्लक्ष्मीश्चपलाचांबिकेतिह्रीश्चेत्युक्तासंविदग्र्यासुविद्येति ॥ गीताभाष्येपि ॥ प्रकृतीद्वेतुदेवस्यजडाचैवाजडातथा ॥ अव्यक्ता ख्याजडासाचसृष्ट्याभिन्नाष्टधापुनः ॥ अवरासाजडाश्रीश्चपरेयंधार्यतेतया ॥ चिद्रूपासात्वनंताचअनादिनिधनापरा ॥ नारा यणस्यमहिषीमातासाब्रह्मणोपिहीति ॥ भाष्येपि ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यौ अहोरात्रेपार्श्वे नक्षत्राणिरूपमिति ॥ ननुलक्ष्मी

---

७१ परमात्मवन्नित्यमुक्तातद्भार्यानानारूपा ॥

परमात्मनोर्नित्यमुक्तत्वेनपरस्परसंभोगेनसुखाभिव्यक्तेरभावात्पतिभार्यारूपत्वमयुक्तं ॥ परमात्मनःस्वरमणत्वाच्चेतिचेदुच्यते॥ परमात्मनःस्वरमणत्वेपिलक्ष्म्यामनुग्रहेणस्वस्त्रीरूपेणतत्रप्रविश्यरूपांतरेणरतिःसंभवत्येव ॥ तदुक्तमैतरेयभाष्ये ॥ प्रादुर्भावस्थितंरूपंयच्चभूमौपुमात्मकं ॥ विष्णोस्तदपिदेवीषुस्थितंस्त्रीरूपकात्मना ॥ एवमन्योन्यतोविष्णुरतःस्वस्मिन्नवान्यतः ॥ रमयारममाणोपितत्स्थेनैवस्त्रियात्मना ॥ रमतेनान्यतःक्वापिरतिर्विष्णोःसुखात्मनः ॥ रमयारमणंतस्माद्रमायारतिपात्रता॥ नैवास्यारतिदातृत्वंविष्णोर्नह्यन्यतोरतिरिति ॥ लक्ष्मीःपरमात्मवद्बहुरूपेत्याह ॥ नानारूपेति ॥ तदुक्तंबृहद्भाष्ये ॥ श्रीर्भूर्दुर्गाभृणीह्रीश्चमहालक्ष्मीश्चदक्षिणा ॥ सीताजयंतीसत्याचरुक्मिणीत्यादिभेदितेति ॥ तत्रदक्षिणामूर्तौसुखेविशेषोस्ति ॥ तदुक्तमेकादशतात्पर्ये ॥ सर्ववेदाभिमानिन्योदेव्योलक्ष्मीस्ततोधिका ॥ वेदाभिमानिनीसाक्षात्साविष्णोरूर्ववस्थिता ॥ यज्ञाख्यासैवविष्णोस्तुयातूरस्थलमाश्रिता ॥ हरिणारतियोगस्थादक्षिणाख्यापिसैवतु ॥ उत्तरोत्तरतःसातुविशिष्टादक्षिणासुखइति ॥ निर्णयेपि ॥ ब्रह्माणमेवोत्तममाहसोपिवेदात्मिकांप्रकृतिंविष्णुपत्नीं ॥ सैकादेवीबहुरूपाबभाषेयुक्तायदाहंज्ञेननारायणेन ॥ यज्ञक्रियामानिनीयज्ञनाम्नीतदोत्तमातत्प्रवेशाच्चुतस्याः ॥ विष्ण्वाविष्टायज्ञनाम्नीतदंकस्थितासोचेकेशवोह्युत्तमोलं ॥ नतत्समश्चाभ्यधिकःकुतःस्याद्दषेसत्यंनान्यथेतिस्मभूपाः ॥ तयोक्तोहंनावतारेषुकश्चिद्विशेषइत्येवयदुप्रवीरं ॥ सर्वोत्तमोसीत्यवदंसचाहंनकेवलंमेंकगायाःश्रियोहं ॥ तदोत्तमःकिंतुयदातुसामेवामार्धरूपादक्षिणानामधेया ॥ यस्मादस्यादक्षिणतःस्थितोहंतस्मान्नाम्नादक्षिणेत्येवसास्यात् ॥ वामार्धोमेतत्प्रविष्टोयतोहिततोहंस्यामर्धनारायणाख्यः ॥ इत्येवावादी

दक्षिणाभिस्सहेतिसर्वोत्तमत्वंदक्षिणानांस्मरन्सइति ॥ ऐतरेयभाष्येपि ॥ दक्षिणाभिस्सहैवैतन्मदधस्ताज्जगत्सदा ॥ धन्याश्चर्योहमेवैकोमित्रंमेदक्षिणारमा ॥ इत्यवादीद्धरिर्भूपाधन्योसीत्युदितोमयेति नारदवचनमिति ॥ अत्रायंसंप्रदायः॥ परमात्मसंभोगेनादौसुखाभिव्यक्तिर्दक्षिणायां ॥ ततःसर्वासामनुभवः ॥ अतआदौसुखाभिव्यक्तिस्थानत्वाद्विशिष्टादक्षिणासुखइत्युक्तिरिति ॥ परमात्मपत्नीत्वेपिजांबवत्यादीनांजडदेहवत्त्वाल्लक्ष्म्याअपिजडदेहोस्तिकिंनेत्याह ॥ **परमात्मवदिति** ॥ ७२ ॥ नचपरमात्मनएवजडदेहाभावेप्रमाणाभावः ॥ अतःकथमतिदेशोलक्ष्म्याइतिवाच्यं ॥ बहूनांप्रमाणानांसद्भावात् ॥ तथाहिप्रथमस्कंधतात्पर्ये ॥ नतस्यप्राकृतामूर्तिर्मांसमेदोस्थिसंभवा ॥ सर्वेनित्याःशाश्वताश्चदेहास्तस्यपरात्मनः ॥ हानोपादानरहितानचप्रकृतिजाःक्वचिदिति ॥ चतुर्थस्कंधतात्पर्यमपि ॥ पंचभूतात्मकंदेहंविष्णोःपश्यंत्ययोगिनः ॥ तथानयोगिराद्धांतोज्ञानदेहोयतोहरिरिति ॥ निर्णयेपि ॥ प्रादुर्भावाहरेःसर्वेनैवप्राकृतदेहिनइति ॥ ऐतरेयभाष्येपि ॥ स्तंभाद्धानरदेहाद्धानतस्यप्राकृतीतनुरिति ॥ लक्ष्म्याःप्राकृतदेहराहित्यमुक्तंतत्वनिर्णये ॥ ब्रह्माशिवःसुरेशाद्याःशरीरक्षरणात्क्षराः ॥ लक्ष्मीरक्षरदेहत्वादक्षरातत्परोहरिरिति ॥ गीतातात्पर्येपि ॥ ब्रह्मरुद्रादयःसर्वेशरीरक्षरणात्क्षराः ॥ श्रीरक्षरात्मेत्युदितानित्यचिद्देहकायतइति ॥ ननुकृष्णावतारेप्राकृतदेहंपरित्यज्यवैकुंठगमनस्यपुराणादावुक्तेःप्रत्यक्षसिद्धत्वाच्चेदमयुक्तमितिचेन्न ॥ तच्छरीरस्यासुरमोहनायतदानींकल्पितत्वेनकृष्णदेहत्वाभावात् ॥ तदुक्तमैतरेयभाष्ये । कृ

७२ परमात्मवज्जडदेहरहिता ॥

ष्णोह्यत्यक्तदेहोपित्यक्तदेहवदेवच ॥ लोकानांदर्शयामासस्वरूपसदृशाकृतिं ॥ येनरूपेणकंसादीञ्जघ्नेतद्रूपमेवहि ॥ पूज्यते
द्यापिशर्वाद्यैर्निर्मितायादवाकृतिः ॥ स्वर्गारोहणकालेतुजनास्तेनैवमोहिताइति ॥ निर्णयेपि ॥ मोहयित्वासुरानंधंतमःप्राप
यितुंप्रभुः ॥ चिदानंदैकदेहोपित्यक्तंदेहमिवापरं ॥ सृष्ट्वास्वदेहोपमितंशयानंभुव्यगाद्दिवमिति ॥ नन्वेवंपरमात्मनःप्राकृतदेह
संबंधोऽवर्जनीयः ॥ नियामकत्वेनब्रह्मादिशरीरेषुविद्यमानत्वात् ॥ अन्यथा तत्सृष्ट्वातदेवानुप्राविशदित्यादिश्रुतिविरोधादिति
चेन्न ॥ अन्याभिमानरहितेप्राकृतशरीरेऽवस्थानाभावस्यविवक्षितत्वात् ॥ ब्रह्मादिशरीरेशरीराभिमानिनांब्रह्मरुद्रादिजीवानां
सद्भावात् ॥ अतोनविरोधः ॥ तदुक्तमेकादशतात्पर्ये ॥ अन्याभिमतदेहेषुप्रविष्टःसर्वदाहरिः ॥ नान्यानभिमतोदेहोविष्णोर
स्तिकदाचन ॥ अन्याहंभावयुग्देहएवासौहरिरास्थितः ॥ नतदन्येषुदेहेषुक्वचित्तस्यप्रवेशनमिति ॥ सप्तमतात्पर्येपि ॥ जीवान
भिमतेदेहेनविष्णुर्जीववत्स्थितः ॥ अतश्चादेहउद्दिष्टःपरमात्मासनातनइति ॥ अतएवान्यानभिमतशरीरप्रवेशोनसीतायाः ॥
स्वसृष्टप्रतिकृतौस्वांशस्यप्रवेशार्थंशक्रस्यप्रवेशितत्वात् ॥ तदुक्तंनिर्णये ॥ सृष्ट्वात्मनःप्रतिकृतिंप्रययौचशीघ्रंकैलासमर्चितपदा
न्यवसच्छिवाभ्यां ॥ तस्यास्तुतांप्रतिकृतिंप्रविवेशशक्रोदेव्याश्चसन्निधियुतांव्यवहारसिद्ध्याइति ॥ लक्ष्म्याःगुणपूर्णत्वसिद्ध
येपरमात्मवत्सर्वशब्दवाच्यत्वमतिदिशति ॥ तद्वदिति ॥ ७३ ॥ परमात्मन्येवप्रसिद्धनारायणादिशब्दान्विहायसर्वशब्द
वाच्येत्यर्थः ॥ तदुक्तमैतरेयभाष्ये ॥ श्रीरप्यखिलशब्दोक्ताविष्णुवन्नतुमुख्यतः ॥ तस्मादमितनामानावमितामितनामवत् ॥

७३ तद्वत्सर्वशब्दवाच्या ॥

श्रीश्चवायुश्चविष्णुस्तुमुख्योक्तेरमिताभिधइति ॥ ऋग्भाष्येपि ॥ देवतासर्वविद्यानांस्वयंनारायणःप्रभुः ॥ ऋतेतत्रप्रसिद्धाश्चदे
वताश्रीस्तथात्रच ॥ ऋतेप्रसिद्धाब्रह्मैवततस्तेनक्रमेणच ॥ पूर्वप्रसिद्धवर्जंतुशक्रांतादेवतामताइति ॥ ननुलक्ष्म्याःपूर्णगुणत्वे
परमात्मनात्यंतसाम्यापत्तिरित्याशंक्यदेशकालाभ्यामेवपूर्णत्वंनतुगुणतइत्याह ॥ देशकालाभ्यामिति ॥ ७४ ॥ एवकारेण
गुणतोव्याप्तत्वंनिराचष्टे ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐसमनाचासृत्युपक्रमादमृतत्वंचानुपोष्यॐ ॥ देशतःकालतश्चव्याप्त्या
समो नापरमपुरुषोयस्यास्सासमनेति ॥ गीतातात्पर्येपि ॥ देशतःकालतश्चैवगुणतश्चत्रिधाततिः ॥ सासमस्ताहरेरेवनह्य
न्येपूर्णसद्गुणाइति ॥ दशमतात्पर्येपि ॥ द्वावेवनित्यमुक्तौतुपरमःप्रकृतिस्तथा ॥ देशतःकालतश्चैवसमव्याप्तावुभावजौ ॥ ता
भ्यामुभययोगाभ्यांजायंतेपुरुषःपरइति ॥ नन्वेवंपरमात्मनोमहतोमहत्त्वंनस्यात् ॥ लक्ष्म्याःदेशकालाभ्यांपरमात्मनासमप
रिमाणत्वेनतदपेक्षयामहत्परिमाणस्यपरमात्मन्यसंभवात् ॥ तथाचमहतोमहीयानितिविरोधः ॥ नचगुणैरेवमहतोमहत्त्वमस्त्वि
तिवाच्यं ॥ तर्ह्यणोरणीयानित्यत्रापिगुणतएवाल्पत्वप्रसंगात् ॥ अतोऽणोरणुत्वंमहतोमहत्त्वंचपरिमाणतएवेतिवाच्यं ॥ तत्कथं
परमात्मनइतिचेदुच्यते ॥ परमात्मनोलक्ष्म्यव्याकृताकाशापेक्षयापिमहत्त्वमस्त्येव ॥ नचलक्ष्म्याःसमव्याप्तत्वविरोधः ॥ अव्या
कृताकाशव्याप्तेःसमत्वेपिततोधिकमहत्त्वस्यस्वस्मिन्नेवसत्त्वात् ॥ गेहव्याप्तप्रकाशवतोपिदीपस्यघटप्रक्षेपेणाल्पप्रकाशेस्वरूपे
व्याप्तत्ववत् ॥ तथाहिश्रुतिः ॥ कस्मिन्भगवःप्रतिष्ठितइति ॥ स्वेमहिम्नीतिहोवाचेति ॥ तैत्तिरीयभाष्येपि ॥ स्वव्यापीचजग

७४ देशकालाभ्यामेवपरमात्मनासमव्याप्ता ॥

व्यापीनित्यैश्वर्यात्सईश्वरइति ॥ इतिलक्ष्मीप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानींजीवस्वरूपंनिरूपयति ॥ अज्ञानादीति ॥७५॥ आदि शब्देनदुःखभयमोहादिपरिग्रहः ॥ तथाचाज्ञानादिदोषयुक्तत्वमेकंलक्षणं ॥ संसारित्वमपरंलक्षणं ॥ ननुब्रह्मवाय्वोःकथमज्ञाना दिदोषः ॥ तस्मादेकोवायुरेवधर्मेभागवतेस्थितः ॥ लक्ष्मीःसरस्वतीचेतिपरशुक्तत्रयंस्मृतं ॥ भीमःसमस्तंप्रतिभाबलेनजानन्स्त्रे हंत्वद्वितीयंकनिष्ठइतिनिर्णयविरोधात् ॥ तथा एवंप्रलयकालेपिप्रतिभातपरावरः ॥ मुख्यवायुर्नित्यसमइत्यनुव्याख्यानविरो धात् ॥ अतिरोहितविज्ञानाद्वायुरप्यमृतःस्मृतइतीशावास्यभाष्यविरोधात् ॥ विरिंचेतरेषांतिरोहितलाभोवेतिटीकावाक्यवि रोधात् ॥ अज्ञानाभिभवास्पृष्टौवायुर्नारायणश्चतौ ॥ तदन्येचेतनास्सर्वेप्राणाश्चात्मानएवच ॥ अज्ञानाभिभवस्पृष्टास्तस्मात्ते ह्यधमाःस्मृताइत्यैतरेयभाष्यविरोधात् ॥ ब्रह्मातुनिरभीमानाच्छरीर्यप्यशरीरवान् ॥ अनादिकालतःसर्वदोषहीनौगुणाधिका वित्यादिबृहद्भाष्यविरोधात् ॥ किंचासुरावेशनिबंधनाःसर्वेदोषाः ॥ ब्रह्मवाय्वोस्तुनासुरावेशः ॥ तदुक्तमेकादशतात्पर्ये ॥ दे वानांपुण्यपापाभ्यांसुखमेवोत्तरोत्तरं ॥ तेषांदुःखादिकंकिंचिदसुरावेशतोभवेत् ॥ प्राणस्यनासुरावेशआखणाश्मसमोहिसइ ति ॥ तथादशमतात्पर्ये ॥ अत्यल्पस्त्वसुरावेशोदेवानांचभविष्यति ॥प्राणमेकंविनासौहित्वाखणाश्मसमःस्मृतइति ॥ तथाछां दोग्यभाष्येपि ॥ यदाविदध्वसुःप्राणंविध्वस्तास्तेतथासुराः ॥ अखन्याश्मानमेवाप्यलोष्टोविध्वंसतेयथेति ॥ बृहद्भाष्येपि दैत्या स्तंवेद्धुमीप्संतेध्वस्तानेशुश्चसर्वशः ॥ पांसुपिंडोयथावज्रशिलांप्राप्यैवनश्यति ॥ तस्मादखंडशक्तिस्समुख्यवायुरुदाहृतइति ॥

७९ अज्ञानादिदोषयुक्ताः संसारिणोजीवाः ॥

तथैतरेयभाष्येपि ॥ प्राणस्यनासुरावेशआखणाश्मसमोहिसइति ॥ तस्मादज्ञानादिदोषयुक्तलक्षणंब्रह्मवाय्वोरव्याप्तमिति चेदुच्यते ॥ अज्ञानंचचतुर्वारंद्विवारंभयमेवच ॥ शोकोपितावान्नान्यत्रकदाचिद्ब्रह्मणोभवेत् ॥ यत्रवायूदपद्मादिरूपेणप्र कृतिःस्थिता ॥ एकस्तत्राबिभेद्ब्रह्माविचार्यभयमत्यगात् ॥ कालोंतकःप्रधानंचमृत्युरव्यक्तमित्यपि ॥ उच्यतेप्रकृतिःसूक्ष्माश्रीर्भू र्दुर्गेतिनामभिः ॥ सैवब्रह्मादिभयदाविष्णोश्चवशवर्तिनीतिषष्ठतात्पर्येऽज्ञानभयादेरुक्तत्वात् ॥ तथैतरेयभाष्येपि सुप्तास्तत्रय तोजीवाःसर्वेब्रह्मशिवादिकाः ॥ असुप्ताःश्रीश्चमुक्ताश्चेत्यज्ञानकार्यस्यस्वापस्योक्तेः ॥ तथा इच्छतोविष्णुयजनंब्रह्मणःसाध नास्मृतेः ॥श्रमात्तापाच्चतंदेहंत्यक्तुमिच्छाबभूवह ॥ ब्रह्मणोभाणितिवचोनिःसृतंभयतोमुखादितिबृहद्भाष्येऽज्ञानभयाद्युक्तेः ॥ सर्वेविमोहितधियस्तवमाययैवब्रह्मादयस्तनुभृतोबहिरर्थभावाइत्येकादशस्कंधभागवतेमोहाद्युक्तेः ॥ दुःखस्पृष्टंतदस्पृष्टमितिद्वे धैवचेतनं ॥ नित्यादुःखारमान्येतुस्पृष्टदुःखास्समस्तशइतितत्त्वसंख्यानेदुःखित्वोक्तेः ॥ अतोऽज्ञानादिदोषयुक्तत्वलक्षणस्य ब्रह्मादौनाव्याप्तिः ॥ तर्हिभयाद्यभावप्रतिपादकप्रमाणविरोधइतिचेन्न ॥ तेषांरुद्रादौयथाभयादिकंस्थिरंनतथाब्रह्मणीतिस्थै र्याभावप्रतिपादकत्वात् ॥ तथाह्युक्तंषष्ठतात्पर्यएव ॥ ज्ञानादिगुणपूर्णस्यब्रह्मणोपिक्षणार्धगाः ॥ भयादिकाभवंतीवकथंतस्मिं स्थिरालयाः ॥ भगवत्प्रीतयेनित्यंब्रह्मणोयेभयादयः ॥ नवृथातस्यभावःस्यात्कश्चित्तेपिक्षणार्धगाः ॥ ब्रह्मणोप्यल्पदुःखंस्यात्त दप्यनभिमानतः ॥ नत्वात्मसंबंधितयाभोगाभावात्कथंचनेति ॥ तथा अदोषःप्रायशोब्रह्मादोषवंतःक्रमात्परइतिऋग्भाष्येप्रा यःशब्देनाल्पदोषोक्तेश्च ॥ ऋजूनामेकएवास्तिपरमोत्साहवर्जनं ॥ सगुणाल्पत्वमात्रत्वान्नर्जुत्वेनविरुध्यतइत्यनुव्याख्यानेमो

क्षार्थपरमोत्साहवर्जनादिदोषाणांगुणाल्पत्वमात्रोक्तेः ॥ अज्ञानसंबंधोपिनसर्वदा ॥ किंतुचतुर्मुखशरीरस्पर्शमात्रेणबहिर्निर्गम
नमेव ॥ नतुरुद्रादिवत्तत्रस्थितिः ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ पंचपर्वात्वविद्यातुभूतेभ्योहरिणापुरा ॥ उद्धृत्यब्रह्मणिक्षिप्ता
सापुनस्तेननिःसृतेति ॥ मोहोपिब्रह्मणोनियतापरोक्षज्ञानाभावएव ॥ नतुमिथ्याज्ञानं ॥ तदुक्तमेकादशतात्पर्ये ॥ सर्वेषांब्रह्मप
दवीयोग्यानांपूर्वमेवतु ॥ अभावस्त्वापरोक्षस्यमोहोज्ञानस्यभण्यते ॥ ब्रह्मणस्त्वंशरूपेषुभारत्याज्ञानवर्जनं ॥ क्वचित्क्वचित्सर
स्वत्याअंशावतरणेष्वपीति ॥ संसारित्वलक्षणमपि भूतबंधस्तुसंसारोमुक्तिस्तेभ्योविमोचनमितिब्रह्मादिजीवसाधारणं ॥ सर्वे
पंचभिरारब्धंभूतैरीश्वरबुद्धिजैरितिभाष्योक्तेः॥ ननु सत्त्वसत्त्वमहासत्त्वसूक्ष्मसत्त्वश्चतुर्मुखइतिगीतातात्पर्येचतुर्मुखशरीरस्यशुद्ध
सात्त्विकत्वोक्तेःपांचभौतिकत्वाभावाद्ब्रह्मवाय्वोरव्याप्तमितिचेन्न ॥ पंचभूतसमूहेनजातःपूरुषउच्यते ॥ बहुत्वात्तत्रभूतानांता
वत्त्वात्तत्त्वमेकजमितिद्वितीयतात्पर्येपुरुषाख्यब्रह्मशरीरस्यपांचभौतिकत्वोक्तेः ॥ नचपुरुषश्चतुर्मुखादन्यएवेतिवाच्यं ॥ महदा
द्यंडपर्यंतःसर्गोंडेब्रह्मणस्तुयः ॥ अनुसर्गइतिप्रोक्तःपौरुषश्चेतिकथ्यतइति पूर्वश्लोकेपुरुषशब्देनब्रह्मणएवोक्तत्वात् ॥ ब्रह्मसृष्टेः
पूर्वंपुरुषांतरस्यसृष्ट्यभावाच्च ॥ नचगीतातात्पर्यविरोधइतिवाच्यं ॥ पंचभूतगतशुद्धसत्त्वभागविषयत्वोपपत्तेः ॥ तदुक्तं
तृतीयस्कंधतात्पर्ये ॥ भौतिकेनतुसत्त्वेनगूढंब्रह्मणआंडजं ॥ रूपंतत्रापितुतमःशतांशेनप्रकीर्तितं ॥ तज्जोरुद्रस्ततस्त्वेवमिंद्रादी
नांपुनर्जनिरिति ॥ एकादशतात्पर्येपि ॥ चिदानंदशरीरस्तुप्रविष्टोंडेहरिःस्वयं ॥ तन्नाभेर्भूतदेहोभूत्पद्मादपिचतुर्मुखइति ॥
नन्वेवंब्रह्मांडाद्बहिर्विद्यमानयोर्महत्तत्त्वाभिमानिनोरव्याप्तिः ॥ तद्देहस्यपंचभूतोत्पत्तेःप्रागेवमहत्तत्त्वाज्जातत्वादितिचेन्न ॥ स्थू

लशरीरस्यतथात्वेपिलिंगशरीरेभूतसूक्ष्माणांसत्त्वात् ॥ यद्वाप्रकृतिबंधएवसंसारः ॥ सचब्रह्मादिसर्वजीवसाधारणइतिनकोपि दोषः ॥ नचैवंमुक्तजीवेष्वव्याप्तिरितिवाच्यं ॥ तेषामपिपूर्वप्रकृतिबंधवत्त्वात् ॥ अतोनाव्याप्तिः ॥ तेचजीवाःकतीत्याकांक्षाया माह ॥ **असंख्याकाइति** ॥७६॥ तेनैकजीववादिनोनिराकृताः ॥ अत्रप्रमाणंतु ॥ अनागताअतीताश्चयावंतःसहिताःक्षणाः ॥ अतीतानागताश्चैवयावंतःपरमाणवः ॥ ततोप्यनंतगुणिताःजीवानांराशयःपृथक् ॥ परमाणुप्रदेशेपिह्यनंताःप्राणिराशयइति तत्त्वनिर्णयोक्तिः ॥ नकेवलंसर्वेपिमिलित्वानंताः ॥ किंतुगणशोपीत्याह ॥ **गणशइति** ॥ ७७ ॥ ब्रह्मपदयोग्याऋजवोनाम जीवाअनंताः ॥ एवंगरुडरुद्रादिपदयोग्याअपिजीवाअनंताः ॥ एवंकलिकालनेमिविप्रचित्त्यादिपदयोग्याआसुराअपिप्रत्येक मनंताइत्यर्थः ॥ तदुक्तंनिर्णये ॥ ब्रह्मत्वयोग्याऋजवोनामदेवाःपृथग्गणाः ॥ तैरेवाप्यंतत्पदंतुनैवान्यैःसाधनैरपि ॥ एवंसर्वप दानांतुयोग्याःसंतिपृथग्गणाः ॥ असुराःकलिपर्यंताएवंदुःखोत्तरोत्तराः ॥ कलिर्दुःखाधिकस्तेषुतेप्येवंब्रह्मवद्गणाः ॥ तथान्ये प्यसुराःसर्वेगणायोग्यतयासदेति ॥ अनंतानामपिजीवानांविभागमाह ॥ **तेचेति** ॥ ७८ ॥ त्रिविधान्निर्दिशति ॥ **मुक्तियो ग्याइति** ॥ ७९ ॥ ननुमुक्तिगतानांप्राप्तांधतमसानांचयोग्यत्वाभावाद्विभागन्यूनतेतिचेन्न ॥ योग्यतायाजनितफलेजनिष्य माणफलेपिसत्त्वेनाधिक्यासंभवात् ॥ मुक्तियोग्यविभागमाह ॥ **तत्रमुक्तियोग्याइति** ॥८०॥ ननुगंधर्वादीनामपिमुक्तियोग्या

---

७६ असंख्याकाः ॥ ७७ गणशोप्यनंताः ॥ ७८ तेचत्रिविधाः ॥ ७९ मुक्तियोग्यानित्यसंसारिणस्तमोयोग्याश्चेति ॥ ८० तत्रमुक्तियोग्याःपंचविधाः ॥ देवर्षिपितृचक्रवर्तिमनुष्योत्तमभेदात् ॥ ब्रह्मवाय्वादयोदेवाः ॥ ऋषयोनारदाद्याः ॥ पितरश्चिराः ॥ रघ्वंबरीषादयश्चक्रवर्त्तिनः ॥ मनुष्योत्तमास्तुद्विविधाः ॥

नांसद्भावात्कथंपांचविध्यमितिचेन्न ॥ तेषांमुक्तेष्वंतर्भावात् ॥ तथाहि ॥ गंधर्वाद्विविधाः ॥ देवगंधर्वामनुष्यगंधर्वाश्चेति ॥ तत्रदे
वगंधर्वादेवशब्देनगृहीताः ॥ मनुष्यगंधर्वामनुष्यपदेनगृहीताः ॥ उर्वश्याद्यप्सरसश्चारणादयोपिदेवशब्देनगृहीताइतिनविरो
धः॥अत्रदेवर्षिपितृपनराइतिमुक्तास्तुपंचधेतितत्त्वसंख्यानं तट्टीकाच मानं॥जीवानांत्रित्वेतु त्रिविधाजीवसंघास्तुदेवमानुषदान
वाः ॥ तत्रदेवामुक्तियोग्यामानुषेषूत्तमास्तथा॥ मध्यमामानुषायेतुसृतियोग्याःसदैवहि॥ अधमानिरयायैवदानवास्तुतमोलयाइ
तिनिर्णयोक्तिर्मानं ॥ गीतातात्पर्यमपि ॥ स्वभावतस्त्रिधाजीवाउत्तमाधममध्यमाः ॥ उत्तमास्तत्रदेवाद्यामर्त्यामध्यास्तुमध्य
माः ॥ अधमाअसुराद्याश्चनैषामस्त्यन्यथाभवः ॥ उत्तमामुक्तियोग्यास्तुसृतियोग्यास्तुमध्यमाः ॥ अपरेंधतमोयोग्याःप्राप्तिः
साधनपूर्तितइति ॥ नन्वेकगुणोपासकानांतृणजीवानांमुक्तियोग्यत्वात्कुत्रांतर्भावइत्याशंक्यमनुष्योत्तमेष्वंतर्भावइतिवक्तुंमनु
ष्योत्तमविभागमाह ॥मनुष्योत्तमास्त्विति ॥ नचैकगुणोपासकसद्भावेतस्यमनुष्योत्तमत्वेतृणजीवत्वेचनप्रमाणमितिवाच्यं ॥ ब
हूनांसद्भावात् ॥ तथाहि ॥ आत्मेत्येवपरंदेवमुपास्यहरिमव्ययं ॥ केचिदत्रैवमुच्यंतेनोत्क्रामंतिकदाचनेतिभाष्यं ॥ तथा ॥ केचि
त्तुमानुषामुक्तिमनुत्क्रम्यैवदेहतः ॥ देहपातेतुदेहस्यदोषान्भुक्त्वैवसर्वशः ॥ मरणोच्छूनतादींश्चस्वकीयारब्धकर्मजान् ॥ देहेक्षी
णेतुगच्छंतिद्दृष्ट्वाविष्णुमनुज्ञया ॥ पुनरत्रैवतिष्ठंतिनित्यानंदैकभागिनइतिबृहद्भाष्यं ॥ आब्रह्मस्तंबपर्यंतमसारंचाप्यनित्यकमिति
भाष्येस्तंबशब्दस्तृणजीववाचकः ॥ अव्यक्तादितृणांतास्तुविप्रुडानंदभागिनइतिचभाष्यं ॥ चतुर्गुणोपासकाइति॥ ८१ ॥

८१ चतुर्गुणोपासकाएकगुणोपासकाश्चेति ॥ तृणजीवाएकगुणोपासकाः ॥ तद्व्यतिरिक्ताश्चतुर्गुणोपासकाः ॥

अत्र आनंदोज्ञःसदात्मेतिह्युपास्योमानुषैर्हरिरितिनिर्णयोक्तिर्मानं ॥ सच्चिदानंदआत्मेतिमानुषैस्त्वित्यणुभाष्यमपि ॥ नित्यसंसा
रिस्वरूपमाह ॥ **नित्यमिति** ॥ ८२ ॥ तदुक्तंनिर्णये ॥ मध्यमामानुषायेतुसृतियोग्याःसदैवहीति ॥ मनुष्येषुनित्यसंसारिव
दैत्यादिष्वस्तिकिं नेत्याह ॥ **तेचमध्यमेति** ॥ ८३ ॥ भाष्यादौसर्वत्रमनुष्येष्वेवनित्यसंसारिणांमुक्तत्वेनासुरादावनुक्तेरिति
भावः ॥ चोष्कूयतेविशइंद्रोमनुष्यानितिश्रुतेश्च ॥ तमोयोग्यान्विभजति ॥ **तमोयोग्यास्त्विति**॥ ८४ ॥ अत्रदैत्यरक्षःपि
शाचकाः ॥ मर्त्याधमाश्चतुर्धैवतमोयोग्याःप्रकीर्तिता इतितत्त्वसंख्यानंमानं ॥ मायावादिनस्तुसर्वेपिजीवाःपरस्परंपरमात्मना
चाभिन्नाः ॥ भेदप्रत्ययस्तुभ्रमइतिमन्यंते ॥ तान्निराकरोति ॥ **सर्वेति** ॥ ८५ ॥ परमात्मनेत्युपलक्षणं ॥ लक्ष्म्याजडेभ्यश्चे
तिद्रष्टव्यं ॥ अभेदस्तुप्रमाणाभावात्प्रमाणविरुद्धत्वाच्चायुक्तइतिभावः ॥ अधिकंतुसुधान्यायामृतादौद्रष्टव्यं ॥ रामानुजास्तु ॥
ब्रह्मादिजीवानांतारतम्यंसंसारएव ॥ मुक्तौतुसर्वेपरस्परंपरमात्मनाचसमाः ॥ निरंजनःपरमंसाम्यमुपैतीतिश्रुतेरित्याहुः ॥ ता
र्किकास्तु ॥ मुक्त्यनंतरंसर्वेपिजीवाःसमाः ॥ एकविंशतिदुःखध्वंसरूपमुक्तौविशेषाभावात् ॥ परमात्मातुसर्वकर्ता ॥ सर्वज्ञः ॥
अतःसर्वोत्तमइत्याहुः ॥ तान्निराह ॥ **संसारेमुक्तौचेति** ॥ ८६ ॥ तदुक्तंनिर्णये ॥ मुक्तानांचनहीयंतेतारतम्यंचसर्वदेति ॥
निर्दोषत्वंतारतम्यंमुक्तानामपिचोच्यतइतिच॥ बृहद्भाष्येपि ॥ मानुषादिविरिंचांतंसुखंमुक्तौशतोत्तरमिति॥ षट्प्रश्नभाष्येपि॥

८२ नित्यंसुखदुःखमिश्रानित्यसंसारिणः ॥ ८३ तेचमध्यममनुष्याएवासंख्याताः ॥ सर्वदास्वर्गभूनिरयचारिणः ॥ ८४ तमोयोग्यास्तुच
तुर्विधाः ॥ दैत्याराक्षसाःपिशाचामनुष्याधमाश्चेति ॥ ८५ सर्वेपिजीवाःपरस्परंपरमात्मनाचभिन्नाः ॥ ८६ संसारेमुक्तौचतारतम्योपेताः ॥

विष्णोःप्राणस्ततःश्रद्धेत्यारभ्य ततःशनिःपृथिव्यात्माकर्मात्मापुष्करस्ततः ॥ क्रमाद्गत्यवराएतेमुक्ताःसर्वगुणैरपीति ॥ ईशावास्यभाष्येपि॥मानुषादिविरिंचांतंतारतम्यंविमुक्तिगमिति॥तैत्तिरीयभाष्यमपि॥ कामःसंकल्पआनंदोमुक्तानांतारतम्यतइति॥ अनुव्याख्यानमपि ॥ मुक्तानांतारतम्यंचमानैरुक्तैर्नचाल्यते ॥ तारतम्यंतुमुक्तौतुतेनैवाध्यवसीयते ॥ तारतम्यंनचेन्मुक्तौकुतः कुर्युःशुभंपुनरिति ॥ योगिनांभिन्नलिंगानामाविर्भूतस्वरूपिणां॥ प्राप्तानांपरमानंदंतारतम्यंसदैवहीतिगीताभाष्यं ॥ मुक्ताःप्राप्यपरंविष्णुंतद्देहंसंश्रिताअपि ॥ तारतम्येनतिष्ठंतिगुणैरानंदपूर्वकैः॥ मुक्तावपितदन्येयेभूपाच्छतगुणावराइतिगीतातात्पर्य ॥ परमंसाम्यमुपैतीत्युक्तेर्गतिरुक्तागीताभाष्ये ॥ साम्यवचनंतुप्राचुर्यविषयंदुःखाभावविषयंच॥ तथाचोक्तं॥ दुःखाभावःपरानंदो लिंगभेदःसमामताः ॥ तथापिपरमानंदोज्ञानभेदात्तुभिद्यतइति ॥ बृहद्भाष्येपि ॥ आनंदेनविनानैवभोगेनविषयेणच ॥ सर्वेतेब्रह्मणस्तुल्याआधिपत्येनचैवहीति ॥ आधिपत्यमृतेचैवआनंदेनचकर्मणा ॥ सर्वेतेब्रह्मणस्तुल्याभोगेनविषयेणचेति ॥ भाष्यमपि ॥ बहवःसूर्यकायद्वत्सूर्यस्यसदृशाजले ॥ एवमेवात्मकालोकेपरात्मसदृशामताइति ॥ अनुव्याख्यानेपि ॥ जीवस्यतादृशत्वंचचित्त्वमात्रंनचापरं ॥ तावन्मात्रेणचाभासोरूपमेषांचिदात्मनामिति ॥ **जीवाभिमानिनइति** ॥ ८७ ॥ मुक्तियोग्यजीवाभिमानीचतुर्मुखः नित्यसंसारिजीवाभिमानीपुरंजनः तमोयोग्यजीवाभिमानीकलिरित्यर्थः ॥ तदुक्तंचतुर्थ स्कंधतात्पर्ये ॥ देवजीवाभिमानीतुब्रह्मैवतुचतुर्मुखः ॥ मानुषाणांतुजीवानामभिमानीपुरंजनः ॥ सतुराजाहरेःपुत्रश्चासुराणां

८७ जीवाभिमानिनोब्रह्मादयः ॥

कलिः स्वयमिति ॥ इतिजीवप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानीमव्याकृताकाशंनिरूपयति ॥ **सृष्टिप्रलययोरि ति** ॥ ८८ ॥ आकाशस्ययथाद्रव्यत्वंतथोक्तमधस्तात् ॥ अत्रादिग्रूपत्वमव्याकृताकाशस्यलक्षणं ॥ सृष्टिप्रलययोरित्यादितुत त्स्वरूपकथनं ॥ सृष्टिकालेविकारः प्रलयकालेविनाशश्चनास्ति ॥ अतएवाव्याकृतमितिनामेत्यर्थः ॥ यद्यपिपराधीनविशेषावा प्तिलक्षणोत्पत्तिः प्रलयेतन्नाशश्चाव्याकृताकाशस्यापि वियदधिकरणानुव्याख्यानेप्रतिपादितं ॥ तथापिमूर्तसंबंधपरतं त्रविशेषयुक् ॥ खमेवोत्पत्तिमन्नामेति ॥ तथापिप्रकृत्यादिवदन्याकारेणविकारोनास्ति ॥ आकाशोनीलिमोदेतिनप्रदेशःकथं चनेतिश्रुतेः ॥ तथाऽव्याकृतंहिगगनंसाक्षिगोचरं ॥ प्रदेशइतिविज्ञेयोनित्यंनोत्पद्यतेहितादित्यनुव्याख्यानोक्तेश्च ॥ अतएवदि ग्रूपत्वमप्येतत्प्रमाणसिद्धं ॥ तथाप्रकृत्यधिकरणसुधायामपि ॥ साक्षिसिद्धमेवगगनंतद्भागाएवदिशोनद्रव्यांतरमित्युक्तेः ॥ नन्वा काशादिपंचभूतस्यतामसाहंकारकार्यत्वान्नविकाराभावइत्यतआह ॥ **भूताकाशभिन्नमिति** ॥८९॥ तथाचात्मनआकाशः संभूतइत्याद्युत्पत्तिवाक्यस्यभूताकाशविषयत्वमेवनाव्याकृताकाशविषयत्वमुक्तप्रमाणादेवेतिभावः ॥ पुनस्तत्स्वरूपमाह ॥ एक मित्यादि ॥ नन्वाकाशस्यस्वगतत्वमयुक्तं ॥ आत्माश्रयप्रसंगादितिचेन्न ॥ प्रमेयत्वेप्रमेयत्ववत्स्वगतत्वस्येहगगनमितिप्रत्यय सिद्धत्वात् ॥ तदुक्तमनुव्याख्याने ॥ ईशोदेशश्चकालश्चस्वगताएवसर्वदेति ॥ दिशःप्राच्यादिव्यवहारआदित्योदयोपाधिकः ॥ नतुस्वाभाविकइतितार्किकाः ॥ तान्निराकरोति ॥ **प्राच्यादीति** ॥९०॥ ननुदिशःप्राच्यादित्वंस्वाभाविकं ॥ अन्यथायस्ययादिक्

---

८८ सृष्टिप्रलययोर्विकारशून्यादिगव्याकृताकाशं ॥ ८९ भूताकाशभिन्नं । एकंनित्यंव्याप्तंस्वगतंच ॥ ९० प्राच्यादिस्वाभाविकावयवोपेतंच ॥

प्राची सादिगंतरगतस्यापिप्राचीस्यात् ॥ स्वाभाविकस्यानपायात् ॥ तथाचादित्योदयेनैवप्राच्यादित्वमितिचेन्न ॥ तस्यस्वाभाविकत्वात् ॥ तथाहि॥ किंदिक्स्वरूपमेवादित्योदयाद्युपाधिकृतं उतप्राच्यादिकं अथप्राचीत्वादिकं किंवाप्राच्यादिव्यवहारः ॥ नाद्यः॥ अंधकारेदिक्प्रतीतेः॥ तत्रादित्योदयरूपोपाधेरभावात्॥ नद्वितीयः ॥ अंधकारेपिदिग्विशेषप्रतीतेः ॥ अन्यथामूर्तांतरावष्टब्धभागपरित्यागेनभागांतरेकरप्रसारणादिकंनकुर्यात्॥ नतृतीयः॥ प्राच्यादित्वस्यदिक्स्वरूपत्वेनांधकारेदिग्विशेषप्रतीतौप्राच्यादित्वस्यापिभानात्॥नचतुर्थः ॥ आदित्योदयाद्युपाध्यभावेपिबहुषुप्राच्यादिव्यवहारस्यदर्शनात्॥ तथाहि॥ वैकुंठानंतासनगतपरमात्मपुरयोःप्राच्यादिभागेषुजयाद्याःप्राणाद्याश्चद्वारपाःश्रूयंते॥ तत्रादित्योदयाभावात्॥ तदुक्तंछांदोग्यभाष्ये ॥ प्राणाभिमानीचक्षुश्चसूर्यएवह्युदाहृतः ॥ तेजोन्नाद्यभिमानीचप्राग्द्वाराधिपतिर्हरेः॥ दक्षिणाधिपतिःसोमोव्यानःश्रोत्राभिमानवान् ॥ यशोलावण्यरूपश्चपश्चिमद्वारपस्तथा॥ वागपानात्मकोवह्निर्ब्रह्मतेजोन्नदेवता ॥ उत्तरद्वारपस्त्विंद्रःसमानोमनआत्मकः ॥ कीर्त्यैश्वर्यात्मकोनित्यमूर्ध्वद्वारपएवच॥ परस्यब्रह्मणस्त्वेतेद्वारपाःपंचकीर्तिताः ॥ द्वारपाहृदयेचैवविष्णुलोकेचसर्वदा॥ आंतरद्वारपाह्येतेजयाद्याबाह्यतःस्मृताइति ॥ नचवैकुंठलोकादावपिसूर्योदयोस्त्येव॥ अन्यथांधकारेणगमनाद्यनुपपत्तेः ॥ अतःसूर्योदयनिमित्तमेवप्राचीत्वादिकमितिवाच्यं॥ सकृद्दिवाहास्यभवतीतिश्रुतिविरोधप्रसंगात्॥ एतांविद्यांतुयोवेदनित्यमस्यदिवाभवेत् ॥ वैकुंठधामसंस्थस्यमुक्तस्यानुदयास्तकमितिच्छांदोग्यभाष्यविरोधाच्च ॥ नचतत्रकथमंधकारनिवृत्तिरितिवाच्यं॥ भगवत्तेजसालक्ष्म्यात्मकमाणिक्यादितेजसाचसर्वदाप्रकाशवत्त्वेनांधकारप्रसक्तेरेवाभावात्॥परमात्मप्रकाशश्चानंतसूर्यप्रकाशापेक्षयाप्यधिकः॥ सह

स्रलक्षामितभानुदीधितिरितिनिर्णयोक्तेः॥ तथामृणालगौरायतशेषभोगपर्यंकएकंपुरुषंशयानं। फणासहस्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोयइतितृतीयस्कंधभागवतेशेषमूर्धरत्नस्यप्रकाशकत्वोक्तेश्च ॥ किंचादित्योदयाद्यभावेपिभगवच्छरीरेपूर्वादिभागस्थकरेषुचक्रशंखादिधारणमुक्तंछांदोग्यभाष्ये ॥ प्राचीदिक्संस्थितस्तस्यबाहुर्दक्षिणऊर्ध्वगः ॥ जुहूःसहोमकर्तृत्वाज्जुहूर्ह्येतेनकेशवः॥ दक्षिणस्त्वधरोबाहुर्दक्षिणादिक्स्थितोविभोः॥सहमानेतिसंप्रोक्तोमानंवेदात्मकंयतः ॥ शंखोवेदात्मकःशंखसहितोदक्षिणाधरः ॥ बाहुर्जुहोतिचक्रेणशत्रूनित्यथवाजुहूः ॥ प्रतीचीदिक्स्थितस्तस्यवामबाहुस्तथोत्तरः ॥ राजीयुक्तगदायुक्तोराज्ञीनामप्रकीर्तितः॥अधरोवामबाहुर्यउत्तरादिक्स्थितोविभोरिति॥नचपरमात्मन्यप्यादित्योदयापेक्षेतिवाच्यं॥ नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निरितिश्रुतिविरोधात् ॥ अपिचचतुर्दशभुवनोत्पत्तेःपूर्वमेवपरमात्मनाभिकमलेस्थितस्यब्रह्मणश्चतुर्दिक्षुदर्शनेनचतुर्मुखप्राप्तिर्भागवतेश्रूयते॥नहितदासूर्योदयोस्ति ॥ तस्यानुत्पत्तेः॥तस्यांसचांभोरुहकर्णिकायामवस्थितोलोकमपश्यमानः॥ परिक्रमन्व्योम्निविवृत्तनेत्रश्चत्वारिलेभेनुदिशंमुखानीति॥ ननुतर्हिसूर्योदयनिरीक्षणस्यकुत्रोपयोगइतिचेन्न ॥ कादाचित्कस्यदिगंतरेदिगंतरभ्रमस्यादित्योदयनिवर्त्यत्वात् ॥ तदुक्तंतत्त्वनिर्णये ॥ अंधकारेपिदिङ्मात्रप्रतीतेःकादाचित्कभ्रांतिरेवादित्योदयदर्शनान्निवार्यतइति॥ नचयस्यप्राचीसासर्वेषामपिप्राचीस्यादितिवाच्यं॥पितापुत्रभाववत्प्राचीत्वादेःससंबंधिकत्वात्॥ नहियोयस्यपिताससर्वस्यापिपिता ॥ अन्यथादित्योदयोपाधिकत्वपक्षेपिदोषापरिहारात्॥ ननुभूताकाशव्यतिरिक्ताव्याकृ

ताकाशसद्भावएवमानाभावः॥भूताकाशेनैवसर्वव्यवहारोपपत्तेरित्याशंकांपरिहरति॥ तद्भावइति॥९१॥अयमाशयः॥अना
दिर्वाअयमाकाशः आत्मनआकाशःसंभूतः॥आकाशोनीलिमोदेतिनप्रदेशःकथंचन॥तामसोभूतसूक्ष्माणियतःखंलिंगमात्मनः॥
भूतादिस्तामसःस्मृतइत्यादिवाक्यान्याकाशस्योत्पत्त्यनुत्पत्तिप्रतिपादकानिसंति॥नचोत्पत्त्यनुत्पत्तीएकस्यवक्तुंशक्येविरोधात्॥
नचान्यतराप्रामाण्यंवक्तुंयुक्तं॥अपौरुषेयत्वात्॥ अतस्तदन्यथानुपपत्त्याकाशद्वैतमंगीकर्तव्यं॥ किंचाव्याकृताकाशस्योत्पत्त्यंगी
कारेतदुत्पत्तेःपूर्वंप्रदेशाभावेमूर्तपदार्थनिबिडतास्यात्॥अतोभूताकाशोत्पत्तेःपूर्वमव्याकृताकाशमस्तीत्यंगीकर्तव्यं॥तत्रप्रमाणंतु
साक्षीति साक्षिनिरूपणावसरेवक्ष्यामः॥किंचरूपित्वारूपित्वव्याकृतत्वाव्याकृत्वपरिच्छिन्नत्वापरिच्छिन्नत्वादिश्रुतीनांसत्त्वेनवि
रुद्धधर्माणामेकत्रसमावेशायोगेनाकाशद्वैविध्यस्यस्वीकर्तव्यत्वात्॥तदुक्तंवियत्पादीयानुव्याख्याने॥ यद्यनाकाशतापूर्वंकिंमूर्तं
निबिडंजगत्॥ मूर्तसंपूर्णताचैवयद्यनाकाशताभवेदिति॥सुधायामपि॥ रूपित्वारूपित्वव्याकृतत्वाव्याकृतत्वश्रुतीनांसत्त्वात्॥किं
चोत्पत्त्यनुत्पत्तिश्रुत्योर्विरोधोप्याकाशद्वैतमवगमयतीत्युक्तं॥ चंद्रिकायांतु॥ नचाकाशद्वित्वेमानाभावः॥भूताकाशातिरिक्ताया
देशकालापरिच्छिन्नायास्तार्किकाद्यभिमतदिशएवास्माकमव्याकृताकाशत्वात्॥ प्राच्यादयोदिग्विशेषास्तद्भागाः॥ उक्तंहिटीका
कारैः॥ अवकाशमात्रंहिदिगुच्यते॥ अवकाशभागाएवदिग्विशेषाइति॥ किंचप्रदेशरूपाकाशोनीरूपः साक्षिसिद्धश्च॥ अन्यथा
वकाशवतिगेहेंधकारादौहस्तचलनादिकंनस्यात्॥ भूताकाशंतु भूतमप्यसितंदिव्यदृष्टिगोचरमेवचेत्यादिश्रुत्यारूपी॥ प्रत्यक्षं

---

९१ तदभावेमूर्तनिबिडंजगत्स्यात्॥

च ॥ किंच ॥ भूताकाशं सर्वंपंचभिराविष्टंभूतैरीश्वरबुद्धिजैः ॥ पंचभूतात्मकेदेहइत्यादिस्मृतिभिर्देहाकारेणविकारि॥ अवका
शंस्तुकूटस्थो नित्यत्वेनसाक्षिसिद्धश्च ॥ नचसर्वाधारभूतौदेशकालौकिंचिद्द्रव्यात्मनाविकुरुतः ॥ किंचावकाशोनादिः ॥ अ
नादिर्वाअयमाकाशइत्यादिश्रुतेः ॥ नतुतामसाहंकारकार्यः ॥ नहिपूर्वमवकाशोनासीत्किंतुसर्वत्रकुत्रचिद्बाधघनीभावएवासीदि
तिधीर्युक्ता ॥ सर्वत्रेत्यादिनैवावकाशनिर्देशात् ॥ भूतंतुआत्मनआकाशःसंभूतइत्यादिश्रुतिभिःतामसाच्चविकुर्वाणाद्भगवद्वी
र्यचोदितात् ॥ शब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दगमित्यादिस्मृतिभिश्च तामसाहंकारकार्यं ॥ किंच॥ एतदंडंविशेषाख्यंक्र
माद्बृद्धैर्दशोत्तरैः ॥ तोयादिभिःपरिवृतमित्यादिस्मृतिभिरेकमविभु॥ अन्यद्विभु॥ आकाशवत्सर्वगतश्चनित्यः ॥ सोनंतोयथा
नंतोयमाकाशइति ॥ किंचमृतिकालेजहत्येनंप्राणाभूतानिपंचच ॥ भागतोभागतस्त्वेनमनुगच्छंतिसर्वशइत्यादिस्मृतिभिर्भूता
काशोगत्यादियोग्यभागवान् ॥ नहिप्रदेशविशेषएतद्देशंविहायप्रदेशांतरंगच्छति ॥ किंचतत्रदेशोनास्तीत्येतदिदानींकालोना
स्तीतिवद्विरुद्धं ॥ तस्मादाकाशद्वित्वंप्रामाणिकमितिसुधोक्तयुक्तिःसम्यगुपपादितेतिसंक्षेपः ॥ नन्वव्याकृताकाशाभिमानीनब्र
ह्मा ॥ तस्यप्रलयकालेऽभावात् ॥ आकाशस्यचनित्यत्वात् ॥ नापिपरमात्मा ॥ तस्यक्वाप्यभिमानित्वाभावात्॥अभिमानिनंवि
नाभिमन्यमानपदार्थस्यैवाभावादित्यतआह ॥ लक्ष्मीरिति॥९२॥अभिमन्यमानाभिमानिनोर्व्याप्तत्वात्प्रकृतिकालवदाकाश
मपिलक्ष्म्यधीनमितिभावः ॥ तदुक्तंमांडूकभाष्ये॥ कालश्चैवदिशोवेदाःप्रकृत्यात्मानईरिताइति ॥ अवांतरदिगभिमानिनोपिष

९२ लक्ष्मीस्तस्याभिमानिनी ॥

द्प्रश्नभाष्योक्ताज्ञातव्याः ॥ तथाहि ॥ प्राच्याःप्राणास्तथैंद्राद्यादक्षिणास्तुयमादयः ॥ प्रतीच्यावरुणाद्यास्तुसोमाद्याश्चोत्तराः स्मृताः ॥ शेषमित्राववाचीनौवींद्रकामावुदक्तनौ ॥ सभार्याःकोणपैःसार्धंचत्वारोदिशिदिश्यपीति॥ मित्रोयमश्चवरुणःकुबेरश्च दिगीश्वराइत्यैतरेयभाष्यंचात्रमानं ॥ इत्यव्याकृताकाशप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ क्रमप्राप्तांप्रकृतिंनिरूपयति ॥ **साक्षात्परं परयावेति**॥९३॥साक्षात्कालस्यगुणत्रयस्यचोपादानं॥ महदादिकंप्रतिचपरंपरयोपादानमित्यर्थः ॥ प्रकृतेर्द्रव्यत्वंच द्रव्यंकर्म चकालश्चेत्यनुव्याख्यानसुधायांद्रव्यंप्रकृत्यादीत्युक्त्यासन्न्यायरत्नावल्यांद्रव्यंप्रधानादीयुक्त्याचसिद्धं ॥ साक्षात्कालोपादान त्वंचप्रकृतेःकालप्रकरणेवक्ष्यामः ॥ उपादानमित्यनेनोपादानकारणत्वंद्रव्यलक्षणमस्त्येवेतिसूचितं ॥ प्रकृतिसद्भावे तस्या जगदुपादानत्वेचप्रमाणंतु भगवत्तंत्रतायस्यास्तद्भार्यात्वंसुरूपता ॥ उच्यतेमायासातुश्रीर्दोषयुक्ताजडास्मृता ॥ परिणा मिनीचयस्यास्तुदोषाश्चेतनतातथेतितृतीयस्कंधतात्पर्यं ॥ द्वितीयाप्रकृतिःप्रोक्तातद्रूपाहिगुणास्त्रयइतिद्वितीयस्कंधतात्पर्यं॥ सत्त्वंरजस्तमइतिगुणाःप्रकृतिसंभवाइतिगीता ॥ ससर्जभगवानादौत्रीन्गुणान्प्रकृतेःपरइतिमणिमंजरी ॥ त्रिगुणाप्रकृतिर्मा यापश्येत्तन्मात्रकंजगत् ॥ निर्मिमीतेजगत्सर्वमतोमायेतिसास्मृतेत्येकादशतात्पर्यं ॥ प्रदर्शयित्वाह्यात्मानंप्रकृतिस्तेषुसर्वशः॥ पुरुषान्यबहुत्वेनप्रतीतानप्रवर्तते ॥ प्रवर्ततिपुनःसर्गेतेषांसानप्रवर्तते ॥ संयोगःप्रकृतेर्नैवमुक्तानांतत्वदर्शनादितिबृहद्भाष्यच्छां दोग्यभाष्ये ॥ जगत्यांप्रकृतावितीशावास्यभाष्यं ॥ तृतीयस्कंधभागवतंच ॥ यत्तत्रिगुणमव्यक्तंनित्यंसदसदात्मकं ॥ प्र

९३ साक्षात्परंपरयावाविश्वोपादानंप्रकृतिः ॥

धानंप्रकृतिंप्राहुरविशेषंविशेषवत् ॥ पंचभिःपंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकंगणंप्राधानिकंविदुरिति ॥ एतेनगुणत्रयातिरिक्तप्रकृतिर्नास्तीतिमतमपास्तं ॥ नन्वस्तुलक्ष्मीरेवप्रकृतिशब्दवाच्यानतुमूलप्रकृतिरित्यतआह ॥ **जडरू पेति** ॥ ९४ ॥ दोषयुक्ताजडास्मृता ॥ परिणामिनीतितृतीयतात्पर्योक्तेः ॥ प्रकृतेर्नित्यत्वंच महाप्रलयानंतरंपुनःसृष्टावुपा दानत्वात् ॥ व्याप्तक्षणलवादिकालोपादानत्वाद्व्याप्तत्वंबोध्यं ॥ **तदभिमानिनीति** ॥ ९५ ॥ प्रकृतिर्नामतत्पत्नीप्रकृते रभिमानिनीत्येकादशतात्पर्योक्तेः पुरुषाव्यक्तकालानांरमैवैकाभिमानिनीतिवियत्पादीयानुव्याख्यानोक्तेश्चेतिभावः ॥ तद्विभा गमाह ॥ **सर्वजीवेति** ॥९६॥ सर्वेषांजीवानांशरीरंतावदंगीकर्तव्यं॥ अन्यथापरमात्मवन्नित्यमुक्तत्वेनसृष्ट्यनुपपत्तिप्रसंगात्॥ सृष्ट्यादिप्रवाहश्चनित्यः अतःस्थूलशरीरापादकं सूक्ष्मशरीरमंगीकर्तव्यं ॥ तदेवलिंगशरीरं ॥ साचप्रकृतिरेव॥शिष्टंलिंगश रीरप्रकरणेवक्ष्यामः॥ तद्भिन्नाचेति ॥ लिंगशरीरभिन्ना गुणत्रयाद्युपादानभूतेत्यर्थः ॥ इतिमूलप्रकृतिप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ गुणत्रयस्वरूपमाह ॥ **सत्त्वरजस्तमइति** ॥९७॥ ननुगुणत्रयस्योपादानंकिं॥ स्रष्टाचकः॥ कदोत्पद्यतइत्यतस्तत्त्रयमप्याह ॥ **सृष्टिकालइति** ॥९८॥ महासृष्टिकालइत्यर्थः॥ महाप्रलयेप्रकृतिरेकैवासीन्महदादिकंकिमपिनासीत्॥ तदाभगवान् सिसृक्ष यामूलप्रकृतेः सकाशात्सत्त्वराशिंरजोराशिंतमोराशिंचासृजत्॥ तद्राशित्रयंगुणत्रयमित्यर्थः॥ तत्किमर्थंव्यसृजदित्यतआह ॥

९४ जडरूपा ॥ नित्याव्याप्ताच ॥ ९५ तदभिमानिनीरमा ॥ ९६ सर्वजीवलिंगशरीररूपा ॥ तद्भिन्नाचेत्यनेकविधा ॥ ९७ सत्त्वरजस्त मोनामकानांगुणानांसमुदायोगुणत्रयं ॥ ९८ सृष्टिकालेमूलप्रकृतेस्सकाशात्परमात्मनात्रेधाभिन्नं ॥

महदादीति ॥ ९९ ॥ त्रयाणांपरिमाणमाह ॥ **तमोगुणापेक्षयेति** ॥ १०० ॥ तदुक्तंतृतीयतात्पर्ये ॥ तमसोरजस्तुद्विगुणं रजसःसत्त्वमेवच ॥ परिमाणतयैवंस्युस्त्रयःप्रकृतिजागुणाइति ॥ तमोगुणस्यपरिमाणंतुमहत्तत्त्वापेक्षयादशगुणितंज्ञेयं ॥ तदुक्तंसन्न्यायरत्नावल्यां ॥ गिरिशगरुडौतुमहत्तत्त्वस्यावरणेनतद्दशोत्तरेणतमोगुणेनपरिमितदेशपर्यंतंव्याप्तमेवविष्णुंपश्यतइति नन्वबघ्नीरनभोहंकृन्महत्तत्त्वगुणत्रयैः ॥ क्रमाद्दशोत्तरैरेतदावृतंपरतस्तथेतिनिर्णयविरोधः ॥ तत्रमहत्तत्वापेक्षयागुणत्रयस्यैवदशोत्तरत्वोक्तेरितिचेन्न ॥ गुणत्रयपदस्यतमोगुणमात्रपरत्वांगीकारात् ॥ नचैवंसन्न्यायरत्नावलीस्थतमोगुणपदस्यैवगुणत्रयपरत्वमस्त्वितिवाच्यं ॥ गिरिशगरुडयोर्गुणत्रयपर्यंतभगवद्रूपापरोक्षज्ञानसामर्थ्यपरिकल्पनापत्तेः ॥ गिरिशोगरुडश्चैवतमोमात्रगतंहरिं ॥ पश्यतइत्यनुव्याख्यानेमात्रपदप्रयोगाच्च ॥ अतोनिर्णयस्थगुणत्रयपदस्यैवतमोगुणपरत्वमंगीकर्तव्यमित्याहुः ॥ रजस्तमसोर्मिश्रीभावमाह ॥ **सत्त्वरजोभ्यामिति** ॥ १०१ ॥ अयमत्रविवेकः ॥ मूलप्रकृतेःसकाशाद्गुणत्रयोत्पत्तिकालेसत्त्वगुणोरजस्तमोभ्याममिश्रःशुद्धएवोत्पन्नः ॥ रजोगुणस्तुसत्त्वतमोभ्यांमिश्रएवोत्पन्नः ॥ तत्ररजोगुणेरजोगुणापेक्षयासत्त्वभागःशताधिकः ॥ रजोगुणापेक्षयाशतांशन्यूनंतमः ॥ एवंरजोगुणस्थितिः ॥ तमोगुणोपिसत्त्वरजोभ्यांमिश्रएवोत्पन्नः ॥ तत्रतमोभागापेक्षयासत्त्वंदशोत्तरं । तमोगुणस्यदशांशन्यूनंरजः ॥ एवंतमोगुणस्थितिः ॥ नचैवंपरस्परमिश्रितत्वेविशेषनिर्देशोनस्यादितिवाच्यं

---

९९ महदादिजगदुपादानं ॥ १०० तमोगुणापेक्षयारजोगुणोद्विगुणपरिमाणयुक्तः ॥ रजोगुणापेक्षयासत्त्वगुणोद्विगुणपरिमाणयुक्तः ॥ १०१ सत्त्वरजोभ्यां मिश्रंचतमः ॥ तमस्सत्त्वाभ्यांमिश्रंचरजः ॥ सत्त्वंतुशुद्धमेव ॥

प्राचुर्याभिप्रायेणोपपत्तेः ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ तत्रसत्त्वंकेवलंस्याद्रजस्यपिशताधिकं ॥ सत्त्वंरजःशतांशंतुतमस्तत्रप्र कीर्तितं ॥ तमस्यपितथासत्त्वंतमसस्तुदशोत्तरं ॥ तद्दशांशेनतुरजइति ॥ इयंगुणानांविषमावस्थासृष्टिरित्युच्यते ॥ सृष्टिकालेस त्त्वगुणस्यमिश्रत्वाभावात् ॥ साम्यावस्थातुप्रलयइत्युत्तरत्रवक्ष्यते॥ त्रयाणामपिगुणानांप्रयोजनमाह॥ तत्र शुद्धसत्त्वमिति ॥ ॥ १०२ ॥ मुक्ताःप्राकृतदेहंलीलयागृहीत्वातद्देहेनयथेष्टभोगाननुभूयतद्देहंस्वेच्छयैवत्यजंति ॥ सचदेहोनरजस्तमोगुणमिश्रस त्त्वात्मकः ॥ बद्धत्वापत्तेः ॥ अतःशुद्धसत्त्वस्यतत्रोपयोगइत्यर्थः ॥ तदुक्तंभाष्ये ॥ सवाएषएवंवित्परमभिपश्यत्यभिशृणोति ज्योतिषैवरूपेणचितावाचितावा नित्येनवानित्येनवा अथानंदीह्येवैषभवति नानानंदंकिंचिदुपस्पृशतीति ॥ केचित्तु ॥ पांचभौ तिकदेहेनापिमुक्तानांभोगःसंभवत्येव ॥ नचैवमस्मदादिवत्सुखदुःखयोरापत्तिरितिवाच्यं ॥ कर्मनिर्मितदेहस्यैवबंधकत्वेनस्वेच्छ यागृहीतस्यबंधकत्वाभावात् ॥ व्रीह्यादिप्रविष्टजीवांतरवत् ॥ तदुक्तंवैराग्यपादे अन्याधिष्ठितेपूर्ववदभिलापादित्यधिकरणटीका यामित्याहुः॥ रजोगुणेनसृष्टिरिति॥ जगतइतिशेषः॥ यत्रापिसात्त्विकराजसादिविभागस्तत्रापिरजोगुणस्थसत्त्वाद्यपेक्षयैव॥ तदु क्तंप्रमेयदीपिकायांतृतीयाध्याये ॥ तथाहि॥ चातुर्वर्ण्यंमयासृष्टमितिगीताश्लोकस्यभाष्यं ॥ सात्त्विकराजसःक्षत्रियः॥ राजसो वैश्यः॥ तामसःशूद्रइतिगुणविभागइति॥ तट्टीकावाक्यंतु राजसस्थसात्त्विकेष्वेवायंविभागइतिज्ञातव्यमिति ॥ गुणानांसृष्ट्यादि हेतुत्वेप्रमाणंतु॥ सत्त्वंरजस्तमइतिनिर्गुणस्यगुणास्त्रयः॥ स्थितिसर्गनिरोधेषुगृहीतामाययाविभोरित्यादिद्वितीयस्कंधभागवतं ॥

१०२ तत्रशुद्धसत्त्वंमुक्तानांलीलाविग्रहायभवति ॥ रजोगुणेनसृष्टिः ॥ रजोगुणस्थसत्त्वेनस्थितिः ॥ तमोगुणेनविनाशः ॥

एवंप्रवर्ततेसर्गः स्थितिः संहारएवहि॥ गुणव्यतिकराद्राजन्माययापरमात्मनइतिचतुर्थस्कंधभागवतं॥तथागीतातात्पर्यमपि॥ तस्या
स्तुत्रीणिरूपाणिसत्त्वंनामरजस्तमः॥ सृष्टिकालेविभज्यंतेसत्त्वंश्रीः सद्गुणप्रभा ॥ रजोरंजनकर्तृत्वाद्भूः सासृष्टिकरीयतः ॥ जीवा
नांग्लपनाद्दुर्गातमइत्येवकीर्तितेति ॥ दशमतात्पर्येपि॥ जगतांवर्धयन्त्सत्त्वंयदारक्षतिकेशवः॥ हयग्रीवादिरूपेणशुक्लवर्णस्तदावि
भुः॥वर्धयंस्तुरजोयेनजगदुत्पादयेद्धरिः॥ तद्रक्तंजामदग्न्यादिरूपंयेनविनाशयेत्॥ वर्धयंस्तुतमोलोकंतत्कृष्णंयादवादिकमिति॥
त्रयाणामपिगुणानामभिमानिनीराह ॥ **सत्त्वेत्यादिना** ॥ १०३ ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ श्रीर्मूलसत्त्वंविज्ञेयाभूर्मूलंरज
उच्यते ॥ मूलंतमस्तथादुर्गामहालक्ष्मीस्त्रिमूर्तिकेति ॥ नकेवलंलक्ष्मीस्तदभिमानिनी किंतुब्रह्मादयोपीत्याह ॥ **ब्रह्मादयोपी
ति** ॥१०४॥ तदुक्तंगीतातात्पर्ये ॥ सर्वाभिमानिनोदेवाः सर्वेपिह्युत्तरोत्तरं ॥ आधिक्यंवक्तुमेवैषांपृथक्स्थानमुदीर्यते ॥ आधि
क्यक्रमएवात्रशास्त्रतात्पर्यमिष्यते ॥ स्थानेषुत्ववरेषांचपरेसंतिनचेतरे ॥ तथापिपितुरर्थोयः पुत्रस्याप्युपचर्यते॥ अव्यक्तादिपदा
र्थानांसर्वेतदभिमानिनइति ॥ इतिगुणत्रयप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ क्रमप्राप्तंमहत्तत्वंनिरूपयति ॥ **साक्षादिति** ॥१०५॥
परंपरयागुणत्रयोपादानकेहंकारादावतिव्याप्तिवारणायसाक्षादिति ॥ साक्षाद्गुणत्रयांशोपादानकमित्यर्थः॥ नतुसर्वमपिगुणत्र
यंमहदात्मनापरिणमतइत्यर्थः॥ महत्तत्वापेक्षयादशोत्तरत्वात्॥ ब्रह्मांडस्यावरणांतरत्वाच्च ॥ महत्तत्वेप्यस्तिकश्चिद्विशेषः ॥ प्रल

१०३ सत्त्वाभिमानिनीश्रीः ॥ रजोभिमानिनीभूः॥ तमोभिमानिनीदुर्गारमैव ॥ १०४ ब्रह्मादयोपिगुणत्रयाभिमानिनः ॥ १०५ साक्षाद्गु
णत्रयोपादानकंमहत्तत्वं ॥

यकालेमहत्तत्वस्यगुणत्रयेलयः॥ तदामहत्तत्वंद्वादशधाविभज्यते ॥ दशभागाः शुद्धसत्त्वराशौप्रविशंति ॥ एकोभागोरजोराशौ
प्रविशति ॥ एकोभागस्तमोराशौप्रविशति॥ पुनः सृष्टिकालेप्राप्तेपूर्वंशुद्धसत्त्वेप्रविष्टदशभागारजोगुणप्रविष्टएकोभागश्चतमोगुणे
नसंगताभवंति ॥ ततोमहत्तत्वमुत्पद्यते ॥ तत्ररजोभागास्त्रयः ॥ एकोभागस्तमः ॥ आहत्यचतुर्भागयुक्तंमहत्तत्वं ॥ तदुक्तंतृती
यतात्पर्ये ॥ मूलजंयद्रजस्तुतत् ॥ विलयेदशांशतः सत्त्वएकांशेनतमस्यपि ॥ मिश्रितंभवतिह्येतांसाम्यावस्थांविदुर्बुधाः॥ यदातु
तद्रजस्सर्वंतमसासहसंगतं ॥ तदात्वाहुर्महत्तत्वंतच्चतुर्भागसंभवं ॥ तत्रत्रिभागोरजसएकोंशस्तमसस्तथा ॥ यद्रजोमूलरजसिमू
लेतमसियद्रजः ॥ तमश्चमूलेतमसिमहत्तत्वंतदात्मकमिति ॥ नन्वेवंमहत्तत्वस्यकेवलरजस्तमोगुणांशत्वापत्त्यासात्त्विकत्वंनस्या
त् ॥ तस्यचतुर्मुखदेहरूपत्वेनशुद्धसात्त्विकत्वस्यैववक्तव्यत्वादितिचेन्न ॥ महत्तत्वगतरजोंशेष्वेवबहूनांसत्त्वांशानांसद्भावात् ॥
तथाहि ॥ महत्तत्वेयेरजोभागास्तत्रदशभागाः सत्त्वगुणाः॥ एकोंशोरजः ॥ तद्दशांशंतमः ॥ तदुक्तंतृतीयतात्पर्ये ॥ दशांशास्त
त्रसत्त्वंस्युरेकोंशोरजएवच ॥ तद्दशांशंतमोज्ञेयमिति ॥ किंचाहंकाराद्यपेक्षयाशुद्धसात्त्विकत्वंज्ञेयं ॥ तदुक्तंतृतीयतात्पर्ये ॥
तदेवकेवलंसत्त्वमितरापेक्षयाभवेदिति ॥ महत्तत्वस्यपरिमाणमाह ॥ **तमोगुणापेक्षयेति** ॥ १०६ ॥ महत्तत्वगुणत्रयैः ॥
क्रमाद्दशोत्तरैरितिनिर्णयोक्तेः ॥ तत्रगुणत्रयपदस्यसन्न्यायरत्नावलीरीत्यातमोगुणपरत्वस्यव्यवस्थापितत्वादितिभावः ॥ तद
भिमानिनआह ॥ **ब्रह्मवायूइति** ॥ १०७ ॥ तदुक्तंतृतीयतात्पर्ये ॥ तदाहुर्ब्रह्मणोरूपंगुणवैषम्यनामकमिति ॥ महतोब्रह्म

१०६ तमोगुणापेक्षयादशगुणपरिमाणन्यूनं ॥ १०७ ब्रह्मवायूतत्स्त्रियौचतदभिमानिनः ॥

वायूचतद्धार्येचाभिमानिनइति ॥ मणिमंजर्यामपि ॥ महत्तत्वंततोविष्णुःसृष्टवान्ब्रह्मणस्तनुमिति ॥ काठकभाष्येपि ॥ तस्याब्र
ह्मामहानात्माततोव्यक्ताभिधारमेति ॥ तंत्रसारेपि ॥ सर्वाण्येतानितत्वानिब्रह्माचपुरुषःस्मृतः॥ महांश्चाव्यक्तनाम्नीचब्रह्माणीसं
प्रकीर्तिता॥ एवंवायुरपिज्ञेयोभारतीचैवतत्रयमिति॥ भाष्येपि॥ विज्ञानतत्त्वंमहतःसमुत्पन्नंचतुर्मुखादिति ॥ महत्तत्वस्य महत्तत्व
मितिद्रव्यविशेषस्यसंज्ञेतिवैशेषिकाधिकरणसुधोक्तेर्द्रव्यत्वंसिद्धं ॥ इतिमहत्तत्वप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ अहंकारतत्वंनिरू
पयति ॥ **महत्तत्वेति** ॥१०८॥ अत्रापिसाक्षान्महत्तत्वांशैरितिशेषः ॥ अहंकारतत्वेपिविशेषः॥ महत्तत्वगततमोभागादहंका
रतत्वमुत्पन्नं॥ तत्रदशभागाःसत्त्वगुणाः॥एकांशोरजः॥ तद्दशांशंतमइति॥ तदुक्तंतृतीयतात्पर्ये॥ तद्दशांशंतमोज्ञेयमहंकारस्तदा
त्मकः॥ सरुद्रस्तामसोज्ञेयोविरिंचापेक्षयैवतु॥ इतरापेक्षयासत्त्वंसत्त्वाद्यास्तद्वदस्यचेति॥तद्विभागमाह॥ **वैकारिकेति**॥१०९॥
तदुक्तंतृतीयस्कंधभागवते॥ महत्तत्वाद्विकुर्वाणादहंतत्वमजायत ॥ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधेति॥ अहंकारतत्वस्यपरि
माणमाह ॥ **महत्तत्वादिति** ॥११०॥ अवम्नीरनभोहंकृन्महत्तत्वगुणत्रयैः॥ क्रमादशोत्तरैरितिनिर्णयोक्तेरितिभावः॥ तद
भिमानिनआह ॥ **गरुडेति** ॥१११॥ तदुक्तंनिर्णये ॥ तस्यामहंकारतनुंसरुद्रंससर्जबुद्धिंचतदर्धदेहामिति ॥ महत्तत्वादहंका
रंससर्जशिवविग्रहमितिमणिमंजरी॥ तृतीयतात्पर्यमपि॥ अहमःशेषवींद्रौचरुद्रेंद्रौकामतत्स्त्रियइति॥ इत्यहंकारतत्वप्रकरणं॥

१०८ महत्तत्वोपादानकमहंकारतत्वं ॥ १०९ वैकारिकतैजसतामसभेदेनत्रिविधं ॥ ११० महत्तत्वाद्दशांशन्यूनं ॥ १११ गरुडशेषरुद्राद-
यस्तदभिमानिनः ॥

॥७॥७॥७॥ इदानींबुद्धितत्वंनिरूपयितुंतद्विभागमाह॥ बुद्धिरिति॥ ११२॥ बुद्धिशब्दस्य यश्चमूढतमोलोकेयश्चबुद्धेःपरंगतः॥ तावुभौसुखमेधेतेक्लिश्यत्यंतरितोजनइतिज्ञानेपिप्रयोगादितिभावः ॥ बुद्धितत्वस्य लक्षणमाह ॥ महत्तत्वेति ॥ विज्ञानतत्वं महतःसमुत्पन्नंचतुर्मुखात् ॥ विज्ञानतत्वाच्चमनोमनस्तत्वाच्चखादिकं ॥ एवंबाह्यापरासृष्टिरंतस्तन्मत्तत्यपेक्षयेतिभाष्योक्तेरिति भावः ॥ ननुतैजसात्तुविकुर्वाणाद्बुद्धितत्वमभूत्सतीतितृतीयस्कंधभागवतेबुद्धितत्वस्यतैजसाहंकारकार्यत्वोक्तेस्तद्विरोधइत्यत आह ॥ तैजसाहंकारेणेति ॥ ११३ ॥ तथाचोपचयभागापेक्षयाभागवतोक्तिरितिभावः ॥ अतएव महानहं ॥ बुद्धिर्मनःखानिदशेति तत्वसंख्यानेहंकारतत्वानंतरंबुद्धितत्वस्यपरिगणनंकृतं ॥ मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परइति काठकोपनिषदिमहत्तत्वानंतरमेवबुद्धितत्वोक्तिरितिद्रष्टव्यं ॥ तदभिमानिनआह ॥ ब्रह्मादीति ॥ ११४ ॥ उत्तमदेवानामधमतत्वाभिमानित्वस्यपूर्वंगीतातात्पर्यप्रमाणेनोक्तत्वात् ॥ तेभ्योबुद्धिःसरस्वतीतिकाठकभाष्येसरस्वत्याबुद्ध्यभिमानित्वोक्तेः॥ तस्यामहंकारतनुंसरुद्रंससर्जबुद्धिंचतदर्धदेहां ॥ बुद्ध्यामुमायांसशिवस्त्रिरूपोमनश्चवैकारिकदेवसंघानितिनिर्णय उमायाबुद्ध्यभिमानित्वोक्तेरितिभावः ॥ इतिबुद्धितत्वप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ मनस्तत्वंनिरूपयितुंतद्विभागमाह ॥ मनोद्विविधमिति ॥ ११५ ॥ तत्वरूपस्यमनसोलक्षणमाह ॥ वैकारिकेति ॥ ११६ ॥ तदुक्तंतृतीयस्कंधभागवते ॥ वैकारिकाद्विकुर्वाणान्म

---

११२ बुद्धिर्द्विविधा॥ तत्त्वरूपाज्ञानरूपाचेति ॥ तत्रतत्वरूपाद्रव्यं ॥ तत्वरूपामहत्तत्वजन्या ॥ ११३ तैजसाहंकारेणोपचिता ॥ ज्ञानरूपाबुद्धिर्ज्ञानप्रकरणे वक्ष्यते ॥ ११४ ब्रह्माद्युमांतास्तदभिमानिनः॥ ११५ मनोद्विविधं तत्वरूपंतद्भिन्नंचेति ॥ ११६ वैकारिकाहंकारोपादानकंमनस्तत्वं ॥

नस्तत्वमजायतेति ॥ वैकारिकान्मनोजज्ञेदेवावैकारिकादशेति ॥ तदभिमानिनआह ॥ **पूर्वोक्तेति** ॥ ११७ ॥ तदुक्तंषट्प्र
श्नभाष्ये ॥ अन्नस्यदेवतासोमोमनोमान्यनिरुद्धकः ॥ रुद्रोवींद्रःशेषकामौमनसस्त्वेवदेवताइति ॥ बृहद्भाष्येपि ॥ येनयज्ञादि
कंकुर्याच्छेषरुद्रविपास्तथा ॥ मनःसूक्ष्मंज्ञानयोग्यंशेषोव्याख्यानगोचरं ॥ रुद्रस्तुमनआख्यंचगरुडोध्यानगोचरं ॥ ब्रह्मास
रस्वतीवायुर्मनआद्यभिमानिनइति ॥ तृतीयतात्पर्येपि ॥ मनसस्त्वनिरुद्धश्चचंद्रश्चान्येयथोदिताइति ॥ काठकभाष्येपि ॥
मनोभिमानिनोरुद्रवींद्रशेषास्त्रयोपित्विति ॥ ऐतरेयभाष्येपि ॥ तत्रप्राणात्मनावायुर्मनोरूपेणशंकरः ॥ शेषःसुपर्णइंद्रश्चमनां
स्येवपृथक्पृथक् ॥ अहंभावमनोरुद्रःशेषोसौपांचरात्रिकं ॥ वैदिकंगरुडोथैंद्रोयज्ञादिविषयंमनइति ॥ तंत्रसारेपि ॥ रुद्रोहंका
रउद्दिष्टःस्कंदेंद्रौमनउच्यते ॥ अहंकारःशेषवींद्रावपिविद्धद्भिरीरिताविति ॥ गीतातात्पर्येपि ॥ उमाबुद्धिरितिज्ञेयाशब्दा
दिज्ञानदायतः॥ मतिदोमनउद्दिष्टइंद्रःस्कंदोपितत्सुतइति ॥ भाष्येपि ॥ वागभिमानिन्युमामनोभिमानिनिरुद्रेविलीयतइति॥
नित्यमनसोधिष्ठानमाह ॥ **नित्येंद्रियमिति** ॥ ११८ ॥ परमात्मनोमनोवक्त्वेप्रमाणंतु चंद्रमामनसोजातः तन्मनोकुरुते
त्यादिश्रुतिः ॥ तथाबृहद्भाष्यमपि ॥ अप्सृष्ट्यर्थंमनोकुरुतेति ॥ मनोवाक्प्राणरूपोसौभगवान्पुरुषोत्तमः ॥ मनोवाक्प्राणतस्त
स्यजाताअन्येभिमानिनइति ॥ लक्ष्म्यामनःसद्भावेतु यंकामयेतंतमुग्रंकृणोमीतिश्रुतिः ॥ कामनायामनःस्वरूपत्वात् ॥ तथा

११७ पूर्वोक्तदेवताइंद्रकामानिरुद्धाश्चतदभिमानिनः ॥ तत्वभिन्नं मनइंद्रियं ॥ तद्विविधं ॥ नित्यमनित्यंचेति ॥ ११८ नित्येंद्रियमीशलक्ष्मी
ब्रह्मादिसर्वजीवानांस्वरूपभूतं ॥

भाष्यमपि ॥ यथाश्रीर्नित्यमुक्तापिप्राप्तकामापिसर्वदा ॥ उपास्तेनित्यशोविष्णुमेवंभक्तोहरेर्भवेदिति ॥ तत्रध्यानस्यमनोरूप
त्वात् ॥ जीवानांतुस्वरूपंमनआदिकंमुक्तौसम्यगभिव्यज्यते ॥ तदुक्तंभाष्ये ॥ कामेनमेकामआगाद्धृदयाद्धृदयमिति ॥ म
र्त्यदेहंपरित्यज्यचितिमात्रात्मदेहिनः ॥ चितिमात्रेंद्रियाश्चैवप्रविष्टाविष्णुमव्ययं ॥ तदंगानुगृहीतैश्चस्वांगैरेवप्रवर्तनं ॥ कुर्वंति
भुंजतेभोगांस्तदंतर्बहिरेववेति ॥ बृहद्भाष्येपि ॥ स्वरूपभूतचित्तेनकामाद्याःस्युःसुखात्मकाः ॥ दुःखात्मकाःप्राकृतावामुक्ता
नांनकथंचन ॥ मनश्चद्विविधंमतं ॥ चेतनंचजडंचेतिचक्षुराद्यंतथैवच ॥ चेतनंत्विंद्रियंह्यात्मस्वरूपंनापरंस्मृतं ॥ मुक्तानांचेत
नंत्वेवबद्धानामुभयंतथेति ॥ छांदोग्यभाष्येपि ॥ स्वरूपेणैवशक्तोपिजीवदेहस्थितोहरिः ॥ भुंक्तेतदिंद्रियैर्भोगांश्छुरितैरिंद्रियैः
स्वकैरिति ॥ प्रमाणलक्षणेपि ॥ प्रत्यक्षंसप्तविधं ॥ साक्षिषडिंद्रियभेदेनेति ॥ स्वरूपेंद्रियंसाक्षीत्युच्यतइतिटीका ॥ अनुव्या
ख्यानेपि ॥ प्राकृतंशुद्धचैतन्यमक्षंतुद्विविधंमतं ॥ शुद्धमीशरमामुक्तेष्वन्यत्रप्राकृतैर्युतं ॥ निर्दोषमेवचैतन्यमन्यत्रोभयमिष्यत
इति ॥ अनित्यमनसोधिष्ठानमाह ॥ **अनित्येंद्रियमिति** ॥ ११९ ॥ ब्रह्मादीनांप्राकृतशरीरवत्त्वादनित्यंमनआदींद्रियंसि
द्धं ॥ पूर्वोक्तप्रमाणैश्चेतिभावः ॥ जीवाश्रितानित्यमनसोविभागमाह ॥ तत्पंचविधमिति ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐ पंचवृ
त्तिर्मनोवद्व्यपदिश्यते ॥ यथाहवैमनःपंचधाव्यपदिश्यते ॥ मनोबुद्धिरहंकारश्चित्तंचेतनेतीति ॥ संकल्पविकल्परूपंमनः ॥ नि
श्चयरूपाबुद्धिः ॥ अस्वरूपेस्वरूपमतिरहंकारः ॥ स्मरणहेतुश्चित्तं ॥ चेतसोव्याप्तिश्चेतिटीका ॥ नन्वेवमत्रविकल्पपदोक्तसंश

११९ अनित्येंद्रियंब्रह्मादिसर्वजीवानांबाह्यं ॥ तत्पंचविधं ॥ मनोबुद्धिरहंकारश्चित्तंचेतनेति ॥

यस्याहंकारपदोक्तमिथ्याज्ञानस्यचब्रह्मवाय्वोरभावात्पंचवृत्तिमनोनयुक्तं ॥ तदुक्तंद्वितीयस्कंधभागवतेचतुर्मुखेनैव ॥ नभार
तीमेंगमृषोपलक्ष्यतेनकर्हिचिन्मेमनसोमृषागतिः ॥ नमेहृषीकाणिपतंत्यसत्पथेयन्मेहृदौत्कंठ्यवताधृतोहरिरिति ॥ ऋग्भाष्ये
पि ॥ यत्स्वयंप्रतिभातस्यसंशयार्थंगुरोर्वचः ॥ सुपर्णादेर्विरिंचस्यकेवलंधर्मकारणमिति ॥ तत्रसुपर्णादेःसंशयमुक्त्वाचतुर्मुख
स्यसंशयाभावोक्तेः ॥ तट्टीकायांतुसुपर्णादेर्गुरोर्वचोनिगदरूपंतदस्माभिर्दृष्टोयंवेदोवायत्किंचिद्वेतिसंशयनिवृत्त्यर्थंवेदएवाय
मितिनिश्चयार्थंभवति ॥ विरिंचस्यतुसंशयाभावात्केवलंधर्मकारणंभवतीत्युक्तं ॥ नचैवंवाय्ववतारस्यहनूमतो यदैनमेषबाधतेत
दाविमोचयाम्यहं ॥ यदिस्मशक्यतेस्वयंस्वमोचनायतद्वरमितितात्पर्यनिर्णये कथंसंशयोक्तिः ॥ तत्रकुंभकर्णेनसुग्रीवाप
हरणकालएवंसंशयेनहनूमतःसहगमनोक्तेरितिवाच्यं ॥ तत्रापिनिश्चयद्वयस्यैवोक्तेः ॥ तथाहि ॥ यदातदेतिहेत्वर्थेकालार्थेचा
पिभण्यतइत्युक्तेर्यदातदेतिशब्दौहेत्वर्थे ॥ तथाचयदायस्मादेषकुंभकर्णएनंसुग्रीवंबाधते तदातस्मादहंविमोचयामिमोच
यिष्यामीत्येकोनिश्चयः ॥ तथास्वयंसुग्रीवःकुंभकर्णांगुलीविवरेणस्वमोचनायशक्यतेतदातदपिवरमितिद्वितीयोनिश्चयः ॥
अतएवोत्तरत्रनिर्णयेतथैवोक्तिः ॥ तलेनचैनंनिजघानराक्षसःपिपेषभूमौपतितंततोपि ॥ समुद्गतोसौविवरेंगुलीनांजघा
नशूलेनपुनःसराक्षसः ॥ अमोघशूलंप्रपतत्तदीक्ष्यरवेःसुतस्योपरिमारुतात्मजः ॥ प्रगृह्यजानौप्रणिधायशीघ्रंबभंजतंप्रेक्ष्यनना
दचोच्चैरिति ॥ अतोब्रह्मवाय्वोःसंशयाद्यभावात्कथंविकल्पात्मकमनआदीतिचेत् ॥ उच्यते ॥ त्रयोर्थाःसर्ववेदेष्वित्यादिप्र
माणेभ्यःसर्वस्यापिवेदस्यार्थत्रयंसिद्धं ॥ तथाचब्रह्मवाय्वोरर्थत्रयवर्णनसामर्थ्यसद्भावादेवमर्थएवंचार्थइतिव्यवस्थितविकल्प

रूपनिश्चयएव नतुमिथ्याज्ञानरूपसंशयः ॥ एवंपरमात्मप्रेरणयैवाहंकरोमीतिअस्वतंत्रकर्तरिस्वस्मिन्पराधीनकर्तृत्वरूपाहंकारस्यापिसंभवो नतुमिथ्यामतिः ॥ अतोनब्रह्मवाय्वोःपंचवृत्तिमनोनुपपत्तिरित्यलं ॥ इतिमनःप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ इदानीमिंद्रियतत्वंनिरूपयितुंतद्द्विभागमाह ॥ इंद्रियाण्यपीति ॥ १२० ॥ स्वस्वविषयद्रवणशक्तिमत्त्वमिंद्रियलक्षणं ॥ तच्चेशलक्ष्मीमुक्तस्वरूपेंद्रियेषुचानुगतं ॥ इदंविषयजातमुद्दिश्यद्रुतेरिंद्रियमितिनिर्वचनात् ॥ तदुक्तंभाष्ये ॥ विषयद्रवणात्तेषामिंद्रियत्वमुदाहृतमिति ॥ श्रोत्रेंद्रियस्यविषयद्रवणंतुज्ञानोत्पत्तिप्रकरणेवक्ष्यामः ॥ नचालोकेऽतिव्याप्तिरितिवाच्यं ॥ तस्यज्ञानेच्छादिवत्सविषयकत्वाभावात् ॥ इंद्रियाणांतु मीयंतइतिमात्राविषयाइतिगीताभाष्ये मात्रास्पर्शास्तुकौंतेयेति गीतास्थमात्राशब्दव्याख्यानरूप इंद्रियविषयत्वंमात्रात्वमितिविषयद्रवणोक्तेः ॥ नचांडाद्बहिर्गतेष्विंद्रियेष्वव्याप्तिः ॥ तेषांपंचतन्मात्रोपादानत्वेनतद्द्रवणोपपत्तेः॥ तार्किकास्तु ॥ शरीरसंयुक्तंज्ञानकारणमतींद्रियमिंद्रियमितींद्रियलक्षणमाहुः ॥ तन्न ईशलक्ष्मीमुक्तस्वरूपेंद्रियेष्वव्याप्तेः ॥ तेषांशरीरसंयुक्तत्वाभावात् ॥ नचतेषामिंद्रियाणिनसंत्येवेतिवाच्यं ॥ पूर्वोदाहृतबहुप्रमाणविरोधात् ॥ किंच ॥ रामकृष्णाद्यवतारेषुचक्षुरादींद्रियाणांप्रत्यक्षत्वेनातींद्रियत्वाभावादव्याप्तिः ॥ नहितत्रापिगोलकातिरिक्तातींद्रियसद्भावःप्रमाणप्रमितः ॥ ऐकात्म्यप्रत्ययसारमितिश्रुतिविरोधात् ॥ अपिच ॥ ब्रह्मांडाद्बहिर्विद्यमानेषुतदावरणेष्विंद्रियेष्वव्याप्तिः ॥ तेषांशरीरसंयुक्तत्वाभावात् ॥ नचतानिनसंत्येवेतिवाच्यं ॥ भागवतादिपुराणविरोधप्रसंगात् ॥ तस्मा

---

१२० इंद्रियाण्यपिद्विविधानि ॥

रूपनिश्चयएव नतुमिथ्याज्ञानरूपसंशयः ॥ एवंपरमात्मप्रेरणयैवाहंकरोमीतिअस्वतंत्रकर्तरिस्वस्मिन्पराधीनकर्तृत्वरूपाहंकारस्यापिसंभवो नतुमिथ्यामतिः ॥ अतोनब्रह्मवाय्वोःपंचवृत्तिमनोनुपपत्तिरित्यलं ॥ इतिमनःप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानीमिंद्रियतत्वंनिरूपयितुंतद्विभागमाह ॥ इंद्रियाण्यपीति ॥ १२० ॥ स्वस्वविषयद्रवणशक्तिमत्त्वमिंद्रियलक्षणं ॥ तच्चेशलक्ष्मीमुक्तस्वरूपेंद्रियेषुचानुगतं ॥ इदंविषयजातमुद्दिश्यद्रुतेरिंद्रियमितिनिर्वचनात् ॥ तदुक्तंभाष्ये ॥ विषयद्रवणात्तेषामिंद्रियत्वमुदाहृतमिति ॥ श्रोत्रेंद्रियस्यविषयद्रवणंतुज्ञानोत्पत्तिप्रकरणेवक्ष्यामः ॥ नचालोकेऽतिव्याप्तिरितिवाच्यं ॥ तस्यज्ञानेच्छादिवत्सविषयकत्वाभावात् ॥ इंद्रियाणांतु मीयंतइतिमात्राविषयाइतिगीताभाष्ये मात्रास्पर्शास्तुकौंतेयेति गीतास्थमात्राशब्दव्याख्यानरूप इंद्रियविषयत्वंमात्रात्वमितिविषयद्रवणोक्तेः ॥ नचांडाद्बहिर्गतेष्विंद्रियेष्वव्याप्तिः ॥ तेषांपंचतन्मात्रोपादानत्वेनतद्द्रवणोपपत्तेः ॥ तार्किकास्तु ॥ शरीरसंयुक्तंज्ञानकारणमतींद्रियमिंद्रियमितींद्रियलक्षणमाहुः ॥ तन्न ईशलक्ष्मीमुक्तस्वरूपेंद्रियेष्वव्याप्तेः ॥ तेषांशरीरसंयुक्तत्वाभावात् ॥ नचतेषामिंद्रियाणिनसंत्येवेतिवाच्यं ॥ पूर्वोदाहृतबहुप्रमाणविरोधात् ॥ किंच ॥ रामकृष्णाद्यवतारेषुचक्षुरादींद्रियाणांप्रत्यक्षत्वेनातींद्रियत्वाभावादव्याप्तिः ॥ नहितत्रापिगोलकातिरिक्तातींद्रियसद्भावःप्रमाणप्रमितः ॥ ऐकात्म्यप्रत्ययसारमितिश्रुतिविरोधात् ॥ अपिच ॥ ब्रह्मांडाद्बहिर्विद्यमानेषुतदावरणेष्विंद्रियेष्वव्याप्तिः ॥ तेषांशरीरसंयुक्तत्वाभावात् ॥ नचतानिनसंत्येवेतिवाच्यं ॥ भागवतादिपुराणविरोधप्रसंगात् ॥ तस्मा

१२० इंद्रियाण्यपिद्विविधानि ॥

त्तल्लक्षणमयुक्तं ॥ एतेन तदीयंस्मृतिजननेत्यादिलक्षणांतरमप्ययुक्तं ॥ स्वरूपेंद्रियेष्वव्याप्तेः ॥ तत्रेंद्रियमनःसंयोगोत्पत्तिक्र
मेणज्ञानोत्पत्तेरयोगात् ॥ तानिद्विविधानिनिर्दिशति ॥ तत्त्वभूतानीति ॥ १२१ ॥ ज्ञानकर्मेंद्रियाण्यपिसंख्यासंज्ञा
भ्यामाह ॥ घ्राणेत्यादिना ॥ १२२ ॥ तदुक्तंभाष्ये ॥ श्रोत्रादीनितुपंचैवतथावागादिपंचकं ॥ मनोबुद्धिसहायानिद्वादशै
वेंद्रियाणित्विति ॥ नचैतत्प्रमाणेनेंद्रियाणांद्वादशत्वात्कथंदशविधत्वमुक्तमितिवाच्यं ॥ पूर्वमनसइंद्रियत्वाभिधानात् ॥ बु
द्धेश्चमनःपंचवृत्तिषुप्रविष्टत्वात् ॥ अवशिष्टानांदशत्वंनविरुद्धमितिभावः ॥ तत्त्वरूपाणांदशेंद्रियाणामुपादानमाह ॥ तत्रत
त्वरूपाणीति ॥ १२३ ॥ तदुक्तंतृतीयस्कंधभागवते ॥ तैजसानींद्रियाण्येवक्रियाज्ञानविभागशइति ॥ द्वितीयस्कंधभागव
तेपि ॥ तैजसात्तुविकुर्वाणादिंद्रियाणिदशाभवन् ॥ श्रोत्रत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवइति ॥ द्वितीयतात्पर्येपि ॥ अ
तिजाज्वल्यमानत्वात्तैजसानींद्रियाण्यपीति ॥ अत्रश्रोत्रादींद्रियाणांज्ञानजनकत्वशक्तिः॥ वागादिकर्मेंद्रियाणांकर्मजनकत्वश
क्तिः ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ क्रियाशक्तीनिवागाद्यानींद्रियाणीतराणितु ॥ ज्ञानशक्तीनिमनसादेवाश्चज्ञानशक्तय
इति ॥ नित्येंद्रियाणामधिष्ठानमाह ॥ नित्यानीति ॥ ईशलक्ष्मीमुक्तानांनित्येंद्रियसद्भावेप्रमाणानितु मनःप्रकरणए

---

१२१ तत्वभूतानितत्वभिन्नानिचेति ॥ पुनर्द्विविधानि ज्ञानेंद्रियाणिकर्मेंद्रियाणिचेति ॥ १२२ घ्राणरसनचक्षुःश्रोत्रत्वग्रूपाणि ज्ञानेंद्रियाणिपंच ॥
वाक्पाणिपादपायूपस्थानिकर्मेंद्रियाणि पंच ॥ नित्यानित्यभेदेनपुनर्द्विविधानि ॥ १२३ तत्रतत्वरूपाण्यनित्यानिज्ञानकर्मेंद्रियाणितैजसाहंकारोपादान
कानि ॥ तत्वभिन्नानिनित्यानिज्ञानकर्मेंद्रियाणीशलक्ष्मीसर्वजीवानांस्वरूपभूतानि ॥ तानिसाक्षीत्युच्यंते ।

वोक्तान्यनुसंधेयानि ॥ ब्रह्माद्यपेक्षयेशलक्ष्मींद्रिययोर्विशेषमाह ॥ ईशलक्ष्म्योरिति ॥ १२४ ॥ केशनखादीन्यपिस
र्वग्राहकत्वशक्तिमंतीत्यपिद्रष्टव्यं ॥ तदुक्तं विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पादितिश्रुतौ ॥ तद्व्या
ख्यानंचगीतातात्पर्येस्पष्टं ॥ सर्वतःपाणिपादादिर्यतःपाण्यादिशक्तिमान् ॥ केशादिष्वपिसर्वत्रकृष्णकेशोहियादवः ॥
अणोरणुतरैरूपैःपाणिपादादिसंयुतैः ॥ सर्वत्रसंस्थितत्वाद्वासर्वतःपाणिपादवानिति ॥ एतेनरूपग्राहकंचक्षूरसग्राहकंर
सनमित्यादिचक्षुरादिलक्षणंपरास्तं ॥ परमात्मचक्षुरादावतिव्याप्तेः ॥ एवंलक्ष्मींद्रियाणामपिसामर्थ्यबोध्यं ॥ ब्रह्मा
दींद्रियाणांनैतादृशंसामर्थ्यमित्याह ॥ मुक्तानामिति ॥ १२५ ॥ तत्तद्योग्येति ॥ चक्षुषारूपग्रहणं रसनेनरसग्रहण
मित्यादिरूपेणेत्यर्थः ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ घ्राणेनगंधंरसनेनवैरसंरूपंतुदृष्ट्यास्पर्शंत्वचैव ॥ श्रोत्रेणचोपेत्यनभो
गुणंतत्प्रायेणनावृत्तिमुपैतियोगीति ॥ अनित्येंद्रियाणामाश्रयमाह ॥ अनित्यानीति ॥ १२६ ॥ तच्छरीराणामनित्य
त्वेन तन्नाशेतदिंद्रियाणामपिनाशइतिभावः ॥ नन्वनित्यब्रह्मादींद्रियाणामुपादानंकिं ॥ नतावत्तैजसाहंकारः ॥ तस्य
ब्रह्मांडाद्बहिरेवसत्त्वात् ॥ तन्मात्रस्यस्थूलेंद्रियकारणत्वाभावाच्च ॥ नापिपंचभूतानि ॥ तेषामपिबहिर्गतत्वादितिचेत् ॥
उच्यते ॥ ब्रह्मांडांतःपंचभूतसृष्ट्यनंतरंब्रह्मादिगतसूक्ष्मेंद्रियाणामेवभूतैरुपचयः ॥ ब्रह्मांडांतःपंचभूतसृष्टिश्चात्मनआकाशःसं

---

१२४ ईशलक्ष्म्योर्दशेंद्रियाण्यपिप्रत्येकंगंधादिसर्वपदार्थविषयकाणि ॥ १२५ मुक्तानाममुक्तानांचब्रह्मादीनामिंद्रियाणितत्तद्योग्यपदार्थविष
यकाणि ॥ १२६ अनित्यानितत्वभिन्नानिदशेंद्रियाणि ब्रह्मादिसर्वजीवानां ॥

भूतइत्यादिश्रुतिसिद्धा ॥ अतोनदोषः ॥ तदुक्तंभाष्ये ॥ नित्यान्येतानिसौक्ष्म्येणहींद्रियाणितुसर्वशः ॥ तेषांभूतैरुपचयः सृष्टि
कालेविधीयतइति ॥ तृतीयस्कंधतात्पर्येपि ॥ सूक्ष्मेंद्रियाणिसंत्येवस्युःस्थूलान्यप्यहंकृतेः ॥ भूतेभ्यश्चोपचीयंतेपुनर्ब्रह्मशरीरत
इति ॥ युक्तिपादीयसुधायामपि॥ सूक्ष्मरूपेणनित्यमपींद्रियमहंकारभूतांशैरुपचितत्वात्प्राकृतमिति॥ इंद्रियाभिमानिनआह ॥
ब्रह्मादयइति ॥१२७॥ तदुक्तंकाठकभाष्ये॥ सोमवित्तपसूर्याप्याअश्व्यग्नींद्रेंद्रसूनवः॥ यमोदक्षश्चेंद्रियेशाइति॥ तंत्रसारेपि ॥
दिग्वायुसूनुसूर्याश्चवरुणश्चाश्विनावपि ॥ वह्निदक्षाविंद्रसूनुर्मित्रश्चैवमनुस्तथा॥ इंद्रियाख्याइति ॥ विषयद्रवणात्तेषामिंद्रियत्व
मुदाहृतं ॥ तेषांनियामकःप्राणःस्थितएवाखिलप्रभुरिति ॥ ऐतरेयभाष्येपि ॥ अध्यात्ममग्निर्वागाख्यश्चक्षुःसूर्यःप्रकीर्तितः ॥
मित्रोयमश्चवरुणःकुबेरश्चदिगीश्वराः ॥ श्रोत्राभिमानिनःसर्वेवैदिकश्रवणोचितं॥श्रोत्रंचंद्रस्तथास्मार्ततांत्रिकश्रवणोचितं ॥ श्रो
त्रंतुवरुणःकाम्यशास्त्रार्थंमित्रएच ॥ श्रोत्रंयन्नीतिशास्त्रार्थंकुबेरस्तत्रकीर्तितइति ॥ षट्प्रश्नभाष्येपि ॥ तस्मादिंद्रस्त्विंद्रियात्मात
स्यसोमोन्नदेवतेति॥ नन्विंद्रियाभिमानिनोदेवाःब्रह्मवायुशरीरेषुसंतिनवा ॥ नेतिपक्षेतयोरिंद्रियव्यापारोनस्यात् ॥ यदिसंति
तर्हितयोःसर्वजीवोत्तमत्वंनस्यात् ॥ एवंपरमात्मेंद्रियेष्वेतेषांसत्त्वेपरमात्मनः स्वातंत्र्यंनस्यात् ॥ तथामुक्तानामिंद्रियेषुतत्सत्त्वे
तेषांसंसारसाम्यंस्यादितिचेन्न ॥ इंद्रियाभिमानिदेवानांपरमात्मांगेभ्योजातत्वेनसायुज्यभात्क्वेनचमुक्तौतदाश्रितत्वावश्यंभा
वात् ॥ तदुक्तंद्वितीयतात्पर्ये ॥ स्वोत्पत्त्यंगेषुदेवानामन्येषांपादमूलतः ॥ मुक्तिस्तुविहिताविष्णोर्निर्दिष्टेषुयथावचइति ॥ ॥ ४२ ॥

१२७ ब्रह्मादयःसूर्यादयश्चतदभिमानिनः ॥

सूत्रेभाष्येच ॥ ॐ अंगेषुयथाश्रयभावः ॥ ॐ अंगदेवतानांयथायथापरमेश्वरांगाश्रयत्वं चक्षोःसूर्योअजायतेत्यादि तथाभा
वनाकर्तव्येत्यादि ॥ अंगैःपराद्येहिदेवाविसृष्टास्तत्तद्गुणान्परमेसंहरेत ॥ तांश्चापितत्रैवविचिंत्यदेवान्स्थानंमुमुक्षुःपरमंव्रजेते
ति ॥ ब्रह्मवायुशरीरेष्विंद्रियाभिमानिदेवानांविवादपूर्वकंनिर्गमनप्रवेशयोर्बृहदारण्यकोपनिषदादावुक्तेः ॥ नचतच्छरीरंनब्रह्मश
रीरमितिवाच्यं ॥ बृहद्भाष्यविरोधप्रसंगात् ॥ तथाहिबृहद्भाष्यं ॥ अहंश्रेयोविवादंतुयेनकृत्वाखिलाःसुराः ॥ असम
र्थाःस्वरक्षायांसवायुःसुरनायकः ॥ विवदंतोखिलादेवावायुर्नारायणंप्रभुं ॥ अहंश्रेयानहंश्रेयानितिवायुपुरःसराः ॥ उक्तंभ
गवतातेनयेनत्यक्तेऽखिलाअपि ॥ स्थातुंनशक्ताःसश्रेयानित्युक्ताःपुनरागताः ॥ उत्क्रांताश्चपुनःसर्वेतद्विज्ञस्यैपृथक्पृथक् ।
उत्क्रांतेषुब्रह्मदेहाच्छरीरंनपपातह ॥ ऋतउत्क्रांतमेकंतुतदन्येनिवसंतिहि ॥ प्राणउच्चक्रमिष्यतिस्थातुंनाशक्नुवन्परइति ॥ ऐत
रेयभाष्यमपि ॥ वाचाहिंसामकुर्वंस्तेविवदंतःपरस्परं ॥ तेविष्णोराज्ञयावोचन्नुत्क्रामामपृथक्पृथक् ॥ देहादब्जभवस्यास्मा
द्यस्मिन्नुत्क्रांतएवहि ॥ शरीरंपद्यतेश्रेयान्सनइत्यवधार्यतां ॥ ततःक्रमेणचान्याद्यानिष्क्रांतास्तेषुसर्वशः ॥ निष्क्रांतेषुनवैपातःशरीर
स्याभवत्क्वचित् ॥ वायावुत्क्रांतएवैतच्छरीरमपतत्क्षितौ ॥ पुनस्तेप्राविशन्सर्वेवह्निसूर्यौशशीशिवः ॥ नोत्थानमभवत्तेषुप्रविष्टेष्व
पिसर्वशः ॥ वायौप्रविष्टेतूत्थानंकायस्यासीत्तदैवचेति ॥ ननुब्रह्मदेहेवायुप्रवेशनिर्गमनाभ्यांतच्छरीरपातापातावयुक्तौ ॥ तच्छ
रीराभिमानिनश्चतुर्मुखस्यतन्नियामकस्यपरमात्मनश्चसत्त्वेनतत्रतयोरस्वातंत्र्यप्रसंगादितिचेन्न ॥ इंद्रियाभिमानिनामहंकारप
रिहारार्थंबलपरीक्षार्थंचतयोरौदासीन्येनस्थितिसंभवात् ॥ तदुक्तमैतरेयभाष्ये ॥ उदासीनवदास्तांतौकेशवश्चाब्जसंभवः ॥ ते

षांबलपरीक्षार्थंवाय्वादीनांसमस्तशइति ॥ यद्वा ॥ एकांशेनस्वदेहेब्रह्मासुप्तवत्स्थितः ॥ अंशांतरेणबहिर्निर्गतः ॥ तदुक्तंतृतीयतात्पर्ये ॥ अंशेनसुप्तोब्रह्माभूदंशेननिरगांत्तथा ॥ स्वदेहाद्वायुसहितोविष्णुनाचजगत्प्रभुः ॥ तमुत्थापयितुंदेवास्तानृतेत्रीन्महाबलान् ॥ नशक्नुवन्नेकसंस्थास्ततस्तेत्वविशंस्त्रयः ॥ उदतिष्ठद्ब्रह्मदेहस्तदातेषांप्रभावतइति ॥ नन्वेवंब्रह्मवायुदेहेष्विंद्रियाभिमानिनांसत्त्वेपितन्नियामकत्वंनसंभवति ॥ तयोरुत्तमत्वात् ॥ किंतुतन्नियम्यतयैवेतिवक्तव्यं ॥ तथाचब्रह्मदेहेब्रह्मणएवेतरेंद्रियदेवतानियामकत्वसंभवाद्वायुप्रवेशोव्यर्थः ॥ एवंवायुशरीरेपिवायोरेवेतरनियामकत्वसंभवाद्ब्रह्मप्रवेशोव्यर्थइतिचेन्न ॥ परस्परोपकारेणैवदेहद्वयउभयोःप्रवेशसंभवात् ॥ तदुपकारश्चबृहद्भाष्यएवोक्तः ॥ प्राणंविनानचब्रह्मातंविनाप्राणएवच ॥ अन्योन्यापाश्रयाच्छक्तौस्थातुमन्येकुतस्ततः ॥ अन्नाभिमानीब्रह्मैवप्राणोवायुरुदाहृतः ॥ अन्योन्यानुप्रविष्टौतौसर्वदैवतुसंस्थितौ ॥ वायुंविनाब्रह्मणोपिदेहोयंपूतिमेष्यति ॥ वायुश्चशोषमाप्नोतिविनाब्रह्माणमंजसेति ॥ एतेन नचादित्यस्यास्तुतत्सर्वशरीरस्थत्वं भवदभ्युपगमादितिवाच्यं ॥ तस्यापिब्रह्मादिसर्वशरीरस्थत्वानुपपत्तेरिति सर्वगतत्वाधिकरणटीकाविरोधोपिपरास्तः ॥ नियामकत्वाभावेपिनियम्यतयास्थित्यंगीकारात् ॥ मुक्तानामपींद्रियाभिमानिनोदेवाअधमानांनियामकतयोत्तमानांनियम्यतयातत्तदिंद्रियेषुबहिर्वास्वेच्छयावर्तंते ॥ तदुक्तं छांदोग्यभाष्ये ॥ तुरीयायामवस्थायांप्राणादेवनिबोधनं ॥ तथापिसंस्मृतिस्तत्रप्राणवश्यतयाभवेत् ॥ प्राणस्यवश्यतानामतद्भक्त्यातत्प्रसादतः ॥ प्राणेवश्येमनोवश्यमिंद्रियाणिचसर्वशइति ॥ प्राणादेवनिबोधनमित्यत्रैवकारः प्राणान्निबोधनंभवत्येवेत्ययोगव्यवच्छेदार्थः ॥ नत्वितरदेवतानियमनव्यवच्छेदार्थः ॥ अन्यथामुक्तस्वकीयावरयंतृताचमुक्तावपिब्रह्मपुरःसराणामित्यनुव्याख्यानविरोधापत्तेः ॥ तथाऽऽथर्वणभाष्येपि ॥ प्रतिबिंबोहरेःप्राणस्तस्यचान्याःकलाःक्रमात् ॥ कलानांदेवताअन्यादेवतानांनराअपि ॥ तस्मात्सर्वेषुमुक्तेषुनरेष्वपिनियामकाः ॥ तिष्ठंतिनात्रसंदेहःपरमात्मनिचाखिलाइति ॥ स्वरूपेंद्रियंसाक्षीत्युक्तं ॥ तस्यमुक्त्यवस्थायां साक्षादेवसर्वपदार्थविषयकत्वेविवादाभावात्संसारावस्थायांविषयानाह ॥ **संसारावस्थायामपीति** ॥१२८॥ प्रमाणपद्धत्युक्तान्विषयाननुवदति ॥ आत्मामनइत्यादिना ॥ आत्मादीनांसाक्षिवेद्यत्वंचानुपदमेवदर्शयिष्यामः ॥ साक्षादेवेति ॥ नतुघटादिवज्ज्ञानद्वारेत्यर्थः ॥ परंपरासंबंधेनसाक्षिविषयाःकइत्याकांक्षायामाह ॥ **बाह्येंद्रियद्वारेति** ॥ १२९ ॥ नन्वात्माकाशादिव्यतिरिक्तानांबाह्येंद्रियागोचराणांधर्माधर्मादीनांकथंसाक्षिविषयत्वमित्यतआह ॥ **ज्ञाततयेति** ॥ १३० ॥ श्रुत्यनुमानादिजन्यातींद्रियपदार्थविषयकज्ञानस्यसाक्षिविषयत्वेनतद्द्वारातद्विषयस्यापिसाक्षिविषयत्वमितिभावः ॥ अज्ञाततयेति ॥ यस्मिन्नर्थेयस्यपुरुषस्यकदापिप्रमाणप्रवृत्तिरेवनास्ति सोपिसाक्षिविषयएव ॥ एतदतिरिक्तंकिंचिन्नावेदिषमितितत्पदार्थविषयकज्ञानस्यसाक्षिवेद्यत्वेनतद्विषयस्यापितद्विषयत्वादित्यर्थः ॥ एतच्चपद्धतिन्यायामृतसुधासूपपादितमितिभावः ॥ ननुसाक्षीनामनप्रमाणांतरं ॥ मानाभावाद्गौरवाच्च ॥ ऐंद्रियकाणांचेंद्रियैरेवज्ञानसंभवात् ॥ अतींद्रियाणांचानुमानागमाभ्यांसिद्धिसंभवादित्यतआह ॥ **साक्ष्यनंगीकार इति** ॥१३१॥

---

१२८ संसारावस्थायामपिसाक्षिस्वरूपेंद्रियस्यात्मामनस्तद्धर्माः सुखदुःखादयोऽविद्याकालोव्याकृताकाशश्चसाक्षादेवविषयाः ॥ १२९ बाह्येंद्रियद्वाराशब्दादयोपिसाक्षिविषयाः ॥ १३० ज्ञाततयाज्ञाततयासर्वेप्यतींद्रियाःसाक्षिविषयाः ॥ १३१ साक्ष्यनंगीकारेकालाकाशाद्यसिद्धिप्रसंगात् ॥

उपलक्षणमेतत् ॥ ऐंद्रियकाणामतींद्रियाणांचासिद्धिप्रसंगात् ॥ तज्ज्ञानप्रामाण्यग्राहकस्यसाक्षिव्यतिरिक्तस्याभावादितिवक्ष्यमाणत्वादित्यपिद्रष्टव्यं ॥ तथाहि ॥ आत्माजीवस्तावत्साक्षिवेद्यः ॥ अहमितिप्रतीयमानत्वात् ॥ नचाहमितिप्रत्ययोनसाक्षिरूपः किंतुमानसानुभवरूपइतिवाच्यं ॥ आत्मनोमनोविषयत्वेकदाचिदात्मविषयकसंशयविपर्ययौस्यातां ॥ नहिकश्चिदहमहंनभवामीतिविपर्ययंवाऽहंवानवेतिसंशयंवाकरोति ॥ तत्कस्यहेतोः ॥ साक्षिवेद्यत्वादेवेत्यंगीकर्तव्यं ॥ तदुक्तमनुव्याख्याने ॥ साक्षिसिद्धेत्वसंशयात् ॥ साक्षिसिद्धस्यनक्वापिबाध्यत्वंतददोषतइति ॥ मनोग्राह्येक्वचिद्विपर्ययःसंशयश्चदृश्यते ॥ यथेदंरजतमितिभ्रमेप्रामाण्यावधारणमावश्यकं ॥ अन्यथानिष्कंपप्रवृत्त्यभावप्रसंगात् ॥ तच्चप्रामाण्यावधारणंनसाक्षिणा ॥ अयथार्थज्ञानेप्रामाण्यस्यबाधितत्वेनसाक्षिग्राह्यत्वायोगात् ॥ अतोमनसैवेतिवक्तव्यं ॥ अतएवतत्रकदाचित्संशयोपियुज्यतेइदंज्ञानंप्रमाणंवानवेति ॥ तदुक्तमनुव्याख्याने ॥ यत्क्वचिद्व्यभिचारिस्याद्दर्शनंमानसंहितदिति ॥ एवंसदेवदत्तोगौरोनवा परमाणुर्गुरुत्वाधिकरणंनवेतिसंशयोमानसइतितार्किकेणाप्यंगीकृतमिति ॥ नन्वात्मनोमनोवेद्यत्वाभावेप्यनुमानवेद्यत्वमस्तु ॥ तथाहि ॥ बुद्ध्यादयस्तावद्गुणाः तेचगुण्याश्रिताः रूपादिवत् ॥ तेचनदिक्कालमनसांगुणाः विशेषगुणत्वात् ॥ नापिपृथिव्यादिगुणाः बाह्येंद्रियाग्राह्यत्वात् ॥ नाप्याकाशगुणाः श्रोत्राग्राह्यत्वात् ॥ अतःपरिशेषाद्बुद्ध्यादीनांयोगुणीसएवात्मेतिचेन्न ॥ मनसएवबुद्ध्याद्याश्रयत्वोपपत्तेः ॥ नचनमनोविशेषगुणाश्रयइतिवाच्यं ॥ धर्मिकल्पनातोवरंधर्मकल्पनमितिन्यायेनधर्म्यंतरकल्पनापेक्षयामनोगुणत्वकल्पनस्यैवलघुत्वात् ॥ किंच ॥ लिंगानुसंधानंविनाप्याविपालगोपालानांझडित्येवाहंप्रत्ययस्यजाय

मानत्वेनलैंगिकत्वानुपपत्तेः ॥ अपिच ॥ सुषुप्तिकालआत्मविषयंज्ञानमंगीकर्तव्यं ॥ अन्यथासुप्तोत्थितस्याहंसुखमस्वाप्समि
त्युत्तरकालीनानुस्मरणाभावप्रसंगात् ॥ अननुभूतार्थेस्मरणायोगात् ॥ नचस्वापकालेमनसाऽऽत्मज्ञानमितिवक्तुंयुक्तं ॥ सर्वेंद्रि
याणामुपरतत्वात् ॥ नचाहंसुखमस्वाप्समितिप्रत्ययोनानुस्मृतिः ॥ किंतूत्तरकालेनुभवएवेतिवाच्यं ॥ सामग्रीविरहात् ॥ नचसु
षुप्तिकालेऽहमासमिदानींसत्त्वादित्यनुमानमेवसामग्रीतिवाच्यं ॥ पूर्वकालस्याप्यसिद्धत्वेनाश्रयासिद्धेः ॥ किंचात्मनोव्याप्य
सिद्धत्वेनाप्रसिद्धविशेषणत्वापत्तेः ॥ तदुक्तमनुव्याख्याने ॥ पक्षीकर्तुमशक्यत्वान्नानुमातत्रवर्ततइति ॥ अतःसाक्षिणैवात्मसि
द्धिः ॥ एवंमनःसिद्धिरपिसाक्षिणैव ॥ अहंतद्विषयकमनोवांस्तत्रमेमनःपततीत्यादिप्रत्ययस्यसाक्षिरूपत्वात् ॥ नहिमनोमनो
ग्राह्यमितिवक्तुंयुक्तं ॥ इंद्रियाणामतींद्रियत्वात् ॥ नन्वनुमानेनैवमनःसिद्धिः ॥ नचलिंगाभावः ॥ युगपज्ज्ञानानुत्पत्तिर्मन
सोलिंगमितिभगवतागौतमेनोक्तत्वात् ॥ तथाहि ॥ बाह्येंद्रियेषुस्वैःस्वैर्विषयैर्युगपत्सन्निकर्षेष्वात्मनाधिष्ठितेष्वपिनयुगपज्ज्ञाना
निजायंते ॥ तेनज्ञायतेस्त्येतेभ्योन्यत्सहकारि यत्संयोगक्रमाज्ज्ञानक्रमस्तदेवमनइतिचेन्न ॥ आत्मनएवैवंविधसामर्थ्यकल्पनो
पपत्तौमनोरूपसहकार्यंतरापरिकल्पनात् ॥ वृक्षात्पततःफलस्यक्रमवर्तिन्याकाशसंयोगेसहकार्यंतरपरिकल्पनाप्रसंगाच्च ॥ युग
पज्ज्ञानानुत्पत्तिमजानतोपिममनोन्यत्रगतमितिझडितिप्रत्ययदर्शनाच्च ॥ यथायुगपन्माणवकोगच्छतिपठतिचपंथानमीक्षतेव
हतिचकमंडलुंजिघ्रतिचपुष्पाणिशृणोतिचशब्दमितिप्रत्ययबलात्कर्तुर्युगपदेवनानाव्यापारोदृश्यते तथेंद्रियाणामपिकरणानां
नानापदार्थविषयकसमूहालंबनज्ञानस्ययुगपत्संभवात् ॥ दीर्घशष्कुलीभक्षणादौसर्वेंद्रियैर्युगपज्ज्ञानस्यदर्शनाच्चनमनःकल्पनाव

सरः ॥ नन्वेवमपिबुद्ध्यादयःसंयोगासमवायिकारणकाः जन्यविशेषगुणत्वात् शब्दवदित्यनुमानेनासमवायिकारणसंयोगसि
द्धौतदाश्रयत्वेनमनःसिद्धिरितिचेन्न ॥ आत्मेंद्रियसंयोगस्यैवासमवायिकारणत्वोपपत्तावात्ममनःसंयोगस्यकारणत्वापरिकल्प
नात्॥समवायस्यनिराकृतत्वाच्च ॥ विभागजशब्देशब्दजशब्देचत्वन्नयेव्यभिचाराच्च ॥ तंतुरूपाद्यसमवायिकारणजन्येषुघटरू
पादिषुव्यभिचाराच्च॥ अधिकंतुसुधायांद्रष्टव्यं॥ नन्वेवमप्यागमादेवमनःसिद्धिरस्तु नसाक्षिणेतिचेन्न॥ जातिबधिराणांमनःप्र
तीत्यभावप्रसंगात्॥तस्मात्सिद्धंसाक्षिग्राह्यत्वंमनसः॥एवंमनोधर्माःसुखदुःखेच्छादयोपिसाक्षिग्राह्याः॥अहंदुःखीसुखीत्यादिप्र
त्ययानांसाक्षिरूपत्वात् ॥ नचसुखदुःखादीनांनमनोधर्मत्वं किंत्वात्मधर्मत्वमितिवाच्यं ॥ अंतःकरणपरिणामत्वस्यगुणप्रकर
णेवक्ष्यमाणत्वात् ॥ नचायमनुभवोमानसः ॥ इंद्रियाणांस्वधर्मग्रहणेसामर्थ्यायोगात् ॥ संतुवात्मधर्माःसुखादयस्तथापिनम
नोग्राह्याः ॥ कदापिसुखदुःखादौसंदेहाद्यभावात् ॥ न हिममानुभूतंसुखंवानवेतिकश्चित्संदिग्धेनवामयानुभूतंदुःखमेवनतुसुख
मितिसुखविषयेविपर्ययस्थोभवति ॥ अतःसुखदुःखादयःसाक्षिवेद्याइतिसिद्धं ॥ एतच्चसांख्याधिकरणसुधायांचर्चितं ॥ एवं
भावरूपाज्ञानमपिसाक्षिग्राह्यं ॥ अहमज्ञोमामन्यंचनजानामीत्यनुभवात् ॥ नचायंमानसः ॥ निर्बाधप्रतीतित्वात् ॥ आश्र
यग्रहणासमर्थस्यमनसआत्मगताज्ञानग्राहकत्वासंभवाच्च ॥ नचश्रोत्रेंद्रियेणशब्दग्रहवन्मनसाऽज्ञानमात्रग्रहइतिवाच्यं ॥ आ
श्रयराहित्येनशब्दग्रहवत्कदाप्यज्ञानस्याश्रयंविनाऽज्ञानात् ॥ नह्यज्ञानमितिप्रतीतिःकिंत्वहमज्ञइति ॥ नचसाक्ष्युपनीतआ
त्मनिमनसाऽज्ञानप्रतीतिरितिवाच्यं ॥ कॢप्तसाक्षिणैवाज्ञानप्रतीत्युपपत्तावुपनीतभानाकल्पनात् ॥ किंचसुप्तिकालेऽज्ञानप्रती

तिरावश्यकी ॥ सुप्तोत्थितस्यनकिंचिद्घटादिकमवेदिषमित्यनुस्मृतेः ॥ नहिसुप्तिकालेऽज्ञानोपस्थापकंकिंचिदस्ति मनसोप्युप
रतत्वात् ॥ अतःसाक्षिणैवाज्ञानप्रतीतिरितिसिद्धंसाक्षिवेद्यत्वमज्ञानस्य ॥ अधिकंत्वविद्याप्रकरणेवक्ष्यामः ॥ नचानादिमा
ययासुप्तइत्याद्यागमात्तत्सिद्धिः ॥ जातिबधिराणामज्ञानप्रतीत्यभावप्रसंगादिति ॥ एवमव्याकृताकाशोपिसाक्षिवेद्यः ॥ इह
विहंगमःपततीतिप्रत्ययस्यसाक्षिरूपत्वात् ॥ नचेहेतिप्रत्ययश्चाक्षुषश्चक्षुरन्वयविधानादितिवाच्यं ॥ रूपरहितद्रव्यत्वेनचा
क्षुषत्वसामग्रीविरहात् ॥ इंद्रियानुविधानस्यपक्षिग्रहणएवोपयुक्तत्वात् ॥ नचसाक्षिणोबहिरर्थेपक्षिणिस्वातंत्र्याभावाच्च
क्षुषश्चाकाशेसामर्थ्याभावात्कथमिहपक्षीपततीतिप्रत्ययःसाक्षिणानिर्वाह्यइतिवाच्यं ॥ साक्षिणोपनीतआकाशेचक्षुषेहपक्षी
तिप्रत्ययसंभवात् ॥ सुरभिश्चंदनखंडइतिप्रत्ययवत् ॥ नचालोकावयवएवेहप्रत्ययविषयोनत्वाकाशइतिवाच्यं ॥ इहालो
कइहालोकाभावइत्यादिप्रत्ययानांतथाप्यनिर्वाहात् ॥ नन्वथापिनाकाशंसाक्षिप्रत्यक्षं ॥ अनुमानेनैवतत्सिद्धिसंभवात् ॥
तथाहि ॥ शब्दस्तावद्गुणः सामान्यवत्त्वेसत्यस्मदादिबाह्यैकेंद्रियग्राह्यत्वात् ॥ रूपवत् ॥ गुणत्वाद्द्रव्याश्रितइतिसामान्यतः
शब्दाश्रयद्रव्यसिद्धौ शब्दोनस्पर्शवद्विशेषगुणः प्रत्यक्षत्वेसत्यकारणगुणपूर्वकत्वात्सुखादिवत् ॥ नाप्यात्मगुणः ॥ बाह्येंद्रिय
ग्राह्यत्वात् ॥ रूपादिवत् ॥ नापिदिक्कालमनसांगुणः विशेषगुणत्वात्प्रत्यक्षत्वाच्च॥ अतःपरिशेषाच्छब्दगुणकआकाशःसिद्ध्य
तीतिचेन्न । जातिबधिराणामाकाशप्रत्ययाभावप्रसंगात् ॥ शब्दज्ञानाभावेनानुमानाप्रवृत्तेः ॥ किंच शब्दोगुणइत्यत्रवर्णा
त्मकःशब्दोवापक्षोध्वन्यात्मकोवा ॥ नाद्यः । तस्यद्रव्यत्वस्यसाधयिष्यमाणत्वात् ॥ नद्वितीयः ॥ तस्यपृथिव्यादिगुणत्वो

पपत्तेः ॥ नचप्रत्यक्षत्वेसत्यकारणगुणपूर्वकत्वंपृथिव्याद्यनाश्रितत्वसाधकमितिवाच्यं ॥ पिठरपाकपक्षेघटादिनिष्ठपाकजरूपे व्यभिचारप्रसंगात् ॥ किंचभेरीशंखादिनिष्ठतयाशब्दस्यप्रतीयमानत्वेनानुमानस्यप्रत्यक्षबाधः ॥ ननुशब्दस्यशंखाद्याश्रयत्वे श्रोत्रेंद्रियेणशब्दप्रत्यक्षमेवनस्यात् ॥ तथाहि ॥ श्रोत्रंसंबद्धंसच्छब्दंगृह्णात्युतासंबद्धं ॥ नांत्यः ॥ अतिप्रसंगात् ॥ नाद्यः ॥ संबंधोपायाभावात् ॥ नहिशब्दः शंखंपरित्यज्यश्रोत्रदेशंगच्छति ॥ अमूर्तत्वात् ॥ नवाश्रोत्रंगच्छति ॥ विभुत्वात् ॥ अतः शब्दस्याकाशगुणत्वमंगीकृत्यस्वसमवायिदेशेवीचीतरंगन्यायेनशब्दांतरोत्पादेयःशब्दःकर्णदेशसंबद्धःसएवश्रोत्रग्राह्यइतिसि ध्यतीतिचेन्न ॥ शब्दस्यैवश्रोत्रंप्रत्यागमनोपपत्तेः ॥ पुष्पादिगंधवत् ॥ नचपुष्पावयवसंबद्धएवगंधस्तैःसहागच्छतीतिवाच्यं ॥ असिद्धेः ॥ शब्दस्यापिशंखावयवैरागमनसंभवात् ॥ तदुक्तंबृहद्भाष्ये ॥ शब्दोहिस्थानांतरंगत्वाप्रतिश्रुतित्वमुपैतीति ॥ श्रो त्रस्यवाशब्ददेशंप्रतिगमनमस्तुचक्षुर्वत् ॥ नचाकाशस्यविभोर्नगमनमितिवाच्यं ॥ भूताकाशस्यविभुत्वाभावात् ॥ तामसाहं कारकार्यत्वेनगमनसंभवाच्च ॥ श्रोत्रेंद्रियस्यशुद्धाकाशत्वेसाधकाभावाच्च ॥ अस्तुवाकथंचिद्भूताकाशसिद्धिरनुमानात् ॥ अ व्याकृताकाशसिद्धिस्तुसाक्षिणैव ॥ तत्साधकलिंगाभावात् ॥ आकाशद्वैतंतुसाधितमधस्तात् ॥ नचागमादाकाशसिद्धिः ॥ जातिबधिराणामाकाशप्रत्ययाभावप्रसंगात् ॥ तस्मादाकाशसिद्धिःसाक्षिणैव ॥ तदुक्तंप्रकृत्यधिकरणानुव्याख्याने ॥ सत्य त्वंगगनादेश्चसाक्षिप्रत्यक्षसाधितमिति ॥ सुधायामप्येवमेवोपपादितमिति ॥ अधिकंतुसुधायांद्रष्टव्यं ॥ एवंकालोपिसाक्षिप्र त्यक्षएव ॥ इदानींघटइत्यादिप्रतीतेःसाक्षिरूपत्वात् ॥ ननुकालोनसाक्षिप्रत्यक्षः ॥ तदितरप्रमाणविषयत्वादितिचेन्न ॥ प्रमा

णांतरस्यतत्रानवकाशात् ॥ तथाहि ॥ नतावत्प्रत्यक्षं ॥ रूपाभावात् ॥ नाप्यागमः ॥ जातिबधिराणामपीदानीमितिप्रत्यया
त् ॥ नाप्यनुमानं ॥ तत्प्रतिबद्धलिंगाभावात् ॥ किंचानुमानमपिकालपक्षकंवाकालसाध्यकंवा ॥ नाद्यद्वितीयौ ॥ आश्रया
सिद्ध्यप्रसिद्धविशेषणत्वयोरापातात् ॥ तत्सिद्धौचानुमानवैयर्थ्यात् ॥ तदुक्तंप्रकृत्यधिकरणानुव्याख्याने ॥ पक्षीकर्तुमश
क्यत्वान्नानुमातत्रवर्ततइति ॥ किंचास्तुयथाकथंचिदनुमानप्रवृत्तिः ॥ तथापिकालसिद्धिंविनाव्याप्तिपक्षधर्मताज्ञानयोरयो
गः ॥ अयमितिवातदितिवातयोर्ज्ञानंवक्तव्यं ॥ तत्रतत्तेदंतयोरेतद्देशैतत्कालसंबंधरूपत्वात् ॥ तथाचव्याप्तिग्रहकालएवकाल
स्यसिद्ध्यानुमानवैयर्थ्यात् ॥ तदुक्तमनुव्याख्याने ॥ तदेतदितिसर्वंचदृश्यंवास्मृतिगोचरं ॥ साक्षिसिद्धेनकालेनखचितंह्येव
वर्तते ॥ तस्मान्नतंविनाकिंचित्स्मर्तुंद्रष्टुमथापिवा ॥ शक्यंतन्नित्यसिद्धेर्हिनानुमावसरोभवेदिति ॥ तार्किकास्तु ॥ परापरव्य
तिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिंगःकालइतिन्यायभाष्यं ॥ अस्यार्थः ॥ अस्तितावत्स्थविरेपरोयमितिप्रत्ययोयूनिचा
परइति ॥ सचदिक्कृतपरापरप्रत्ययविलक्षणत्वात्परापरव्यतिकरप्रत्ययइत्युच्यते ॥ युगपदागतावयुगपदागताविितिद्वौप्रत्ययौ ॥
तथाचिरेणागतोचिरेणागतइतिद्वौप्रत्ययौ ॥ तएतेषट्प्रत्ययाःकालस्यलिंगानि ॥ कालाभावेचैतेषांनिरालंबनत्वापत्तेः ॥ नहि
द्रव्यमेवालंबनं ॥ तद्विलक्षणप्रत्ययत्वादिति ॥ तन्न ॥ परापरादिप्रत्ययानामेवकालविशिष्टव्यक्तिविषयकत्वे नकालज्ञानेनका
लानुमानासंभवात् ॥ नहिदंडिज्ञानेनदंडानुमानंसंभवति ॥ नचविशिष्टज्ञानमिदंविशेषणज्ञानपूर्वकंविशेषणंचकालएवेत्यनुमी
यतइतिवाच्यं ॥ तर्हिकालज्ञानानुमानत्वापत्त्याकालानुमानत्वाभावप्रसंगात् ॥ किंचकालरूपविशेषणज्ञानमनुमानात्पूर्वकेनप्र

माणेनेतिवक्तव्यं ॥ नतावदनुमानांतरेण ॥ अनवस्थापत्तेः ॥ अतःसाक्षिणैवेतिसिद्धंनःसमीहितं ॥ ननुशरीरेवलीपलितका
र्कश्यादिकंप्रत्यक्षेणानुभूयते ॥ तच्चकारणजन्यं कार्यत्वाद्धटवदित्यनुमानेनतत्कारणसिद्धौ तच्चकारणंकालएवेतिचेन्न ॥ का
लसंबंधस्यसर्वदाविद्यमानत्वेनवलीपलितादिमात्रकारणत्वानुपपत्तेः ॥ उभयवादिसिद्धाकाशादिद्रव्याणामेववलीपलितादि
कारणताशक्तिकल्पनोपपत्तावतिरिक्तकालकल्पनेगौरवाच्च ॥ स्यादेतत् ॥ बहुतरतरणिपरिस्पंदांतरितजन्मत्वंपरत्वं ॥ अल्प
तरसौरसंचारांतरितजन्मत्वंचापरत्वं ॥ एकतपनसंचारविशिष्टत्वंयौगपद्यं ॥ अनेकतपनसंचारविशिष्टत्वमयौगपद्यं ॥ बहुतर
णिक्रियाविशिष्टत्वंचिरत्वं ॥ कतिपयतरणिक्रियाविशिष्टत्वंक्षिप्रत्वं ॥ एतैःप्रत्ययैःकालोनुमीयते ॥ तरणिक्रियाहितरणिग
ता ॥ साचस्थविरादिपिंडेषुसाक्षात्संबंधाभावात्परंपरासंबंधेनैववाच्या ॥ तत्परंपरासंबंधघटकएवकालइतिचेन्न ॥ सूर्यरश्म्या
काशदिशामेवतत्संबंधघटकत्वोपपत्तावतिरिक्तकालाकल्पनात् ॥ किंचसुषुप्त्यवस्थायांकालोनुभूयते ॥ एतावंतंकालंसुखमहम
स्वाप्समित्युत्तरकालीनपरामर्शात् ॥ नचसुषुप्तौमानांतरस्यप्रसक्तिरस्ति ॥ अतःसाक्षिणैवकालसिद्धिः ॥ नचागमात्तत्सिद्धिः ॥
जातिबधिराणामपितत्प्रत्ययादित्यलं ॥ तदुक्तमनुव्याख्याने ॥ कालोहिसाक्षिप्रत्यक्षःसुषुप्तौचप्रतीतितइति ॥ इतींद्रियप्रकर
णम् ॥ ७ ॥ ७ ॥ ७ ॥ इदानींमात्रारूपद्रव्यंनिरूपयति॥**मीयंतइति**॥१३२॥मीयंते इंद्रियैर्ज्ञायंतइत्यर्थः॥तदुक्तंगीताभाष्ये॥

---

१३२ मीयंइततिमात्राः शब्दस्पर्शरूपरसगंधाः पंचविषयाः ॥

मीयंतइतिमात्राविषयाइति ॥ तेषांपंचभूतोपादानतयातद्रवणाद्द्रव्यत्वमितिभावः ॥ तद्विभागमाह ॥ **ताइति** ॥ १३३ ॥
तत्रभूतानांमात्राणामुपादानमाह ॥ **तामसेति** ॥ तदुक्तंतृतीयस्कंधभागवते ॥ तामसाच्चविकुर्वाणाद्भगवद्वीर्यचोदितात् ॥ श
ब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दगमित्यादि ॥ ननुपुराणादौपंचतन्मात्राणामेवतामसाहंकारजन्यत्वमुच्यते ॥ तत्कथमेत
दित्यतआह ॥ **पंचतन्मात्राइति** ॥ **गुणाइति** ॥ आकाशादीनामितिशेषः ॥ तदभिमानिनआह ॥ **उमेति** ॥ १३४ ॥ उमै
कस्यैवाभिमानिनी ॥ सौपर्णीवारुण्यौतुद्वयोर्द्वयोरितिविवेकः ॥ तदुक्तंकाठकभाष्ये ॥ सौपर्णीवारुणीतथा ॥ उमेतिचार्थमा
निन्यस्तिस्रोद्विद्व्येकदेवताइति ॥ तद्व्याख्यानेव्यासतीर्थीयेप्येवमेवव्याख्यानमस्तीतिद्रष्टव्यं ॥ आदिशब्देनापानव्यानोदानस
मानागृह्यंते ॥ तेचत्वारोबृहस्पतिनासहशब्दादिपंचानांक्रमेणाभिमानिनइत्यर्थः ॥ तदुक्तंतंत्रसारे ॥ शब्दनामाबृहस्पतिः ॥
अन्येचसूनवोवायोरिति ॥ इदमुपलक्षणं ॥ सर्वेसर्वाभिमानिनइतिप्रमाणबलेनोत्तमादेवाब्रह्माद्याअपिशब्दाद्यभिमानिनइति
द्रष्टव्यं ॥ इतिपंचतन्मात्राप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ उपादानोक्तिपूर्वकं भूतानिनिरूपयति ॥ **तद्वारेति** ॥१३५॥ शब्दादि
तन्मात्राद्वारेत्यर्थः ॥ तद्विभजति ॥ **तानीति** ॥ १३६ ॥ शब्दादिद्वारातामसाहंकारोपादानकानिपंचभूतानीत्युक्तं ॥ त

---

१३३ ताद्विविधाः ॥ तत्वरूपास्तद्भिन्नाश्चेति ॥ तत्वरूपास्तामसाहंकारजन्याः पंचतन्मात्राइत्युच्यंते । तत्वभिन्नामात्रागुणास्तत्प्रकारणेनिरूप्यंते॥
१३४ उमासुपर्णीवारुण्योबृहस्पत्याद्याश्चतदभिमानिनः ॥ १३५ तद्वारातामसाहंकारजन्यानिपंचभूतानि । आकाशवायुतेजोप्पृथिव्यः ॥
१३६ तानिद्विविधानि ॥ तत्वभूतानितद्भिन्नानिचेति ॥

त्राकाशस्यसाक्षादुपादानमाह ॥ तत्रशब्दादिति ॥ १३७ ॥ शब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दगमितिभागवतमत्रप्रमा
णमितिभावः ॥ विनायकइति ॥ तदुक्तंषट्प्रश्नभाष्ये ॥ आकाशदेवताविघ्नइति ॥ तंत्रसारेपि ॥ अन्येपिसूनवोवायोरुद्र
स्यापिप्रकीर्तिताइति ॥ बृहद्भाष्येपि ॥ नभोभिमानीविघ्नेशोविष्णोर्मांसाश्रितःसदा ॥ अंतरिक्षाभिमानीचतत्सूनुरुदरेस्थित
इति ॥ भूताकाशस्यपरिमाणमाह ॥ अहंकारतत्वादिति ॥ १३८ ॥ अत्रअबग्नीरनभोहंकृन्महत्तत्वगुणत्रयैः ॥ क्रमाद्दशो
त्तरैरेतदितिनिर्णयोक्तिर्मानं ॥ ननुबुद्धितत्वमारभ्यपंचतन्मात्रापर्यंतंमूलेकिमितिपरिमाणंनोक्तं ॥ नचतेषांपरिमाणाभावादेव
नोक्तमितिवाच्यं ॥ तर्हिद्रव्यत्वाभावप्रसंगात् ॥ परिमाणस्यद्रव्यत्वव्यापकत्वेनतदभावेद्रव्यत्वस्याभावादितिचेन्न ॥ तेषामपि
परिमाणस्यसंभवात् ॥ नचाबग्नीरनभोहंकृदितिपरिमाणप्रकरणेतर्हिकुतोनुक्तिरितिवाच्यं ॥ निर्णये आचार्यैर्दशोत्तरपरिमाण
वद्द्रव्यस्यैवोक्तत्वेनपंचभूताहंकारमध्यपतितानांदशोत्तरत्वाभावादनुक्तिसंभवात् ॥ नचतेषांपरिमाणस्यक्काप्यनुक्तत्वादितिवा
च्यं ॥ ज्ञानपादीयसन्न्यायरत्नावल्यामुक्तेः ॥ तथाहि ॥ व्याप्तापरोक्षप्रकरणेतद्वाक्यानि ॥ मनुबृहस्पत्यादयस्त्वहंकारात्परिमा
णतोहीनेनबुद्धितत्वेनस्वोचितपरिमाणेनपरिमितदेशपर्यंतमवस्थितंविष्णुंपश्यंतिसोमसूर्यौतुबुद्धितत्वात्परिमाणतोहीनेनमन-
स्तत्वेनपरिमितदेशपर्यंतमवस्थितंविष्णुंपश्यतः । वरुणादयस्त्वाकाशवाय्वादिभूतैःक्रमेणपरिमाणतोदशहीनैःपरिमितदेशपर्य

१३७ तत्रशब्दादाकाशोत्पत्तिः ॥ तदभिमानीविनायकः ॥ १३८ अंहकारतत्वाद्द शगुणन्यूनमाकाशं ॥

तमेवस्थितंविष्णुंयोग्यतानुसारेणपश्यंतीति ॥ वायुतत्वंनिरूपयितुंतद्विभागमाह ॥ वायुर्द्विविधइति ॥ १३९ ॥ तद्भिन्नइति ॥ योयंवायुर्वातिबहिःसइत्यर्थः ॥ ईशलक्ष्म्योरिति ॥ अत्रमानंतु प्राणाद्वायुरजायतेतिश्रुतिः ॥ वाचोबभूवुरुशतीःश्वसतोस्यनस्तइतिद्वितीयस्कंधभागवतं॥हयग्रीवादिमाविद्याःश्वसितत्वेननिःसृताइतिऋग्भाष्यं॥तथैतरेयभाष्यमपि॥विष्णोर्विमुक्तवायोश्चलोमाद्यंतुचिदात्मकं ॥लोमप्राणादिभेदश्चनैवकश्चिच्चिदात्मनि ॥ प्राणादिभ्यश्चवाय्वाद्याएवंविष्णोःप्रजज्ञिरे ॥ एवंहिसर्वेदेवाहिविष्णवंगेभ्यःप्रजाज्ञिरइति ॥ प्राणेनसृष्टावंतरिक्षंचवायुश्चेत्यैतरेयोपनिषत् ॥ तथाबृहद्भाष्यमपि ॥ मनोवाक्प्राणरूपोसौभगवान्पुरुषोत्तमः ॥ मनोवाक्प्राणतस्तस्यजाताअन्येभिमानिइति ॥ द्वितीयस्कंधभागवतमपि ॥ अन्नंचवीर्यंश्वसितंमातरिश्वागतिर्वयः कर्मगुणप्रवाहइति ॥ तथा ॥ वामबाहुकृतवामकपोलोवल्गितभ्रुरधरार्पितवेणुः ॥कोमलांगुलिभिरास्तृतमार्गगोप्यईरयतियत्रमुकुंदः ॥ तन्माधवोवेणुमुदीरयन्वृतोगोपैर्गृणद्भिःस्वयशोबलान्वितइतिदशमभागवतं॥माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः॥ पांचजन्यंहृषीकेशोदेवदत्तंधनंजयइतिशंखध्वनिजनकश्वासोगीतायामुक्तः ॥ सटावधूताजलदाःपरापतन्ग्रहाश्चतदृष्टिविमुष्टरोचिषः ॥ अंभोधयःश्वासहताविचुक्षुभुर्निर्ह्रादभीतादिगिभाश्चतुर्दशेतिसप्तमभागवतेनृसिंहस्यश्वासोक्तिः ॥ एवंलक्ष्म्याअपिस्वरूपभूतोवायुरस्त्येव ॥यत्रवायूपदपद्मादिरूपेणप्रकृतिःस्थितेतिषष्ठस्कंधतात्पर्योक्तेः॥ मुक्तानामपिस्वरूपभूत

१३९ वायुर्द्विविधः ॥ प्राणापानादिरूपस्तद्भिन्नश्चेति ॥ पुनर्द्विविधः ॥ नित्योनित्यश्च ॥ नित्यःप्राणादिरीशलक्ष्म्योर्मुक्तानांचस्वरूपभूतः ॥ अनित्यस्तत्वभिन्नःसंसारिणां ॥

वायुरस्त्येव ॥ शंखवेणुगानादिध्वनिकर्तृत्वात् ॥ वायुतत्वस्योपादानमाह ॥ तत्वरूपइति ॥ १४० ॥ तदुक्तंतृतीयस्कंधे ॥ नभसःशब्दतन्मात्रात्कालगत्याविकुर्वतः॥स्पर्शोभवत्ततोवायुस्त्वक्स्पर्शस्यचसंग्रहइति॥तामसानुसृतंस्पर्शंविकुर्वन्निर्ममेनिलमिति च ॥ द्वितीयस्कंधेपि ॥ नभसोथविकुर्वाणादभूत्स्पर्शगुणोनिलइति ॥ तत्वातत्वरूपवाय्वभिमानिनआह॥ वाय्वादयइति ॥ प्रधानवायोःसर्वाभिमानित्वं सावाएषादेवतानादिर्योयंपवतइत्यादिश्रुतिसिद्धं ॥ तत्सूनुःप्रवहोवाय्वभिमानी ॥ अन्येतुसूनवो वायोरिति तंत्रसारोक्तेः ॥ प्राणापानादिवायूनांचाभिमानिनस्तुबृहद्भाष्योक्ताग्राह्याः ॥ तदुक्तं ॥ शिवस्यचतथोमायाःप्राणात्मा शेषआश्रयः ॥ शेषस्यापानरूपासाभारत्येवव्यपाश्रयः ॥ तस्याव्यानाभिधोवायुर्विशिष्टातोयतोहिसइति ॥ छांदोग्यभाष्येपि ॥ प्राणाभिमानीचक्षुश्चसूर्यएवप्रकीर्तितः॥दक्षिणाधिपतिःसोमोव्यानःश्रोत्राभिमानवान्॥ वागपानात्मकोवह्निरित्यादि ॥ वायुतत्वपरिमाणमाह ॥ आकाशादिति ॥१४१॥ अत्राबग्नीरनभोहंकृदितिनिर्णयोक्तिर्मानं ॥ तेजस्तत्वंनिरूपयितुंतद्विभागमाह ॥ तेजोद्विविधमिति ॥१४२॥ नित्यंतेजईशलक्ष्म्योरिति ॥ तत्रप्रमाणानितु ॥ अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः ॥ प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधमितिगीता ॥ अयमग्निर्वैश्वानरइतिभाष्यं ॥ वैश्वानरमृतआजातमग्निमितिश्रुतिः॥ निर्णयेपि ॥ स्कंदप्रसादकवचःसमुखेचकारगोविंदमाग्निवदमुंप्रदहंतमुच्चैः॥चच्छर्दतुंडशिरसैवनिहंतुमेनमायांतमीक्ष्यजगृहेस्यसतुंडमीशइति॥

१४० तत्वरूपोवायुःस्पर्शजन्यः ॥ वाय्वादिदेवास्तदभिमानिनः ॥ १४१ आकाशाद्दशगुणन्यूनः ॥ १४२ तेजोद्विविधं ॥ तत्वरूपंतद्भिन्नंचेति ॥ नित्यानित्यभेदेनपुनर्द्विविधं ॥ नित्यंतेजईशलक्ष्म्योर्मुक्तानांचस्वरूपभूतं ॥

यद्रोषोत्करदक्षनेत्रकुटिलप्रांतोत्थिताग्निस्फुरत्खद्योतोपमविष्फुलिंगभसिताब्रह्मेशशक्रोत्करा इतिनृसिंहनखस्तुतिः॥ तथासप्तमस्कंधेनरसिंहंप्रतिप्रह्लादवाक्यं॥नाहंबिभ्येम्यजिततेऽतिभयानकस्यजिह्वाग्निनेत्रभ्रुकुटीरभसोग्रदंष्ट्रादिति ॥ निर्णयेपि ॥ रात्रित्रयेप्यनुपगामिनमीक्ष्यसोब्धिंचुक्रोधरक्तनयनांतमयुंजदब्धौ॥सक्रोधदीप्तनयनांतहतःपरस्यशोषंक्षणादुपगतोदनुजादिसत्त्वैरिति॥ विश्वरूपाध्यायेपि॥पश्यामित्वादीप्तहुताशवक्त्रंस्वतेजसाविश्वमिदंतपंतमिति॥ऐतरेयभाष्येपि॥ तापिनीपाचिकाचैवशोषणीचप्रकाशिनी ॥ नैवराजन्नवेःशक्तिःशक्तिर्नारायणस्यसेति॥ लक्ष्म्यास्तुप्रलयकालीनाग्निरूपदुर्गास्वरूपत्वात्॥ नहिप्रसिद्धाग्नेर्ब्रह्मांडादिसर्वदाहकत्वशक्तिर्युक्ता ॥ एवंमुक्तानामपितेजोरूपत्वं ॥ तदुक्तंबृहद्भाष्ये ॥ अल्पतेजस्तथैवाल्पंजीवरूपंहिसंसृतौ ॥ तथैवसुमहत्तेजःकरोतिभगवान्महदिति ॥ तत्वरूपतेजसउपादानमाह ॥ तत्वरूपंतेजइति ॥१४३॥ तदुक्तंतृतीयभागवते ॥ वायोश्चस्पर्शतन्मात्राद्रूपंदैवेरितादभूत् ॥ समुत्थितंततस्तेजश्चक्षूरूपोपलंभनमिति ॥ द्वितीयस्कंधभागवतेपि ॥ वायोरपिविकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यततेजोवैरूपवत्स्पर्शशब्दवदिति ॥ तेजस्तत्वस्यपरिमाणमाह ॥ वायुतत्वादिति ॥१४४॥ अबग्नीरनभोहंकृदितिनिर्णयोक्तेरितिभावः ॥ तदभिमानिनआह ॥ ब्रह्मादयइति ॥१४५॥ सर्वेसर्वाभिमानिनइत्युक्तेः ॥ अग्निस्तुतेजोभिमानीतिप्रसिद्धः ॥ अप्तत्वंनिरूपयितुंतद्विभागमाह ॥ आपोद्विविधाइति ॥१४६॥ अप्तत्वस्योपादानमाह ॥ तत्व

१४३ तत्वरूपंतेजोरूपतन्मात्राजन्यमनित्यंच ॥ १४४ वायुतत्वाद्दशगुणन्यूनं ॥ १४५ ब्रह्मादयोदेवास्तदभिमानिनः ॥ १४६ आपोद्विविधाः ॥

भूताइति ॥१४७॥ तदुक्तंतृतीयस्कंधभागवते ॥ रूपमात्राद्विकुर्वाणात्तेजसोदैवचोदितात् ॥ रसमात्रमभूत्तस्मादंभोजिह्वार सग्रहइति ॥ द्वितीयस्कंधेपि ॥ तेजसस्तुविकुर्वाणादासीदंभोरसात्मकमिति ॥ ईशलक्ष्मीति ॥१४८॥ तत्रप्रमाणानितु ॥ सएवद्रवरूपेणगंगांभोनात्रसंशयइत्यादिपुराणवाक्यानि॥ लक्ष्म्यास्तूदकात्मकत्वं यत्रवायूदपद्मादिरूपेणप्रकृतिःस्थितेतिषष्ठता त्पर्यसिद्धं॥तथा॥आरंभणाधिकरणटीकायामपि॥यच्चेतनप्रकृतिरूपमंभस्तदप्यासीत्किमित्युक्तं ॥ तथा ॥ अरश्चहवैण्यश्चार्णवौब्र ह्मलोके ॥ अरश्चवैण्यश्चसुधासमुद्रौतत्रैवसर्वाभिमतप्रदौद्वावितिप्रमाणाद्विष्णुलोकेऽरण्याख्यसुधासमुद्रौस्तः ॥ प्रधानपरमव्यो म्नोरंतराविरजानदीतिपुराणवाक्याच्चविजरजानदीचास्ति ॥ तत्रमद्यंसरोवरमितिच्छांदोग्यभाष्याच्चतत्रमद्यसरोवरंचास्ति ॥ वैकुंठपरिघाकाराविरजानदीचास्ति ॥ तेसर्वेपिलक्ष्म्यात्मकाः ॥ प्रलयकालेपिविनाशाभावात् ॥ तदुक्तंछांदोग्यभाष्ये ॥ परस्यब्रह्मणोलोकेश्वेतद्वीपाभिधेपरे ॥ अरण्यौचार्णवौदिव्यौचिदानंदरसात्मकौ ॥ यावानुच्चःस्वर्गलोकस्तावानुच्चतयासच ॥ श्वेतद्वीपोदिविष्ठोतस्तत्रमद्यंसरोवरं ॥ सर्वभोज्यात्मकंदिव्यंतत्राश्वत्थाःसुधास्रवाः ॥ तत्रविष्णोःपुरंदिव्यमपराजितनामकं ॥ विमिताख्यंचपर्यंकंविष्णोर्मानेनसंमितं॥ चित्सुवर्णमयंदिव्यंलक्ष्मीस्तत्तत्स्वरूपिणीति॥मुक्तानांकामरूपत्वादुदकात्मकत्वंयुक्तं ॥ नद्याद्यभिमानिनांचवैकुंठेनदीरूपत्वंच ॥ तदुक्तमैतरेयभाष्योदाहृतश्रुतौ ॥ यत्रामूर्यह्वतीरापस्तत्रमाममृतंकृधींद्रायेंदोपरिस्रवे

१४७ तत्वभूतास्तद्भिन्नाश्चेति ॥ पुनर्द्विविधानित्याअनित्याश्च ॥ तत्वभूताआपोरसजन्याः ॥ तत्वभिन्नाआपोऽनित्याः ॥ १४८ ईश लक्ष्मीमुक्तस्वरूपभूताः ॥

ति ॥ अबभिमानिनआह ॥ ब्रह्मादयइति ॥१४९॥ तदुक्तमैतरेयभाष्ये ॥ ब्रह्मशेषसुपर्णेंद्रशिवाद्याआपईरिताः॥तेविष्णोर्मनसो जाताःसर्वेचाबभिमानिनइति ॥ छांदोग्यभाष्येपि ॥ वायुर्भूतात्मकोवरः ॥ तथाविशिष्टप्राणाख्योवायुःसोपांचदेवता ॥ अन्ना मादेहसंव्याप्तेस्तथातस्मात्पुरंदरः ॥ तेजोभिमानीतन्नामातेजोह्योजउदीर्यते ॥ तथातस्मादुमाचैवसाचाकाशाभिमानिनीति ॥ वरुणश्चाबभिमानी ॥ तदुक्तंकाठकभाष्ये ॥ सोमवित्तपसूर्याप्याइति ॥परिमाणमाह॥तेजसइति ॥१५०॥ अत्राबन्नीरनभोहं कृदितिनिर्णयोक्तिर्मानं॥पृथिवीतत्वंनिरूपयितुंविभजते॥पृथिवीद्विविधेति ॥१५१॥ तत्वपृथिव्याउपादानमाह॥अनित्येति ॥१५२॥ तदुक्तंतृतीयभागवते ॥ ज्योतिषांभोनुसंसृष्टंविकुर्वद्ब्रह्मवीक्षितं ॥ महींगंधगुणामाधात्कालमायांशयोगतइति ॥ रस मात्राद्विकुर्वाणादंभसोदैवचोदितात् ॥ गंधमात्रमभूत्तस्मात्पृथ्वीघ्राणस्तुगंधगइतिच ॥ द्वितीयस्कंधेपि ॥ विशेषस्तुविकुर्वाणादं भसोगंधवानभूदितिविशेषःपृथिवीतितत्तात्पर्यं॥नित्यपृथिवीस्वरूपमाह॥नित्येत्यादिना ॥ अत्रप्रमाणंतु वैकुंठादौभगवल्लोकेताव त्पृथिवीवर्तते॥अन्यथातत्रगृहारामादेःसंचारादेश्चानुपपत्तेः॥साचपृथिवीलक्ष्म्यात्मिकैव॥लक्ष्मीस्तत्तत्स्वरूपिणीतिच्छांदोग्यभा ष्योक्तेः ॥ मध्वविजयेप्येकादशसर्गे॥ समतीतविद्रुमभुवांसुदृशांपदपल्लवाग्र्यनखरक्तरुचीः॥ परभागतःस्फटिककुट्टिमभूः प्रकटी करोतिनपुराप्रकटेत्यादि ॥ तथामुक्तधरादेव्यावैकुंठादौपृथिव्यात्मकत्वं ॥ मुक्तानांकामरूपत्वात्पृथिव्यात्मकत्वंयुक्तं॥ परमात्मन

---

१४९ ब्रह्मादयोदेवाअबभिमानिनः ॥ १५० तेजसोदशगुणन्यूनाः ॥ १५१ पृथिवीद्विविधा तत्वातत्वभेदात् ॥ पुनर्द्विविधा नित्यानित्याचेति ॥ १५२ अनित्यातत्वरूपापृथिवीगंधजन्या ॥ नित्यातत्वभिन्नाईशलक्ष्मीमुक्तस्वरूपभूता ॥

स्तुमहासामर्थ्योंपेतत्वात्पृथिव्यात्मकत्वंयुक्तमेव ॥ पृथिव्यभिमानिनआह ॥ ब्रह्मादयइति ॥ १९३ ॥ तदुक्तमैतरेयभाष्ये ॥ अतएव पृथिव्यादिस्वरूपामनआदयः ॥ देवाःप्राणाश्रितानित्यंगच्छंतिप्राणमन्वपि ॥ पृथिवीमयंमनस्तत्रशेषवींद्रविशेषकाइति ॥ छांदोग्य भाष्येपि ॥ तेजोभिमानिनीलक्ष्मीःप्राणस्त्वबभिमानवान् ॥ अन्नाभिमानीरुद्रश्चतिस्रस्तादेवताःपुरा ॥ तेजःसंस्थातुसादेवीप्राणोप्सु स्थितएवच ॥ ततस्तेजसएवापोजायंतेन्नस्थितोहरः ॥ जायतेतोद्भ्यएवान्नंपृथिवीत्वन्नरूपिणीति ॥ धराचेति ॥ तदुक्तंनिर्णये ॥ पंचभूतावराया ॥ तस्यांजज्ञेनरकःश्रीवराहादिति ॥ परिमाणमाह ॥ अद्भिरिति ॥ १९४ ॥ अबग्नीरनभोहंकृदितिनिर्णयो क्तेः ॥ अंडात्तुद्विगुणापृथ्वीतिप्रमाणाच्चेत्यर्थः ॥ तृतीयस्कंधतात्पर्येपि ॥ पृथिवींविशेषइत्याहुः शब्दादीनांबहुत्वतः ॥ सासू क्ष्मात्वावृणोदंडंद्विगुणात्तुदशोत्तराः ॥ अबादयःप्रकृत्यंताइति ॥ इदानींतत्वानांतद्भिन्नानांचस्वरूपंस्थितिंचसंगृह्याह ॥ अव्य क्तमारभ्येति ॥ १९५ ॥ गुणत्रयमारभ्येत्यर्थः ॥ ब्रह्मांडाद्बाह्यानीति ॥ तदुक्तंतृतीयस्कंधभागवते ॥ एतदंडंविशेषाख्यंक्र मवृद्धैर्दशोत्तरैः ॥ तोयादिभिःपरिवृतंप्रधानेनावृतंबहिरिति ॥ निर्णयेपि ॥ अबग्नीरनभोहंकृन्महत्तत्वगुणत्रयैः ॥ क्रमाद्दशोत्त रैरेतदावृतंपरतस्तथेति ॥ तत्वभिन्नानांपंचभूतानांकर्तारंस्थानंचाह ॥ तत्वभिन्नानीति ॥ १९६ ॥ आत्मनअकाशःसंभूतइत्या दिश्रुतेःपरमात्माकर्ता ॥ स्थानंप्रत्यक्षादिप्रमाणसिद्धमितिभावः ॥ ननुगुणत्रयमारभ्यपंचतन्मात्रापर्यंतानांतत्वानांवैयर्थ्यं ॥ त

१९३ ब्रह्मादयोधराचतदभिमानिनः ॥ १९४ अद्भिर्दशांशन्यूना ॥ ब्रह्मांडाद्विगुणपरिमाणा ॥ १९५ अव्यक्तमारभ्यपृथिवीतत्वपर्यंता निब्रह्मांडाद्बाह्यानितदावरणानि ॥ १९६ तत्वभिन्नान्याकाशादिपंचभूतानिब्रह्मांडांतर्गतानिपरमात्मजन्यानि ॥

दनंगीकारेबाधकाभावात् ॥ अंगीकारेचसाधकाभावात् ॥ नचब्रह्मांडोत्पत्त्यर्थमेवतत्स्वीक्रियतइतिवाच्यं ॥ पंचभूतैरेवतदुत्पत्ति संभवात् ॥ नचपंचभूतोपादानतयातत्स्वीकारइतिवाच्यं ॥ मूलप्रकृतेरेवतदुपादानत्वोपपत्तेरित्याशंक्यतदनंगीकारेबाधकमाह महदाद्यनंगीकारइति ॥ १९७ ॥ नचपंचभूतैरेवब्रह्मांडोत्पत्तिरस्त्वित्युक्तमितिवाच्यं ॥ चतुर्विंशतितत्वांशैरेवब्रह्मांडोत्पत्ते रनुपदमेववक्ष्यमाणत्वात् ॥ दूषणांतरमाह ॥ तत्तद्देवानामिति ॥ १९८ ॥ नचब्रह्मांडांतर्गतब्रह्मादिदेवेभ्योव्यतिरिक्तास्तत्त दंशिनएवनसंतीतिवाच्यं ॥ प्रथमस्कंधतात्पर्यविरोधप्रसंगात् ॥ तथाहितत्रोक्तं ॥ नदेवानांनदेवीनांसामस्त्येनजनिर्भुवि ॥ अंशां शेनैवजायंतेसर्वेत्वाजानजादयइति ॥ अत्रब्रह्मांडाद्बहिर्येऽशिनस्तेषांयेऽशाब्रह्मांडांतर्गतास्तदंशेनदेवाजायंतइतिहितदर्थः ॥ नच ब्रह्मांडांतर्गतायेंऽशिनइंद्रादयस्तदंशेनार्जुनादयोजायंतइत्यर्थःकिंनस्यादितिवाच्यं ॥ देवानामित्यस्यानन्वयापत्तेः ॥ नहिब्रह्मां डांतर्गतानामिंद्रादिदेवानामंशांशाअर्जुनादयः । अतोब्रह्मांडाद्बहिरेवदेवानामंशिनःसंति ॥ तेषामवस्थानार्थमहदादीनामंगीका र्यत्वात् ॥ नचतेषामेकस्मिन्नेवतत्वेवस्थानमस्त्वितिवाच्यं ॥ उत्तमानांराजाधिराजानांदेवानामधमाभिमन्यमानेऽल्पेगेहेवस्थानस्य अधमानामुत्तमाभिमन्यमानेमहतिगेहेमहाराजवैभवयुक्तेवस्थानस्यचलोकदृष्ट्यननुकूलत्वात् ॥ दूषणांतरमाह ॥ तत्तत्तत्वे ति ॥ १९९ ॥ एतच्चदेवानांव्याप्तरूपापरोक्षज्ञानप्रकरणेसम्यगुपपादयिष्यामः । दूषणांतरमाह ॥ तत्तदिति ॥ १६० ॥

१९७ महदाद्यनंगीकारे ब्रह्मांडोत्पत्तिर्नस्यात् ॥ १९८ तत्तद्देवानामंशिनामवस्थानानिनस्युः ॥ १९९ तत्तत्तत्वपर्यंतव्याप्तभगवद्रूपापरो क्षज्ञानंचदेवानांनस्यात् ॥ १६० तत्तत्प्रतिपादकप्रमाणविरोधश्चस्यात् ॥

प्रमाणानितुपूर्वोदाहृतानिभागवतादीनिबोद्धव्यानि ॥ इतिपंचभूतप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानींब्रह्मांडनिर्माणप्रकार
माह ॥ एतैस्तत्वैरिति ॥१६१॥ ननुब्रह्मांडस्यपूर्वोक्ततत्वोपादानकत्वेनपृथग्द्रव्यत्वेनपरिगणनंनस्यात् ॥ अन्यथाब्रह्मांडां
तर्गतघटपटादीनामपिपृथग्द्रव्यत्वेनपरिगणनापत्तेरितिचेन्न ॥ महदादीनामसंसृष्टत्वेनब्रह्मांडस्यचसंसृष्टत्वेनचोभयोर्भिन्नप्रका
रत्वात् ॥ तदुक्तंतत्वसंख्याने ॥ असंसृष्टंमहानहं ॥ बुद्धिर्मनःखानिदशमात्राभूतानिपंचच॥संसृष्टमंडंतद्गंचसमस्तंसंप्रकीर्तित
मिति॥ यद्वा ॥महदाद्यारभ्यपृथिवीपर्यंतंप्राकृतं॥ अंडंतुविकृतं॥ अतोभेदादंडस्यपृथगुक्तिः॥ तदुक्तंतृतीयस्कंधतात्पर्ये॥ अव्य
क्ता द्याःपृथिव्यंताःसर्वाःप्रकृतयःस्मृताः॥ तदुपादानकःसर्गःप्राकृतःपरिपठ्यते॥अंडंतुविकृतंज्ञेयंतज्जंवैकृतमुच्यतइति॥ अथवा
॥महदादीन्येकैकोपादानकानि ब्रह्मांडंतुचतुर्विंशतितत्वोपादानकं अतोभेदइत्यभिप्रायेणोक्तमेतैस्तत्वैरिति ॥ नन्वेवंमहदाद्या
रभ्यपृथिवीपर्यंतस्यासंसृष्टतत्वप्राकृतत्वयोरविशेषाद्भेदेनपरिगणनंनस्यादितिचेत्सत्यं।महदाद्यारभ्यपृथिवीपर्यंतंसूक्ष्मरूपाणिसं
ति ॥ तत्रपूर्वपूर्वतत्वैरुत्तरोत्तरस्योपचयः ॥ अतोविशेषाद्भेदः ॥ तदुक्तंतत्वसंख्यानटीकायां ॥ सूक्ष्मरूपेणानित्यानांमहदादी
नांप्रकृत्याद्यंशैरुपचयमात्रंक्रियतइतितान्यसंसृष्टानीति ॥ तत्वविवेकेपि ॥ भूतेंद्रियप्राणगुणसूक्ष्मरूपंचनित्यकमिति ॥ उपल
क्षणंचैतत् ॥ महदहंकाराद्यपिग्राह्यमितितट्टीकोक्तेश्चेति ॥ अत्रब्रंह्मांडनिर्माणार्थंतत्वदेवैः स्तुतेनभगवतायुगपत्तत्वानिप्रविश्यो
द्धृतैस्तत्तदंशैरितिबोध्यं ॥ तदुक्तंतृतीयस्कंधभागवते ॥ एतेदेवाःकलाविष्णोःकालमायांशलिंगिनः ॥ नानात्वात्स्वक्रिया

१६१ एतैस्तत्वैर्विष्णुर्वीर्यात्मनापरिणाम्यब्रह्मांडमसृजत् ॥

नीशाः प्रोचुःप्रांजलयोहरिमितिस्तुतिः ॥ इतितासांस्वशक्तीनामसतीनांसमेत्यसः ॥ प्रसुप्तलोकतंत्राणांनिशाम्यगिरमीश्वरः॥
त्रयोविंशतितत्वानांगणंयुगपदाविशत् ॥ सोनुप्रविष्टोभगवांश्चेष्टारूपेणतंगणं ॥ भिन्नंसंयोजयामाससुप्तंकर्मप्रबोधयन् ॥ प्र
वृद्धकर्मादेवेनत्रयोविंशतिकोगणः ॥ प्रेरितोजनयत्स्वाभिर्मात्राभिरधिपूरुषमिति ॥ तथाकापिलेयेतत्रैव ॥ एतान्यसंहत्ययदाम
हदादीनिसप्तवै ॥ नशेकुःपुरुषंस्रष्टुंभोगायतनमंजसा ॥ कालकर्मगुणोपेतोजगदादिरुपाविशत् ॥ ततस्तेनानुविद्धेभ्यस्तत्वेभ्यों
डमचेतनं ॥ उत्थितंपुरुषोयस्मादुदतिष्ठदसौविराडिति ॥ तथाद्वितीस्कंधेपि ॥ यएतेसंहताभावाभूतेंद्रियमनोगुणाः ॥ यदायतन
निर्माणेनशेकुर्ब्रह्मवित्तम ॥ तदासंहृत्यचान्योन्यंभगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादायचोभयंससृजुर्ह्यदः ॥ वर्षपूगसहस्रांतेत
दंडमुदकेशयमिति ॥ संग्रहरामायणेपि ॥ अंडसृष्टावपांडित्याच्छार्ङ्गिणंशरणंययुरित्यादि ॥ छांदोग्यभाष्येपि ॥ इतितत्वानांप्रार्थना
नंतरंभगवतएवतेषुप्रवेशोक्तेर्भागवतइति ॥ वीर्यात्मनापरिणाम्येति ॥ तदुक्तंभाष्ये ॥ अपएवससर्जादौतासुवीर्यमवासृजत् ॥ तदंडम
भवद्धैमंसहस्रांशुसमप्रभमिति ॥ निर्णयेपि ॥ एतेहिदेवाःपुनरंडसृष्टावशक्नुवंतोहरिमेत्यतुष्टुवुः ॥ त्वन्नोजगच्चित्रविचित्रसर्गनिःसीम
शक्तिःकुरुसन्निकेतनं ॥ इतिस्तुतस्तैःपुरुषोत्तमोसौसविष्णुनामाश्रियमारसृष्टये ॥ सुषावसैषांडमधोक्षजस्यशुष्मंहिरण्यात्मकमंबुम
ध्यइति ॥ ब्रह्मांडांतःपरिमाणमाह ॥ तच्चेति ॥ १६२ ॥ अंतरितिशेषः ॥ तदुक्तंतृतीयस्कंधभागवते ॥ विकारैःषोडशैर्युक्तोविशेषादि
भिरावृतः ॥ अंडकोशोबहिरयंपंचाशत्कोटिविस्तरइति ॥ निर्णयेपि ॥ पंचाशत्कोटिविस्तारोयोजनानांसमस्तशः ॥ तथा ॥ योज

१६२ तच्चपंचाशत्कोटिविस्तीर्णं ॥

नानांपंचविंशत्कोटयोमेरुपर्वतात् ॥ चतसृष्वपिदिक्षूर्ध्वमधश्चांडंप्रकीर्तितमिति ॥ अत्रमेरुपर्वतमारभ्योर्ध्वभागेऽधोभागेदक्षि
णादिभागेषुचपंचविंशतिकोटियोजनोक्त्याधोभागस्थब्रह्मांडखर्परमारभ्योर्ध्वब्रह्मांडखर्परपर्यंतंपंचाशत्कोटिविस्तीर्णत्वंलभ्यते॥
तथा दक्षिणभागस्थब्रह्मांडखर्परमारभ्योत्तरभागस्थब्रह्मांडखर्परपर्यंतंपंचाशत्कोटिविस्तीर्णत्वंलभ्यते। एवंपूर्वपश्चिमभागयोरपिपं
चाशत्कोटिविस्तीर्णत्वंलभ्यते।॥बृहद्भाष्येपि॥ पंचाशत्कोटिविस्तारमेवमंडांतइष्यतइति॥तदंडंकतीत्याकांक्षायामाह॥एकमेवेति
॥१६३॥ ननुतृतीयस्कंध भागवते दशोत्तराधिकैर्यत्रप्रविष्टंपरमाणुवत् ॥ लक्ष्यतेंतर्गताश्चान्येकोटिशोह्यंडराशयइतिब्रह्मांडस्य
बहुकोटिसंख्याकत्वोक्तेःकथमेकमेवेत्यवधारणमितिचेदुच्यते एकमेवब्रह्मांडंपरमात्मनासृष्टं॥ तच्चपरमात्मनाधृतं ॥ तस्यबहवो
रोमकूपाः॥ तेषांपरमात्मनासहाभेदाद्बहुत्वेनदृश्यते॥ नत्वनेकानिब्रह्मांडानिभगवतासृष्टानि॥ अतोनविरोधः॥ तदुक्तंतृतीय
तात्पर्ये ॥ एकमंडंबहुत्वेनप्रत्येकंरोमकूपगं॥ ब्रह्मापश्यत्तथात्मानंहरेस्तेषुपृथक्पृथक् ॥ विष्णुसामर्थ्यतोंडानांबहुत्वान्नान्यथाभवे
दिति ॥ नन्वेवंचतुर्मुखस्यैकब्रह्मांडेनेकत्वदर्शनेमिथ्याज्ञानित्वंस्यादितिचेन्न॥ एकस्मिन्नेवांडेपरमात्मसामर्थ्येनानेकत्वस्यापिसृष्ट
त्वेनतद्विषयकज्ञानंनमिथ्या ॥ विद्यमानविषयकत्वात् ॥ नचैकत्वानेकत्वयोरेकत्रविरोधइतिवाच्यं॥ ईशसामर्थ्येनसृष्टेपदार्थेवि
रोधशंकायाएवायोगात्॥ अतएवगुहाधिकरणानुव्याख्याने द्वित्वंचैकस्ययुज्यतइत्येकत्वानेकत्वयोरविरोधएवोक्तः॥ ऋग्भाष्ये
पि ॥ द्विरूपत्वाद्बहुत्वंचविशेषादेवकेवलं॥ एकस्यैवहरेर्नात्रभेदःशंक्यःकथंचनेति ॥ अतएवसीताभरणान्येकविधान्येवद्वि ॥ ९३ ॥

१६३ एकमेवकपालद्वयं ॥ उपरितनंकपालंसुवर्णं ॥ अधस्तनंरजतं ॥

धाभूतानिसीतायांप्रतिकृतौचसर्वैर्दृश्यंते ॥ तदुक्तंनिर्णये ॥ सीतायायानिचैवासन्नाकृतेस्तानिसर्वशः॥ भूषणानिद्विधाभूत्वा
तान्येवासंस्तथैवच॥ अथचूडामणिंदिव्यंदातुंरामायसाददाविति॥ अतएवऋग्भाष्ये॥ एकस्यैवचमसपात्रस्यऋभुसामर्थ्येनचतु
र्धादर्शनमुक्तं ॥ एकंचमसंचतुरःकुरुतेत्याहतान्पुरा ॥ त्वष्टाग्निश्चैवदेवानांवाक्यात्तदपितैःकृतं ॥ द्व्यादिस्वोक्तंपरित्यज्यत्व
ष्टुःशुश्रूषणंकृतं ॥ तंपूर्वकृतमेवैकंचमसंचतुरोकृतेति ॥ एवंगोमंतपर्वतेकृष्णशिरसिगरुडेननिक्षिप्तमूलरूपकिरीटस्य कृष्णक
रचक्रस्य रामकरगतशार्ङ्गधनुषोऽर्जुनेनधृतगांडीवधनुषश्चनिर्णयोक्तमनेकत्वमेतन्न्यायेनैवद्रष्टव्यं ॥ यद्वा ॥ भागवतेनेकांड
कथनमतीतानागतवर्तमानकालापेक्षयैव नत्वेकब्रह्मकल्पापेक्षया ॥ तदुक्तंतृतीयतात्पर्ये ॥ शरीराणांबहुत्वेनअतीतानागतैस्त
था ॥ अस्यैवदेवकार्येषुप्रतिप्रतिचदर्शनादिति ॥ ब्रह्मांडेविशेषमाह ॥ कपालद्वयरूपमित्यादिना ॥ तदुक्तंछंदोगोपनिष
दि ॥ तेआंडकपालेरजतंचसुवर्णंचाभवतां ॥ यद्रजतंसेयंपृथिवी ॥ यत्सुवर्णंसाद्यौरिति ॥ ननुसर्वस्यापिब्रह्मांडस्यसुवर्णत्व
प्रतिपादकपूर्वोदाहृतप्रमाणविरोधइतिचेन्न ॥ निरवकाशच्छांदोग्यश्रुतिबलेनतेषामुपरितनकपालविषयकत्वात् ॥ उदकेविद्य
मानस्यब्रह्मांडस्यकथंस्थितिरित्याशंक्याह ॥ कूर्मरूपेणेति ॥ १६४ ॥ तदुक्तंबृहद्भाष्ये ॥ बिभर्त्यंडंहरिःकूर्मस्त्वंडेचाप्युद
कंमहत् ॥ उदकेकूर्मरूपस्यवायुःपुच्छंसमाश्रितः ॥ वायोःपुच्छंसमाश्रित्यशेषस्तुपृथिवीमिमां ॥ बिभर्तितस्यांचजगदिदंसर्वं
प्रतिष्ठितमिति ॥ वायुनाचेति ॥ तदुक्तंबृहद्भाष्ये ॥ सएषकूर्मरूपेणवायुरंडोदकेस्थितः ॥ विष्णुनाकूर्मरूपेणधारितोनंतधा

१६४ कूर्मरूपेणहरिणावायुनाचधृतं ॥

रकः ॥ अस्यपादाहिचत्वारोह्यंडोदेकोणसंस्थिताः ॥ उरश्चभूमिसंश्लिष्टमतिरिच्यभुवंपुनः ॥ पार्श्वतःपुच्छतश्चैवशिरश्चो दकसंस्थितं ॥ आकाशमुदरेतस्यद्यौःपृष्ठेसंस्थिताविभोः ॥ सप्तस्कंधगताँल्लोकान्योबिभर्तिमहाबलइति ॥ ब्रह्मांडस्यप्रयोजन माह ॥ **सर्वप्राणिनामिति** ॥ १६५ ॥ तदुक्तंनिर्णये ॥ तस्मिन्प्रविष्टाहरिणैवसार्धंसर्वेसुरास्तस्यबभूवनाभेरित्यादि ॥ च तुर्दशलोकसृष्टिश्चपद्मसृष्टिप्रकरणेवक्ष्यते ॥ पुनर्ब्रह्मांडेविशेषमाह ॥ **संधिदेशइति** ॥ १६६ ॥ तदुक्तंबृहद्भाष्ये ॥ पंचाश त्कोटिविस्तारमेवमंडांतइष्यते ॥ ततस्त्वंडंचसौवर्णतद्भिन्नंहरिणापुरा ॥ सुषिरंसर्वतोदिक्षुक्षुरधारोपमंततः ॥ सुपर्णोवायवे तेनमुक्तान्कामान्प्रयच्छतीति ॥ ब्रह्मांडस्याभिमानिनमाह ॥ तदभिमानीति ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ अचेतनाद्यतस्त्वं डाद्ब्रह्मासमजनिस्फुटं ॥ अतोब्रह्मांडमित्याहुर्विराड्ब्रह्माप्रकाशनादिति ॥ मणिमंजर्यामपि ॥ ततःकूटस्थमसृजद्विधिंब्रह्मांड विग्रहमिति ॥ चतुर्मुखइत्युपलक्षणंशक्रादयोपीतिद्रष्टव्यं ॥ तदुक्तंतृतीयतात्पर्ये ॥ इदमंडंजगत्सर्वंशक्रदेहंविदुर्बुधाइति ॥ शेषसुपर्णादीनामपिस्वस्वाभिमन्यमानतत्वांशद्वाराब्रह्मांडाभिमानित्वंज्ञेयं ॥ इदानीमविद्यांनिरूपयितुंतस्याब्रह्मांडांतर्ब्रह्मणा सृष्टत्वमभिप्रेत्यांतःसृष्टिमाह ॥ **ततोभगवानिति** ॥ १६७ ॥ तदुक्तंप्रथमस्कंधभागवते ॥ जगृहेपौरुषंरूपंभगवान्महदादि भिः ॥ संभूतंषोडशकलमादौलोकसिसृक्षयेति ॥ तत्तात्पर्यंच ॥ अंतर्गतमहदादीति। ब्रह्मांडांतःप्रविवेशेति ॥ तदुक्तंतृतीयस्कंध

१६५ सर्वप्राणिनांचतुर्दशलोकानांचावासस्थानं ॥ १६६ संधिदेशेक्षुरधारोपमसुषिरयुक्तं ॥ तदभिमानीचतुर्मुखः ॥ १६७ ततोभगवा न्महदादितत्वांशान्स्वोदरेनिक्षिप्यब्रह्मांडांतःप्रविवेश ॥

भागवते ॥ हिरण्मयादंडकोशादुत्थायसलिलेशयात् ॥ समाविश्यमहादेवोबहुधानिर्बिभेदखमिति ॥ इदानींनाभिकमलसृष्टिमाह ॥ तदोदकेशयानस्येति ॥ १६८ ॥ तदुक्ततृतीयस्कंधे ॥ चतुर्युगानांचसहस्रमप्सुस्वपंस्तयोदीरितयात्मशक्त्या ॥ कालाख्ययासादितकर्मतंत्रोलोकानपीमान्ददृशेस्वदेहे ॥ तस्यात्मसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोर्थोरजसातनीयान् ॥ गुणेनकालानुगतेनविद्धःशुष्मंतदाभिद्यतनाभिदेशात् ॥ सपद्मकोशःसहसोदतिष्ठत्कालेनकर्मप्रतिबोधितेन ॥ स्वरोचिषातत्सलिलंविशालंविद्योतयन्नर्कइवात्मयोनिः ॥ तल्लोकपद्मंसउएवविष्णुःप्रावीविशत्सर्वगुणावभासमिति ॥ तथा ॥ यन्नाभिपद्मभवनादहमाविरासंलोकत्रयोपकरणोयदनुग्रहेणेति ॥ नाभिह्रदादिहसतोंभसियस्यपुंसोविज्ञानशक्तिरहमासमनंतशक्तेरिति ॥ भाष्येपि ॥ अजस्यनाभावितियस्यनाभेरभूच्छ्रुतेःपुष्करंसोकसारमिति ॥ विश्वकर्मसूक्तेपि ॥ अजस्यनाभावध्येकमर्पितंयस्मिन्विश्वानिभुवनानितस्थुरिति ॥ ननुनाभिपद्मस्योपादानंनपरमात्मा ॥ तस्यनिर्विकारत्वात् ॥ नापिपंचभूतानि ॥ पद्मात्पूर्वमनुत्पत्तेरितिचेन्न ॥ भगवदुदरांतर्गतगर्भोदकस्यैवपद्मोपादानत्वात् ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ उदकंवायुनाशुष्कंभिन्नंपद्ममभूद्धरेरिति ॥ अतएवांतर्गतोर्थोरजसातनीयानित्यादितृतीयभागवतएवोक्तमिति ॥ पुनर्देवादयइति ॥ १६९ ॥ ब्रह्मांडाद्बहिर्जातत्वात्तदपेक्षयापुनरिति ॥ स्वस्वांशैरितिशेषः ॥ तदुक्तंनिर्णये ॥ लोकात्मकंपद्ममथुष्यमध्येपुनर्विरिंचोजनिसद्गुणात्मा ॥ तस्मात्पुनःसर्वसुराःप्रसूताइति ॥ ततोविरिंचोभुवनानिसप्तसप्तकान्याशुचकारसोब्जात् ॥ तस्माच्चदेवाऋषयःपुनश्चवैकारिकाद्याःसशिवाबभूवुः ॥

१६८ तदोदकेशयानस्यभगवतोनाभेः पद्ममभूत् ॥ पद्मेचचतुर्मुखोऽजनि ॥ १६९ तस्मात्पुनर्देवादयोमनआदीनिजातानि ॥

अग्रेशिवोहंभवएवबुद्धेरुमामनोजौसहशक्रकामौ ॥ गुरुर्मनुर्दक्षउतानिरुद्धःसहैवशच्यामनसःप्रसूताः ॥ चक्षुःश्रुतिभ्यांस्प र्शात्सहैवरविःशशीधर्मइमेप्रसूताः ॥ जिह्वाभवोवारिपतिर्नसोश्च्वनासत्यदस्रौक्रमशःप्रसूताः ॥ ततःसनाद्याश्चमरीचिमुख्या देवाश्चसर्वेक्रमशःप्रसूताः ॥ ततोसुराद्याऋषयोमनुष्याजगद्विचित्रंसविरिंचतोभूत् ॥ ऐतरेयभाष्येपि ॥ सऐच्छद्भगवान्वि ष्णुःस्रष्टुंलोकाभिमानिनः ॥ लोकाभिमानवद्देवाञ्जडलोकांश्चशाश्वतः ॥ सलोकेभ्यःपूर्वतनानबाख्यान्महदादिकान् ॥ ब्रह्म शर्वादिकान्सृष्ट्वाजडैःसहजनार्दनः ॥ दिवमाकाशमुर्वींचससृजेचाद्रिसप्तकान् ॥ इतिसृष्ट्वासलोकांस्तुपुनस्तानेवलोकपान् ॥ अं डांतःस्रष्टुमैच्छच्चतेषांपूज्यत्वसिद्धये ॥ अम्नामकेभ्यस्तेभ्यःसपूर्वसृष्टेभ्यएवतु ॥ सर्वजीवाधिकत्वात्तुब्रह्माणंपुरुषाभिधं ॥ अंशेनोद्धृत्यरुद्राद्यैःसहचैनमयोजयत् ॥ तथैववाचेतनानांभागानुद्धृत्यपिंडवत् ॥ चेतनाचेतनंराशिमेकस्थंविदधेप्रभुः ॥ पुनरैच्छज्जगन्नाथस्तस्यांगोत्पत्तिमच्युतः ॥ अंडवन्मुखमस्यासीत्प्रथमंतुशिरोभिधं ॥ भिन्नमास्यंपुनस्तस्यविष्णोरेवेच्छया विभोः ॥ तत्रवाङ्नामकंरूपंवह्नेरासीत्पुरातनं ॥ तस्यैवाथद्वितीयंचयदग्निरितिगीयते ॥ तथैवनासिकातोभून्मुख्यवायोः सुतोमरुत् ॥ प्राणोवायुरितिद्वौचचक्षुषाभूत्तथारविः ॥ द्विरूपएवकर्णाभ्यांमित्रधर्माप्यवित्तपाः ॥ दिग्देवताद्विरूपेण बभूवुःसर्वएवच ॥ हृदयाद्गरुडानंतशिवशक्राःपृथक्पृथक् ॥ मनोबुद्ध्यभिमानास्तेतन्नामानश्चजज्ञिरे ॥ त्वचश्चरोमना मानोवृक्षनामानएवच ॥ द्विविधाःपारिजाताद्याबभूवुर्ब्रह्मदेहतः ॥ हस्ताभ्यांद्विविधःशक्रःपद्भ्यांतत्सूनुरेवच ॥ यज्ञस्त्वज निपायोश्चयमोनिर्ऋतिरेवच ॥ रेतोम्नामादिरूपस्तुशिवएवतुगुह्यतः ॥ अपानोमृत्युरितिचमुख्योनाभेश्चमारुतइति ॥ एवं

द्वितीयतृतीयभागवतेपिचतुर्मुखदेहात्सर्वदेवानामुत्पत्तिःप्रतिपादिताद्रष्टव्या ॥ एवंसर्वेदेवाःपुनःकश्यपाददित्यां दित्यादिषुदै त्यादयोजाताः॥ तदुक्तंनिर्णये ॥ पुनश्चमारीचतएवदेवाजाताअदित्यामसुराश्चदित्यां ॥ गावोमृगाःपक्ष्युरगाश्चसत्वादाक्षायणी ष्वेवसमस्तशोहीति ॥ मणिमंजर्यामपि ॥ कश्यपस्यमहात्मनः ॥ दित्यांततोभवन्दैत्याअदित्यांचसुराःपुनः ॥ दनौतुदानवाःक द्रौनागानानाविषोल्बणाः ॥ कीकसायांयातुधानाविनतायांतुपक्षिणइति ॥ काठकभाष्येपि ॥ यथामुखादिंद्रश्चेत्यादिनाजाता एवेंद्रादयःकश्यपात्पुनर्जायंते नतथाभगवतोब्रह्मेति ॥ मनआदीनीति ॥ एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच ॥ खंवायुर्ज्यो तिरापःपृथिवीविश्वस्यधारिणीतिश्रुतेः॥सूत्रेभाष्येच ॥ ॐ तथाप्राणाः ॐ ॥ यथाकाशादयःपरमात्मनोत्पद्यंतेतथाप्राणाअपि ॥ ॐ तत्प्राक्श्रुतेश्च ॐ ॥ पूर्वमनःसमुत्पन्नंततोन्येषांसमुद्भवः ॥ तदनुत्पत्तिवचनमल्पोपचयकारणादिति ॥ आत्मनआकाशःसं भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यःपृथिवी पृथिव्याओषधयइतिश्रुतिः ॥ इतिब्रह्मांडप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानीमविद्योत्पत्तिमाह ॥ ततइति ॥ १७० ॥ ततः पंचभूतसृष्ट्यनंतरं ततः चतुर्मुखादविद्योत्पन्नेत्यर्थः ॥ नन्वनादिमा ययासुप्तइत्यादिश्रुतिभिरनाद्यविद्याकामकर्मेत्यादिटीकाकृदुक्तिभिश्चाविद्यायाअनादित्वात्कथमुत्पत्तिरितिचेन्न ॥ सूक्ष्मरू पेणानादिभूताया एवसृष्टिकालेस्थूलरूपेणोत्पत्त्यंगीकारात् ॥ अन्यथोत्पत्तिप्रतिपादकवक्ष्यमाणबहुप्रमाणविरोधप्रसंगात् ॥ नन्वेवमपिपरमात्मनैवब्रह्मांडाद्बहिरविद्यासृष्टिरुक्तातृतीयस्कंधभागवते ॥ आद्यस्तुमहतःसर्गोगुणवैषम्यनामकइत्यादिनामह

१७० ततोऽविद्योत्पन्ना ॥ साचपांचपर्वणी ॥

दहंकारादिसृष्टिमभिधाय षष्ठस्तुतमसःसर्गोयस्त्वबुद्धिकृतःप्रभोः ॥ षडिमेप्राकृताःसर्गावैकृतान्यपिमेश्टण्विति ॥ तत्कथमं डांतर्ब्रह्मसृष्टाऽविद्येत्युच्यतइतिचेत् ॥ उच्यते ॥ सत्यमेवांडाद्बहिरविद्योत्पन्नेति ॥ तथापिसैवाविद्यापरमात्मनाच्चतुर्मुखेप्र क्षिप्तातत्सृष्टत्वज्ञापनाय ॥ ततोब्रह्मशरीरात्सृष्टिकालेबहिर्निःसृता ॥ तदभिप्रायेणैवब्रह्मणासृष्टाऽविद्येत्युक्तमितिनविरोधः ॥ तदुक्तंतृतीयतात्पर्ये ॥ पंचपर्वात्वविद्यातुभूतेभ्योहरिणापुरा ॥ उद्धृत्यब्रह्मणिक्षिप्तासापुनस्तेननिःसृता ॥ सत्सृष्टत्वज्ञापनाय तस्मात्साप्राकृतामता ॥ अबुद्धिपूर्वमिवतुब्रह्मणोहरिबुद्धितः ॥ अविद्यापंचपर्वैषाप्रादुर्भूतामहात्मनइति ॥ नचाविद्योपा दानंकिमितिवाच्यं ॥ पंचभूतगततमोगुणानामेवोपादानत्वात् ॥ तदुक्तंतृतीयतात्पर्ये ॥ तामसानांतुभूतानांसहस्रंसत्त्वभागि नां ॥ शतांशरजसामेकतमसासर्ववेदिनां ॥ केवलस्तमसोयोंशःसाविद्यापंचपर्विका ॥ जातातिकृष्णातद्देहाद्दैत्यरक्षःपिशाचका इति ॥ अतएवपरिणामित्वाद्द्रवणप्राप्यत्वाच्चद्रव्यत्वंद्रष्टव्यं ॥ पंचपर्वाण्याह ॥ **मोहइत्यादिना** ॥ १७१ ॥ तदुक्तंतृतीय तात्पर्ये ॥ तमस्तुशार्वरंप्रोक्तंमोहश्चैवविपर्ययः ॥ तदाग्रहोमहामोहस्तामिस्रःक्रोधउच्यते ॥ मरणंत्वंधतामिस्रमविद्यापंचप र्विकेति ॥ तृतीयस्कंधभागवतेपि ॥ ससर्जाग्रेंधतामिस्रमथतामिस्रमादिकृत् ॥ महामोहंचमोहंचतमश्चाज्ञानवृत्तयइति ॥ अविद्याविभागमाह ॥ **पुनरिति** ॥ १७२ ॥ जीवाच्छादिकापरमाच्छादिकाचदशमस्कंधतात्पर्योक्ता ॥ जहिदोषैर्ययासर्वगु णाजीवस्यसंवृताः ॥ अथान्येप्रकृतीदुष्टेनृषुप्रातिस्विकंस्थिते ॥ स्वगुणाच्छादिकाचैकापरमाच्छादिकापरा ॥ स्वगुणाच्छा

---

१७१ पंचपर्वाणितुमोहोमहामोहस्तामिस्रमंधतामिस्रंतमश्चेति ॥ १७२ पुनर्जीवाच्छादिकापरमाच्छादिकाशैवलामायाचेतिचतुर्विधा ॥

दिकांहत्वापरमाच्छादिकांपरां ॥ व्याघुष्यमोक्षपदवींददातिपुरुषोत्तमः ॥ अजेद्वेअपितेप्रोक्तेअनंताच्छादिनीहरेः ॥ नविष्णुं छादयत्येषातज्ज्ञानंछादयेत्परं ॥ जीवस्यैवनतत्रापिब्रह्मादेरस्तिसाक्वचिदिति ॥ प्रकृत्यभिमानवत्त्वादविद्यायाःप्रकृतिशब्दे नापिव्यवहारः ॥ तदुक्तंतत्रैव ॥ प्रेरकास्तूभयोर्देव्यइंदिराद्याःसुखात्मिकाइति ॥ मायातुपंचपर्विकापूर्वोक्तामिथ्याज्ञानमम ताहंभावादिजननद्वारासंसारहेतुः ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ परिभ्रमंस्तत्रनविंदतेर्थान्मायामयेवासनयाशयानइति ॥ तेवैविदंत्यतितरंतिचदेवमायांनैषांममाहमितिधीःश्वसृगालभक्ष्यइतिच ॥ दशमस्कंधेपि ॥ गुणप्रवाहोयमविद्ययायतःप्रव र्ततेयेननृतिर्यगात्मसु ॥ विमोहितोयंजनईशमाययात्वदीययात्वांनभजत्यनर्थदृक् ॥ सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पु रुषैश्चवंचितः ॥ मर्त्यात्मबुद्धेःसुतदारकोशेष्वासज्जमानस्यदुरंतचिंतया ॥ कलेवरेस्मिन्घटकुड्यसन्निभेनिरूढमानोनरदेवइत्यह मित्यादिमुचकुंदस्तुतिः ॥ अविद्ययामुह्यतिशोचमानः ॥ अविद्यायामंतरेवर्तमानाः स्वयंधीराःपंडितंमन्यमानाः ॥ अनादिमा ययासुप्तइत्यादिश्रुतयः ॥मायापिशंबराद्यधीनागजतुरगाद्युपादानभूताभवति ॥ तेचपदार्थानिर्णयएवोक्ताः ॥ अथात्मसेनामवमृ द्यमानांवीक्ष्यासुरःशंबरनामधेयः ॥ ससारमायाविदसह्यमायोवरादुमेशस्यसुरान्विमोहयन् ॥ मायासहस्रेणसुराःसमर्दितारणे विषेदुःशशिसूर्यमुख्याइति ॥ एवंभगदत्तेनयुद्धकालेघटोत्कचस्यमाययागजचतुष्टयनिर्माणमुक्तं ॥ घटोत्कचोभ्यद्रवदाशुवीरःस्व माययाहस्तिचतुष्टयस्थः ॥ चतुर्गजात्मोपरिगात्मकश्चघटोत्कचःसुप्रतीकंचतंच ॥ नानाप्रकारैर्वितुदंश्चकारसंदिग्धजीवौजगतांसम क्षमिति ॥ तथा ॥ अलंबुसेरावतोर्युद्धकालेमाययापदात्यश्वनिर्माणेनतेषांहननमुक्तं ॥ दृष्ट्वातमुग्रंधृतराष्ट्रपुत्रोदिदेशरक्षोलंबुसनाम

धेयं ॥ जह्यार्जुनंक्षिप्रमितिस्मसोपिसमासदन्नागसुतातनूजं ॥ तयोरभूद्युद्धमतीवदारुणंमायायुजोर्वीर्यवतोर्महाद्भुतं ॥ ससादि
नोश्वान्सतुराक्षसोसृजत्तेपार्थपुत्रस्यचसादिनोहनन्निति ॥ नचतेगजादयोभ्रांतिकल्पिताएवेतिवाच्यं ॥ छेदभेदादिनादुःखाद्य
र्थक्रियाकारित्वदर्शनात् ॥ नचारोपितस्यासतोर्थक्रियाकारित्वंसंमतं ॥ नचतेप्रकृतिजन्याएवेतिवाच्यं ॥ प्राकृतगजादिवदुत्तर
त्रापितद्दर्शनापत्तेः ॥ नचदूर्वाससंप्रतिरामेणतत्कालसृष्टषड्रसान्नवत्प्राकृतत्वमस्त्वितिवाच्यं॥माययासृजन्नित्युक्तेः ॥परमात्म
वत्तेषांप्राकृतसृष्टौसामर्थ्याभावाच्च॥अतोमायोपादानकाएवतेपदार्थाः ॥ एवमैंद्रजालिकमायास्थलेपिमायाविनाप्रयुक्तामाया
द्रष्टृपुरुषनयनसंबद्धासतीगजतुरगादिभ्रांतिंजनयति ॥ नतुतेपदार्थाःसत्याः ॥ तदुक्तंतत्वनिर्णये ॥ अधिष्ठानंचसद्दृशंतथ्यव
स्तुद्वयंविना ॥ नभ्रांतिर्भवतिक्वापिस्वप्नमायादिकेष्वपीति॥ तट्टीकायामपि ॥ ऐंद्रजालिकमायापदार्थभ्रांतिरप्यधिष्ठानप्रधा
नाधीनेति ॥ शैवलाविद्यापितृतीयस्कंधतात्पर्योक्ता ॥ शैवलानामसामायाजगद्बंधात्मिकासदेति ॥ तटाकादिजलोपरिह
रितवर्णाजलाच्छादिकाशैवलाप्रत्यक्षसिद्धा ॥ साहस्तादिनाइतस्ततश्चालनेसतितज्जलंविहायपार्श्वेस्थाभवति ॥ पुनर्हस्ता
द्यपगमेपूर्ववज्जलाच्छादिकाभवति ॥ प्राकृतभाषयाहाविशिकेत्युच्यते ॥ तद्वज्जीवसंबद्धामायासच्छास्त्रश्रवणादिजन्यपरो
क्षज्ञानेनजीवस्वरूपमनावृत्यतिष्ठति ॥ तज्ज्ञाननाशेपुनर्जीवस्वरूपमाच्छादयतीति ॥ केचित्तुशैवलाविद्याजडप्रकृतिरेवेत्या
हुः ॥ अपरेतुपंचपर्वाविद्येत्याहुः॥ननुलक्ष्म्याःपरमात्मगतयावद्गुणज्ञानमस्तिनवा ॥ नाद्यः ॥ सर्वत्रसर्वदेवेशंपश्यत्येवरमापितु
॥ नतुसर्वैर्विशेषैस्तंपश्यंत्यप्यन्यतोधिकमितिज्ञानपादीयानुव्याख्यानविरोधात् ॥ ईशादन्यत्रानालोचनेसर्वविषयकंलक्ष्मीज्ञा

नमितिप्रमाणलक्षणविरोधाच्च ॥ नद्वितीयः ॥ अज्ञानित्वापत्त्यासंसारित्वंस्यात् ॥ तथाचपूर्वोक्तनित्यमुक्तत्वव्याघातइतिचे
न्न ॥ भावरूपाज्ञानाभावेपिज्ञानाभावरूपाज्ञानसंभवात् ॥ नन्वेवंज्ञानाभावरूपाज्ञानमेवसर्वजीवेष्वप्यस्तुनतुभावरूपाज्ञानं ॥
नचसंसारित्वानुपपत्त्याभावरूपाज्ञानंकल्प्यतइतिवाच्यं॥ लिंगशरीरप्रकृतिबंधादिनैवसंसारित्वोपपत्तेरितिचेन्न ॥ अहमज्ञोमा
मन्यंचनजानामीतिसाक्षिसिद्धत्वेनदुरपह्नवत्वात् ॥ नचाहमज्ञइतिप्रत्यक्षंज्ञानाभावगोचरमितिवाच्यं ॥ सुषुप्तिकालेऽज्ञानप्र
तीत्यभावप्रसंगात् ॥ नहितत्रापिज्ञानभावप्रतीतिर्युक्ता ॥ मनसोप्युपरतत्वेनप्रतियोग्यधिकरणज्ञानादेरभावात् ॥ तत्सत्वेसु
षुप्त्यभावप्रसंगात् ॥ प्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमितिश्रुतिविरोधप्रसंगाच्च ॥ नचैतच्छ्रुतिबलेनसुषुप्तिका
लेऽज्ञानस्यवान्यस्यवाज्ञानमेवनास्तीतिवाच्यं ॥ एतावंतंकालंनकिमप्यवेदिषमित्युत्तरकालीनानुस्मरणानुपपत्तेः ॥ नचसुप्तो
त्थितस्यतत्कालीनज्ञानाभावानुमानमस्तु॥ अहंतदाज्ञानाभाववान्तदानुपलंभवत्त्वादितिवाच्यं ॥ तदेतिकोर्थः॥ कालइतिचे
त्तर्हिसुप्त्यवस्थायामनुभूतइदानींस्मृतिकालेज्ञानाभावानुमानेबाधप्रसंगात् ॥ तदाकालज्ञानस्यांगीकृतत्वात् ॥ अतोभावरूपा
ज्ञानस्यसुषुप्तिकालेपिसाक्षिणैवसिद्धिरंगीकर्तव्या ॥ तदुक्तंमांडूकभाष्ये ॥ सुषुप्तंतुतमोज्ञेयंहरिंप्राप्यतदावृतः ॥ नकामयेन्नै
वपश्येज्जीवःस्वात्मतमोविना ॥ कालंचतस्यस्थानस्यपतिःप्राज्ञोहरिःस्वयमिति ॥ नात्मानंनपरांश्चैवनसत्यंनापिचानृतं ॥ प्रा
ज्ञःसंवेदयेत्किंचिज्जीवकालतमोविना ॥ सुप्त्यवस्थांसुखंचापिविनानान्यत्प्रदर्शयेदिति ॥ किंचाविद्यायाभावरूपत्वमेवांगीकर्त
व्यं ॥ तमोगुणेनेश्वरसृष्टत्वस्य ब्रह्मशरीरेप्रक्षेपस्य तच्छरीरान्निस्सृतत्वस्य जीवस्वरूपावरकत्वस्यापरोक्षज्ञाननाश्यत्वस्यचाभा

वेसर्वथावक्तुमशक्यत्वादितिसंक्षेपः ॥ अविद्यायाआश्रयमाह ॥ सर्वाप्यविद्येति ॥ १७३ ॥ तदुक्तंतत्वोद्योते पुंगतमेवहि तमइति ॥ मांडूकभाष्येपि घनोजीवस्तमोवृतइति ॥ जिज्ञासाधिकरणानुव्याख्यानेपिस्वभावाज्ञानवादस्यनिर्दोषत्वान्नतद्भवेदिति ॥ अत्रस्वभावशब्दोजीवस्वरूपपरइतिसुधायामुक्तं ॥ तथाहितद्वाक्यानि ॥ स्वश्चासौभावश्चेतिस्वभावोजीवः ॥ तदाश्रितंतदावरणमितिवादः ॥ स्वभावाज्ञानवादःजीवाश्रितंजीवावरणंचाज्ञानमित्यंगीकारादिति ॥ नचाविद्यापटलपिहितनयनैरन्यैरन्यथाव्याख्यातानीतिटीकाविरोधइतिवाच्यं ॥ नीयतेनेनेतिनयनमितिनयनशब्दस्यस्वरूपमनःपरत्वात् ॥ यद्वाअविद्यापटलपिहितंनयनंयथास्थितयोजनाप्रकारोयेषांतैरितिव्याख्यानसंभवात् ॥ नन्वेवमज्ञानस्यजीवाश्रितत्वानुपपत्तिः ॥ जीवस्यज्ञानस्वरूपत्वेनाज्ञानावरणानुपपत्तेः ॥ अन्यथांधकारस्यदीपावरकत्वापत्तेः ॥ नचस्वरूपज्ञानंनाज्ञानविरोधि ॥ किंतुवृत्तिरूपज्ञानमितिवाच्यं ॥ अज्ञताखिलसंवेत्तुर्घटतेनकुतश्चनेत्युपाधिखंडने ईश्वरस्वरूपज्ञानस्याज्ञानविरोधित्वोक्तिर्नस्यादिति चेत् ॥ उच्यते ॥ ज्ञानाज्ञानयोःसर्वथाविरोधएव ॥ नचजीवस्यस्वप्रकाशज्ञानरूपस्याज्ञानावरणानुपपत्तिरितिवाच्यं ॥ ईश्वराचिंत्यशक्त्याऽज्ञानस्यजीवाश्रितत्वसंभवात् ॥ तदुक्तंजिज्ञासाधिकरणसुधायां ॥ अतःपरमेश्वरएवसत्त्वादिगुणमय्याविद्याविरोधित्वेनाविद्ययास्वाधीनयाप्रकृत्याऽचिंत्याद्भुतयास्वशक्त्याजीवस्यस्वप्रकाशमपिस्वरूपचैतन्यमप्याच्छादयतीतियुक्तमिति ॥ तथातत्रैव ॥ जीवाश्रितंजीवावरणंचाज्ञानमित्यंगीकारात् ॥ तच्चस्वप्रकाशस्यापिपरमेश्वरेच्छयापरमेश्वरेस्वधर्मेषुचाज्ञानं संभव

१७३ सर्वाप्यविद्याजीवाश्रिता ॥

त्यैवेति ॥ नन्वेवमज्ञानस्यजीवाश्रितत्वेपरमात्मापरोक्षज्ञानेननिवृत्तिर्नस्यात् ॥ ज्ञानस्यांतःकरणपरिणामत्वेनांतःकरणाश्रि तत्वात् ॥ समानाधिकरणयोरेवदीपांधकारयोर्निवर्त्यनिवर्तकभावस्यदर्शनादितिचेत् ॥ अभेदसंबंधेनज्ञानस्यांतःकरणनिष्ठत्वे पिसंयोगसंबंधेनात्मनिष्ठत्वात् ॥ मनसआत्माश्रितत्वात् ॥ अयःपिंडसंबद्धाग्नेरयःपिंडसंबद्धपटादिदाहकत्ववदित्यलं ॥ नन्व ज्ञानस्यजीवाश्रितत्वएकस्यापरोक्षज्ञानोत्पत्तावज्ञाननाशेसर्वेषामपिमुक्तिःस्यादित्यतआह ॥ **प्रातिस्विकीचेति** ॥ १७४ ॥ ए कैकस्यजीवस्यैकैकमज्ञानं ॥ नतुसर्वजीवाश्रितमेकमज्ञानं ॥ अतएकस्यापरोक्षज्ञानेनतदाश्रिताज्ञाननाशेपिजीवांतरस्याज्ञानां तराश्रितत्वान्नतस्यापिमुक्तिरित्यर्थः ॥ तदुक्तंदशमस्कंधतात्पर्ये ॥ अथान्येप्रकृतीदुष्टेनृषुप्रातिस्विकंस्थितेइति ॥ एकादश तात्पर्येपि ॥ पिशाचवत्स्थितामायामुच्यतेजीवगायदा ॥ दह्यंतेतद्गुणाःसर्वेसाचप्रातिस्विकीनरइति ॥ अविद्याभिमानिनीच दुर्गेतिद्रष्टव्यं ॥ तदुक्तमेकादशतात्पर्ये ॥ श्रीस्तुविद्यासमुद्दिष्टादुर्गाऽविद्याप्रकीर्तितेति ॥ अविद्यायाद्रव्यत्वंचतमो गुणविकारत्वाद्युक्तं ॥ जिज्ञासाधिकरणसुधायामपिद्रव्यत्वेनव्यवहाराच्चसिद्धं ॥ तथाहितद्वाक्यं ॥ अतःकर्मादिव्यति रिक्तंमायाविद्याप्रकृतिशब्दाभिधेयमनाद्येवकिमपिद्रव्यमंगीकरणीयमिति ॥ ॥ इत्यविद्याप्रकरणं ॥ ४ ॥ ४ ॥ ४ ॥ इदानींवर्णाख्यद्रव्यविभागमाह ॥ **वर्णाइति** ॥ १७५ ॥ एकपंचाशदिति ॥ तदुक्तंतंत्रसारे ॥ एकपंचाशद्वर्णा नांचतुर्विंशतिमूर्तयइति ॥ पंचाशद्वर्णवाच्यास्तावर्णास्तारार्णभेदिताः ॥ सक्षकाराद्व्यसेद्वर्णान्नृसिंहःक्षस्यदेवतेति ॥ न

---

१७४ प्रातिस्विकीच ॥ १७५ वर्णाअकारादयएकपंचाशत् ॥

नुतंत्रसारे अकाराद्यतिशांतांतःसोयमष्टाक्षरोमतइतिशांतातिशांतनादबिंदुघोषाणपंचानामेकपंचाशद्वर्णातिरिक्तानामुक्तेः ॥ तथाएकादशस्कंधतात्पर्ये त्रिमात्रमादितःकृत्वायावच्चानंतमात्रकाः ॥ प्रणवास्तेविभेदेनह्यनंताःपरिकीर्तिताः ॥ एकमात्रोत्तराःसर्वेवासुदेवाभिधायकाः ॥ तेषांव्याख्यानरूपाहिसर्ववेदाःप्रकीर्तिताइतिप्रणवांतर्गतानामनंतवर्णानामुक्तेः ॥ मध्वविजयेपि ॥ अनंतमात्रांतमुदाहरंतियंत्रिमात्रपूर्वप्रणवोच्चयंबुधाः ॥ तदाभवद्ब्राविचतुर्मुखाकृतिर्जपाधिकारीयतिरस्यसूचितइत्यनंतवर्णात्मकत्वोक्तेः ॥ कथमेकपंचाशद्ववर्णाइतिचेदुच्यते ॥ ॐ कारगतेष्वकारोकारमकारेष्वेवानंतानां मात्राणामंतर्भूतत्वेनाकारादिग्रहणेनैवतेषामपिगृहीतत्वान्नविरोधः ॥ यद्वासर्वैरुच्चार्यमाणवर्णाभिप्रायेणप्रवृत्तैकपंचाशद्वर्णानामितितंत्रसारानुसारेणविभागस्यकृतत्वान्नदोषइत्यवधेयं ॥ ननुवर्णानामेकपंचाशत्त्वेलौकिकवैदिकवाक्यानामानंत्यं कथंस्यादित्यतआह ॥ **सर्वइति** ॥ १७६ ॥ आनुपूर्वीविशेषविशिष्टाइतिशेषः ॥ तथाचवर्णानामेकपंचाशत्त्वेप्यानुपूर्वीविशेषविशिष्टानांलौकिकवैदिकवाक्यानामानंत्योपपत्तेर्नदोषइतिभावः ॥ तार्किकास्तु ॥ वर्णाआकाशविशेषगुणाउच्चारणे नोत्पद्यंतेथनश्यंतीत्याहुः ॥ तान्निराचष्टे ॥ प्रत्येकंव्याप्ताइत्यादिना ॥ गुणत्वेव्याप्तत्वानुपपत्तेरितिभावः ॥ नचवर्णानांव्याप्तत्वेप्रमाणाभावइतिवाच्यं ॥ देशतःकालतश्चैवगुणतश्चत्रिधाहरेः ॥यथानंत्यंनचान्यस्यप्रकृतेर्देशकालतः ॥ तथाशब्दस्यकालस्य देशानंत्यंचकालतः ॥ कालशब्दात्मिकासैवेतितृतीयस्कंधतात्पर्योक्तेः ॥ तथाचेत्थमनुमानप्रयोगः ॥ वर्णाःद्रव्यंव्याप्तत्वादा

१७६ सर्वेलौकिकावैदिकाश्चशब्दाएकपंचाशद्वर्णात्मकाः प्रत्येकंव्याप्ताअनादिनित्याश्च ॥

काशवदिति ॥ नचद्रव्यत्वेपिपृथिव्यादिवन्मध्यमपरिमाणत्वमस्त्वितिवाच्यं ॥ तथात्वेघटादिवदनित्यत्वापत्तेः ॥ नचेष्टापत्तिरितिवाच्यं ॥ वर्णानांदेवतानांचनित्यत्वान्नक्रमःस्वतइतितंत्रसारविरोधापत्तेः॥नाप्यणुपरिमाणंवक्तुंयुक्तं॥अतींद्रियत्वापत्तेः॥ नचव्याप्तत्वआकाशवदतींद्रियत्वंस्यादितिवाच्यं ॥ व्याप्तत्वेपितवात्मनोमानसत्ववच्छ्रोत्रग्राह्यत्वोपपत्तेः॥ अतोवर्णानांद्रव्यत्वं व्याप्तत्वंचयुक्तमेव ॥ तदुक्तंप्रकृत्यधिकरणसुधायां ॥ तथाहितद्वाक्यानि ॥ शब्दोवर्णात्मावापक्षोध्वनिरूपोवा ॥ नाद्यः ॥ तस्यगुणत्वासिद्धेः ॥ आत्मनएकेंद्रियग्राह्यत्ववद्द्रव्यस्यैवसतःशब्दस्यबाह्येंद्रियग्राह्यत्वेपिविरोधाभावादिति ॥ विष्णुतत्वनिर्णयटीकायामपि ॥ वर्णानांद्रव्यत्वेपिसर्वगतत्वात् ॥ अणुत्वेतींद्रियत्वापत्तेः॥मध्यमपरिमाणत्वेनित्यत्वविरोधादिति ॥जिज्ञासाधिकरणसुधायामपि ॥ वर्णास्तावन्नित्यद्रव्यत्वान्नक्वचित्समवेताइति ॥ ननुनवर्णानांनित्यत्वंवक्तुंयुक्तं ॥ उच्चारणेसत्युत्पन्नोगकारोनष्टोगकारइतिप्रतीतिविरोधादितिचेन्न॥तस्याःव्यंजकोच्चारणविषयत्वादित्याह॥ **उच्चारणध्वनिव्यंग्याइति**॥१७७॥ उच्चारणजन्याध्वनिरुच्चारणध्वनिः ॥ ध्वनिव्यंग्याइत्येवोक्तउच्चारणस्यवैयर्थ्यापातात् ॥ उच्चारणव्यंग्याइत्येवोक्ते अतआकाशगुणेशब्देव्यज्यमानावर्णाइतितत्वनिर्णयविरोधप्रसंगात्॥ अतउभयमप्युपात्तं॥ननुवर्णानांद्रव्यत्वेघटादिवद्वाचकत्वंनस्यादित्यतआह ॥ **प्रत्येकमिति** ॥ १७८॥ इंद्रियाणांद्रव्यत्वेप्यर्थप्रकाशकत्ववद्वर्णानांद्रव्यत्वेप्यर्थप्रतिपादकमुपपन्नमेवेतिभावः ॥ इतिवर्णप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानीमंधकाराख्यंद्रव्यंनिरूपयति ॥ **प्रकाशेति** ॥ १७९ ॥ प्रकाशनाश्यत्वंचांधकार

१७७ उच्चारणध्वनिव्यंग्याः ॥ १७८ प्रत्येकमानुपूर्वीविशषविशिष्टतयाचपदार्थवाचकाः ॥ १७९ प्रकाशविनाश्योंधकारः ॥

स्यप्रत्यक्षसिद्धं ॥ नचप्रकाशनाश्यत्वंनतमोलक्षणं ॥ प्रभाध्वंसद्वाराप्रभाकुड्यसंयोगेतिव्याप्त्यापत्तेरितिवाच्यं ॥ प्रकाशाजन्यत्वे नवासाक्षादितिवाविशेषणात् ॥ नचैवंप्रकाशप्रागभावेतिव्याप्तिः॥भावत्वेनापिविशेषणात् ॥ ननुतमोनद्रव्यं॥ किंतुतेजोभावः॥ नचैकस्यदीपादितेजसोध्वंसेसतिदीपांतरवतिगेहेंधकारप्रतीत्यापत्तिः॥किंचैतद्दीपवतिगेहेदीपांतरप्रागभाववत्यंधकारप्रतीत्याप त्तिः उभयत्रापितेजोभावस्यसत्त्वादितिवाच्यं ॥ तेजोत्यंताभावस्यविवक्षितत्वात्॥ अत्यंताभावस्यप्रागभावध्वंसोभयविरोधि त्वेनतदुभयत्रप्रागभावप्रतियोगिध्वंसानांसत्वान्नांधकारप्रतीतिः ॥ अत्यंताभावाभावात् ॥ नचैवंगेहादावंधकारप्रत्ययएवनस्या त् ॥ दीपवतिदीपात्यंताभावस्यतत्प्रागभाववतितद्ध्वंसवतिचदीपात्यंताभावस्यविरोधेनवक्तुमशक्यत्वादितिवाच्यं॥ प्रौढप्रकाश कतेजस्सामान्याभावस्यविवक्षितत्वादितिचेदुच्यते ॥ नीलंतमश्चलतीतिप्रत्ययस्तावदनुभवसिद्धः॥ अतोनीलरूपाश्रयतयाक्रि याश्रयतयाचमूर्तद्रव्यत्वसिद्धिः ॥ नचनीलंतमश्चलतीतिप्रत्ययोभ्रमः ॥ नीलंनभइतिप्रतीतिवदितिवाच्यं ॥ बाधकज्ञानाभा वात् ॥ नभोनैल्यस्यशास्त्रबाधितत्वेनारोपितत्वात् ॥ किंचतमसएवद्रव्यत्वमस्तुतदभावरूपत्वंतेजसःकिंनस्यात्॥ नहिविरोध मात्रेणैकस्यापरविरहरूपत्वंवक्तुंयुक्तं ॥ काकोलूकाहिमूषिकादीनामपितथात्वापत्तेः ॥ अपिचरात्रौसूर्यादिप्रकाशाभावेनप्रौढप्र काशकतेजस्सामान्याभावसत्त्वेनदीपवतिगेहेंऽधकारप्रत्ययःस्यात् ॥ नचसामान्याभावस्ययत्किंचित्प्रतियोगिसत्त्वविरोधित्वा दीपवतिनतेजस्सामान्याभावइतिवाच्यं ॥ तर्हिदीपापसरणेदीपध्वंसस्यदीपांतरप्रागभावस्यचसत्त्वनेतत्सामान्याभावाभावेनत

त्रांधकारप्रत्ययाभावप्रसंगादित्यभिप्रायेणतार्किकान्निराकरोति ॥ नत्विति ॥ १८० ॥ निरवकाशानिदूषणान्याह ॥ चक्रादीति ॥ १८१ ॥ अंधकारस्यतेजःप्रागभावरूपत्वेचक्रच्छेद्यत्वानुपपत्तेः॥नह्यन्यप्रागभावस्यान्यच्छेद्यत्वंयुक्तं ॥ तेजो ध्वंसात्यंताभावयोश्चनित्यत्वेनछेद्यत्वस्यैवाभावादितिभावः ॥ अंधकारस्यचक्रच्छेद्यत्वंचोक्तंनिर्णये ॥ वह्निंप्रविश्यंतमसुंनिवार्य ययौसविप्रःसहफल्गुनोहरिः ॥ आशामुदीचींबृहतारथेनक्षणेनतीर्त्वैवचसप्तवारिधीन् ॥ ददुश्चमार्गेगिरयोऽधयस्तथाविदार्यच क्रेणतमोंधमीशइति ॥ नचांधतमसस्यदुर्गात्मकत्वात्कथंचक्रच्छेद्यत्वमितिवाच्यं ॥ जडप्रकृत्युपादानकस्यैवातिनिबिडस्यचक्र च्छेद्यत्वात् ॥ दुर्गारूपस्याप्रतिघत्वेनगत्यप्रतिबंधकतयाचक्राच्छेद्यत्वात् ॥ इदंचोपलक्षणं ॥ कुरुपांडवयुद्धकालेसूर्येसत्येवकृ ष्णेनसृष्टांधकारस्यसर्वैरुपलब्धत्वेनतेजोभावरूपत्वाभावादित्यपिग्राह्यं ॥ तदुक्तंनिर्णये ॥ अजितेद्रोणतनयेत्वहतेचजयद्रथे ॥ अर्जुनस्यजयाकांक्षीससर्जतमऊर्जितं ॥ तदैवसूर्येसकलैश्चदृष्टेहाहेतिवादःसुमहानथासीदिति ॥ ब्रह्मणापीयमानत्वादि ति ॥ १८२ ॥ तथाचतमसस्तेजोभावरूपत्वेपानकर्मत्वानुपपत्तिरितिबोध्यं ॥ तदुक्तंतृतीयस्कंधभागवते ॥ विश्वमात्मगतं व्यंजन्कूटस्थोजगदंकुरः ॥ स्वतेजसापिबत्तीव्रमात्मप्रस्वापनंतमइति ॥ नचैवंप्रलयकालीनतमसआरंभणाधिकरणटीकायां तम आसीदित्यत्रतमःशब्दव्याख्यानरूपेणयत्तमोपरिमितंसलिलंभूत्वासीत्प्रकृत्याख्यंतेनेदंसर्वंगूहितमासीदित्यनेनदुर्गारूपत्वस्यव राहपुराणादिनाचोक्तेःकथंब्रह्मपीतत्वमितिवाच्यं ॥ तद्भिन्नस्यापिजडप्रकृत्युपादानकस्यतमसोब्रह्मणापीतत्वात् ॥ तदुक्तंतृ

१८० नतुतेजोभावः ॥ १८१ चक्रादिच्छेद्यत्वात् ॥ १८२ ब्रह्मणापीयमानत्वादावरणत्वात्स्वातंत्र्येणोपलभ्यमानत्वाच्च ॥

तीयतात्पर्ये ॥ महांतंयोसृजज्जीवमोहकंचतमोग्रसदिति ॥ प्रथमतात्पर्येपि ॥ तमसाप्युपगूढस्ययत्तमःपानमीशितुरिति ॥ आव
रणत्वादिति ॥ तथाचांधकारस्याभावरूपत्वेघटाद्यावरकत्वानुपपत्तेर्द्रव्यत्वमेवयवनिकादिवदंगीकर्तव्यमितिभावः ॥ नचांध
कारस्थपुरुषस्यदीपवतिप्रदेशांतरेघटादिज्ञानदर्शनान्नावरकत्वमंधकारस्येतिवाच्यं ॥ विषयावरकत्वस्यैवविवक्षितत्वेनपुरुषाव
रकत्वस्यानुक्तत्वात् ॥ स्वातंत्र्येणेति ॥ प्रतियोग्युल्लेखंविनेहांधकारइत्युपलब्धेरित्यर्थः ॥ तेजोभावरूपत्वेघटोनास्तीतिवदिह
तेजोनास्तीत्येवप्रत्ययापत्त्यांधकारोस्तीतिप्रत्ययोनस्यात् ॥ ननुतमसउत्पत्तिमत्त्वउपादानंवक्तव्यमितिचेन्न ॥ तमोगुणस्यवाभू
तस्थतमसोवांधकारोपादानत्वसंभवात् ॥ तदुक्तंबिंबप्रतिबिंबैक्यभंगेन्यायामृते ॥ प्रतिबिंबस्यकॢप्तद्रव्यानंतर्भावेतमोवद्द्रव्यां
तरत्वसंभवाच्चेति ॥ इत्यंधकारप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानींवासनारूपद्रव्यंनिरूपयति ॥ स्वाप्नेति ॥ १८३ ॥
प्रतिजीवंवासनानांनानात्वाद्वासनाइतिबहुवचनोक्तिः ॥ ननुस्वाप्नपदार्थाःसर्वेपिमिथ्याभूताः ॥ कुतस्तेषामुपादानापेक्षा ॥
अन्यथास्वप्नकालेतेषांसृष्टत्वेस्वप्नोत्थानानंतरमपितेदृश्येरन् ॥ बहिःसृष्टत्वेपार्श्वस्थैरुपलभ्येरन् ॥ अंतःसृष्टत्वेहृदयविदारणप्रसं
गादितिचेन्न ॥ सुखदुःखाद्यर्थक्रियाकारित्वेनशुभाशुभसूचकत्वेनचतेषांसत्यत्वात् ॥ नह्यसतःसाधकत्वंक्वापिदृष्टं ॥ रज्जुसर्पा
देः सवितृसुषिरादेश्चनार्थक्रियाकारित्वं ॥ किंतुतद्विषयकज्ञानस्यसद्रूपस्यैवसाधकत्वं ॥ तदुक्तमनुव्याख्याने ॥ सर्पभ्रमादावपि
हिज्ञानमस्त्येवतादृशमिति ॥ शुभाशुभसूचकत्वेतु सूचकश्चहिश्रुतेराचक्षतेचतद्विदइतिसूत्रं ॥ यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेभिप

१८३ स्वाप्नपदार्थोपादानानिवासनाः ॥

श्यति ॥ समृद्धिंतत्रजानीयात्तस्मिन्स्वप्ननिदर्शनइतिश्रुतिः ॥ ऐतरेयोक्तस्वप्नाध्यायश्चमानं ॥ ऐतरेयभाष्यमपि ॥ बृहत्तमं
मधुयदिसहापूपेनभक्षयेत् ॥ स्वप्नेतस्याचिरान्मृत्यूरक्ताब्जेवाशिरोधृतइति ॥ यच्चान्यथेत्यादिदूषणमुक्तं तन्न ॥ तेषांदेहांतरुत्पत्त्यं
गीकारात् ॥ अप्रतिघवासनोपादानकत्वेनहृदयविदारणादेरभावात् ॥ तत्कालएवविद्युदादिवदीश्वरसृष्टत्वेनविनष्टत्वेनच
स्वप्नोत्थितस्यतज्ज्ञानायोगात् ॥ नन्वेतादृशवासनानामुपादानंकिं आश्रयोवाकइत्याशंकायामाह ॥ पूर्वानुभवेति ॥१८४॥
जाग्रदवस्थायांयेपदार्थाअनुभूतास्तत्तदनुभवेभ्योंतःकरणोपादानकाअंतःकरणाश्रिताजायंतइत्यर्थः ॥ तदुक्तंभक्तिपादीया
नुव्याख्याने ॥ वासनाःसर्ववस्तूनामनाद्यनुभवागताः ॥ संत्येवाशेषजीवानामनादिमनसिस्थिताः ॥ संस्कारैर्भगवाने
वसृष्ट्वानानाविधंजगत् ॥ स्वप्नकालेदर्शयतीति ॥ भाष्येपि ॥ मनोगतांस्तुसंस्कारान्स्वेच्छयापरमेश्वरः ॥ प्रदर्शय
तिजीवायसस्वप्नइतिगीयतइति ॥ नन्वेवंवासनानामनादित्वोक्तेःकथंपूर्वानुभवजन्यत्वमुक्तं ॥ तथासंस्काराणामेवस्वा
प्नपदार्थोपादानकत्वोक्तेर्नवासनानामुपादानत्वमित्यतआह ॥ प्रवाहतइत्यादिना ॥ १८५ ॥ अनादित्ववचनंप्रवाहतो
नादित्वपरं ॥ संस्काररूपाएववासनाअतोनविरोधइतिभावः ॥ एवंस्वाप्नपदार्थन्यायएवमनोरथपदार्थेषुद्रष्टव्यः ॥ ननुनमनो
रथपदार्थानांवासनामयत्वं ॥ किंतुभ्रांतिकल्पितत्वमेवेतिचेन्न ॥ उत्पद्यंतेविलीयंतेदरिद्राणांमनोरथाइत्यादिनोत्पत्तिविना
शप्रतिपादकपुराणवाक्येनविरोधप्रसंगात् ॥ तवयन्मनोरथःसएवासीदित्यादिव्यपदेशस्तुमनोरथबाह्यपदार्थयोःसादृश्याद्गौ

१८४ पूर्वानुभवजन्याः मनोगताः ॥ १८५ प्रवाहतोऽनादयः ॥ संस्कारपदवाच्याः ॥

णः ॥ नत्वभेदादितिबोध्यं ॥ तदुक्तंस्वप्नाधिकरणसुधायां ॥ तस्माद्यथामनोरथेध्यानेवासंस्कारयोनीनर्थान्मनसानुभवत्येवं
स्वप्नेपीतिकिमनुपपन्नं ॥ इयांस्तुविशेषः ॥ मनोरथादौप्रयत्नपूर्विकासृष्टिःस्वप्नेपुनरीश्वराधीनैवेति ॥ तत्वनिर्णयटीकायाम
पि ॥ इयमेवरीतिर्मनोरथस्य ॥ इयांस्तुविशेषः ॥ स्वप्नेऽदृष्टवशादेववासनापरिणामोदृश्यते ॥ मनोरथेतुपुरुषप्रयत्नाधीनइ
तीति ॥ एवमुपासनाकालेयोभगवत्सदृशाकारःप्रतीयते सोपिवासनामयएव ॥ भगवतःसाक्षाद्ध्यानविषयत्वायोगात् ॥ तदु
क्तंसूत्रे तथान्यत्प्रतिषेधादिति ॥ भाष्येपि ॥ यथाजीवानंदादेरन्यद्ब्रह्मतथोपासाकृतादपि ॥ पश्यंतिपरमंब्रह्मचित्तेयत्प्रतिबिं
बितमिति ॥ टीकायामपि ॥ ध्यानेप्रतीतस्याब्रह्मत्वादिति ॥ न्यायविवरणभावबोधेपि ॥ चित्तप्रतिबिंबरूपता ॥ ध्यानकाले
प्रतीतचित्तोपादानकरूपस्वरूपता ॥ नेत्यर्थइति ॥ जिज्ञासाधिकरणसुधायामपि ॥ श्रवणदर्शनादिजनितमानसवासनामय
स्यवस्तुनोमनसावलोकनंध्यानमित्यंगीकारात् ॥ अतींद्रियोपादानकस्यापिद्रव्यस्यैंद्रियकत्वंत्र्यणुकादेरिवोपपद्यतइति ॥ स्व
प्नाधिकरणसुधायामपि ॥ नचतेषांगुणत्वेनोपादानत्वानुपपत्तिः ॥ मनोवृत्तित्वेनद्रव्यत्वादिति ॥ अतएवद्रव्यत्वंसिद्धं ॥
इतिवासनाप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ क्रमप्राप्तंकालंनिरूपयति ॥ आयुर्व्यवस्थापकइति ॥ १८६ ॥ अयंशतायुरयंदीर्घायु
श्चिरंजीवीतस्यायुर्गतमायुर्वर्धतइत्यादिव्यवहारासाधारणकारणमित्यर्थः ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ आयुर्हरतिवैपुंसामु
द्यन्नस्तंचयन्नसौ ॥ तस्यर्तेयःक्षणोनीतउत्तमश्लोकवार्तयेति ॥ तत्तात्पर्यमपि ॥ तस्यायुषोयउत्तमश्लोकवार्तयाकृतेक्षणःसनीतए

१८६ आयुर्व्यवस्थापकःकालः ॥

वत्र्थेति ॥ तृतीयस्कंधभागवतेपि ॥ तमस्यपारेविदुरात्मसर्गंविचिन्वतोभूत्सुमहांस्त्रिनेमिः ॥ योदेहभाजांभयमीरयानःपरि
क्षिणोत्यायुरजस्यहेतिरिति ॥ एवंविधैरहोरात्रैःकालगत्युपलक्षितः ॥ अपेक्षितमिवास्यापिपरमायुर्वयःशतमिति ॥ निर्णयेपि
कालकृतमायुर्विभीषणायरामेणदत्तमित्युक्तं ॥ मत्वातृणोपममशेषसदंतकंतंरक्षःपतेस्त्ववरजस्यददौसलंकां ॥ कल्पांतमस्यनि
शिचारपतित्वपूर्वमायुःप्रदायनिजलोकगतिंतदंतइति ॥ एवंहनुमदादीनामपिकालकृतमेवचिरायुरितिद्रष्टव्यं ॥ अतएवपरमा
त्मनोमुक्तानांचकालसंबंधाभावान्नायुर्मर्यादा ॥ नवर्ततेयत्ररजस्तमस्तयोःसत्त्वंचमिश्रंनचकालविक्रमइतिद्वितीयस्कंधभागवतो
क्तेः ॥ सचकालस्तार्किकाद्यंगीकृतकालवन्नाखंडैकइत्याह ॥ क्षणलवादीति ॥ १८७ ॥ तदुक्तंतृतीयस्कंधभागवते ॥ द्व्यणु
द्वौपरमाणूस्यात्त्र्यसरेणुस्त्रयःस्मृतः ॥ त्र्यसरेणुत्रिकंभुंक्तेयःकालःसत्रुटिस्मृतः ॥ तत्रिभागस्तुवेधःस्यात्तैस्त्रिभिस्तुलवःस्मृतः ॥
निमेषस्त्रिलवोज्ञेयआम्नातस्तत्त्रयःक्षणः ॥ क्षणान्पंचविदुःकाष्ठांलघुतादशपंचच ॥ लघूनिवैसमाम्नातादशपंचचनाडिका ॥
तेद्वेमुहूर्तःप्रहरःषड्यामःसप्तवानृणामित्यादि ॥ तार्किकास्तुकालस्यनित्यत्वमाहुः ॥ तान्निराकरोति ॥ प्रकृत्येति ॥ १८८ ॥
सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधीतिश्रुतेरितिभावः ॥ तदुक्तमनुव्याख्यानेवैशेषिकाधिकरणे ॥ विशेषाश्चैवकालस्यहरेरि
च्छावशाःसदा ॥ सर्वेनिमेषाइतिहिश्रुतिरेवाहसादरमिति ॥ ननुकालस्योत्पत्त्यंगीकारेतस्योपादानंवक्तव्यं ॥ नतावत्पंचभूता
निकालोपादानं ॥ कालस्ययावदव्याकृताकाशव्याप्तत्वेनपरिमितानांपंचभूतानामुपादानत्वानुपपत्तेः ॥ प्रलयकालस्यापि

१८७ क्षणलवाद्यनेकरूपः ॥ प्रत्येकंव्याप्तः ॥ १८८ प्रकृत्योत्पत्तिविनाशवान् ॥

जायमानत्वेनपंचभूतानांतदानीमभावाच्च ॥ अतएवमहदादिकमपिनोपादानमित्यतआह ॥ प्रकृत्येति ॥ प्रकृतेश्चनित्यत्वा
द्व्याप्तत्वाच्चव्याप्तकालोपादानत्वंसंभवत्येवेत्यर्थः ॥ तदुक्तंवैशेषिकाधिकरणसुधायां ॥ कालोपादानंप्रकृतिरेवेति ॥ प्रलय
कालेपिकालसृष्टिरंगीकर्तव्या ॥ अन्यथा कालस्यत्वष्टमोभागःसृष्टिकालउदाहृतइतिदशमतात्पर्यार्थस्याघटनापत्तेः ॥ नहि
तत्रकालसृष्टेरभावेप्रलयकालाष्टमभागमारभ्यसृष्टिकालव्युत्पादनंघटते ॥ किंच गीतायामहोरात्रिशब्दवाच्ययोःसृष्टिप्रलय
कालयोःसाम्यमुक्तं ॥ तत्प्रलयेकालसृष्ट्यनंगीकारेकथंस्यात् ॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः ॥ रात्रिंयुगसहस्रांतांतेहो
रात्रविदोजनाः ॥ अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंत्यहरागमे ॥ रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञकइति ॥ नचैतच्छ्लोकस्यदै
नंदिनप्रलयपरत्वमेवास्त्वितिवाच्यं ॥ अव्यक्ताद्व्यक्तयःसर्वाइतिमहदादीनामुत्पत्तिविनाशयोरुक्तेः ॥ नहिब्रह्मणोदैनंदिनसृ
ष्टिप्रलययोर्महदादिसृष्टिस्तद्विनाशोवाभवति ॥ अतोमहाप्रलयमहासृष्टिपरएवायंश्लोकइति ॥ तदुक्तंगीताभाष्येब्रह्मपरं ॥
द्विपरार्धप्रलयएवात्रविवक्षितः ॥ अव्यक्ताद्व्यक्तयःसर्वाइत्युक्तेः ॥ उक्तंचमहाकौर्मे ॥ अनेकयुगपर्यंतमहर्विष्णोस्तथानि
शा ॥ रात्र्यादौलीयतेसर्वमहरादौतुजायतइतिचेति ॥ तथातृतीयस्कंधभागवतेपिप्रलयकालेपिकालसृष्टिरुक्ता ॥ सोंतःशरी
रेर्पितभूतसूक्ष्मःकालात्मिकांशक्तिमुदीरयाणः ॥ उवासतस्मिन्त्सलिलेपदेस्वेयथानलोदारुणिरुद्धवीर्यइति ॥ एतच्छ्लोकोव्या
ख्यातःसुधायांवैशेषिकाधिकरणे ॥ कालात्मिकां कालाख्यांसहकारिशक्तिं उदीरयाणो जनयन्नित्यर्थइति ॥ केचित्तु
कालोपादानंनप्रकृतिः ॥ तस्याव्याप्तकालोपादानत्वेसर्वावयवैरपिकालात्मनापरिणतत्वेनमहदाद्युपादानत्वाभावप्रसंगात् ॥

नह्येकस्यैवयुगपदुभयोपादानत्वंसर्वावयवैरितिवक्तुंयुक्तं ॥ अनुभवविरोधात् ॥ किंतुपूर्वपूर्वकालएवोत्तरोत्तरकालोपादानं ॥
यथाबाल्यावस्थायांविद्यमानस्यैवदेहस्योत्तरोत्तरदेहोपादानत्वं ॥ यथावादीपज्वालायाउत्तरोत्तरदीपज्वालोपादानत्वं ॥ य
थावाद्रौपदीवस्त्रस्यदुःशासनेनापहारकालेपूर्वपूर्ववस्त्रस्योत्तरोत्तरवस्त्रोपादानत्वंतद्वदित्याहुः ॥ तन्न ॥ कालोपादानंप्रकृ
तिरितिसुधाविरोधप्रसंगात् ॥ नचप्रकर्षेणकरोतीतिप्रकृतिरितिप्रकृतिशब्दस्यकालपरत्वमितिवाच्यं ॥ योगापेक्षयारूढेःप्र
बलत्वात् ॥ किंचनचसर्वाधारभूतौदेशकालौकिंचिद्द्रव्यात्मनाविकुरुतइतिवियत्पादीयचंद्रिकाविरोधप्रसंगात् ॥ किंचपूर्वका
लस्योत्तरकालोपादानत्वेकालप्रवाहोनादिनित्यइतिसिद्धांतविरोधप्रसंगात् ॥ पूर्वावधिरहितानांपरस्परमत्यंतभिन्नानांसजाती
यानामनवरतमुत्पत्तिमतांविच्छेदाभावोहिप्रवाहतोनादिनित्यत्वं ॥ यथाजगत्प्रवाहस्यानादिनित्यत्वं ॥ नह्यत्रपूर्वपूर्वजगतामु
त्तरोत्तरजगदुपादानत्वं ॥ किंतुपरस्परंभिन्नानामेवप्रकृत्युपादानकतयासंततोत्पत्तिः ॥ एवंयोगिज्ञानमृजूनामनादिनित्यमिति
प्रमाणलक्षणोक्तऋजुयोगिज्ञानव्यक्तीनांनपूर्वपूर्वज्ञानोपादानकत्वं किंतुपरस्परंभिन्नानामेवांतःकरणोपादानकत्वं ॥ उपचारतो
नादिनित्यस्यापिगंगाप्रवाहस्यनपूर्वपूर्वोत्पन्नोदकानामुत्तरोत्तरजलोपादानत्वं किंतुपरस्परमत्यंतभिन्नानामेवसंश्लिष्टतयागमना
विच्छेदः॥ तथाचपूर्वपूर्वकालस्योत्तरोत्तरकालोपादानत्वेउपादानोपादेययोरभेदेनभिन्नानामुत्पत्तिविनाशपरंपराभावात्प्रवाहतो
नादित्वभंगप्रसंगएव ॥ यच्चोक्तंशरीरादिदृष्टांतेनपरस्परमुपादानोपादेयभावइति ॥ तन्न ॥ तत्रप्रवाहशब्दस्यप्रयोगाभावात् ॥
नहिदेवदत्तस्यैकस्मिन्नेवदेहेशरीरप्रवाहइतिव्यपदेशोस्ति ॥ किंचप्रलयकालेगतःसृष्टिकालउत्पन्नइत्युत्पत्तिविनाशप्रत्ययौनस्या

तां ॥ नहिदेवदत्तशरीरेनष्टंपूर्वशरीरंशरीरांतरमुत्पन्नमितिव्यपदेशोस्ति किंतुतदेवेदंशरीरमिति ॥ अपिचनित्यावेदाःपुरा
णाद्याःकालःप्रकृतिरेवचेतितत्वसंख्यानटीकायांकालप्रवाहस्यनित्यानित्यत्वमुक्तं ॥ तच्चैकदेशैरुत्पत्तिविनाशौएकदेशिनस्तद
भावइति ॥ तदयुक्तंस्यात् ॥ नहिपूर्वकालस्योत्तरकालोपादानत्वेपूर्वकालस्यविनाशोयुक्तः ॥ अपिच ॥ यत्परिणामि तदनि
त्यमितिव्याप्तिःसर्वसिद्धा ॥ नचपरिणामिनःकालस्यविनाशस्त्वत्पक्षेयुक्तः ॥ उपादानाभावेनोत्तरकालानुत्पत्तिप्रसंगात् ॥ न
चाविनष्टस्यैवकालस्याजस्रंपरिणामइतिवाच्यं ॥ तर्ह्युत्पन्नस्यकार्यभावंपरित्यज्यकारणात्मनावस्थानरूपविनाशाभावेनित्य
त्वमेवायातीतिकिंपरिणामव्यसनेन ॥ अन्यथैतादृशपरिणामस्याव्याकृताकाशादावपिवक्तुंशक्यत्वेनपराधीनविशेषावाप्तिरूपो
त्पत्तिकथनप्रयासोनस्यात् ॥ प्रकृतेःकालोपादानत्वपक्षेतुप्रकृतिसूक्ष्माणामनंतानांपरस्परंभिन्नत्वेनप्रत्येकंकालोपादानत्वसंभवे
नकार्याणांकालानांपरस्परभिन्नत्वमुत्पत्तिविनाशौप्रवाहतोनादित्वंचघटते ॥ यच्चोक्तंसर्वप्रकृतेःकालोपादानत्वउपादानाभावा
न्महदाद्युत्पत्तिर्नस्यादिति ॥ तन्न ॥ सर्वत्रव्याप्तानांकतिपयप्रकृतिसूक्ष्माणांकालोपादानत्वंकतिपयानांमहदाद्युपादानत्वंकतिप
यानांचमूलरूपेणावस्थानमित्यंगीकारात् ॥ नचैवमल्पसूक्ष्मोपचितत्वात्कालस्यव्याप्तत्वंनस्यादितिवाच्यं ॥ उपादानोपादेय
योःसमपरिमाणत्वनियमाभावात् ॥ अल्पानामेवमहाकार्यात्मनापरिणामसंभवात् ॥ यथादशसहस्रयोजनपरिमितसूर्यमंडल
स्यपरितःसप्तकोटियोजनपरिमितलोकालोकप्रदेशपर्यंतव्याप्तप्रकाशोपादानत्वं ॥ यथावावृत्रासुरदेहस्यपरिमितत्वेनसर्वैर्दृष्ट
स्ययुगपदेवपंचाशत्कोटिविस्तीर्णभूमंडलव्याप्तदेहोपादानत्वं ॥ यथावाल्पपरिमाणवतोद्रौपदीवस्त्रस्यापरिमितपरिमाणोपेतव

स्त्रोपादानत्वं ॥ यथावाबिडालसंमितहनूमद्देहस्यमाहेंद्रपर्वतेमहाकायोपादानत्वं ॥ यथावाणूनांजीवानांपंचाशत्कोटिविस्ती र्णब्रह्मांडांतस्तद्बहिश्चयथायोग्यव्याप्तप्रकाशाभिव्यंजकत्वंतद्वदुपपत्तेः ॥ कालस्यस्रष्टुरीश्वरस्याचिंत्यशक्त्याचयावन्निर्वाहसंभ वाच्च ॥ तस्मात्साधूक्तंकालोपादानंप्रकृतिरिति ॥ ननुकालःकालेस्तिनवा ॥ नेतिपक्षेऽसत्त्वंस्यात् ॥ देशकालसत्त्वस्यैवसत्ता रूपत्वात् ॥ आद्यआत्माश्रयइत्यतआह ॥ स्वगतइति ॥१८९॥ इदानींप्रातःकालःसायंकालस्तूत्तरत्रेत्यनुभवादितिभावः ॥ तदुक्तंवैशेषिकाधिकरणानुव्याख्याने ॥ ईशोदेशश्चकालश्चस्वगताएवसर्वदेति ॥ कालस्यस्वगतत्वेननविरोधोपिकश्चन ॥ स्या त्कालःसर्वदैवेतिकालस्यस्वगतत्वतइति ॥ दिग्वत्कालोपिसर्वाधारइत्याह ॥ **सर्वाधारश्चेति** ॥ १९० ॥ इदानींघटइत्यादि प्रत्ययबलादित्यर्थः ॥ तदुक्तंप्रकृत्यधिकरणानुव्याख्याने ॥ तदेतदितिसर्वंचदृश्यंवास्मृतिगोचरं ॥ साक्षिसिद्धेनकालेनखचि तंह्येववर्तते ॥ तस्मान्नतंविनाकिंचित्स्मर्तुंद्रष्टुमथापिवेति॥ ननुकालस्योत्पत्तिविनाशवत्त्वेसर्वस्याप्यसत्त्वंस्यात्॥ अनादिनित्य त्वप्रतिपादकप्रमाणविरोधश्चस्यादित्यतआह ॥ **कालप्रवाहस्त्विति** ॥ १९१ ॥ पूर्वपूर्वकालानामुत्पत्तिविनाशेपिपुनःपुनः कालांतराणामुत्पादेनप्रवाहविच्छेदाभावान्नकोपिदोषइतिभावः ॥ तदुक्तमनुव्याख्यानेवियत्पादे ॥ कालप्रवाहएवैकोनित्योन तुविशेषवानिति ॥ तृतीयस्कंधतात्पर्येपि ॥ पूर्वापरादिभेदेनसकालःपरमोमहानिति ॥ तथाशब्दस्यकालस्यदेशानंत्यंचकालत इतिच ॥ प्रकृतिवत्कार्यमात्रकारणमित्याह ॥ **सर्वकार्येति** ॥ १९२ ॥ कालात्प्रसूतिंमन्यंते कालाद्भवंतिभूतानीत्यादि

१८९ स्वगतः ॥ १९० सर्वाधारश्च ॥ १९१ कालप्रवाहस्तुनित्यः ॥ १९२ सर्वकार्योत्पत्तिहेतुः ॥

श्रुतेः ॥ स्वतएवकालेविशेषांगीकृतेश्चेतिभाष्योक्तेः ॥ कालस्यद्रव्यत्वंच वैशेषिकाधिकरणसुधायां कालेश्वरादीनिहिद्रव्याणि
परममहत्त्ववंतीष्यंतइत्युक्तं ॥ इतिकालप्रकरणं ॥ ६ ॥ ६ ॥ ६ ॥ इदानीमवशिष्टंप्रतिबिंबंनिरूपयति ॥ **प्रतिबिंबस्त्विति**
॥ १९३ ॥ बिंबाधीनसत्ताक्रियादिमत्त्वमित्यर्थः ॥ तदुक्तंगीताभाष्ये ॥ नहिप्रतिबिंबस्यक्रिया ॥ सहिबिंबक्रिययैवक्रियावा
निति ॥ तदर्थस्तुप्रमेयदीपिकायामुक्तः ॥ बिंबक्रियया बिंबाधीनक्रिययेति ॥ नन्वेवंघटपटादिजडस्यापिपरमात्मादिप्रतिबिंब
त्वापत्तिरित्यतआह ॥ तत्सदृशइति ॥ तत्सादृश्यंचक्वचिज्ज्ञानानंदादिना क्वचित्करचरणादिमत्त्वादिनाविवक्षितं ॥ तेनजडे
नातिव्याप्तिः ॥ अतएवदैत्यानामपिपरमात्मप्रतिबिंबवत्त्वंसंभवति ॥ चेतनत्वेन करचरणादिमत्त्वेनचसादृश्यसंभवात् ॥ त
दुक्तंभक्तिपादीयानुव्याख्याने ॥ जीवस्यतादृशत्वंचचित्त्वमात्रंनचापरं ॥ तावन्मात्रेणचाभासोरूपमेषांचिदात्मनां ॥ किंचि
त्सुखादिसादृश्यमपीशेनासुरानृतइति ॥ नचैवंप्रतिमायाअपिपरमात्मप्रतिबिंबत्वंस्यादितिवाच्यं ॥ इष्टापत्तेः ॥ अमंत्रज्ञंबद्धं
दृष्ट्वाहरिर्बिंबात्पलायतइतिप्रतिमायांप्रतिबिंबशब्दापरपर्यायबिंबशब्दप्रयोगात् ॥ मुक्तियोग्यानांतु ज्ञानानंदादिनासादृश्यम
स्त्येव ॥ दर्पणादिगतमुखादिप्रतिबिंबेपिमुखादिगतनयनादिसादृश्यस्यसत्त्वान्नतत्राव्याप्तिः ॥ परमात्मरूपाणांपरमात्मप्रतिबिं
बत्ववारणायबिंबभिन्नत्वमपिदेयं ॥ तद्विभागमाह ॥ **सचेति** ॥ १९४ ॥ नित्यप्रतिबिंबानाह ॥ **परमात्मव्यति**
रिक्ताइति ॥ १९५ ॥ दर्पणादौमुखप्रतिबिंबस्यबिंबभूतमुखनाशेनवा दर्पणरूपोपाधिनाशेनवा तत्सन्निधिनाशेनवा नाशो

१९३ प्रतिबिंबस्तुबिंबाविनाभूतस्तत्सदृशः ॥ १९४ सचद्विविधः ॥ नित्योनित्यश्च ॥ १९५ परमात्मव्यतिरिक्ताः सर्वेपिचेतनाः परमात्मप्रतिबिंबानित्याः ॥

दृष्टः ॥ नतथाचेतनेषु ॥ बिंबस्यपरमात्मनो वक्ष्यमाणस्वरूपोपाधेस्तत्सन्निधेश्चनित्यत्वेननाशकाभावान्ननाशइतिभावः ॥ जी
वानांपूर्वंजीवत्वेनरूपेणद्रव्यत्वोक्तावपि प्रतिबिंबत्वेनापि द्रव्यत्वंसंभवतीत्यभिप्रायेण पुनरुक्तमितिद्रष्टव्यं ॥ परमात्मप्रतिबिं
बाइत्युपलक्षणं ॥ रमाब्रह्मादिप्रतिबिंबाइत्यपिग्राह्यं ॥ अधमदेवानामपिस्वोत्तमदेवताप्रतिबिंबत्वंच ॥ तदुक्तंनिर्णये ॥ आभास
कोस्यपवनःपवनस्यरुद्रःशेषात्मकोगरुडएवचशक्रकामौ ॥ वींद्रेशयोस्तदपरेत्वनयोश्चतेषामृष्यादयःक्रमशऊनगुणाःशतांशात् ॥
आभासकाभासपरावभासरूपाण्यजस्राणिचचेतनानां ॥ विष्णोःसदैवेति ॥ आथर्वणभाष्येपि ॥ प्रतिबिंबोहरेःप्राणस्तस्यचान्याः
कलाःक्रमात् ॥ कलानांदेवताअन्यादेवतानांनरादयइति ॥ स्त्रीणामप्युत्तमोत्तमस्त्रीप्रतिबिंबत्वंपरंपरयापरमात्मप्रतिबिंब
त्वंचज्ञेयं ॥ तदुक्तंनिर्णये ॥ आभासकात्वथरमास्यमरुत्स्वरूपाच्छ्रेष्ठाप्यजात्तदनुगीःशिवतोवरिष्ठा ॥ तस्याउमाविपतिनीचगिर
स्तयोस्तुशच्यादिकाःक्रमशएवयथापुमांसइति ॥ एवमधमदेवाःपुमांसोप्युत्तमदेवस्त्रीप्रतिबिंबभूताः ॥ तदुक्तंभक्तिपादीयानुव्या
ख्याने ॥ छायाविष्णोरमातस्याश्छायाधाताविशेषकौ ॥ तस्येंद्रकामौचतयोस्तयोरन्येखिलाअपि ॥ हरेर्ब्रह्मास्यगीस्तस्यावि
शेषाविंद्रएतयोः ॥ मारश्चाभासकाःसर्वएतयोस्तदधीनतइति ॥ नचपुंसांकथंस्त्रीप्रतिबिंबत्वं तत्सादृश्याभावादितिवाच्यं ॥
चित्त्वेनकरचरणादिनाचसंभवेनयावत्सादृश्यस्यानुपयोगात् ॥ तदुक्तंतत्रैव ॥ नातिसाम्यंनिदर्शनइति ॥ ननुनपुंसकजीवानां
परमात्मादिप्रतिबिंबत्वमस्तिनवा ॥ नेतिपक्षेजीवत्वंनस्यात् ॥ अंशाएवहीमेजीवाः ॥ ममैवांशोजीवलोकइत्यादिश्रुतिस्मृति
भिःपरमात्मांशत्वस्यसिद्धत्वेनतद्विरोधप्रसंगात् ॥ नाद्यः ॥ परमात्मादेरपिनपुंसकत्वापत्तेरितिचेन्न ॥ जात्यानपुंसकजीवानामे

वाभावात् ॥ स्वतःपुंसामेवशापादिनापापादिनाचनपुंसकत्वं ॥ अतएवार्जुनस्योर्वशीशापेनसंवत्सरपर्यंतमज्ञातवासेषंडरूपत्वं निर्णयोक्तं ॥ षंडोभवेत्येवतयाभिशप्तेपार्थेशक्रोनुग्रहंतस्यचादात् ॥ संवत्सरंषंडरूपीचरस्वनषंडतातेभवतीतिधृष्णुरिति ॥ एवंपरमात्मनःसर्वात्मनाषंडरूपाभावएव ॥ तदुक्तमैतरेयभाष्ये ॥ नचनपुंसकंरूपंभगवतःकुत्रचिदुक्तं ॥ प्रसिद्धमेवरूपद्वयं ॥ नपुंसकरूपेप्रमाणाभावादेव ॥ स्त्रीपुंरूपद्वयंविष्णोर्नतृतीयंकथंचन ॥ साक्षान्नपुंसकस्तस्मान्मुक्तभागीनतुक्वचित् ॥ विष्णोर्नपुंसकाकारोनैवास्तिक्वचनप्रभोरिति ॥ एवंपुंसांस्त्रीदेहप्राप्तावपिबिंबरूपंपुरुषरूपमेव ॥ निजस्वरूपस्यव्यत्यासाभावात् ॥ नच स्त्रीणांपुंस्त्वेकागतिरितिवाच्यं ॥ तथाभावस्यैवाभावात् ॥ तदुक्तंगीतातात्पर्ये ॥ यांतिस्त्रीत्वंपुमांसोपिपापतःकामतोपिवा ॥ नस्त्रियोयातिपुंस्त्वंतुस्वभावादेवयाःस्त्रियः ॥ पुंसासहैवपुंदेहेस्थितिःस्याद्वरदानतः ॥ तज्जन्मनिवराःपापजाताभ्योनिजस त्स्त्रियः ॥ सर्वेषामपिजीवानामंत्यदेहोयथानिजः ॥ मुक्तौचनिजभावःस्यात्कर्मभोगांततोपिचेति ॥ निर्णयेपि ॥ पुंसांस्त्रीत्वं भवेत्क्वापितथाप्यंतेपुमान्भवेत् ॥ स्त्रीणांनैवहिपुंस्त्वंस्याद्बलवत्कारणैरपीति ॥ नन्वेवंनवमस्कंधभागवतइलायाःस्त्रियःसुद्युम्नना मकपुंदेहप्राप्तिरुक्ता ॥ अस्तौषीदादिपुरुषमिलायाःपुंस्त्वकाम्यया ॥ तस्मैकामवरंतुष्टोभगवान्हरिरीश्वरः ॥ ददाविलाभवत्येव सुद्युम्नःपुरुषर्षभइति ॥ तत्कथंस्त्रीणांपुंस्त्वाभावइतिचेन्न ॥ इलायाःपूर्वजन्मनिपुंस्त्वस्यैवनिर्णयादिप्रमाणबलेनकल्प्यत्वात् ॥ तदुक्तंन्यायदीपिकायांनवमांते ॥ इलायाःसुद्युम्नत्वदर्शनादिति ॥ अतोनविरोधः ॥ ननुनपरमात्मप्रतिबिंबत्वंसर्वचेतनानां ॥ उपाधेरभावात् ॥ दर्पणाद्युपाधावेवमुखप्रतिबिंबदर्शनात् ॥ नचांतःकरणमेवोपाधिरितिवाच्यं ॥ तस्यसंसारकालेसत्त्वेपिमुक्तौ

तन्नाशेनजीवनाशप्रसंगात् ॥ लक्ष्म्यामुक्तानांचोपाधिसंबंधाभावेनपरमात्मप्रतिबिंबत्वाभावप्रसंगाच्चेत्यतआह ॥ नित्या
नित्येति ॥ १९६ ॥ तथाचांतःकरणनाशेपिनित्यस्वरूपोपाधेःसर्वदासत्त्वान्नांतःकरणनाशेनजीवनाशः ॥ नवालक्ष्म्या
मुक्तानांचप्रतिबिंबत्वाभावइत्यर्थः ॥ तदुक्तंगीताभाष्ये ॥ नित्यश्चोपाधिःकश्चिदस्ति ॥ प्रतिपत्तौविमोक्षस्यनित्योपाध्यास्वरूप
या ॥ चिद्रूपयायुतोजीवःकेशवप्रतिबिंबकइति ॥ चतुर्थस्कंधतात्पर्येपि ॥ जीवोपाधिर्द्विधाप्रोक्तःस्वरूपंबाह्यमेवच ॥ बा
ह्योपाधिर्लयंयातिमुक्तावन्यस्यतुस्थितिरिति ॥ नचसोपाधिरनुपाधिश्चप्रतिबिंबोद्विधेयते ॥ जीवईशस्यानुपाधिरिंद्रचापो
यथारवेरितिभाष्यविरोधः ॥ तत्रजीवस्यानुपाधिप्रतिबिंबत्वोक्तेरितिवाच्यं ॥ गीताभाष्याद्युदाहृतप्रमाणबलेनतस्यमुक्तौबा
ह्योपाध्यभावविषयकत्वात् ॥ अतोनविरोधः ॥ अनित्यप्रतिबिंबस्योदाहरणमाह ॥ दर्पणादाविति ॥ १९७ ॥ दर्पणनाशे
नवा मुख्यनाशेनवा तत्संनिधिनाशेनवा तत्त्रयनाशेनवा नाशसंभवादित्यर्थः ॥ ननुदर्पणादौमुखप्रतिबिंबोनोत्पत्तिविनाश
वानुपादानाभावादित्यतआह ॥ दर्पणादीति ॥ १९८ ॥ तथाचदर्पणादेरेवमुखादिबिंबसन्निधानेनप्रतिबिंबात्मनापरिणाम
स्वीकारान्नदोषइत्यर्थः ॥ ननुदर्पणादेर्मुखादिप्रतिबिंबोपादानत्वंनयुक्तं॥स्पर्शवतोदर्पणस्यनिस्पर्शप्रतिबिंबोपादानत्वायोगात् ॥
अन्यथात्वगिंद्रियेणापिदर्पणग्रहवत्तद्गतप्रतिबिंबग्रहापत्तेरितिचेन्न ॥ दर्पणगतसूक्ष्मावयवानामेवप्रतिबिंबात्मनापरिणामसं
भवात् ॥ प्रतिबिंबस्यदर्पणेनात्यंतसल्लग्नत्वेनक्षीरमिश्रनीरादिवत्पृथग्ग्रहणाभावसंभवात् ॥ नन्वेवंदर्पणाद्युपाधिपरिणामरूप

---

१९६ नित्यानित्योपाधियुक्ताः ॥ स्वापेक्षयोत्तमोत्तमप्रतिबिंबाश्च ॥ १९७ दर्पणादौमुखादिप्रतिबिंबाअनित्याः ॥ १९८ दर्पणाद्युपाध्युपादानकाः ॥

त्वेप्रतिबिंबस्यबिंबसन्निधिनाशेनतन्नाशोनस्यात् ॥ समवायिकारणनाशेनवाऽसमवायिकारणनाशेनवाकार्यनाशोदृष्टः ॥ न चात्रसमवायिकारणस्यदर्पणादेरसमवायिकारणस्यतदवयवसंयोगस्यचनाशोस्ति ॥ अतोनदर्पणपरिणामःप्रतिबिंबइतिचेन्न ॥ क्वचित्समवायिकारणनाशेनकार्यनाशः क्वचिदसमवायिकारणनाशेनकार्यनाशः क्वचिदुभयनाशेनयथाकार्यनाशोंगीक्रियते ॥ तथानिमित्तकारणनाशेनापिकार्यनाशस्यापेक्षाबुद्धिनाशजन्यद्वित्वनाशवत्पाकजस्थलेऽग्निसंयोगजन्यघटादिरूपादिनाशवच्चांगीतकर्तव्यत्वात् ॥ नचैवंबिंबसन्निधिनाशेनप्रतिबिंबनाशोस्तु ॥ पुनस्तद्विपरीताकारोदर्पणस्यकथमितिवाच्यं ॥ बिंबसन्निधिनाशवशादेवप्रतिबिंबगर्भतानाशपूर्वकंदर्पणस्यतद्विपरीतपरिणामसंभवात् ॥ यथाहिसुवर्णरजतादीनांमूषाग्निसंयोगेनद्रवावस्थानं तदपायेपुनर्घनीभावस्तथात्रापिसंभवात् ॥ तदुक्तंतत्वनिर्णयटीकायां बहुजीववादे ॥ यथाबिंबसन्निधिरादर्शपरिणतिहेतुरेवंतदपायोपिविपरीतपरिणतिहेतुः ॥ विपरीतपरिणतौचप्रतिबिंबगर्भतानश्यत्येवेति ॥ नन्वनित्यप्रतिबिंबस्यदर्पणाद्युपादानकत्वान्नपृथग्द्रव्यत्वेनपरिगणनंयुक्तमितिचेत्सत्यं ॥ दर्पणाद्युपादानकत्वेबहुवादिविप्रतिपत्तेस्तन्निरासायपृथगुक्तिरितिद्रष्टव्यं ॥ यद्वा ॥ दर्पणादिगतप्रकृतिसूक्ष्माणामेवप्रतिबिंबोपादानत्वमस्तु ॥ प्रतिबिंबस्यक्लृप्तद्रव्यानंतर्भावेपितमोवद्द्रव्यांतरत्वोपपत्तेरितिन्यायामृतोक्तेः ॥ अदृष्टानियमादित्यधिकरणेचंद्रिकायांतु दृश्यंतेचप्रतिध्वनिप्रतिसूर्यकच्छायापुरुषेंद्रचापादीनि भिन्नोपाधिरहितान्यपिप्रतिबिंबानीति प्रतिबिंबादीनांस्वरूपातिरेकेणभिन्नोपाधिनियमोनास्तीत्युक्तं ॥ तच्चदर्पणादिस्थूलोपाधिव्यतिरिक्तस्थलेद्रष्टव्यं ॥ अन्यथातत्वनिर्णयटीकाविरोधप्रसंगात् ॥ ननुपरमात्मनखेषुरमाब्रह्मादिप्रतिबिंबानामुपादानाभावइतिचेन्न ॥ नखानांनानारूपत्वात् ॥ तच्चनानारूपत्वंरमाब्रह्मादिबिंबसन्निधिवशादभिव्यज्यते ॥ यद्वातत्संबद्धप्रकृतिसूक्ष्माणामुपादानत्वसंभवात् ॥ मायावादिनस्तु ॥ बिंबप्रतिबिंबयोरैक्यमेव नतुभेदः ॥ येनदर्पणस्यैवप्रतिमुखात्मनापरिणामःस्यात् ॥ तथाहि ॥ बहिःस्थितोदेवदत्तोयल्लक्षणस्तल्लक्षणएववेश्मांतःप्रविष्टोपिप्रतीयतेयथा तथाबहिःस्थितंमुखंदर्पणतलेप्रविशति अन्यथाप्रतिमुखेबिंबलांछितत्वानुपपत्तेरित्याहुः ॥ तान्निराकरोति ॥ **नतुबिंबात्मकाइति** ॥ १९९ ॥ उभयोःप्रत्यक्षेणैव भेददर्शनेनाभेदायोगात् ॥ किंमुखंदेवदत्तशरीरंपरित्यज्यदर्पणंप्रविशत्युततत्रैवस्थित्वा ॥ नाद्यः ॥ देवदत्तशरीरस्यनिर्मुखत्वापत्तेः ॥ प्रत्यक्षविरोधाच्च ॥ नापितत्रैवस्थित्वाप्रविशति ॥ अतिप्रसंगापत्तेः ॥ देवदत्तशरीरस्यगेहेप्रवेशस्तुयुज्यतएव ॥ तस्यबहिरभावात् ॥ दूषणांतरंचाह ॥ **आभिमुख्यादीति** ॥ २०० ॥ तथाचप्रत्यक्त्वपराक्त्वरूपविरुद्धधर्माधिकरणत्वान्नानयोरभेदइतिभावः ॥ आदिशब्देनन्यूनाधिकपरिमाणत्वोपाधिसंयुक्तत्वासंयुक्तत्वत्वगादिग्राह्यत्वाग्राह्यत्वादयोग्राह्याः ॥ एवंदर्पणगतानांपर्वतकस्तूरीगुडाग्निप्रतिबिंबानांचलत्वाचलत्वसुरभित्वासुरभित्वमाधुर्यामाधुर्यदाहकत्वादाहकत्वादयोविरुद्धधर्माऊह्याः ॥ एवमेवचंद्रिकान्यायामृतयोरुक्तेः ॥ तार्किकास्तुमुखसन्निधिवशात्तस्यैवदर्पणआरोपइत्याहुः ॥ तन्न ॥ इदंमुखंदर्पणेनास्तीतिबाधज्ञानदशायामपिदर्पणेमुखप्रतीतेर्जायमानत्वात् ॥ प्रतिबिंबांतरमाह ॥ **छायेति** ॥ २०१ ॥ उपलक्षणमेतत् ॥ परिवेषेंद्रचापप्रतिसूर्यप्रतिध्वनिस्फटिकलौहित्यादयोद्रष्टव्याः ॥ तदुक्तंन्यायामृतेबिंबप्रतिबिंबैक्यभंगे ॥ प्रतिबिंबमपि

१९९ नतुबिंबात्मकाः ॥ २०० आभिमुख्यादिविरुद्धधर्माधिकरणत्वात् ॥ २०१ छायापिप्रतिबिंबभूतैव ॥

हिच्छायाविशेषइति ॥ ननुछायायाउत्पत्तिमत्त्वउपादानानुपपत्तिः ॥ प्रतिबिंबवद्दर्पणाद्युपाधेरभावादित्यतआह ॥ आलो
केति ॥ २०२ ॥ तदन्वयव्यतिरेकानुविधानादित्यर्थः ॥ यद्वोपादानांतरंवातत्रकल्प्यं ॥ अन्यथाकार्यानुपपत्तेः ॥ तदुक्तं
न्यायामृते ॥ छायादाविवकारणस्यकल्प्यत्वात् ॥ कॢप्तद्रव्यानंतर्भावेतमोवद्द्रव्यांतरत्वसंभवाच्चेति ॥ चंद्रिकायामपि ॥ प्रति
बिंबस्योपादानंत्वंधकारपरिवेषेंद्रचापादाविवास्पार्शनंकिंचिद्द्रव्यंकार्यबलात्कल्प्यं ॥ नह्यस्माकंतार्किकाणामिवनवैवद्रव्याणी
ति ॥ ननुछायायाअचेतनत्वात्कथंछायाविष्णोरमातस्याइत्यादौचेतनेछायाशब्दप्रयोगइत्यतआह ॥ क्वचिदिति ॥ २०३ ॥
इतिप्रतिबिंबप्रकरणं ॥ ॥ इतिश्रीपद्मनाभसूरिविरचितेपदार्थसंग्रहव्याख्यानेमध्वसिद्धांतसारेद्रव्यनिरूपणं समाप्तं ॥ ॥ ७ ७
॥ ७ ॥ ॐ द्रव्याण्युक्तानि ॥ गुणानिरूप्यंते ॥ तत्रादौगुणसामान्यलक्षणमाह ॥ **दोषभिन्नत्वमिति** ॥ २०४ ॥
नचैवंगुणभिन्नत्वंदोषत्वमितिपरस्परसापेक्षत्वादन्योन्याश्रयइतिवाच्यं ॥ दुष्टव्यवहारजनकत्वंदोषत्वमित्यंगीकारादितिभावः ।
प्रथमोद्दिष्टस्यरूपस्यलक्षणमाह ॥ **शुक्लादीति** ॥ २०५ ॥ तद्विभजति ॥ **तच्चेति** ॥ २०६ ॥ नित्यानांरूपाणामाश्रयमाह
॥ **तत्रेति** ॥ २०७ ॥ तदुक्तंछांदोग्यभाष्ये ॥ ऋक्प्रोक्तोलोहिताकारोवासुदेवःपरःपुमान् ॥ सएवसूर्येलौहित्येप्राच्यरश्मिषु

---

२०२ नत्वन्याआलोकोपादानभूता ॥ २०३ क्वचिच्चेतनेपि छायाशब्दप्रयोगः प्रतिबिंबत्वसाम्याद्भवतीति ॥ इतिश्रीमत्पद्मनाभसूरिविरचिते पदार्थसं
ग्रहेद्रव्यनिरूपणंसमाप्तं ॥ २०४ दोषभिन्नत्वंगुणत्वं ॥ २०५ शुक्लादिव्यवहारहेतुर्गुणोरूपं ॥ २०६ तच्चशुक्लनीलपीतरक्तहरितकपिलचित्रभेदा
त्सप्तविधं ॥ पुनर्द्विविधं ॥ नित्यमनित्यंच ॥ पुनर्द्विविधं ॥ उद्भूतमनुद्भूतंच ॥ २०७ तत्रशुक्लनीलपीतरक्तादिसप्तान्यपिनित्यानिरूपाणिपरमात्मनः ॥

संस्थितः ॥ संकर्षणःशुक्लवर्णोयजुर्वेदोदितःप्रभुः ॥ शुक्लवर्णेचसूर्यस्यदक्षरश्मिषुसंस्थितः ॥ प्रद्युम्नःश्यामवर्णस्तुसामवेदोदितः
प्रभुः ॥ प्रत्यग्रश्मिषुसूर्यस्यश्यामवर्णेपिचस्थितः ॥ अनिरुद्धःसुनीलश्चइतिहासपुराणयोः ॥ अथर्ववेदेचोक्तःसन्नुदग्रश्मिषुसं
स्थितः ॥ सुकृष्णेसूर्यरूपेचमध्येनारायणःप्रभुः ॥ ऊर्ध्वरश्मिषुसंस्थश्चप्रोद्यदादित्यसप्रभइति ॥ नारायणाख्यंसौषुम्नंमध्यस्थं
रक्तवर्णकं ॥ शुक्लंतुवासुदेवाख्यंनादिन्यामग्रतःस्थितं ॥ पिंगलाख्यंपिंगलंचरूपंसंकर्षणाभिधं ॥ पश्चिमेवज्रिकायांचपीतं
प्रद्युम्ननामकं ॥ इडायामनिरुद्धाख्यंनीलंरूपंव्यवस्थितमिति ॥ बृहद्भाष्येपि ॥ शुक्लंतुवासुदेवाख्यमनिरुद्धंसुनीलकं ॥
संकर्षणंपिंगलंचप्रद्युम्नंहरितंमतं ॥ नारायणंलोहितंस्यात्पंचरूपाण्यजेहराविति ॥ तंत्रसारेपि ॥ युक्ताःप्रदीपवर्णाश्चस
र्वाभरणभूषिताः ॥ तादृग्रूपाश्चपंचाशज्ज्ञानमुद्राभयोद्यताः ॥ मूलरूपसवर्णानिकृष्णवर्णाशिखोच्यते ॥ चतुर्विंशन्मूर्तय
श्चमूलरूपसवर्णकाः ॥ उद्यदादित्यवर्णाश्चज्ञानमुद्राभयोद्यताः॥ वराहस्तु ॥ श्यामःसुदर्शनदराभयसद्धरेतः ॥ हंसस्तु ॥ अंत्य
स्तुरक्तवर्णोवाध्येयोविष्णुःसनातनः ॥ विद्युद्वर्णोथवाध्येयः ॥ दधिवामनः ॥ ध्यायेत्सुशुक्लमरविंददलायताक्षं ॥ परशुरामः॥
अंगारवर्णमभितोंडबहिःप्रभाभिर्व्याप्तं ॥ कृष्णः ॥ ध्यायेद्धरिन्मणिनिभं ॥ वेदव्यासः ॥ विज्ञानरोचिःपरिपूरितांतर्बाह्यांड
कोशंहरितोपलाभं ॥ हयग्रीवः ॥ वंदेतुरंगवदनंशशिबिंबसंस्थंचंद्रावदातं ॥ कपिलदत्तात्रेयौ ॥ प्रोद्यद्दिवाकरसमानतनुं ॥
धन्वंतरिः ॥ चंद्रौघकांतिं ॥ हरिर्नीलःसितःपिंगोलोहितश्चात्रकेशवः ॥ प्रद्युम्नादिस्वरूपेणध्येयःसिद्धिमभीप्सतेति ॥ ऋ
ग्भाष्येपि ॥ हितत्वाद्रमणीयत्वाद्धिरण्यंवर्णतोपिच ॥ हिरण्याक्षोनरसिंहात्मनासवार्याणियद्धरणीयंसुवित्तं ॥ दधानोसौस्व

र्णवर्णश्चतेनस्वर्णपाणिःस्वर्णहस्तश्चदेवइति ॥ सूत्रेभाष्येच ॥ रूपोपन्यासाच्च ॥ यदापश्यःपश्यतेरुक्मवर्णं ॥ तस्यहैतस्यपरम
स्यनारायणस्यचत्वारिरूपाणिशुक्लंरक्तंरौक्मंकृष्णमिति ॥ शुद्धस्फटिकसंकाशंवासुदेवंनिरंजनमिति ॥ चित्ररूपमपिपरमात्मन
श्छांदोग्योपनिषदि तद्भाष्येचोक्तं ॥ श्यामाच्छबलंप्रपद्येशबलाच्छ्यामंप्रपद्यइति ॥ श्यामोहृदिस्थितोविष्णुःशबलोविश्व
रूपवानिति ॥ षष्ठस्कंधतात्पर्येपि ॥ नानावर्णोहरिस्त्वेकोबहुशीर्षशिरोरुपात् ॥ आसील्लयेतदन्यत्तुसूक्ष्मरूपंश्रियंविनेति ॥
निर्णयेपिवेदव्यासस्यचित्ररूपमुक्तं ॥ शुभमरकतवर्णोरक्तपादाब्जनेत्राधरकरनखराग्रश्चक्रशंखाब्जरेखः ॥ रविकरवरगौरंचर्मचै
णंवसानस्तटिदमलजटासंदीप्तचूडंदधानइति ॥ अत्रैकस्मिन्नेवशरीरेरूपत्रयोक्तेः ॥ गीतायांविश्वरूपाध्यायेपि ॥ नानाविधा
निदिव्यानिनानावर्णाकृतीनिचेति ॥ नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालनेत्रं ॥ द्यावापृथिव्योरिदमंतरंहिव्याप्तं
त्वयैकेनदिशश्चसर्वाइति ॥ अत्रैकस्यैवविश्वरूपस्यनानावर्णत्वमुच्यतइति ॥ ननुचित्ररूपसद्भावेमानाभावः ॥ नचचित्रःपटइ
तिप्रतीतिरेवमानमितिवाच्यं ॥ अवयवरूपाणामेवपटेभानोपपत्तेरितिचेन्न ॥ चित्रपटेयदिचित्ररूपंनस्यात्तर्हितस्याप्रत्यक्षत्वाप
त्तेः ॥ अन्यगतरूपस्यान्यत्रप्रत्यक्षत्वाप्रयोजकत्वात् ॥ नचावयवावयविनोरभेदात्प्रत्यक्षत्वोपपत्तिरितिवाच्यं ॥ रूपिद्रव्यस्य
नीरूपद्रव्येणाभेदानुपपत्तेः ॥ नचैकस्मिन्नेवपटेनानारूपाणिसंत्वितिवाच्यं ॥ संयोगवद्रूपस्यप्रदेशवृत्तित्वाभावात् ॥ विरोधे
नैकत्रनानारूपाणामवस्थानस्यतत्तदवयवाभेदस्यचायोगात् ॥ अतश्चित्ररूपसिद्धिः ॥ तदुक्तंजिज्ञासाधिकरणसुधायां ॥ एक
मेवहिचित्रंनामरूपमाश्रयंव्याप्यवर्तीतिपदार्थविदइति ॥ लक्ष्म्यामपिरूपाण्यतिदिशति ॥ तद्वल्लक्ष्म्याइति ॥ २०८ ॥
तदुक्तंछांदोग्यभाष्ये ॥ चित्सुवर्णमयंदिव्यंलक्ष्मीस्तत्तत्स्वरूपिणीति ॥ वैकुंठलोकगतनानावर्णनवरत्नात्मकत्वान्नानावर्णत्वंल
क्ष्म्याः ॥ तंत्रसारेपि ॥ कौशेयपीतवसनामरविंदनेत्रांपद्मद्वयाभयवरोद्यतपद्महस्तां ॥ उद्यच्छतार्कसदृशींपरमांकसंस्थांध्याये
द्विधीशनुतपादयुगांजनित्रीमिति ॥ दुर्गायाअपि ॥ वर्णःश्यामोविशेषोत्रतांबूलंनीलमुत्पलमिति ॥ तथानिर्णयेपिसत्यभामा
यारूपमुक्तं॥ अनंतशक्तिःसहसत्यभामयाविवेशरंतुंप्रिययाखिलेश्वरः॥ तयाच्युतोसौकनकावदातयासुकुंकुमास्निग्धपिशंगवास
सेति ॥ एवंजीवानामपिनानावर्णाःस्वरूपभूताःसंत्येव ॥ तदुक्तंच्छांदोग्यभाष्ये ॥ जीववर्णोजीवगतोलोहितश्चक्षुषिस्थितइ
ति ॥ द्वितीयस्कंधभागवतेपि ॥ श्यामावदाताःशतपत्रलोचनाःपिशंगवस्त्राःसुरुचःसुपेशसः ॥ सर्वेचतुर्बाहवउन्मिषन्मणि
प्रवेकनिष्काभरणाःसुवर्चसः॥ प्रवालवैडूर्यमृणालवर्चसांपरिस्फुरत्कुंडलमौलिमालिनां॥ भ्राजिष्णुभिर्यःपरितोविराजतेलसद्वि
मानावलिभिर्महात्मनामिति ॥ एतेचभागवतश्लोकाअनुव्याख्यानच्छांदोग्यभाष्यादौमुक्तपरत्वेनैवोदाहृताः ॥ मध्वविजये
पि ॥ अरुणाश्मवर्णतनवस्तनवःशुभहारसन्निभरुचोत्रपराः ॥ हरिनीलनीलरुचयोप्यपराःप्रकटीभवंतिविविधाभरणाइति ॥
मूलप्रकृतेर्नित्यरूपाण्याह॥ प्रकृतेरिति ॥२०९॥ अजामेकांलोहितशुक्लकृष्णामितिश्रुतेः॥ नन्वेवंरूपादिमत्त्वाच्चविपर्ययोदर्श
नादितिसूत्रकारेणोक्तेः परमात्मादीनामनित्यत्वंस्यादितिचेन्न॥ भौतिकरूपस्यैवविनाशव्याप्तत्वेनाभौतिकस्यतदभावात्॥ परमा

२०८ तद्वल्लक्ष्म्याअपिरूपाणि ॥ सर्वाण्यप्युद्भूतरूपाणिनित्यानिसर्वजीवानां ॥ २०९ प्रकृतेः शुक्लरक्तनीलानिनित्यानित्रीणि ॥

त्मादीनांचाप्राकृतरूपत्वात् ॥ तदुक्तंवैशेषिकाधिकरणानुव्याख्याने ॥ भौतिकंत्वेवरूपादिव्याप्तंनाशेननोमतइति ॥ तत्सुधाया मपि ॥ भौतिकमेवरूपंविनाशव्याप्तमिति ॥ अनित्यरूपस्योदाहरणमाह ॥ तद्वद्गुणत्रयस्यापीतिमहत्तत्वस्येति ॥ २१० ॥ तदुक्तंतृतीयस्कंधभागवते ॥ दैवात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरःपुमान् ॥ आधत्तवीर्यंसासूतमहत्तत्वंहिरण्मयमिति ॥ भूते ष्विति ॥ २११ ॥ आकाशोनीलिमोदेतिनप्रदेशःकथंचनेतिन्यायविवरणोक्तेर्भूताकाशस्यनीलरूपमित्यर्थः ॥ नचैवंभूताकाश स्यप्रत्यक्षत्वापत्तिरितिवाच्यं ॥ अनुद्भूतरूपवत्त्वेनाप्रत्यक्षत्वोपपत्तेः ॥ तदुक्तमनुव्याख्याने ॥ भूतमप्यसितंदिव्यदृष्टिगोचरमे वतु ॥ उत्पद्यतेऽव्याकृतंहिगगनंसाक्षिगोचरमिति ॥ पृथिव्यादौरूपाणांप्रत्यक्षसिद्धत्वान्नप्रमाणांतरापेक्षा ॥ नीलमाकाश तमसोरिति ॥ २१२ ॥ अत्रतमःशब्देनाविद्यापिविवक्षिता ॥ तस्यानीलरूपवत्त्वात् ॥ तदुक्तंतृतीयतात्पर्ये ॥ केवलस्तमसोयों शःसाविद्यापंचपर्विका ॥ जातातिकृष्णातदेहाद्दैत्यरक्षःपिशाचकाइति ॥ वासनाप्रतिबिंबयोरिति ॥ २१३ ॥ स्वाप्नानां वासनोपादानकपदार्थानांनानारूपवत्त्वंदर्पणादिगतप्रतिबिंबस्यचनानारूपवत्त्वंप्रत्यक्षसिद्धमितिभावः ॥ इतिरूपप्रकरणं

---

२१० तद्वद्गुणत्रयस्यापि ॥ महत्तत्वस्यहेमवद्रूपं ॥ अहंकारादौतुरूपवद्द्रव्यारब्धत्वाद्रूपंसंभावितं ॥ २११ भूतेषुतेजोजलपृथिवीष्वनित्या निरूपाण्युद्भूतानि ॥ आकाशेत्वनुद्भूतं ॥ तत्रपृथिव्यांसप्तविधं ॥ शुक्लंजले ॥ शुक्लभास्वरंतेजसि ॥ २१२ नीलमाकाशतमसोः ॥ २१३ स र्वाण्यपिरूपाणिवासनाप्रतिबिंबयोश्च ॥

॥ ७ ॥ ७ ॥ ७ ॥ इदानींरसंनिरूपयति ॥ **माधुर्यादीति** ॥ २१४ ॥ नित्यमधुररसस्याश्रयमाह ॥ **ईशलक्ष्म्योरिति** ॥ २१५ ॥ ईशस्यतावदधरामृतमस्ति ॥ तच्चमधुरमीशात्मकमेव ॥ नचेशस्याधरामृतमेवनास्तीतिवाच्यं ॥ दशमस्कंधभागवतविरोधप्रसंगात् ॥ तथाहि ॥ सकृदधरसुधांस्वांमोहिनींपाययित्वासुमनसइवसद्यःकस्त्यजेन्मांभवादृगिति ॥ रंध्रान्वेणोरधरसुधयापूरयन्गोपवृंदैरिति ॥ वीक्ष्यालकावृतमुखंतवकुंडलश्रीगंडस्थलाधरसुधंहसितावलोकमिति ॥ नचतदानीमेवकृष्णेनसृष्टमधरामृतं नतुतत्स्वरूपमितिवाच्यं ॥ लक्ष्मीसंभोगादौतदभावप्रसंगात् ॥ एवंछांदोग्योपनिषदि सर्वकर्मासर्वगंधःसर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरइतिद्विवारमुक्तं ॥ तत्रैकत्रसर्वगंधरसाद्यात्मकत्वमपरत्रसर्वगंधरसाद्यनुभववक्त्वंविवक्षितं ॥ तदुक्तं ॥ छांदोग्यभाष्ये ॥ एकत्रसर्वगंधादिनाचिदानंदाद्यात्मकगंधादिरूपत्वमित्यादि ॥ गीताभाष्येपि ॥ सर्वकर्मासर्वगंधः सर्वरसइत्युदाहृतं ॥ लक्ष्म्याअप्यरण्याख्यसुधासमुद्रात्मकत्वात्स्वरूपभूतोमधुररसःसिद्धएव ॥ केचित्त्वीशलक्ष्म्योःषड्रसाः संत्येव ॥ कामरूपत्वादचिंत्यशक्तित्वाच्चेत्याहुः ॥ मुक्तानामप्यधरामृतवत्त्वात्स्वरूपरसोस्त्येव ॥ तदुक्तंमध्वविजये ॥ उपरम्यतेनतरुणेनचिरंमधुराधरामृतरसंपिबतेति ॥ एवंमूलप्रकृतावपिनित्यारसाद्रष्टव्याः ॥ अनित्यरसस्याश्रयमाह ॥ **पृथिव्यामित्यादिना** ॥ २१६ ॥ पृथिव्यांरसाःप्रत्यक्षसिद्धाः ॥ वासनामयस्वाप्नपदार्थेष्वप्यनुभवसिद्धाः ॥ **जलेत्विति** ॥ २१७॥

---

२१४ माधुर्यादिव्यवहारहेतुर्गुणोरसः ॥ सचषड्विधः ॥ मधुराम्ललवणकटुकषायतिक्तभेदात् ॥ रूपवन्नित्यानित्यविभागवान् ॥ २१५ ईशलक्ष्म्योर्मधुररसः ॥ २१६ पृथिव्यांवासनायांचषड्रसाः ॥ २१७ जलेतुमधुरएव ॥

ननुलवणसमुद्रेलवणरसस्यैवानुभवसिद्धत्वात्कथंजलेमधुरएवेतिचेन्न ॥ स्वतएवमधुररसस्यसमुद्रस्यागस्त्यपानेनपुनर्मूत्रात्मना तद्देहान्निस्सृतत्वाल्लवणरसऔपाधिकएव ॥ ननुचित्ररूपवच्चित्ररसोप्यंगीकार्यः ॥ दूरतरतोपास्तंरसोयोष्टमइतिनरसिंहनखस्तु तावष्टमरसस्यैवनिषेधादितिचेन्न ॥ सप्तमरसवदष्टमरसस्याप्यलीकत्वेनैवोक्तत्वात् ॥ सप्तमरसेतुमंदानांसंदेहःस्यादतोनिःसंदिग्धस्थलमुक्तमाचार्यैः ॥ वस्तुतस्तुसप्तमरसोप्यप्रामाणिकः ॥ तदुक्तंवैशेषिकाधिकरणानुव्याख्याने ॥ अन्यथासप्तमरसभावोप्यनुमयापतेदिति ॥ बौद्धाधिकरणेपि ॥ यद्येवंसप्तमरसान्मधुरादिवपीनता ॥ भवेज्जनस्यमार्जारशृंगंगोरिवघातुकमिति ॥ शास्त्रयोनित्वाधिकरणानुव्याख्यानेपि ॥ वस्तुत्वात्तुरगःश्रृंगीपुष्पवत्खंसुतैर्युता॥चित्रिणीचरसःषष्ठोरसत्वात्सोत्तरोभवेदिति ॥ इतिरसप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ गंधंनिरूपयति ॥ **सुरभ्यादीति** ॥ २१८ ॥ नित्यसुगंधस्याश्रयमाह ॥ **ईशेति** ॥ २१९ ॥ तदुक्तंबृहद्भाष्ये ॥ अपार्थिवोहरेर्गंधोनतृप्तिश्चाप्यबात्मिका ॥ सर्वाधारसुगंधत्वात्पृथिवीमयईरितइति ॥ भाष्यगीताभाष्यादावपि ॥ सद्देहःसुखगंधश्चज्ञानभाःसत्पराक्रमइति ॥ छांदोग्यभाष्येपि ॥ सर्वगंधादिरूपश्चभोक्ताचैषांसदैवहि ॥ एकत्रसर्वगंधादिनाचिदानंदात्मकसर्वगंधादिरूपत्वमुच्यतइति ॥ दशमतात्पर्येपि ॥ अनंतनामापरमःसुसुखज्ञानरूपवान् ॥ तानिचास्यसुदिव्यानिसुगंधानिसुभांतिचेति ॥ लक्ष्म्याअपिस्वरूपभूतःसुगंधः ॥ सुगंधात्मकामृतसमुद्ररूपत्वात् ॥ मुक्तानामपिस्वरूपभूतःसुगंधोस्त्येव ॥ तदुक्तंबृहद्भाष्ये ॥ अनिंद्रियाअनाहाराअनिष्पंदाःसुगंधिनइति ॥ मध्वविजयेपि ॥ सुखसंविदात्मकतयावपुषां

२१८ सुरभ्यादिव्यवहारहेतुर्गुणोगंधः ॥ सचद्विविधः सुरभिरसुरभिश्चेति ॥ पूर्ववन्नित्यानित्यविभागवान् ॥ २१९ ईशलक्ष्मीमुक्तानांसुगंधएव ॥

सुरभित्वमेवबहिरंतरपीति ॥ नन्वंधेतमसिदैत्यानांदुर्गंधानुभवात्तत्रकथंदुर्गंधइतिचेन्न ॥ दैत्यानांदुर्गंधात्मकत्वेनतदनुभवसंभवात् ॥ एकेतुजडप्रकृत्यात्मकएवदुर्गंधः तदनुभवएवतेषामित्याहुः ॥ नचांधेतमसिदुर्गंधएवनास्तीतिवाच्यं ॥ पूयासृङ्मूत्रविष्ठाकृमिकुलकलिलेतत्क्षणक्षिप्तशक्तीतिपंचकष्टाख्येतमसिदुर्गंधद्रव्योक्तेः ॥ तथाऽनित्यनरकेदुर्गंधस्यसत्त्वेनतदपेक्षयातिनिकृष्टेतमस्यतिदुर्गंधस्यावश्यकत्वात् ॥ अनित्यनरकेदुर्गंधश्चनिर्णयएवोक्तः ॥ दुर्गंधेनसकृच्छ्रेणतमसाप्रावृतेनच ॥ गत्वैवकियतींभूमिंतद्दुर्गंधासहोनृपः ॥ इच्छन्निवर्तनंतत्रस्वानांवाचइवाश्रृणोदिति ॥ अनित्यगंधस्याश्रयमाह ॥ **पृथिव्यामिति** ॥ २२० ॥ पृथिव्यांप्रत्यक्षसिद्धः ॥ वासनायांतु स्वाप्नपदार्थेषूभयविधगंधानुभवात् ॥ इतिगंधनिरूपणं ॥ ७ ॥ ७ ॥ ७ ॥ स्पर्शंनिरूपयति ॥ **शीतादीति** ॥ २२१ ॥ नित्यस्पर्शस्याश्रयमाह ॥ **तत्रहराविति** ॥ २२२ ॥ परमात्मनोलक्ष्म्यालिंगन गोपिकालिंगन कंसकेशाभिमर्शन कालियमर्दन पादप्रहार मुष्टिप्रहारादिभिः स्पर्शावगतेः ॥ गजेंद्रोभगवत्स्पर्शान्मोचितोऽज्ञानबंधनादितिभागवतोक्तेः ॥ रामकरस्पर्शेनलक्ष्मणस्यश्रमपरिहारोक्तेर्निर्णये ॥ दैत्यान्प्रत्युष्णस्पर्शस्यपूर्वमुक्तेः ॥ मुक्तानामप्यालिंगनादिनास्पर्शःसिद्धः ॥ अनित्योष्णस्पर्शस्याश्रयमाह ॥ **उष्णंतेजसीत्यादिना** ॥ २२३ ॥ कालकूटविषउष्णस्पर्शश्चनिर्णयउक्तः ॥ तदाजगद्ग्रासिविषंसमुत्थितंत्वदाज्ञयावायुरधात्करेनिजे ॥ कलेःस्वरूपंतदतीवदुःसहंवराद्विधातुःसकलैश्चदुःस्पृशमिति ॥ अ

२२० पृथिव्यांवासनायांचद्विविधोपि ॥ २२१ शीतादिव्यवहारहेतुर्गुणःस्पर्शः ॥ सत्रिविधः शीतोष्णानुष्णाशीतस्पर्शभेदात् ॥ पूर्वोक्तविभागयुक्तः ॥ २२२ तत्रहरौलक्ष्म्यांचत्रिविधोपिनित्यश्च ॥ शीतंतेजसि ॥ २२३ उष्णंतेजसिकालकूटविषेऽपरोक्षज्ञानेच ॥

ष्टमस्कंधभागवतेपि ॥ निर्मथ्यमानादुदधेरभूद्विषंमहोल्बणंहालहलाह्वमग्रतः ॥ तदुग्रवेगंदिशिदिश्युपर्यधोविसर्पदुत्सर्पद
सह्यवीर्यं ॥ भीताःप्रजादुद्रुवुरंगसेश्वराअरक्ष्यमाणाःशरणंसदाशिवं ॥ देवदेवमहादेवभूतात्मन्भूतभावन ॥ त्राहिनःशरणापन्नां
स्त्रैलोक्यदहनाद्विषादिति ॥ तथा तक्षकविषस्यवृक्षभस्मीभावजनकत्वमुक्तमादिपर्वणिश्रीमन्महाभारते ॥ एवमुक्तःसनागेंद्रः
काश्यपेनमहात्मना ॥ अदशद्वृक्षमभ्येत्यन्यग्रोधंपन्नगोत्तमः ॥ सवृक्षस्तेनदष्टस्तुपन्नगेनमहात्मना ॥ आशीविषविषोपेतःप्रज
ज्वालसमंततः ॥ भस्मीभूतंततोवृक्षंपन्नगेंद्रस्यतेजसा ॥ भस्मसर्वंसमाहृत्यकाश्यपोवाक्यमब्रवीत् ॥ विद्याबलंपन्नगेंद्रपश्यमे
स्मिन्वनस्पतौ ॥ अहंसंजीवयाम्येनंपश्यतस्तेभुजंगम ॥ ततःसभगवान्विद्वान्काश्यपोद्विजसत्तमः ॥ भस्मराशीकृतंवृक्षंविद्यया
समजीवयदित्यादि ॥ अपरोक्षज्ञानस्याप्युष्णस्पर्शोंगीकर्तव्यः ॥ तद्यथैषीकातूलमग्नौप्रोतंप्रदूयतएवंहैवास्यपाप्मनःसर्वेप्रदूयं
तइतिश्रुतेः ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिगीतोक्तेः ॥ प्रथमस्कंधतात्पर्येपि॥प्रकृतिंस्वात्मसंश्लिष्टांगुणान्सत्वादि
कानपि ॥ कर्माणिसूक्ष्मदेहंचजायमानाहरेर्द्दशिः ॥ दहेत्तथापिसादग्धेंधनवच्चपुनःपुनः ॥ यावदारब्धकर्मस्यादाविर्वापितिरो
व्रजेदिति ॥ छांदोग्योपनिषद्यपि॥ पौत्रायणरैक्वयोरपरोक्षज्ञानप्रकाशस्यबहिर्निर्गतस्यदाहकत्वभयाद्धंसानांपरस्परंवचनमुदाहृ
तं ॥ होहोयिभल्लाक्षभाल्लाक्ष जानश्रुतेःपौत्रायणस्यसमंदिवाज्योतिरातततंतन्माप्रसांक्षीस्तत्वामाप्रधांक्षीरिति ॥ तमुहपरःप्रत्युवा
च ॥ कम्बरएनमेतत्संतंसयुग्वानमिवरैक्वमात्थेति ॥ नचैतेऔपचारिकप्रयोगाइतिवाच्यं ॥ बहुप्रमाणबाधापेक्षयोष्णस्पर्शक
ल्पनस्यलघुत्वात् ॥ एवंशोकादेरप्युष्णस्पर्शः ॥ शरीरशोषकत्वदर्शनात् ॥ एवमृषिशापेनवेनस्यभस्मीभावः वरेणभस्मासुरकर

स्पर्शेनभस्मीभावश्च तेषामपरोक्षज्ञानसामर्थ्येनतद्बाङ्गिस्सृताग्निरूपेणवाद्रष्टव्यः ॥ इतिस्पर्शप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥
संख्यांनिरूपयति ॥ एकत्वादीति ॥ २२४ ॥ एकत्ववद्वित्वादिकमपिननित्यानित्यविभागयुक्तमित्याह ॥ द्वित्वत्रित्वा
दिकंचेति ॥ २२५ ॥ अयंघटएकोयंपटएकऽआहत्यघटपटौद्वावितीच्छापूर्वकबुद्धिजन्यत्वाद्वित्वादेः ॥ तन्नाशेतन्नाशादित्य
र्थः ॥ तदुक्तंवैशेषिकाधिकरणसुधायां ॥ अनेकत्वसंख्याऽनेकाश्रिता ॥ साचापेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनीति ॥ द्वि
त्वादिकंसंयोगादिवन्नैकैकाधिकरणविश्रांतं ॥ किंत्वनेकाधिकरणकं ॥ घटपटोभयवृत्तिद्वित्वमुभयानुगतमेकमेवेतियावत् ॥ न
चैवंभिन्नाश्चभिन्नधर्माश्चेतिप्रमाणविरोधइतिवाच्यं ॥ तस्यसमुदायव्यतिरिक्तधर्मविषयत्वात् ॥ तदुक्तंवैशेषिकाधिकरणानु
व्याख्याने ॥ नसर्वधर्मएकोस्तिसमुदायस्तुभिन्नगइति ॥ भिन्नगोनेकाश्रितइतिसुधा ॥ नचैवमीश्वरघटोभयवृत्तिद्वित्वस्यजन्य
त्वउपादानाभावइतिवाच्यं ॥ घटस्यैवोपादानत्वात् ॥ नचोपादेयस्योपादानातिरिक्तवृत्तित्वाभावादीश्वरेद्वित्वाभावप्रसं
गइतिवाच्यं ॥ दीपोपादानकस्याप्यालोकगुणस्यभूतलादिवृत्तित्ववदुपपत्तेः ॥ तंत्वाद्युपादानकस्यापिपटादेरभेदसंबंधेनतं
तुवृत्तित्वेपिसंबंधांतरेणभूतलादिवृत्तित्ववदुपपत्तेः ॥ नचैवंपरमात्मरूपयोर्लक्ष्मीपरमात्मनोर्जीवेशयोरीशाव्याकृताकाशयोर्द्वि
त्वंनस्यात्तेषांनिर्विकारत्वादितिवाच्यं ॥ नित्यगतानांद्वित्वानामप्यनन्यगत्याऽचिंत्येश्वरशक्त्यानित्यद्रव्यविकारत्वस्यवक्तव्य

२२४ एकत्वादिव्यवहारहेतुस्संख्या ॥ एकत्वंद्विविधं ॥ नित्यमनित्यंचेति ॥ नित्यगतंनित्यं ॥ अनित्यगतमनित्यं ॥ २२५ द्वित्वत्रित्वादिकं चसर्वत्रापेक्षाबुद्धिजन्यमनित्यमेव ॥

त्वात् ॥ अविकारश्रुतेश्चद्वित्वातिरिक्तविषयत्वोपपत्तेः ॥ यद्वानित्यद्रव्यगतानांद्वित्वत्रित्वादीनांनित्यत्वमेवास्तु ॥ अपेक्षाबुद्धेश्चद्वित्वाभिव्यंजकत्वमेवनतुतज्जनकत्वं ॥ तदुक्तमुपासनापादीयसुधायां ॥ दशत्वादिसंख्याखल्वपेक्षाबुद्धिजन्यातद्व्यंग्यावेति ॥ ननुजीवेश्वरद्वित्वस्यनित्यत्वेतत्किंजीवेश्वराभ्यांभिन्नंभिन्नाभिन्नमभिन्नंवा ॥ नाद्यः ॥ यावद्वस्तुनभेदवदितितत्वविवेकविरोधात् ॥ नित्याधर्मास्तदीयास्तुसर्वेस्मान्नैवभेदिनइत्यनुव्याख्यानविरोधप्रसंगाच्च ॥ नद्वितीयः ॥ खंडितेभेदऐक्यंचेत्युक्तत्वेनयावद्वस्तुभाविनोभेदाभेदायोगात् ॥ नतृतीयः ॥ जीवेश्वरयोरभेदप्रसंगात् ॥ योयदत्यंताभिन्नाभिन्नःसतदत्यंताभिन्नइतिव्याप्तेः ॥ यथामूलरूपात्यंताभिन्नयोरामकृष्णयोरत्यंताभिन्नत्वमितिचेन्न ॥ जीवेश्वरद्वित्वस्यजीवेश्वराभ्यांभेदाभेदस्वीकारात् ॥ नचयावद्वस्तुभावित्वेनखंडितत्वाभावात्कथंभेदाभेदइतिवाच्यं ॥ खंडितेभेदऐक्यंचेतिवचनस्यद्वित्वातिरिक्तधर्मविषयत्वात् ॥ अन्यथाभगवतोद्वित्वादिसंख्याव्यतिरिक्ता ॥ नैवभेदिनइतिवैशेषिकाधिकरणसुधाविरोधप्रसंगात् ॥ तथाचयोयदत्यंताभिन्नाभिन्नइतिव्याप्तेरत्यंताभेदस्थलएवप्रवृत्तत्वेनप्रकृतेतदवकाशाभावात् ॥ नन्वेवमप्यस्मदाद्यपेक्षाबुद्धिजन्यद्वित्वस्यविनाशेपीश्वरापेक्षाबुद्धिजन्यघटाद्यनित्यगतद्वित्वस्यकथंविनाशः ॥ ईश्वरापेक्षाबुद्धेर्नित्यत्वात् ॥ नचतस्यापिनित्यत्वमेवास्त्विति वाच्यं ॥ आश्रयस्यघटादेरनित्यत्वेनतद्धर्मस्यनित्यत्वायोगादितिचेन्न ॥ अपेक्षाबुद्धेरिच्छापूर्वकंत्वेनेश्वरेच्छायाःशक्तिव्यक्तिस्वीकारेणघटादिद्वित्वस्यविनाशसंभवात् ॥ केचित्तु ॥ द्वित्वंनैकंकिंतुसंयोगादिवद्भिन्नभिन्नमेव ॥ घटःपटाद्वितीयः पटोघटाद्वितीय इतिप्रत्येकंविश्रांततयाप्रतीतेः ॥ घटसंयुक्तःपटःपटसंयुक्तोघटइतिवत् ॥ एवंचपरमात्मादिनित्यपदार्थगतद्वित्वानामनित्यगतद्वित्वानांचतत्तत्स्वरूपत्वमेव ॥ तेननित्यद्वित्वस्योपादानकल्पनाप्रयासः अविकारत्वेनश्रुत्यादिसिद्धस्यभगवतोविकारकल्पनादोषः परमात्मनाभेदाभेदपरिकल्पनादोषश्च परास्तइत्याहुः ॥ तदसारं ॥ द्वितीयत्वस्यद्वित्वातिरिक्तत्वात् ॥ चतुर्थत्वपंचमत्वादिवत्पूरणप्रत्ययार्थकत्वात् ॥ नहिपंचमइत्युक्तेपंचेत्यर्थः ॥ नवाचतुर्थइत्युक्तेचत्वारइत्यर्थः ॥ किंतुपंचमत्वंपंचत्वसंख्यान्यदेव ॥ तद्वदत्रापिद्वितीयइत्युक्तेद्वावितिनार्थः किंतुद्वित्वसंख्यापूरकइत्येवार्थः ॥ तथाचैकत्रद्वावितिप्रतीतेरभावाद्वित्वमुभयानुगतमेव ॥ अन्यथापूर्वोदाहृतानुव्याख्यानसुधाविरोधप्रसंगादित्यलं ॥ एकत्वादिपरार्धपर्यंतासंख्येतितार्किकाः ॥ तान्दूषयति ॥ एकत्वादीति ॥२२६॥ परार्धाख्यसंख्यातोधिकसंख्यायाःशास्त्रेसत्त्वादितिसुधोक्तेरित्यर्थः ॥ संख्यायाआश्रयमाह ॥ **सर्वेति** ॥ २२७ ॥ नचगुणकर्मादौनसंख्येतिवाच्यं ॥ चतुर्विंशतिगुणाः ॥ पंचकर्माणि ॥ सामान्यंद्विविधं ॥ अभावश्चतुर्विधइत्यादित्वदीयव्यवहारोनस्यात् ॥ नचद्रव्यगतैवसंख्यागुणादौभासतइतिवाच्यं ॥ द्रव्याणांचतुर्विंशतित्वादिनियमाभावात् ॥ गुणादिगतसंख्यैवद्रव्येभासतइत्यपिवक्तुंशक्यत्वाच्च ॥ नचगुणादौगुणांगीकारेद्रव्यत्वापत्तिरितिवाच्यं ॥ गुणादिव्यावृत्तलक्षणांतरस्यैवकर्तुमुचितत्वादितिसंक्षेपः ॥ इतिसंख्याप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ परिमाणस्वरूपमाह ॥ **अणुत्वादीति** ॥ २२८ ॥ तद्विभागमाह ॥ **तत्रिविधमिति** ॥ २२९ ॥ दीर्घत्वह्रस्वत्वयोर्मध्यमपरिमाणएवांतर्भावइ

२२६ एकत्वाद्यनंतपर्यंता ॥ २२७ सर्वपदार्थवृत्तिः ॥ २२८ अणुत्वादिहेतुर्गुणः परिमाणं ॥ २२९ तत्रिविधं ॥ अणुमहन्मध्यमंचेति ॥

त्यर्थः॥नित्यपरिमाणानामाश्रयमाह॥नित्यंत्रिविधमिति ॥२३०॥ त्रिविधमपिपरिमाणंपरमात्मनउक्तंतृतीयतात्पर्ये॥तथापि देशतस्तस्यपरिच्छेदोपिविद्यते ॥ परिच्छेदस्तथाव्याप्तिरेकरूपेपियुज्यते ॥ तथाचिंत्याद्भुतैश्वर्यादिति॥ वैशेषिकाधिकरणानुव्याख्यानेपि॥ तच्चब्रह्मपरंसाक्षात्सर्वानंत्ययुतंसदेति॥रामकृष्णादिरूपेषुमध्यमपरिमाणंप्रत्यक्षसिद्धं॥लक्ष्म्याःपरममहत्परिमाणंच लक्ष्मीप्रकरणएवोक्तं॥मध्यमपरिमाणंतुसीतारुक्मिण्यादिरूपेषुप्रत्यक्षसिद्धं॥नित्याणुपरिमाणस्याश्रयमाह॥नित्यमणुपरिमाणमिति ॥२३१॥ तदुक्तंमांडूकभाष्ये ॥ अणूनामपिजीवानांप्रकाशोव्यापकोभवेदिति ॥ सूत्रेभाष्येच ॥ उत्क्रांतिगत्यागतीनामिति ॥ हेतूनांसकाशादणुरेव ॥ अणुर्ह्येषआत्मा ॥ अणुमात्रोप्ययंजीवःस्वदेहंव्याप्यतिष्ठतीति ॥ चिद्गुणेनव्याप्तिर्जीवरूपेणाव्याप्तिरिति ॥ गीतातात्पर्येपि ॥ नित्यंसर्वगतेस्थितोऽणुश्चायमितिसर्वगतस्थाणुः ॥ सर्वगतोविष्णुः ॥ तदधीनत्वादिकंतत्स्थत्वं ॥ नित्यंसर्वगतेविष्णावणुर्जीवोव्यवस्थितइति ॥ तार्किकास्तु ॥ जीवाव्याप्ताःदेहादौसर्वत्रसुखदुःखचेष्टादिकार्यदर्शनात्॥ नचमध्यमपरिमाणत्वंवक्तुंयुक्तं ॥ अनित्यत्वप्रसंगात् ॥ अतोमहत्परिमाणमेवेत्याहुः ॥ तन्न ॥ देहोत्क्रमणदेहप्रवेशस्वर्गनरकादिगमनागमनादीनांश्रुतिसिद्धानामभावप्रसंगात्॥ नचव्याप्तत्वेगमनादिकंयुक्तं ॥ आकाशादावदर्शनात्॥ सर्वत्रसुखादिकार्योपलंभश्चप्रकाशव्याप्त्यायुज्यतएव ॥ व्याप्ताह्यात्मानइत्यादिश्रुतयःपरमात्मपराइतिभाष्यटीकयोःस्पष्टं ॥ अनित्यमणुपरिमाणमिति ॥ तार्किकांगीकृतपरमाणूनामनित्यत्वेनतत्परिमाणस्याप्यनित्यत्वादितिभावः ॥ नचपरमाणूनामनित्यत्वेमानाभावइति

२३० नित्यंत्रिविधमपिपरिमाणमीशलक्ष्म्योर्युगपदेव ॥ २३१ नित्यमणुपरिमाणंसर्वजीवेषु ॥ अनित्यमणुपरिमाणमनित्यगतं ॥

वाच्यं ॥ रूपादिमत्त्वाच्चविपर्ययोदर्शनादितिसूत्रकारेणैवोक्तत्वात् ॥ अव्याकृताकाशादीनांपरिमाणमाह ॥ नित्यंमहदिति ॥ २३२ ॥ अत्रप्रमाणानितुपूर्वमेवतत्तत्प्रकरणेषूक्तानि ॥ कालपरिमाणमाह ॥ कालेक्षणलवादिरूपइति ॥ २३३ ॥ क्षणस्यव्याप्तत्वंतावत्सिद्धं ॥ अयंक्षणोदेशांतरेनास्तीत्यस्यसाक्षिप्रमाणविरुद्धत्वात् ॥ तस्यचानित्यत्वात्तद्गतंपरिमाणमप्यनित्यमेवेतिभावः ॥ तदुक्तंसुधायां ॥ क्षणलवादयोपिप्रत्येकंव्याप्ताइति ॥ अनित्यमध्यमपरिमाणस्याश्रयमाह ॥ कार्यद्रव्येष्विति ॥ २३४ ॥ ननुनजीवानामणुपरिमाणंयुक्तं ॥ तथात्वेस्त्र्यादिभोगाभावप्रसंगात् ॥ संसारावस्थायामणुपरिमाणवतांमुक्तौमध्यमपरिमाणांगीकारेऽनित्यत्वप्रसंगादित्यतआह ॥ मुक्तानामिति ॥ २३५ ॥ परमेश्वरेच्छयाणुरूपमेवमुक्तौमहत्त्वेनाभिव्यज्यते ॥ तेषामणिमाद्यष्टैश्वर्यवत्त्वात् ॥ यथाल्पपरिमाणमेवक्षीरंपात्रस्थमधःसंतपनादिनोन्नाहवदुपलभ्यतेतद्वत् ॥ एतच्चोत्तरत्रमुक्तभोगप्रकरणेवक्ष्यतइतिभावः ॥ इतिपरिमाणप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ संयोगंनिरूपयति ॥ संयुक्तेति ॥ २३६ ॥ नित्यसंयोगस्थानमाह ॥ ईशलक्ष्म्योरिति ॥ २३७ ॥ नित्यावियोगित्वाद्व्याप्तत्वाच्चलक्ष्म्याःपरमात्मनासंयोगोनित्यः ॥ परमात्मनोपिव्याप्तत्वाच्छ्रीवत्सलांछनत्वाच्चलक्ष्म्यासंयोगोनित्यः ॥ ईशजीवयोरिति ॥ द्वासुपर्णासयुजासखायेतिश्रुतेरिति

---

२३२ नित्यंमहत्परिमाणमव्याकृताकाशप्रकृतिवर्णगतं ॥ २३३ कालेक्षणलवादिरूपेऽनित्यंमहत्परिमाणं ॥ २३४ कार्यद्रव्येषुसर्वत्रमध्यमपरिमाणमनित्यमेव ॥ २३५ मुक्तानांमहत्तत्त्वादिकमणिमाद्यष्टैश्वर्यरूपं ॥ २३६ संयुक्तव्यवहारहेतुर्गुणसंयोगः ॥ सद्विविधः नित्योऽनित्यश्च ॥ २३७ ईशलक्ष्म्योरीशजीवयोर्वर्णाव्याकृताकाशयोर्वर्णानांचपरस्परंसंयोगोनित्यएव ॥

भावः ॥ वर्णाव्याकृताकाशयोरित्यादि ॥ उभयोर्व्याप्तत्वादितिभावः ॥ अनित्यसंयोगस्योदाहरणमाह ॥ अनित्येति ॥ २३८ ॥
घटाकाशसंयोगादिरित्यर्थः ॥ अनित्यानामपिघटपटादीनांसंयोगोऽनित्यइतिचबोध्यं ॥ ननुसंयोगमात्रंक्रियादिजन्यं ॥ त
त्कथमुच्यतेजसंयोगइतिचेन्न ॥ क्रियारहितानामव्याकृताकाशवर्णादीनांसंयोगांगीकारेबाधकाभावात् ॥ अन्यथाव्याप्तत्वंन
स्यात् ॥ नचसकलमूर्तद्रव्यसंयोगित्वंव्याप्तत्वमितिवाच्यं ॥ मुख्यव्याप्तत्वेसंभवतिवैवक्षिकव्याप्तत्वस्यायुक्तत्वात् ॥ किंचेश्व
रादिव्याप्तानांदिग्रूपाव्याकृताकाशसंयोगाभावेत्यंतासत्त्वमेवस्यात् ॥ देशकालसंबंधातिरिक्तसत्त्वेमानाभावात् ॥ क्लृप्तसंयोगे
नैवोपपत्तौसार्वकालिकसंबंधांतरकल्पनेमानाभावात् ॥ नन्वीश्वरसंयोगोननित्यईश्वरक्रियाजन्यत्वाज्जीवादिक्रियाजन्यत्वाच्चे
त्यतस्तत्संयोगस्यनित्यत्वंवक्तुंसंयोगस्यतावदेकत्वंनिराकरोति ॥ उभयोरिति ॥ २३९ ॥ घटपटयोःसंयोगोनैकः किंतुघ
टनिरूपितसंयोगःपटे पटनिरूपितसंयोगोघट इतिसंयोगद्वयमित्यर्थः ॥ तदुक्तंवैशेषिकाधिकरणानुव्याख्याने ॥ संयोगश्च
विभागश्चभेदश्चैवपृथक्पृथगिति ॥ किंचघटसंयुक्तःपटः पटसंयुक्तश्चघटइत्यन्योन्यप्रतियोगित्वेनसंयोगोनुभूयते ॥ नचैकस्यैव
संयोगस्यैकनिरूपितप्रतियोगित्वमनुयोगित्वंचयुक्तं ॥ विरोधात् ॥ अतःसंयोगद्वयमेवघटपटयोः ॥ एतदप्युक्तमनुव्याख्या
ने ॥ अन्योन्यप्रतियोगित्वंह्युभयोरपिदृश्यतइति ॥ तथाचेश्वरक्रिययाईश्वरनिरूपितोघटाधिकरणकःसंयोगोजायते ॥ सच
घटनाशेननश्यति ॥ घटनिरूपितेश्वराधिकरणकसंयोगस्तु नित्यएव नघटक्रियाजन्यः ॥ घटनाशेपितन्निरूपितत्वानाशात् घट

२३८ अनित्यनित्यद्रव्ययोरनित्यानांचपरस्परंसंयोगोऽनित्यएव ॥ २३९ उभयोस्संयोगस्तुनैकः ॥ किंतुभिन्नभिन्नएव ॥

ध्वंसादिवत् ॥ नचघटक्रियायाःकुत्रोपयोगइतिवाच्यं ॥ ईश्वराधिकरणकसंयोगाभिव्यंजकत्वात् ॥ ईश्वरेजगदाधारत्वाभि
व्यंजकजगद्वत् ॥ ईश्वरजीवक्रिययोश्चनपरस्परंसंयोगजनकत्वं ॥ किंत्वभिव्यंजकत्वमात्रं ॥ अन्यथोपादानाभावेनस्वरूपस्यैवप
रिणामप्रसंगात् ॥ जीवस्यप्रतिदिनंविश्वतैजसप्राज्ञैःसंश्लेषविश्लेषौचविशेषशक्त्याघटनीयौ ॥ तार्किकास्तु ॥ अन्यतरक
र्मज उभयकर्मजः संयोगजसंयोगश्चेतिसंयोगत्रैविध्यमाहुः ॥ तन्निरासायाह ॥ अनित्यसंयोगइति ॥ २४० ॥ एकविधत्वमे
वोपपादयति ॥ अन्यतरकर्मजइति ॥ ननुमल्लयोःसंयोगउभयकर्मजोदृश्यते ॥ तथामेषयोरपि ॥ तत्कथमुच्यतेन्यतरकर्मजए
वसंयोगइत्यतआह ॥ मल्लयोरिति ॥ २४१ ॥ तत्रसंयोगद्वयस्वीकारेणतयोःपरस्परमन्यतरकर्मजत्वादित्यर्थः ॥ अत्रानु
रूपंदृष्टांतंवदन्नेवान्यतरकर्मजसंयोगस्योदाहरणमाह ॥ स्थाणुश्येनेति ॥ २४२ ॥ ननुहस्तपुस्तकसंयोगात्कायपुस्तकसंयोगो
जन्यते ॥ तथाचसंयोगजसंयोगोप्यन्यस्तत्कथमेकविधएवसंयोगइत्यतआह ॥ संयोगजेति ॥ २४३ ॥ कुतोनेत्यतआह ॥ ह
स्तशरीरयोरिति ॥ २४४ ॥ ननुस्थाणुश्येनसंयोगौद्वावित्यंगीकारेश्येनकर्मणास्थाणावेकःसंयोगस्तेनचसंयोगेनस्थाणौसंयो
गोजायतइतिवक्तव्यं ॥ स्थाणौकर्माभावेनश्येननिष्ठसंयोगजनकस्यान्यस्याभावात् ॥ तथाचसंयोगजसंयोगोऽवर्जनीयः ॥ नच
श्येनसंयोगएवनास्तीतिवाच्यं ॥ स्थाणुसंयुक्तःश्येनइतिप्रत्ययापलापायोगादितिचेन्न ॥ श्येनकर्मणैवसंयोगद्वयजननोपपत्तेः ॥

२४० अनित्यसंयोगएकविधएव ॥ अन्यतरकर्मजः ॥ २४१ मल्लयोस्संयोगस्तुनैकः ॥ किंतुद्वौ ॥ अतोन्यतरकर्मजौ ॥ २४२ स्थाणुश्ये-
नसंयोगवत् ॥ २४३ संयोगजसंयोगस्तुनास्त्येव ॥ २४४ हस्तशरीरयोरभेदेनहस्तपुस्तकसंयोगेनसंयोगांतरोत्पत्तेरयोगात् ॥

एकेनैवघटाग्निसंयोगेनयुगपदेवघटेरूपरसगंधाद्यनेकगुणोत्पत्तिवत् ॥ चूतफलादौपतनक्रिययायुगपच्चतुर्दिङ्निरूपितसंयोगवच्च ॥ एतत्सर्ववैशेषिकाधिकरणसुधायामेवोक्तं ॥ इतिसंयोगप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ विभागस्वरूपंनिरूपयति ॥ विभक्तेति ॥ २४५ ॥ अनित्यविभागस्योदाहरणमाह ॥ अनित्यद्रव्येति ॥ २४६ ॥ उपलक्षणमेतत् ॥ घटादिनिरूपितआकाशादिनिष्ठोविभागोप्यनित्यइतिबोध्यं ॥ नित्यविभागस्योदाहरणमाह ॥ भगवद्रूपाणामिति ॥ २४७ ॥ ननुविभागोनगुणो भेदेनैवविभक्तव्यवहारोपपत्तेरितिचेन्न ॥ घटादौकथंचित्संभवेपि भगवद्रूपेषु मूलरूपादन्योन्याभावस्य विदारणरूपभेदस्यच श्रुत्यादिनिषिद्धत्वेनविभागरूपगुणस्यैववक्तव्यत्वात् ॥ नचभगवद्रूपेषुविभागएवनास्तीतिवाच्यं ॥ पूर्णात्पूर्णमुदच्यतइत्युद्गमनरूपविभागोक्तेः ॥ अन्यथाभगवद्रूपाणामैक्यस्यस्वभावतःसिद्धत्वेन कदाचिदीशःसकलावतारानेकंविधायाहिपतौहिशेतइतिपुनरेकीकरणविधानानुपपत्तेः ॥ अतःप्राग्विभक्तानांस्वरूपाणांसंश्लेषएवेत्यंगीकर्तव्यं ॥ तदुक्तमाथर्वणभाष्ये ॥ हरेरपिस्वरूपाणामेकीभावोयदोच्यते॥संश्लेषएवसिद्धत्वात्स्वरूपैक्यस्यनोभवइति ॥ननुसंयोगविभागयोःपरस्परविरुद्धत्वात्कथंपरमात्मनितौनित्यौस्तइतिचेन्न ॥ परमात्मगुणानांलोकविरुद्धानामेवेश्वरशक्त्यायुगपदणुत्वमहत्त्वादिवत्स्वीकारात् ॥ तदुक्तंभागवते ॥ यस्मिन्विरुद्धगतयोप्यनिशंपतंतीति ॥ गुणाःश्रुताःसुविरुद्धाश्चदेवइत्यादिश्रुतिः ॥ नन्वाकाशादौघटादिनि

---

२४५ विभक्तव्यवहारहेतुर्गुणोविभागः ॥ सद्विविधः ॥ नित्योनित्यश्च ॥ २४६ अनित्यद्रव्यगतोऽनित्यः ॥ २४७ भगवद्रूपाणांपरस्परंमूलरूपेणचविश्लेषशब्दवाच्योविभागोनित्यः ॥ संश्लेषवदचिंत्यशक्त्याघटनीयः ॥

रूपितसंयोगविभागयोर्नित्यत्वमुतानित्यत्वं ॥ नाद्यः ॥ विरुद्धयोरेकत्रसदासत्त्वानुपपत्तेः ॥ घटनाशेपिसत्त्वापत्तेः ॥ नद्वितीयः ॥ उपादानकारणाभावादितिचेन्न ॥ आकाशादीनामेवोपादानत्वसंभवात् ॥ स्वगतद्वित्वादिवत् ॥ तदुक्तंवियत्पादीयानुव्याख्याने ॥ तथापिमूर्तसंबंधपरतंत्रविशेषयुक् ॥ खमेवोत्पत्तिमन्नामश्रुतिशब्दविवक्षितमिति ॥ अन्यथाप्रकारांतरेणघटनासंभवात् ॥ इतिविभागनिरूपणं ॥ ७ ॥ ७ ॥ ७ ॥ परत्वापरत्वेनिरूपयति ॥ **परापरेति** ॥ २४८ ॥ नित्ययोर्देशकालपरत्वयोराश्रयमाह ॥ **नित्येइति** ॥ २४९ ॥ दूरदेशवृत्तित्वंदेशपरत्वं बहुकालसंबंधित्वंकालपरत्वमीशलक्ष्म्योर्बहुदूरवृत्तित्वाद्ब्रह्माद्यपेक्षयापूर्वकालीनत्वेनज्येष्ठत्वाच्चयुक्तं ॥ तदुक्तमैतरेयभाष्ये ॥ आत्मब्रह्माग्रइत्यादिगुणाग्र्यत्वंहरेर्वदेत् ॥ कालज्यैष्ठ्यंतुयस्मात्तत्सृष्ट्युक्तेरेवसिध्यतीति ॥ मुक्तानामपिजीवानांदूरदेशस्थत्वस्यनित्यत्वेनकालज्येष्ठत्वस्यचसत्त्वात्तदुभयंयुक्तं॥ अव्याकृताकाशादौनित्यंकालपरत्वमस्तीत्याह ॥ **नित्यमिति** ॥२५०॥ महदादिजगदुत्पत्तेःपूर्वमपिसत्त्वाज्ज्येष्ठत्वमित्यर्थः ॥ **अनित्यमिति** ॥ २५१ ॥ ज्येष्ठादिनाशेपरत्वादीनामपिनाशादित्यर्थः ॥ नित्यदेशापरत्वस्योदाहरणमाह ॥ **नित्यमिति** ॥ २५२ ॥ नचसमीपस्थत्वदूरस्थत्वयोःपरमात्मनिविरोधइतिवाच्यं ॥ अचिंत्यशक्त्योपपत्तेः ॥ आसीनोदूरंव्रजतीत्यादिश्रु

---

२४८ परात्परव्यवहारकारणेपरत्वापरत्वे ॥ तेप्रत्येकंद्विविधे॥ कालपरत्वापरत्वेदेशपरत्वापरत्वेचेति ॥ पुनर्द्विविधे ॥ नित्येऽनित्येचेति ॥ २४९ नित्येदेशकालपरत्वेउभेअपीशलक्ष्मीजीवेषु ॥ २५० नित्यंकालपरत्वमव्याकृताकाशादिनित्यद्रव्येषु ॥ २५१ अनित्यंकालपरत्वंज्येष्ठे ॥ अनित्यंकालापरत्वंकनिष्ठे ॥ अनित्यंदेशपरत्वंदूरस्थेऽनित्यद्रव्ये ॥ २५२ नित्यंदेशापरत्वमीशलक्ष्म्योः ॥ अनित्यंदेशापरत्वंसमीपस्थेवस्तुनि॥

तेः ॥ द्वादशस्तोत्रेपि ॥ दूराद्दूरतरंयच्चुतदेवांतिकमंतिकादिति ॥ नन्वीश्वरेदेशापरत्ववत्कालापरत्वमप्यस्त्येव ॥ ज्येष्ठत्वव
त्कनिष्ठत्वस्याप्युक्तेः ॥ तथाहि ॥ व्यासःषट्शतवर्षीयोधृतराष्ट्रमजीजनदितिभागवततात्पर्ये ॥ निर्णयेपि ॥ पूर्वंसुमित्रातन
यश्चशेषःसलक्ष्मणोनामरघूत्तमादन्वितिरामस्यज्येष्ठत्वोक्तेः ॥ तथा लेभेपुत्रंगोकुलेपूर्णचंद्रकांताननंबलभद्रंसुशुभ्रं ॥ यदात्रि
मासःसबभूवदेवस्तदाविरासीत्पुरुषोत्तमोजइतिकृष्णस्यकालापरत्वोक्तेरितिचेन्न ॥ तदज्ञजनदृष्टिविषयत्वोपाधिकत्वेनस्वभा
वतःकनिष्ठत्वाभावात् ॥ तदुक्तंतृतीयतात्पर्ये ॥ नायुर्मानंभगवतःकस्मिन्रूपेपिविद्येत ॥ अनादित्वादमध्यत्वादनंतत्वा
च्चसोव्ययइति ॥ प्रथमतात्पर्येपि ॥ अहेयमनुपादेयंयद्रूपंनित्यमव्ययं ॥ सएवापेक्ष्यरूपाणांव्यक्तिमेवजनार्दनः ॥ अगृ
ह्णाद्व्यसृजच्चेतिरामकृष्णादिकांतनुं ॥ पठ्यतेभगवानीशोमूढबुद्धिव्यपेक्षया ॥ कृष्णरामादिरूपाणांलोकव्यक्तिव्यपेक्षये
ति ॥ नचयच्चान्यत्त्रिकालातीतंतदप्योंकारएवेतिमांडूकोपनिषदिपरमात्मनःसर्वथाकालसंबंधनिषेधात्कथंकालज्येष्ठत्वमपी
तिवाच्यं ॥ तस्यकालकृतविकाराभावपरत्वात् ॥ अतएवद्वितीयभागवते ॥ नवर्ततेयत्ररजस्तमस्तयोःसत्त्वंचमिश्रंनचका
लविक्रमइतिकालविकाराभावएवोक्तः ॥ अन्यथापूर्वोदाहृतबहुप्रमाणविरोधप्रसंगात् ॥ इतिपरत्वापरत्वप्रकरणं ॥ ७ ॥ ७ ॥
॥ ७ ॥ द्रवत्वंनिरूपयति ॥ **द्रवणहेतुरिति** ॥ २५३ ॥ सांसिद्धिकनित्यद्रवत्वस्योदाहरणमाह ॥ **सांसिद्धिकमिति** ॥ २५४ ॥

२५३ द्रवणहेतुर्गुणोद्रवत्वं ॥ तद्द्विविधं ॥ नित्यमनित्यंचेति ॥ पुनर्द्विविधं ॥ २५४ सांसिद्धिकंनैमित्तिकंच ॥ सांसिद्धिकंनित्यंद्रवत्वमीश
लक्ष्म्योर्देवेषुजलांतर्गतेषु ॥ अनित्यंसांसिद्धिकंजले ॥

सएवद्रवरूपेणेतिपुराणादौपरमात्मनोद्रवत्वंप्रसिद्धं ॥ लक्ष्म्याअपिप्रलयकालीनोदकसुधासमुद्रादिरूपायाद्रवत्वंयुक्तं ॥ मुक्ता
नांतुतीर्थदेवानांद्रवत्वमन्येषांकामरूपत्वाद्द्रवत्वंयुक्तमितिभावः ॥ **नैमित्तिकमिति** ॥ २५५ ॥ अग्निसंयोगादिनिमित्तज
न्यमित्यर्थः ॥ सुवर्णंतुपार्थिवं ॥ तत्रतेजोभागःप्रचुरः ॥ अतोत्यंतानलसंयोगेप्यनुच्छेदस्तद्द्रवत्वस्येतिध्येयं ॥ अन्यथामहत्तत्व
ब्रह्मांडयोर्हेमरूपत्वस्योक्तत्वेनशुद्धतेजस्त्वापत्तेः ॥ इतिद्रवत्वप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ गुरुत्वंनिरूपयति ॥ **पतनेति**
॥ २५६ ॥ चूतफलादौपतनक्रियायागुरुत्वान्वयव्यतिरेकानुविधायित्वदर्शनादितिभावः ॥ ईश्वरेनित्यगुरुत्वसद्भावेप्रमाणमाह ॥
यशोदेति ॥ २५७ ॥ तदुक्तंदशमस्कंधभागवते ॥ एकदारोहमारूढंलालयंतीसुतंसती ॥ गरिमाणंशिशोर्वोढुंनसेहेगिरिकूट
वत् ॥ भूमौनिधायतंगोपीविस्मिताभारपीडितेति ॥ तृणावर्तःशांतरयोवात्यारूपधरोहरन् ॥ कृष्णंनभोगतंहंतुंनाशक्नोद्भूरि
भारभृत् ॥ तमश्मानंमन्यमानआत्मनोगुरुमत्तया ॥ गलेगृहीतउत्स्रष्टुंनाशक्नोदद्भुतार्भकमिति ॥ एवंलक्ष्म्याअपिसीतारु
क्मिण्यादिरूपेषुगुरुत्वंबोध्यं ॥ योगिनांमुक्तानांचगुरुत्वमाह ॥ **योगिनामित्यादिना** ॥ **पंचतन्मात्रेति** ॥ २५८ ॥
तत्कार्यस्यक्वाप्यनुक्तेरित्यर्थः ॥ इतिगुरुत्वप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ लघुत्वंनिरूपयति ॥ **वेगहेतुरिति** ॥ २५९ ॥

२५५ नैमित्तिकंद्रवत्वंघृतसुवर्णादौ ॥ २५६ पतनासाधारणकारणंगुरुत्वं ॥ नित्यमनित्यंचेतिद्विविधं ॥ नित्यंगुरुत्वमीशलक्ष्म्योः ॥
२५७ कृष्णेयशोदाप्रत्यक्षसिद्धं ॥ २५८ योगिनांमुक्तानांचगुरुत्वमष्टैश्वर्यांतर्गतं ॥ अनित्यंगुरुत्वंपाषाणादौकार्यद्रव्यमात्रे ॥ पंचतन्मात्रावाय्वा
काशतमस्सुनगुरुत्वं ॥ २५९ वेगहेतुर्गुणोलघुत्वं ॥ तद्द्विविधं ॥ नित्यमनित्यंच ॥

अन्वयव्यतिरेकाभ्यांतद्धेतुत्वावधारणादितिभावः ॥ अव्याकृताकाशादौवेगादर्शनान्नलघुत्वमित्याह ॥ **नित्यंलघुत्वमिति** ॥ २६० ॥ कृष्णादिरूपेषुधावनादेर्दर्शनादितिभावः ॥ लाघवातिशयेनेति ॥ अनेकयोजनस्थमार्तांडमंडलरश्मीनांलाघवातिशयेनवेगातिशयात्क्षिप्रंभूप्रसरणंप्रत्यक्षसिद्धमितिभावः ॥ ननुलघुत्वंनगुणः ॥ गुरुत्वाभावरूपत्वादित्याशंक्य निराकरोति ॥ **गुरुत्वाभावइति** ॥ २६१ ॥ वैपरीत्येति ॥ तथाचविनिगमनाविरहादुभयोरपिगुणत्वंयुक्तमित्यर्थः ॥ प्रतियोगीति ॥२६२॥ गुरुत्वज्ञानंविनापीदंलघ्विातिज्ञानस्यसर्वानुभवसिद्धत्वादितिभावः ॥ इतिलघुत्वप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ मृदुत्वंनिरूपयति ॥ **मार्दवेति** ॥ **नित्यमीशेति** ॥ २६३ ॥ बदरपांडुवदनोमृदुगंडमंडयन्मकरकुंडललक्ष्म्येतिदशमस्कंधभागवतोक्तेः ॥ लक्ष्मीशरीरेचवनिताशरीरत्वान्मृदुत्वंसिद्धमेव ॥ इतिमृदुत्वप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ काठिन्यं विभजति ॥ **काठिन्यमिति** ॥ २६४ ॥ ईशलक्ष्म्योरिति ॥ कृष्णादिभगवद्रूपाणांशरीरस्यवज्रादपिदार्ढ्योक्तेः ॥ तथाहि दशमस्कंधभागवते ॥ भगवद्धारनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरोभज्यमानांगोमुहुर्ग्लानिमवापह ॥ भगवंतंवासुदेवंक्रुद्धो

---

२६० नित्यंलघुत्वमव्याकृताकाशवर्णव्यतिरिक्तेशादिद्रव्यवृत्ति ॥ अनित्यंलघुत्वमनित्यद्रव्यवृत्ति ॥ वेगहेतुत्वंचलघुत्वस्यलाघवातिशयेनवेगातिशयदर्शनात्तेजआदौप्रत्यक्षसिद्धं ॥ २६१ गुरुत्वाभावोलघुत्वमितिचवैपरीत्यपराहतं ॥ २६२ प्रतियोग्यनपेक्षणाच्च ॥ २६३ मार्दवव्यवहारहेतुर्मृदुत्वं ॥ नित्यानित्यभेदेनद्विविधं ॥ नित्यमीशलक्ष्मीमुक्तेषु ॥ अनित्यंमृदुत्वमाकाशकालाविद्यांधकारतेजोवायुव्यतिरिक्तेषुकार्यद्रव्येषु ॥ २६४ काठिन्यं द्विविधं ॥ नित्यमनित्यं च ॥ नित्यमीशलक्ष्म्योः ॥

वक्ष्यस्यताडयत् ॥ नाचलत्तत्प्रहारेणस्रजाहतइवद्विपइति ॥ एवंतत्रतत्रयुद्धेषुभगवच्छरीरसंबंधेनशत्रुमुक्तायुधानांचूर्णीभाव स्तत्रतत्रोक्तोज्ञातव्यः॥ अनित्यमिति ॥२६५॥ महदादिद्रव्येष्वित्यर्थः ॥ तमस्यपिकाठिन्यंबोध्यं॥ तदुक्तंबृहद्भाष्ये॥ तमोंधं द्विगुणंतस्मात्काठिन्यात्पृथ्विनामकमिति ॥ इतिकाठिन्यप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ ननुपृथक्त्वंनामगुणांतरमस्ति ॥ घटःपटा त्पृथगितितार्किकाः ॥ तान्निराकरोति ॥ अन्योन्याभावातिरिक्तमिति ॥ २६६ ॥ घटःपटादन्यो घटःपटात्पृथगित्यनयोः प्रतीत्योर्विशेषाभावेनोभयोरैक्यादित्यर्थः ॥ अन्यथाघटपटयोर्भेदज्ञानानंतरंघटःपटात्पृथग्वानवेतिकदाचित्संशयापत्तेः ॥ न नुभेदशब्दवाच्यस्त्रिविधः ॥ स्वरूपभेदोऽन्योन्याभावः पृथक्त्वंचेति ॥ तत्रस्वरूपभेदोऽभावादौ नत्वन्योन्याभावः ॥ अ भावाधिकरणकाभावानंगीकारात् ॥ नापिपृथक्त्वं ॥ अभावेगुणाभावात् ॥ अन्योन्याभावस्त्वभावव्यतिरिक्तपदार्थमात्रे ॥ द्रव्याद्भिन्नोगुणइत्यादिप्रतीतेस्तत्रनपृथक्त्वं ॥ गुणादिपंचकेगुणानंगीकारात् ॥ पृथक्त्वंतुद्रव्यमात्रे ॥ बाधकाभावात् ॥ तथा स्वरूपभेदान्योन्याभावावपिद्रव्येस्तः ॥ किंचघटःपटात्पृथगितिपंचमीदृश्यते ॥ साचान्याराादितरर्तेदिक्शब्दांचूत्तरपादाजा हियुक्तइतिसूत्रेणैववक्तव्या ॥ सूत्रांतराभावात् ॥ अतएवान्यइत्यर्थग्रहणमितिकाशिकावृत्तिः ॥ किंचपृथग्विनानानाभिस्तृ तीयान्यतरस्यामितिपृथक्शब्दयोगेविकल्पेनपंचमीविहिता ॥ सानस्यात् ॥ पूर्वसामान्यतोन्यशब्देनग्रहणांगीकारात् ॥ अतःपृ

२६५ अनित्यमनित्यमूर्तद्रव्ये ॥ नचकाठिन्यंनिबिडावयवसंयोगोनगुणांतरमितिवाच्यं ॥ संबंधिद्वयप्रतीतिंविनापीदंकठिनमितिप्रतीतेः ॥ अन्यथागु रुत्वमपिगुणांतरंनस्यात् ॥ २६६ अन्योन्याभावातिरिक्तंपृथक्त्वंनास्त्येव ॥

थक्त्वमप्यन्योन्याभावातिरिक्तंभेदादिशब्दवाच्यमंगीकर्तव्यमितिचेदुच्यते ॥ अन्यारादितरर्तेइतिसूत्रेन्यशब्दयोगएवपंचमी
विहिता ॥ नतुशब्दांतरयोगेपि ॥ नचैवंघटात्पटोभिन्नइत्यादौपंचमीनस्यादितिवाच्यं ॥ विलक्षणोदेवदत्तोयज्ञदत्तादित्यत्रेवो
पपत्तेः ॥ नहिवैलक्षण्यमन्यशब्दार्थः ॥ नचापादानेपंचमीतिसूत्राद्वैलक्षण्यपदयोगेपंचमीतिवाच्यं ॥ तर्हितेनैवपृथक्शब्द
योगेपिपंचम्युपपत्तेः ॥ नचैवमन्यारादितरर्तेइतिसूत्रंव्यर्थंस्यात् ॥ अपादानेपंचमीत्यनेनैवान्यादिशब्दयोगेपंचम्यावक्तुंशक्य
त्वादितिवाच्यं ॥ प्रपंचार्थत्वेनैवोपपत्तेः ॥ अतएवमहाभाष्ये प्रपंचार्थमिदमुक्तमित्युक्तं ॥ यच्चोक्तं पृथग्विनेतिसूत्रेणवैकल्पि
कपंचमीनस्यादिति ॥ तन्न ॥ अप्राप्तविकल्पानांबहूनांदर्शनात् ॥ अतोभेदातिरिक्तंपृथक्त्वंनास्त्येव ॥ तदुक्तंलिंगपादीयानु
व्याख्याने ॥पृथक्त्वाभावतद्रूपान्भेदांस्त्रीन्कल्पयंतिचेत् ॥ कल्पनागौरवाद्यास्तुदोषास्तत्रविरोधिनः ॥ पृथक्त्वान्यत्वभेदास्तु
पर्यायेणैवलौकिकैः ॥ व्यवह्रीयंतेसततंवैदिकैरपिसर्वशइति ॥ स्नेहंविभजति ॥ **स्नेहइति** ॥ **मनःप्रावण्यमिति** ॥२६७॥
माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपभक्त्यंतर्गतमनोधर्मइत्यर्थः ॥ तत्रापिस्नेहशब्दस्यव्यवहारात् ॥ **चैतन्यमात्रइति** ॥२६८॥
ईशलक्ष्मीसज्जीवानांपरस्परंस्नेहसद्भावात् ॥ तमोयोग्यानांचस्वकलत्रपुत्रादौस्नेहस्यसत्त्वादितिभावः ॥ **अनित्यमिति**
॥ २६९ ॥ यस्ययत्रस्नेहस्तत्रैवकदाचिद्द्वेषोत्पत्त्यापूर्वस्नेहनाशस्यानुभवसिद्धत्वादित्यर्थः ॥ **ईशलक्ष्म्योरिति** ॥ २७० ॥ जला

२६७ स्नेहोद्विविधः ॥ मनःप्रावण्यंचूर्णादिपिंडीभावहेतुश्चेति ॥ उभयमपिनित्यानित्यभेदेनद्विविधं ॥ २६८ आद्यंमनःप्रावण्यंचैतन्यमात्रे ॥
२६९ अनित्यंमनःप्रावण्यंसंसारिषु ॥ २७० नित्यश्चूर्णादिपिंडीभावहेतुरीशलक्ष्म्योः ॥

त्मकत्वेनविद्यमानयोरितिशेषः ॥ **जलमात्रवर्तीति** ॥ २७१ ॥ अनित्यजलमात्रवर्ती ॥ तन्नाशेतन्नाशादित्यर्थः ॥ इतिस्ने
हप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ शब्दंनिरूपयति ॥ **शब्दस्त्विति** ॥ २७२ ॥ प्रकृतेविवक्षितइतिशेषः ॥ यथाश्रुतेवर्णानामपिश
ब्दत्वेनगुणेंतर्भावापत्त्याद्रव्यत्वेनपूर्वपरिगणनंनस्यादितिद्रष्टव्यं ॥ **नित्यईशलक्ष्मीति** ॥ २७३ ॥ ईशस्यस्वरूपोध्वनिरु
क्तश्छांदोग्यभाष्ये ॥ विष्णोःस्वरोवृषभवन्मेघनादवदेववा ॥ एकस्यपादवर्षस्यस्वरोविष्णोरुदाहृतइति ॥ न्यायविवरणेपि ॥
अलौकिकास्तस्यशब्दास्तथार्थाअलौकिकोह्येषविष्णुःपरत्वात् ॥ तथापिशब्दालौकिकाअप्यमुष्मिन्प्रवर्तमानाअधिकार्थान्वदं
तीति ॥ नचात्रालौकिकशब्दोवेदएव नविष्णुस्वरूपशब्दइतिवाच्यं ॥ वेदाद्यनुक्तभगवद्गुणानामवाच्यत्वापातात् ॥ नचवे
दानुक्तागुणाभगवतिनसंत्येवेतिवाच्यं ॥ गुणाःश्रुताःसुविरुद्धाश्चदेवेसंत्यश्रुताअपिनैवात्रशंकेत्यादिश्रुतिविरोधापत्तेः ॥ किं
चगीताभाष्ये ॥ सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां भारतसंहितामचीक्लृपदितिवेदानुक्तभगवद्गुणप्राति
पादकत्वंभारतस्यास्तीत्युक्तत्वेनतद्विरोधप्रसंगात् ॥ नचभारतस्यैवयावद्भगवद्गुणप्रतिपादकत्वं नस्वरूपशब्दस्येतिवाच्यं ॥
देवेसंत्यश्रुताइतिश्रुतिविरोधप्रसंगात् ॥ नच अनुक्तंपंचभिर्वेदैर्नवस्त्वस्तिकुतश्चनेतिप्रमाणविरोधइतिवाच्यं ॥ तस्यसामान्या
कारेणानुक्तभगवद्गुणविषयकत्वेनैवोपपत्तेः ॥ नचैवंसामान्याकारेणैवभगवद्गुणाभारतादिप्रतिपाद्याःसंति नतुविशेषशब्दप्र

२७१ अनित्यस्तुजलमात्रवर्ती ॥ २७२ शब्दस्तुध्वनिः ॥ नित्यानित्यभेदेनद्विविधः ॥ २७३ नित्यईशलक्ष्मीमुक्तप्राप्तांधतमसां ॥ अनि
त्यस्त्वव्याकृताकाशाविद्यांधकारवर्णव्यतिरिक्तेषुसर्वत्र ॥

तिपाद्याइतिवाच्यं ॥ तत्तद्गुणप्रतिपादकविशेषशब्दाभावेतत्तद्गुणासिद्धिप्रसंगात् ॥ अन्यथाविशदंक्षीरमाधुर्यंस्थिरमाज्यस्य तीक्ष्णकं ॥ सितस्यपनसादीनांनिर्हारीत्यभिधीयतइतिबृहद्भाष्यैतरेयभाष्यादौमाधुर्यादिविशेषप्रतिपादकविशेषशब्दोक्तिर्न स्यात् ॥ अतःस्वरूपशब्दसिद्धिः ॥ एवंभागवतादौकृष्णस्यवेण्वादिगानमुक्तं ॥ तृतीयस्कंधेपिवराहस्यघर्घरध्वनिरुक्तः ॥ ब्रह्माणंहर्षयामासहरिस्तांश्चद्विजोत्तमान् ॥ स्वगर्जितेनककुभःप्रतिध्वनयताविभुः ॥ निशम्यतद्धर्घरितंस्वखेदंक्षयिष्णुमायामयसूकरस्येति ॥ एवंनृसिंहस्यापिब्रह्मांडस्फोटसंकाशाट्टहासरूपध्वनिरुक्तःसप्तमस्कंधभागवते ॥ तदैवतस्मिन्निनदोतिभीषणोबभूवयेनांडकटाहमस्फुटत् ॥ कृत्वाट्टहासंखरकेसरोल्बणोनिमीलिताक्षंजगृहेमहाजवइति ॥ लक्ष्म्याअपिगानरूपध्वनिरुक्तोद्वितीयस्कंधभागवते ॥ श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूतिभिः ॥ प्रेंखश्रिताायाःकुसुमाकरानुगैर्विगीयमानाप्रियकर्मगायतीति ॥ तथाप्रलयकालीनोदकादेर्महाट्टहासउक्तः ॥ मुक्तानामपिध्वनिरस्त्येव ॥ हावुहावुइतिसामगायन्नास्तइत्याद्युक्तेः ॥ मध्वविजयेपि ॥ शुकनिस्वनाध्रुवमिमाअपराः ॥ मधुरस्वरास्ततपतत्रिततिप्रकटांतपङ्क्तिधृतनेत्ररुचः ॥ प्रियया चशोभनशुकस्वनयेत्यादि ॥ तमोगतानामपिवेदनयाध्वनिरुक्तःपुराणादौ ॥ नचपरमात्मादौसर्वत्रतदानीमेवप्राकृतोध्वनिःसृष्टइतिवाच्यं ॥ प्रलयकालेवैकुंठलोकादौश्रीभागेप्राकृतकार्याभावात् ॥ एवंवेदेष्वपिस्वरूपोध्वनिर्नित्योंगीकार्यः ॥ तदुक्तंतत्वनिर्णये ॥ तत्क्रमेणैवतैर्वर्णैस्तैःस्वैरेवनान्यथेति ॥ सामवेदेतुगानरूपध्वनिर्नित्यएवेति ॥ अनित्यशब्दस्याधिष्ठानमाह ॥ मुक्तेति ॥ तत्रमुक्तेषुनित्यध्वनेरुक्तत्वात् ॥ अव्याकृताकाशादौध्वनेःप्रसक्तेरभावादितिभावः ॥ ननुशब्दस्याकाशगुणत्वात्क

थंपृथिव्यादौसर्वत्रशब्दइतितार्किकशंकांनिराकरोति ॥ **आकाशमात्रेति** ॥ २७४ ॥ कुतोनेत्यतस्तत्रप्रमाणमाह ॥ **पूर्वंपूर्वेति** ॥ २७५ ॥ तदुक्तंतृतीयस्कंधभागवते ॥ भूतानांनभआदीनांयद्यद्भाव्यंपरात्परं ॥ तेषांपरानुसंसर्गाद्यथासंख्यंगुणान्विदुरिति॥ परस्यदृश्यतेधर्मोह्यपरस्मिन्समन्वयात् ॥ अतोविशेषोभावानांभूमावेवोपलभ्यतइतिच ॥ द्वितीयस्कंधेपि ॥ नभसोथविकुर्वाणादभूत्स्पर्शगुणोनिलः ॥ परान्वयाच्छब्दवांश्चप्राणओजःसहोबलं ॥ वायोरपिविकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यततेजोवैरूपवत्स्पर्शशब्दवत् ॥ तेजसस्तुविकुर्वाणादासीदंभोरसात्मकं ॥ रूपवत्स्पर्शवच्चांभोघोषवच्चतदन्वयात् ॥ विशेषस्तुविकुर्वाणादंभसोगंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितइति ॥ नचैवंशब्दस्यपंचभूतगुणत्वे अत आकाशगुणेशब्देव्यज्यमानावर्णादयस्तत्क्रमात्मकोवेदश्चनित्यएवेतितत्वनिर्णयविरोधइतिवाच्यं ॥ प्रथमतःशब्दस्याकाशोत्पत्त्यभिप्रायेणतदुपपत्तेः ॥ तदुक्तंतृतीयतात्पर्ये ॥ स्पर्शादयश्चतन्मात्राइतरेपूर्वसंस्थितेः ॥ तिष्ठत्येकोगुणोभूतेप्रत्येकंपंचसुस्थितः ॥ शब्दोवर्णात्मकोनित्योध्वनिराकाशसंभवः ॥ आकाशएवसूक्ष्मस्तुध्वनिरित्येवशब्द्यतइति ॥ युक्त्यंतरमाह ॥ **अनुभवाच्चेति** ॥ २७६ ॥ अयंशंखध्वनिर्भेरीध्वनिरित्यादिप्रत्यक्षानुभवादितिभावः ॥ नचशंखाद्यवच्छिन्नाकाशएवशब्दोत्पत्तिरितिवाच्यं ॥ शंखादावेवोत्पत्तौबाधकाभावात् ॥ अन्यथारूपस्पर्शादीनामपिघटावच्छिन्नतेजोवाय्वादावुत्पत्तिसंभवेनघटादेःस्पर्शादिगुणवत्त्वाभावप्रसंगात् ॥ नन्वेवंनपरमात्मनःशब्दस्वरूपत्वं नवापूर्वोक्तरूपादिमत्त्वंयुक्तं॥ अश

---

२७४ आकाशमात्रगुणइतिचनयुक्तं ॥ २७५ पूर्वपूर्वगुणानामुत्तरोत्तरेषुभूतेष्वनुवृत्तेर्भागवतादावुक्तेः ॥ २७६ अनुभवाच्च ॥

ब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयदित्यादिश्रुतिविरोधप्रसंगादितिचेन्न ॥ प्राकृतशब्दादिगुणनिषेधपरत्वोपपत्तेः ॥ अन्यथापूर्वोदाहृतबहुप्रमाणविरोधप्रसंगात् ॥ नन्वेवं तमोवाय्वादीनांसर्वात्मनानिरासः ॥ अदुःखमसुखमितिवदित्यक्षराधिकरणटीकाविरोधः ॥ तत्ररसगंधादीनांसर्वात्मनानिषेधस्योक्तेरितिचेदुच्यते ॥ सर्वात्मनानिरासइत्यस्यायमर्थः ॥ सर्वात्मनाऽनिरासोनिरासश्चेति॥ पदद्वयस्याप्यत्रतंत्रन्यायेनविवक्षितत्वात्॥ तथाचतमःशब्दोदिताज्ञानस्यदुःखस्यचसर्वात्मनानिवृत्तिः अप्राकृताज्ञानस्यदुःखस्यचप्रमाणविरुद्धत्वात् ॥ तदितरेषांवाय्वादीनांसर्वात्मनाऽनिरासः साकल्येनानिरासः ॥ अप्राकृतवाय्वादीनांपूर्वोदाहृतप्रमाणसिद्धत्वात् ॥ अन्यथाऽदुःखमसुखमितिवदितिदृष्टांतवाक्येदुःखवत्सुखस्यापिसर्वात्मनानिरासप्रसंगात् ॥ अतोदृष्टांतोक्तिबलात्पदद्वयमत्रविवक्षितमित्यलं ॥ इतिशब्दप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ बुद्धिंनिरूपयति॥ **बुद्धिर्ज्ञानमिति** ॥२७७॥ व्यवहर्तव्यज्ञानाभावेव्यवहारस्यैवासंभवादित्यर्थः॥ ईशादिस्वरूपाणांज्ञानात्मकत्वेप्रमाणंतुपूर्वमेवोक्तं॥ **अयथार्थंनित्यमिति** ॥२७८॥ तदुक्तंगीतातात्पर्ये ॥ अतोधमानांजीवानांमिथ्याज्ञानादयोखिलाः ॥ स्वाभाविकागुणाज्ञेयामर्त्यमध्येषुमिश्रिताइति ॥ **ब्रह्मवाय्वोरिति** ॥२७९॥ अत्रप्रमाणंतुपूर्वमेवोक्तमितिज्ञातव्यं ॥ **ईशलक्ष्मीति** ॥२८०॥ नन्वीशस्यस्मृतिः

---

२७७ बुद्धिर्ज्ञानं ॥ सर्वव्यवहारहेतुर्गुणः ॥ तच्चज्ञानंद्विविधं ॥ नित्यमनित्यंच ॥ पुनर्द्विविधं ॥ यथार्थमयथार्थंच ॥ तत्रयथार्थंनित्यज्ञानमीशलक्ष्मीसज्जीवस्वरूपं ॥ २७८ अयथार्थंनित्यंज्ञानमसज्जीवस्वरूपं ॥ अनित्यंयथार्थज्ञानंब्रह्मादिसर्वजीवानां ॥ अनित्यमयथार्थज्ञानंरुद्रादिसर्वजीवानाम् ॥ २७९ ब्रह्मवाय्वोःसरस्वतीभारत्योश्चनायथार्थज्ञानं ॥ पुनर्ज्ञानंद्विविधं ॥ अनुभवःस्मृतिश्चेति ॥ २८० ईशलक्ष्मीमुक्तानामनुभवएव ॥

ऋतोस्मरकृतंस्मरेतिश्रुतिसिद्धेतिचेन्न ॥ भक्तेष्वनुग्रहोन्मुखत्वस्यैवस्मरणशब्दार्थत्वेन संस्कारजन्यज्ञानस्याभावात् ॥ तदुक्तमीशावास्यभाष्ये ॥ भक्तानांस्मरणंविष्णोर्नित्यज्ञप्तिस्वरूपतः ॥ अनुग्रहोन्मुखत्वंतुनैवान्यत्क्वचिदिष्यतइति॥ नन्वेवंमुक्तानांस्मरणमवर्जनीयं ॥ आजन्ममरणंस्मृत्वामुक्ताहर्षमवाप्नुयुरितिछांदोग्यभाष्योक्तेरितिचेन्न ॥ पूर्वानुभूतपदार्थविषयकस्वरूपज्ञानत्वेनसंस्कारजन्यज्ञानरूपस्मरणस्यायोगात् ॥ संस्कारस्यमनोधर्मत्वेनमुक्तौमनोनाशेसंस्कारस्यापिनाशादित्यभिप्रायेणाह॥ **नत्विति** ॥ **स्मृतिर्ब्रह्मादीति** ॥ २८१ ॥ पूर्वानुभूतातीतादिविषयकज्ञानस्यस्मृतित्वसंभवादितिभावः ॥ इच्छतोविष्णुयजनंब्रह्मणःसाधनास्मृतेरितिबृहद्भाष्येनिषेधबलेनस्मरणरूपज्ञानस्यापिसंभवात् ॥ **ईशलक्ष्म्योरिति** ॥ २८२ ॥ विश्वतश्चक्षुरित्यादिश्रुत्यातज्ज्ञानस्यापरोक्षरूपत्वात् ॥ नन्वीश्वरोभक्तकृतस्तुतिंशृणोतिनवा ॥ नेतिपक्षेईश्वरस्यबधिरत्वापत्तिः ॥ आश्रुत्कर्णश्रुधीहवमितिश्रवणप्रार्थनानुपपत्तिः ॥ भागवतादौब्रह्मादिभिःस्तुतिकरणवैयर्थ्यंच ॥ यदिशृणोतितदातदर्थज्ञानंशाब्दरूपंप्राप्तमेवेतिचेन्न ॥ सर्वदासर्वविषयकापरोक्षज्ञानवत्त्वेनभक्तानुग्रहार्थंभक्तकृतस्तुतिश्रवणस्यांगीकारात् ॥ परंतुस्वस्मिन्ननुग्रहायभक्तेनस्तुतिःक्रियते ॥ नतुपरमात्मनोज्ञानंजन्यते ॥ अनुग्रहोन्मुखत्वंतुभविष्यतीतिनस्तुत्यादिवैयर्थ्यं ॥ **ब्रह्मादीनांत्विति** ॥ २८३ ॥ तदुक्तंभाष्ये ॥ शब्दोनुमातथैवाक्षोयोग्यताभेदतःसदा ॥ ब्रह्मादीनामेकमर्थंबहुधादर्शयंतिहीति ॥

---

२८१ नतुसंस्कारजन्यास्मृतिः ॥ स्मृतिर्ब्रह्मादिसर्वजीवानां ॥ अनुभवस्त्रिविधः ॥ प्रत्यक्षानुमितिशाब्दभेदात् ॥ २८२ ईशलक्ष्म्योःप्रत्यक्षरूपमेवज्ञानंनत्वनुमितिर्नवाशाब्दं ॥ २८३ ब्रह्मादीनांतुत्रिविधमपिज्ञानं ॥

इतिबुद्धिप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ सुखंनिरूपयति ॥ **सर्वैरिति** ॥ २८४ ॥ सुखमेवमेस्याद्दुःखंमनागपिमाभूदितिनिखिलै रर्थ्यमानत्वादित्यर्थः ॥ **नित्यमीशलक्ष्मीति** ॥ २८५ ॥ आनंदोब्रह्मेतिव्यजानादित्यादिपूर्वोदाहृतप्रमाणान्यत्रानुसंधेया नि ॥ नन्वेवंसर्वेषामपिसुखवत्त्वेसाम्यमेवस्यादित्यतआह ॥ **उभयमपीति** ॥ २८६ ॥ स्वरूपसुखंबाह्यसुखंचेत्युभयमित्य र्थः ॥ सुखादितारतम्यंचसाधनप्रकरणेवक्ष्यामः ॥ **नित्यसंसारिणामिति** ॥ २८७ ॥ स्वरूपंयुगपदेवसुखदुःखात्मकं ॥ बाह्यंसुखंदुःखंचक्रमेणसुखदुःखमिश्रमित्यर्थः ॥ संसारावस्थायामेवेति ॥ अंधेतमसिस्वरूपदुःखस्यैवानुभवेनतत्रसुखलेशाभा वात् ॥ तच्चोत्तरत्रतमोयोग्यप्रकरणेवक्ष्यते ॥ मुक्तियोग्यानांसुखवत्तमोयोग्यानामपिसुखंनैकप्रकारमित्याह ॥ तारतम्योपे तमिति ॥ इतिसुखप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ दुःखंनिरूपयति ॥ **प्रतिकूलतयेति** ॥ **नित्यंदुःखमिति** ॥ २८८ ॥ निरामिणोरिपवोन्नेषुजागृधुरित्यादिश्रुतेरित्यर्थः ॥ तारतम्योपेतमिति ॥ तदुक्तंनिर्णये ॥ असुराःकलिपर्यंताएवंदुःखोत्तरोत्त राः ॥ कलिर्दुःखाधिकस्तेषुतेप्येवंब्रह्मवद्गणाइति ॥ इतिदुःखप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ इच्छांनिरूपयति ॥ **कामइति** ॥

---

२८४ सर्वैरनुकूलतयावेदनीयंसुखं ॥ तद्विविधं ॥ नित्यमनित्यंच ॥ २८५ नित्यमीशलक्ष्मीसज्जीवस्वरूपं ॥ अनित्यंसुखंब्रह्मादिसर्वजीवानांसंसा रावस्थायामेव ॥ २८६ उभयमपिज्ञानवद्बहुतारतम्योपेतं ॥ २८७ नित्यसंसारिणांतुदुःखमिश्रंसुखं ॥ तमोयोग्यानामनित्यंसुखंसंसारावस्थाया मेव ॥ तारतम्योपेतं ॥ २८८ प्रतिकूलतयावेदनीयंदुःखं ॥ तदपिनित्यानित्यभेदेनद्विविधं ॥ नित्यंदुःखंतमोयोग्यानांस्वरूपंतारतम्योपेतं ॥ नित्यसंसारिणांसुखमिश्रंदुःखंस्वरूपभूतं ॥ अनित्यंदुःखंसर्वजीवानां ॥

तत्रादुष्टनित्येच्छेति ॥ २८९ ॥ सोकामयतेत्यादिपूर्वोदाहृतश्रुतेरित्यर्थः ॥ सज्जीवस्वरूपेति ॥ मुक्तावपिजीवानांकामना सद्भावादित्यर्थः ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐ संकल्पादेवचतच्छ्रुतेः ॐ ॥ सयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःस मुत्तिष्ठंते ॥ कामेनमेकामआगात् ॥ कामान्नीकामरूपीत्यादिश्रुतयश्च ॥ कामानुकूलकामत्वंनान्यत्तेषांविधीयतइतिभाष्यं च ॥ इतीच्छाप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ द्वेषंनिरूपयति ॥ क्रोधइति ॥ नित्यःक्रोधइति ॥ २९० ॥ नचक्रोधस्यदो षस्वरूपत्वात्कथमीश्वरेक्रोधइतिवाच्यं ॥ तमोयोग्येषुक्रोधस्यसज्जीवेक्षमात्मकत्वेनविरोधाभावात् ॥ तदुक्तंबृहद्भाष्ये ॥ क्रो धःक्षमात्मकोयस्यचिदानंदात्मकस्तथा ॥ अन्यक्रोधसमक्रोधस्तस्यविष्णोःकथंभवेत् ॥ सर्वदुष्टप्रतीपत्वात्सहिक्रोधमयोमतइ ति ॥ निर्णयेपि ॥ यस्यप्रसादजोब्रह्मारुद्रश्चक्रोधसंभवइति ॥ नचैवंरामस्यसज्जनेसमुद्राभिमानिनिवरुणेक्रोधउक्तोनिर्णये कथं ॥ रात्रित्रयेप्यनुपगामिनमीक्ष्यसोब्धिचुक्रोधरक्तनयनांतमयुंजदब्धौ ॥ सक्रोधदीप्तनयनांतहतःपरस्यशोषंक्षणादुपगतो दनुजादिसत्वैरितिवाच्यं ॥ अज्ञानमिथ्याज्ञानप्रवर्तके वरुणशरीरप्रविष्टे दैत्यएवभगवतःक्रोधस्वीकारात् ॥ अतएवोत्तरत्र तंत्वावयंजडधियोनविदामभूमन्नित्यज्ञानस्योक्तेः ॥ नचैवंप्रलयकालेब्रह्मादिषु यद्रोषोत्करदक्षनेत्रकुटिलप्रांतोत्थिताग्निस्फुर

२८९ कामइच्छा ॥ साद्विविधा ॥ नित्यानित्यभेदात् ॥ दुष्टादुष्टभेदेनपुनर्द्विविधा ॥ तत्रादुष्टनित्येच्छाईशलक्ष्मीसज्जीवस्वरूपभूता ॥ अदुष्टाऽनित्येच्छासर्वजीवानांसंसारे ॥ नित्यदुष्टेच्छातमोयोग्यस्वरूपा ॥ अनित्यदुष्टेच्छारुद्रादिसर्वजीवानां ॥ ब्रह्मवायुतत्स्त्रीणांतुनासद्विषयेच्छा ॥

२९० क्रोधोद्वेषः ॥ सद्विविधः ॥ नित्यानित्यभेदात् ॥ नित्यःक्रोधईशलक्ष्मीसर्वजीवानांस्वरूपं ॥ अनित्यःसंसारिजीवानांबाह्यः ॥

त्वद्योतोपमविस्फुलिंगभसिताब्रह्मेशशक्रोत्कराइतिनृसिंहक्रोधविषयत्वंकथमितिवाच्यं ॥ ब्रह्मेशानादिशब्दानांतत्तन्नामकदैत्यपरत्वेनब्रह्मरुद्रादिपरत्वाभावात् ॥ नचब्रह्मेंद्रादिशब्दवाच्यादैत्याएवनसंतीतिवाच्यं ॥ दीनत्वाद्देवनामानस्त्वन्येब्रह्मादिनामकाः ॥ अवैष्णवकृतोयज्ञोदीनैर्देवैश्चभुज्यतइतिगीतातात्पर्यविरोधप्रसंगात् ॥ इतिद्वेषप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ प्रयत्नंनिरूपयति ॥ **प्रवृत्तिरिति** ॥ **नित्यःप्रयत्नइति** ॥ २९१ ॥ कर्तृत्वान्यथानुपपत्त्याज्ञानवत्प्रयत्नस्यापिवक्तव्यत्वात् ॥ तार्किकास्तु बुद्ध्यादयःप्रयत्नांताआत्मविशेषगुणाइतिमन्यंते ॥ तान्निराकरोति ॥ **बुद्ध्यादीति** ॥ २९२ ॥ बुद्धेर्मनोधर्मत्वेप्रमाणंतु सूत्रंभाष्यंच ॥ ॐ पंचवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ मनोबुद्धिरहंकारश्चित्तंचेतनेति ॥ कामस्यापिमनोगतत्वमुक्तंगीतायां ॥ प्रजहातियदाकामान्सर्वान्पार्थमनोगतानिति ॥ कामायेस्यहृदिस्थिताः ॥ कामःसंकल्पोविचिकित्साश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतयः॥दुःखितेमनसिसर्वमसह्यमित्युक्तेर्दुःखमपिमनोगतमेव ॥ खिद्यतेमेमनइत्यादिभागवतप्रयोगाच्च ॥ दुःखितंमेमनइत्यनुभवाच्च ॥ संतुष्टंमेमनइत्यनुभवात्सुखमपिमनोधर्मः ॥ किंचमनसःकामादिकंप्रत्युपादानकारणत्वात्कामादयोमनोगताः ॥ तदुक्तंसांख्याधिकरणसुधायां ॥ ईश्वरोंतःकरणंस्पष्टंदृष्टातत्रज्ञानेच्छाप्रयत्नरूपावृत्तीःस्वेच्छाज्ञानप्रयत्नैरुत्पाद्येति ॥ मनसस्तुकामंप्रत्युपादानत्वमेव ॥ अंतःकरणस्यैवकामोपादानत्वेनांगीकृतत्वादित्यादि ॥ नन्वेवंज्ञाने

२९१ प्रवृत्तिःप्रयत्नः ॥ नित्यानित्यभेदात्सोपिद्विविधः ॥ नित्यःप्रयत्नईशलक्ष्मीसर्वजीवानांस्वरूपं ॥ अनित्यःप्रयत्नःसंसारिणां ॥ २९२ बुद्ध्यादिप्रयत्नांतंमनोधर्मएवानित्यं ॥

च्छादीनामंतःकरणधर्मत्वेइदमहंजानामीच्छामिसुखीदुःखीत्यादिप्रत्यक्षविरोधःस्यादितिचेन्न ॥ देवदत्तोधनीगोमानित्यादिप्रत्ययवत्तत्स्वामित्वेनाप्युपपत्तेरित्याह ॥ **तत्स्वामित्वादिति** ॥ २९३ ॥ तदुक्तंसमयपादीयानुव्याख्याने ॥ इच्छास्वामित्वमेवोक्तमिच्छावत्त्वंनचापरं ॥ किंचित्तद्वशगत्वेपिस्वामित्वंलोकवद्भवेदिति ॥ यत्तूक्तंतार्किकैः ॥ ज्ञानेच्छाप्रयत्नाःसंख्यादयःपंचचेश्वरगुणाः ॥ नसुखमिति ॥ तन्न ॥ आनंदंब्रह्मणोविद्वान् ॥ आनंदोब्रह्मेतिव्यजानादित्यादिश्रुतिविरोधप्रसंगात् ॥ नचेश्वरस्यसुखित्वेदुःखित्वंस्यादितिवाच्यं ॥ तद्व्याप्तेरनित्यसुखादिविषयत्वात् ॥ अन्यथाज्ञानादेःशरीरव्याप्तत्वेनत्वयेश्वरेशरीरानंगीकारेणज्ञानाद्यसिद्धिप्रसंगात् ॥ नचकर्तृत्वान्यथानुपपत्त्याज्ञानादिकमंगीक्रियते नसुखमितिवाच्यं ॥ चेतनत्वान्यथानुपपत्त्यासुखस्याप्यंगीकार्यत्वात् ॥ ज्ञानमात्रेणापिकर्तृत्वोपपत्ताविच्छाद्यसिद्धिप्रसंगात् ॥ इतिप्रयत्नप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ धर्माधर्मौनिरूपयति ॥ **धर्माधर्माविति** ॥ २९४ ॥ अत्रपुण्यपापेकिंपूर्वोक्तगुणवदीशलक्ष्म्योस्तइत्यपेक्षायांनेत्याह ॥ **तत्रेशलक्ष्म्योरिति** ॥ २९५ ॥ नकर्मणावर्धतेनोकनीयानितिश्रुतेः ॥ सकारयेत्पुण्यमथापिपापंनतावतादोषवानीशितापीतिच ॥ नमेपार्थास्तिकर्तव्यंत्रिषुलोकेषुकिंचन ॥ नानवाप्तमवाप्तव्यंवर्तएवचकर्मणि ॥ नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहेतिगीता ॥ अपहतपाप्मेत्यादिश्रुतेः ॥ **नित्यंपुण्यमिति** ॥ २९६ ॥ ननुब्रह्मादीनांस्व

२९३ तत्स्वामित्वात्तदनुभवितृत्वाज्जीवस्य ॥ २९४ धर्माधर्मौपुण्यपापे ॥ नित्यानित्यभेदेनतौद्विविधौ ॥ पुनर्द्विविधौ ॥ अल्पमहद्भेदात् ॥ अनित्यौद्विविधौ ॥ काम्यकर्मजाकाम्यकर्मजभेदात् ॥ २९५ तत्रेशलक्ष्म्योःपुण्यपापसंबंधएवनास्ति ॥ २९६ नित्यंपुण्यंब्रह्मादिसज्जीवस्वरूपं ॥

रूपपुण्यसद्भावेमानाभावइत्यतआह ॥ ज्ञानोत्तरेति ॥ २९७ ॥ अयमाशयः ॥ सर्वेषांमोक्षयोग्यानांमोक्षआनंदा
तिशयस्तावद्वक्ष्यमाणरीत्यासिद्धः ॥ सचज्ञानोत्तरभाविनिवृत्तकर्मोपासनादिसाधनैर्भवति ॥ येषांज्ञानंसमुत्पन्नंतेषांमो
क्षोविनिश्चितः ॥ शुभकर्मभिराधिक्यंविपरीतैर्विपर्ययइत्यादिप्रमाणसिद्धत्वात् ॥ तथाचज्ञानोत्तरभाविकर्मजन्यं मोक्षआ
नंदातिशयकारणंपुण्यं नांतःकरणनिष्ठं ॥ मोक्षेंऽतःकरणस्यविनाशेनतस्यापिविनाशेमोक्षआनंदातिशयोनस्यात् ॥ नापिजी
वस्वरूपउत्पद्यतइतिवक्तुंयुक्तं॥ उपादानाभावात् ॥अतःस्वरूपमेवपुण्यंज्ञानोत्तरभाविसत्कर्मणाभिव्यज्यतइत्येवांगीकर्तव्यं ॥
प्रकारांतराभावात् ॥ नचज्ञानोत्तरभाविकर्मणेश्वरप्रसादोभवति नपुण्यमितिवाच्यं ॥ तर्हिजीवेषुपुण्यपापमात्रविलयप्रसंगा
त् ॥ केचित्तु ॥ पुण्यपापेंऽतःकरणधर्मो ॥ नतुजीवस्येत्याहुः ॥ तन्न ॥ज्ञानोत्तरभाविपुण्यपापयोर्जीवधर्मत्वस्यैववक्तव्यत्वा
त् ॥ ज्ञानात्पूर्वभाविपुण्यपापानामपिजीवधर्मत्वेबहुप्रमाणसद्भावात् ॥ तदुक्तंभक्तिपादियानुव्याख्याने ॥ सएवाशेषजीवस्थ
निःसंख्यानादिकालिकान् ॥ धर्माधर्मान्सदापश्यन्स्वेच्छयाबोधयत्यजः ॥ कर्माणितानिचपृथक्चैतन्येपिचसर्वशइति ॥ सुधा
यामपि ॥ तानीति ॥ अशेषजीवस्थेत्याद्युक्तविशेषणानि ॥ पृथगिति ॥ एकैकधर्माधिष्ठातृभूतानीति ॥ नयचंद्रिकायामपि ॥
कर्माभिमानिषुपृथक्चेतनानिकर्माणिसंतीति ॥ अकाम्यकर्मजन्यपुण्यस्यप्रयोजनमाह ॥ ज्ञानात्पूर्वभावीति ॥ २९८ ॥ क

२९७ ज्ञानोत्तरभाविसत्कर्मणाभिव्यज्यते ॥ मोक्षेआनंदातिशयहेतुः ॥ अनित्यंपुण्यंसर्वजीवानांबाह्यं ॥ काम्यकर्मजमकाम्यकर्मजंच ॥
२९८ ज्ञानात्पूर्वभाव्यकाम्यकर्मजंपुण्यमपरोक्षज्ञानहेतुरंतःकरणशुद्धिद्वारा ॥

र्मणाज्ञानमातनोतीत्यादिश्रुतेः ॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइतिगीतायामुक्तेश्च ॥ अंतःकरणशुद्धिद्वारेति ॥ तदुक्तंगी ताभाष्ये ॥ अकामकर्मणामंतःकरणशुद्ध्याज्ञानान्मोक्षोभवति ॥ कर्मणाशुद्धसत्त्वस्यवैराग्यंजायतेहृदीतिभागवते ॥ विरक्ता नामेवचज्ञानमुक्तामिति ॥ काम्यकर्मजंपुण्यमिति ॥ २९९ ॥ स्वर्गधनादेहतोवैगृहाच्च ॥ दर्शपोर्णमासाभ्यांस्वर्गकामोय जेतेत्यादिश्रुतेः ॥ भाष्येपि ॥ स्वर्गादयःकर्मणैवनान्येनेत्यपरेविदुरिति ॥ अनिष्टपुण्यस्येति ॥ ३०० ॥ अपरोक्षज्ञानात्पूर्वंसुखदुः खाद्यनुभवस्यकर्मसाध्यत्वादितिभावः ॥ कस्यचिदपरोक्षज्ञानेनेति ॥ ३०१ ॥ यदापश्यःपश्यतेरुक्मवर्णंकर्तारमीशंपुरुषंब्र ह्मयोनिं ॥ तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैतीति ॥ तद्यथेषीकातूलमग्नौप्रोतंप्रदूयतएवंहैवास्यसर्वेपाप्मानःप्रदू यंतइतिश्रुतेः ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिगीता ॥ अपरोक्षज्ञानेनकर्मनाशोपिबहुप्रकारः ॥ केषांचित्पुण्यानां सुहृद्भ्योदानं ॥ केषांचिज्ज्ञानेनविनाशइति ॥ तदुक्तंभाष्ये ॥ तस्यपुत्रादायमुपयंति सुहृदःसाधुकृत्यां द्विषंतःपापकृत्यामिति ॥ नचपुण्यपापयोर्मूर्तद्रव्यत्वाभावात्कथंसुहृदादिभ्योदानमितिवाच्यं ॥ अनेनपुण्येनयदैहिकामुष्मिकसुखादिफलंजायते तत्फलंत वैवस्यादित्यनुसंधानस्यैवपुण्यदानशब्दार्थत्वात् एवंपापदानमपि ॥ केषांचित्स्वरूपतएवनाशेश्रुतेःपूर्वमेवोक्तत्वादितिबोध्यं ॥ न न्वेवंपुण्यपापयोर्विनाशउत्पत्तिर्वक्तव्या ॥ साचानुपपन्ना ॥ जीवाश्रितत्वपक्षउपादानाभावादितिचेन्न ॥ नीचोच्चत्वादिवज्जीवस्व

२९९ काम्यकर्मजंपुण्यमनित्यंस्वर्गादिकाम्यफलहेतुः ॥ पुनरनित्यंद्विविधं ॥ इष्टानिष्टभेदात् ॥ ३०० अनिष्टपुण्यस्यकस्यचिद्भोगेननाशः ॥ ३०१ कस्यचिदपरोक्षज्ञानेननाशः ॥

रूपस्यैवोपादानत्वात् ॥ नचनीचोच्चत्वयोर्नजीवधर्मत्वमितिवाच्यं ॥ नीचोच्चतैवदुःखादेर्भोगइत्यभिधीयते ॥ नासौनीचोच्चतां
यातीतिभाष्यविरोधात् ॥ तथाचमूलप्रकृत्युपादानकमहदादेर्विनाशेपियथाप्रकृतेर्नविनाशस्तथाजीवस्वरूपपरिणामस्यपुण्या
देर्नाशेपिनजीवस्वरूपस्यनाशइति ॥ तदुक्तंसमयपादेजैनाधिकरणसुधायां ॥ आत्मनोन्यथाभावोस्त्येव ॥ सुखदुःखाभ्यामु
च्चनीचत्वाभ्युपगमात् ॥ अन्यथाभाववतोप्यात्मनोनानित्यताप्रसज्यतइत्यादि ॥ जिज्ञासाधिकरणसुधायामपि ॥ दुःखादी
न्सत्यानेवात्मीयत्वेनापश्यंस्तत्कृतेनीचोच्चत्वलक्षणेविकृतिसत्येएवप्रतिपद्यतइति ॥ नन्वपरोक्षज्ञानेनसर्वस्यापिकर्मणोनाशइ
ष्टकर्मणोपिनाशःस्यादित्यतआह ॥ इष्टपुण्यस्येति ॥ ३०२ ॥ तदुक्तंगीताभाष्ये ॥ पुण्यमनिष्टं ॥ नहीष्टनाशःपुरुषार्थ
इति ॥ टीकायामपि ॥ अनिष्टपुण्यस्यज्ञानेनविनाशः ॥ इष्टपुण्यस्यतुननाशइति ॥ नन्विष्टपुण्यस्यज्ञानेननाशाभावेतस्यकु
त्रोपयोगः ॥ अपरोक्षज्ञानिनांभोगनिमित्तानांकर्मणांसद्भावेप्रयोजनाभावादित्यतआह ॥ ज्ञानोत्तरमिति ॥ पूर्वतनस्येष्टपुण्य
स्यापरोक्षज्ञानिनःप्रारब्धानुभवकालएवभोगइतिकेचित् ॥ अपरेत्विष्टपुण्यंज्ञानोत्तरभाविपुण्यवन्मोक्षेआनंदातिशयहेतुरित्या
हुः ॥ तत्रप्रथमपक्षस्तुनयुक्तः ॥ तस्यतावदेवचिरं यावन्नविमोक्ष्येऽथसंपत्स्यतइतिश्रुतेरपरोक्षज्ञानिनःप्रारब्धानुभवानं
तरमेवाविलंबेनमोक्षप्रतिपादनात् ॥ टीकायामपि अथेतिनियमसूचकः ॥ प्रारब्धभोगानंतरमेवाविलंबेनमुक्तिरिति ॥ किंच
ममभोक्षेवस्त्रवनितादिविषयभोगःस्यादितीच्छयाकृतस्येष्टकर्मणोमोक्षात्पूर्वंभोगहेतुत्वासंभवात् ॥ तादृशानिकर्माणिचछांदो

३०२ इष्टपुण्यस्यज्ञानेननाशः ॥ ज्ञानोत्तरंमोक्षेवाभोगानुकूलं ॥ पुनःकाम्यपुण्यंद्विविधं ॥ प्रारब्धमप्रारब्धंचेति ॥

ग्यभाष्यादावुक्तानि ॥ प्राणस्यवस्त्रबुद्ध्यातुभोजनोभयतःपिबन् ॥ स्वर्गमुक्तौतथादिव्यवस्त्रलाभीभवत्यलमिति ॥ द्वितीयपक्ष
स्तुयुक्तएव ॥ नहिमोक्षेनियमोस्ति ॥ अपरोक्षज्ञानानंतरभाविकर्मणएवमोक्षआनंदातिशयहेतुत्वं नतुज्ञानात्पूर्वभावीष्टकर्म
णइति येनतस्यमोक्षेऽनुस्यूतिर्नस्यात् ॥ तदुक्तंगीताभाष्ये ॥ सुकृतमप्यप्रियंमानुष्यादिफलंजहाति ॥ नबृहत्फलमुपासनादि
निमित्तं ॥ नहास्यकर्मक्षीयते ॥ नहीष्टपुण्यक्षयेकिंचित्प्रयोजनं ॥ नचेष्टनाशोज्ञानिनोयुक्तः ॥ इष्टाश्चकेचिद्विषयाः ॥ सय
दिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंते ॥ प्रजापतेःसभांवेश्मप्रपद्ये ॥ यशोहंभवानिब्राह्मणानां ॥ स्त्रीभि
र्वायानैर्वा ॥ अस्माद्ध्येवात्मनोयद्यत्कामयतेतत्तत्सृजतेकामान्नीकामरूप्यनुसंचरन्निति ॥ नचैतत्सर्वंज्ञानोत्तरभाविपुण्यविषयकं
॥ नतुज्ञानात्पूर्वभावीष्टपुण्यविषयकमितिवाच्यं ॥ नचेष्टनाशोज्ञानिनोयुक्तइतिज्ञानात्पूर्वभावीष्टकर्मणोपरोक्षज्ञानेनानाशमु
क्त्वाइष्टाश्चकेचिद्विषयाइतीष्टविषयान्सामान्येनोक्त्वा सयदिपितृलोककामोभवतीतिमोक्षगतविषयोक्तेः ॥ किंच नहा
स्यकर्मक्षीयते अस्माद्ध्येवात्मनोयद्यत्कामयतेतत्तत्सृजतइतिज्ञानानाश्यकर्मफलस्योक्तेः ॥ नचैतद्वाक्यंज्ञानोत्तरभाविकर्मवि
षयमितिवाच्यं ॥ नहास्यकर्मक्षीयतइतिज्ञानानाश्यत्वोक्तेः ॥ नहिज्ञानोत्तरभाविकर्मणोज्ञाननाशप्रसक्तिरस्ति ॥ येनज्ञाना
नाश्यत्वंप्रतिपादयेत् ॥ प्रमेयदीपिकायामपीदंभाष्यंव्याख्यातं ॥ तथाहितद्वाक्यानि ॥ युक्तिविरुद्धंचज्ञानिनःसर्वसुकृतहानं
॥ तथाहि ॥ उपासनादिजनितंसुकृतंज्ञानिनःकिमिष्टमुतानिष्टं ॥ आद्येकिंतत्तदिच्छयाक्षीयते उतज्ञानस्वभावात् ॥ आद्यं
दूषयति ॥ नहीति ॥ द्वितीयंनिराकरोति ॥ नचेति ॥ ज्ञानस्यापुरुषार्थत्वप्रसंगादितिभावः ॥ नांत्यः ॥ अनिष्टत्वेकारणा

भावात् ॥ निष्फलत्वादनिष्टमित्यतआह ॥ इष्टाश्चेति ॥ केचिदित्यलौकिकाः ॥ मुक्तावलौकिकाविषयाभवंति ॥ तत्प्राप्तिःसु
कृतफलमितिभावइत्यादि ॥ सूत्रेभाष्येपि ॥ ॐ अतोन्यदपीत्येकेषामुभयोः ॐ ॥ मुक्तावनुभवकारणादन्यत्पुण्यमपिविनश्य
ति ॥ अनारब्धमनभीष्टंचेति ॥ अत्रमुक्तावनुभवकारणान्यस्यकर्मणोविनाशोक्ताविष्टकर्मणोमुक्तावनुभवकारणत्वमायातमेव ॥
टीकायामपि ॥ यदकाम्यपुण्यतोन्यत्पूर्वोत्तरकाम्यंपुण्यंतदपिविनाशाश्लेषौप्राप्नोतीत्यादि ॥ प्रारब्धस्यस्वरूपमाह ॥ भो
क्तुमारब्धमिति ॥३०३॥ अनादौसंसारेसर्वैरपिनानाशरीरकारणान्यनंतानिकर्माणिसंपादितानि ॥ तानिसर्वाणिक्रमेणभोक्त
व्यानि ॥ तत्रैकस्यकर्मणोभोगकालेसाधनसंपत्तितईश्वरेच्छयाऽपरोक्षज्ञानेजातेतत्कर्मप्रारब्धं भोक्तुमारब्धत्वादित्यर्थः ॥ ननुज्ञा
नेनसर्वकर्मनाशेसतिप्रारब्धस्यापिनाशोस्तिनवा ॥ नेतिपक्षेऽपरोक्षज्ञानिनांमोक्षाभावप्रसंगः ॥ बंधकप्रारब्धकर्मसद्भावात् ॥
नाद्यः ॥ प्रारब्धकर्मणोन्यस्यज्ञानादेवपरिक्षयइत्यणुभाष्यविरोधात् ॥ अनभीष्टमनारब्धंपुण्यमस्याविनश्यतीत्यादिभाष्यवि
रोधप्रसंगाच्चेत्यतआह ॥ महतःप्रारब्धस्येति ॥ ३०४ ॥ महत्पदप्रयोजनमनुपदमेववक्ष्यते ॥ तथाचप्रारब्धकर्मणोपिभोगे
ननाशान्नज्ञानिनोमोक्षाभावप्रसंगइतिभावः ॥ ब्रह्मादिसर्ज्जीवानामिति ॥ ३०५ ॥ ब्रह्मपदयोग्यानामृजूनांशतब्रह्मक
ल्पात्पूर्वमपरोक्षज्ञानस्यवक्ष्यमाणत्वाज्ज्ञानोदयमारभ्यशतब्रह्मकल्पपर्यंतंप्रारब्धस्यैवभोगादित्यर्थः ॥ सर्वस्यापिप्रारब्धस्यभोगे

---

३०३ भोक्तुमारब्धंप्रारब्धं ॥ संचितंभोक्तव्यमप्रारब्धं ॥ ३०४ महतःप्रारब्धस्यपुण्यस्यभोगेनैवनाशः ॥ ३०५ ब्रह्मादिसज्जीवानां
अल्पस्यप्रारब्धस्यज्ञानेनविनाशः ॥

नैवनाशइतिननियमः ॥ किंत्वल्पस्यप्रारब्धस्यापिज्ञानेननाशइत्याह ॥ अल्पस्येति ॥ तदुक्तंप्रथमस्कंधतात्पर्ये ॥ ज्ञानिनांप्रारब्धस्यनिर्मथनंयोग्यस्य ॥ महताकारणेनैवप्रारब्धान्यपिकानिचित् ॥ कर्माणिक्षयमायांतिब्रह्मदृष्टिमतःक्वचिदिति ॥ षष्ठस्कंधतात्पर्येपि ॥ प्रारब्धमपिचक्वापिकिंचिद्विघटितंभवेदिति ॥ भाष्येपि ॥ आरब्धयोश्चनाशःस्यादल्पयोःपुण्यपापयोरिति ॥ अल्पफलरूपोपमर्दोपि ॥ पापप्रारब्धस्यापीति ॥ ३०८ ॥ रुद्रादयोदेवास्तावदपरोक्षज्ञानिनः ॥ अन्यथारुद्रादिपदानुपपत्तेः ॥ नैवदेवपदंप्राप्ताब्रह्मदर्शनवर्जिताइतिगीतातात्पर्योक्तेः ॥ तेषांमूलरूपेअश्वत्थामार्जुनाद्यवताररूपेषुचदुःखादिकंदृश्यते ॥ तच्चपापादिप्रारब्धफलमित्यर्थः ॥ नचरुद्रादीनामिदानींतनकर्मैवदुःखजनकं ॥ नतुप्रारब्धकर्मेतिवाच्यं ॥ तस्यप्रारब्धेनैवावश्यंभावीदानींतनदुःखस्येदानींतनकर्मणःसूचकत्वेनकारणत्वाभावात् ॥ तदुक्तंषष्ठस्कंधतात्पर्ये ॥ प्रारब्धकर्मणैवैषां क्लृप्तदुःखस्यसूचकं ॥ इदानींतनकर्मस्याद्व्रणहेतुर्यथारणइति ॥ निर्णयेपि ॥ ब्रह्मापरोक्षेपिविकर्मसूचकंप्रारब्धपापस्यविपाशनं यथेति ॥ प्रथमतात्पर्येपि ॥ ज्ञानादिव्यक्तिरव्यक्तिःसुखदुःखादिकंतथा ॥ सुदृष्टब्रह्मतत्वानांभवंत्यारब्धकर्मणेति ॥ ननुरुद्रे रुद्रादीनांमूलरूपेबल्यादिभिर्युद्धेनमूर्च्छादिदुःखं इंद्रस्यवृत्रासुरहननेनब्रह्महत्याप्रयुक्तकमलनालप्रवेशदुःखं शेषस्यलक्ष्मणावतारेरावणयुद्धेमूर्च्छादिदुःखं रुद्रस्याश्वत्थामावतारेशिरोरत्नोन्मूलनेनदुर्गंधयुक्तव्रणसंचितांगदुःखं इंद्रस्यार्जुनावतारेस्वपुत्रबभ्रुवाहनयुद्धेनमूर्च्छादिदुःखंच निर्णयइदानींतनकर्मसाध्यमितिप्रतीयते ॥ तत्कथंप्रारब्धकर्मणैवेत्युक्तमितिचेन्न ॥ निरवकाश

---

३०८ पापप्रारब्धस्यापिभोगेननाशोरुद्रादिसर्वजीवानां ॥

तात्पर्यप्रमाणबलेनेदानींतनकर्मणांप्रारब्धकर्मफलदुःखसूचकत्वस्यैववक्तव्यत्वाच्छाकुनवत्स्वाप्ननिदर्शनवच्चेति ॥ रुद्रादिसर्वजीवानामिति ॥ अनेनब्रह्मवायुतद्भार्याणांसुखप्रारब्धमेवनतुदुःखप्रारब्धं ॥ तेषामनादिकालतःपापप्रसक्तेरेवाभावात् ॥ नभारतीमेंगमृषोपलभ्यतइत्यादिभागवतप्रमाणस्योदाहृतत्वादितिभावः ॥ नित्यपापस्योदाहरणमाह ॥ **नित्यंपापमीषदिति** ॥ ३०७ ॥ पापोहंपापकर्माहंपापात्मापापसंभवइत्यादिपुराणवाक्यात्स्वरूपस्यापिकिंचित्पापत्वप्रतीतेरितिभावः ॥ नचपापोहमित्यस्यार्शआद्यच्प्रत्ययेनपापवत्त्वमर्थइतिवाच्यं ॥ पापकर्मेत्यनेनपौनरुक्त्यापत्तेः ॥ नचपापकर्मेत्यस्यपापक्रियावत्त्वमर्थः पापोहमित्यस्यपापक्रियाजन्याधर्मवत्त्वमर्थोऽतोनपौनरुक्त्यमितिवाच्यं ॥ पापात्मेत्यनेनपौनरुक्त्यापत्तेः ॥ नचात्मशब्दस्यांतःकरणपरत्वमितिवाच्यं ॥ पुण्यपापयोर्जीवधर्मत्वेनांतःकरणधर्मवत्त्वाभावात् ॥ अन्यथारुद्रेंद्रचंद्रपदयोग्यानांजातापरोक्षज्ञानिनांपंचाशद्विंशतिदशब्रह्मकल्पपर्यंतंप्रारब्धानुभवाभावप्रसंगात् ॥ ब्रह्मप्रलयेंतःकरणनाशात् ॥ नचलिंगशरीरस्थांतःकरणधर्मत्वमितिवाच्यं ॥ प्रमाणाभावात् ॥ प्रारब्धकर्मशेषस्तुविरजातरणावधिरित्यादिवचनानांस्वरूपांतःकरणगतप्रारब्धविषयत्वसंभवात् ॥ अस्तुवांतःकरणधर्मत्वमपरोक्षज्ञानात्पूर्वभाविपुण्यपापयोः ॥ अथापिमोक्षआनंदातिशयानंदह्रासकारणयोःपुण्यपापयोर्ज्ञानानंतरमनुष्ठितयोर्जीवस्वरूपत्वमेवांगीकर्तव्यं ॥ मोक्षेंतःकरणभावादित्याह ॥ तच्चेति ॥ **श्रेष्ठापराधादिति** ॥ ३०८ ॥ श्रेष्ठापराधव्यतिरिक्तस्यापरोक्षज्ञानिनोश्लेषात् ॥ तदुक्तंनिर्णये ॥ श्रेष्ठापराधान्ना

३०७ नित्यंपापमीषद्रुद्रादिसज्जीवस्वरूपं ॥ ३०८ तच्चश्रेष्ठापराधादपरोक्षज्ञानानंतरमभिव्यज्यते ॥

न्यदोषस्यलेपस्तेजीयसामिति ॥ श्रेष्ठापराधस्यप्रयोजनमाह ॥ **मुक्तावधिकानंदस्येति** ॥ ३०९ ॥ तदुक्तंज्ञानपादीयानुव्याख्याने ॥ देवानामपिनप्रायःक्लृप्तस्यतुकथंचन ॥ प्राप्तह्रासोभवेत्क्वापिमहताचविकर्मणा ॥ तथापितत्क्लृप्तमेवतस्मान्ननियमोज्झितिः ॥ चंद्रसुग्रीवयोश्चैवस्वोच्चदारपरिग्रहात् ॥ प्राप्तहानिरभून्नैवक्लृप्तहानिःकथंचनेति ॥ अत्रप्राप्तशब्दःप्राप्तव्यपरः ॥ तथाचयेनदेवेनस्वयोग्यपरिपूर्तयेयावत्साधनमनुष्ठेयं ततोतिरिक्तेनसाधनेनानुष्ठितेनयदधिकानंदादिकंप्रसक्तं तस्याभावःस्वोत्तमापराधादिनाभवेत् ॥ नतुज्ञानोत्तरभाविकर्मादिनायआनंदाद्यतिशयोयोग्यो नतस्यहानिरितिसुधायां सन्न्यायरत्नावल्यां चोक्तं ॥ नन्वेवंयेनदेवेनस्वयोग्यानंदातिशयातिरिक्तातिशयायसाधनमनुष्ठितं पुनश्चतद्ध्रासकारणस्वोत्तमापराधादिविकर्मचनकृतं तस्यदेवस्यमोक्षेस्वयोग्यातिरिक्ताधिकानंदाभिवृद्धिःस्यात् ॥ तथाचमोक्षेतारतम्यानुपपत्तिरितिचेन्न ॥ तेषांस्वयोग्यतातिरिक्ताधिकानंदार्थंप्रयत्नस्यैवाभावात् ॥ कथंचित्संभवेपितद्विघातकमहात्मद्रोहोनियतएवभवेत् ॥ तदुक्तं स्वाधिकाराधिकोयत्नःकथंचिन्नोपपद्यते ॥ कथंचिदधिकेयत्नेदोषःकश्चित्समापतेदिति ॥ एधमानद्विडितिश्रुतिश्च ॥ पंचमतात्पर्यमपि ॥ देवानांनाशुभाद्ध्रासःशुभात्काचित्सुखोन्नतिः ॥ आधिकारिकदेवानामेवमन्येषुतुद्वयं ॥ अशुभाभावजोन्नाहोमहाधीकारिणामपि ॥ अशुभेकृतेनभवतितारतम्याच्चसस्मृतइति ॥ अतएवरामावतारेधिकसेवावतोर्लक्ष्मणसुग्रीवयोःकृष्णावतारेबलरामत्वेन कर्णत्वेनावतारः तत्रबलरामस्यकृष्णवैमनस्यभीमद्रोहयोःप्रसक्तिः कर्णस्यासुरावेशेनमहात्मभीमादिद्रोहप्राप्तिर्निर्णयेप्रतिपादि

३०९ मुक्तावधिकानंदस्यप्राप्तव्यस्यह्रासकारणंदेवानां ॥

ता ॥ देवाद्यपेक्षयामनुष्याणांविशेषमाह ॥ **मनुष्योत्तमानामिति** ॥ ३१० ॥ तेषामधिकप्रयत्नप्रसक्तिरेवनास्ति ॥ किंतु
योग्यानंदातिशयसाधनसत्कर्मार्जनमेव॥ तत्रापियदिस्वोत्तमापराधप्रसक्तिस्तदाक्लृप्तातिशयस्यापिह्रासोऽनभिव्यक्तिरित्यर्थः॥
तदुक्तंज्ञानपादीयानुव्याख्याने ॥ ह्रासोपिमानुषादीनामानंदस्यविकर्मणा ॥ भवेन्मुक्तौविशेषेणस्वोच्चानामपराधतइति ॥ त
त्सुधायामपिदेवातिरिक्तानांक्लृप्तस्यापिह्रासइति ॥ सन्न्यायरत्नावल्यामपि ॥ मनुष्यादीनांतुक्लृप्तसुखस्यापिविकर्मणाह्रासोभवे
त् ॥ विशेषतस्तुस्वोत्तमापराधाच्चेति ॥ पंचमतात्पर्येपि ॥ अल्पाधिकारिणांतत्रह्रासोपिभवतिस्फुटमिति ॥ ननुमोक्षेमनुष्यो
त्तमानांनक्लृप्तानंदह्रासोयुक्तः ॥ ह्रासस्यनाशरूपस्याभावात् ॥ किंत्वावृतत्वं तच्चनसंभवति ॥ आवरणत्वेनाभिमतप्रकृत्यवि
द्यांतःकरणादीनांनिवृत्तत्वादितिचेन्न ॥ तेषांमोक्षेऽभावेपीश्वरेच्छारूपावरणेनावृतत्वात्॥ तदुक्तंज्ञानपादीयसुधायां ॥ ह्रा
सोनामानभिव्यक्तिः ॥ साचेश्वरेच्छाधीना ॥ प्रकृत्याद्यावरणानामपास्तत्वादिति ॥ नित्यमहत्पापस्याधिष्ठानमाह ॥ **नित्यं
महदिति** ॥ ३११ ॥ तदुक्तंनिर्णये ॥ समस्तदोषरूपिणःशरीरिणोहितेभवन्निति ॥ चेरुश्चतेबालवधेसदोद्यताहिंसाविहाराः
सततंस्वभावतइति ॥ निर्णयेदुर्योधनंप्रतिकृष्णवाक्यंच ॥ निसर्गतःपापतमस्त्वमन्यान्धर्मेस्थितान्पापपथेनिधाय ॥ स्वयंचपा
पेनिरतःसदैवपापात्सुपापांगतिमेवयासीति ॥ तमोयोग्यानामनित्यपापस्यप्रयोजनमाह ॥ **अनित्यंपापमिति** ॥ ३१२ ॥
द्वेषपरिपाकेत्यनेननतमोयोग्यानामपरोक्षज्ञानमंधतमसहेतुस्तस्यैवाभावात् ॥ किंतुद्वेषपरिपाकएवेतिज्ञायते ॥ तच्चोत्तरत्रवक्ष्य

---

३१० मनुष्योत्तमानांतुक्लृप्तानंदस्यैवह्रासकारणं॥ ३११ नित्यंमहत्पापंतमोयोग्यस्वरूपं॥ तमस्साधनं॥ ३१२ अनित्यंपापंभगवद्वेषपरिपाकहेतुः॥

ते ॥ द्वेषपरिपाकानंतरमिति ॥ ३१३ ॥ तदुक्तंकर्मक्षयपादीयटीकायां ॥ पापस्यपूर्वकृतस्यकियतश्चद्वेषाभिवृद्धिहेतुत्वे नोत्तरस्यतुसाक्षात्तमस्येवानुप्रवेशइति ॥ ननुतमोयोग्यकृतपुण्यस्यकुत्रोपयोगइत्यतआह ॥ तेषामनित्यपुण्यमिति ॥३१४॥ तदुक्तंगीताभाष्ये ॥ यज्ञादिकर्माणिचतेषांवृथैव ॥ केनापिब्रह्मरुद्रादिभक्त्याद्युपायेननकश्चित्पुरुषार्थआमुष्मिकस्तैराप्यतइति ॥ नचदैत्यैर्यज्ञेषुब्रह्मादिदेवेभ्योहविरादेर्दत्तत्वात्संतुष्टाब्रह्मादयोदेवायजमानेभ्यःस्वर्गादिकंदद्युरेवेतिवाच्यं ॥ तैर्हविरादेर्दत्तत्वे पिब्रह्मादिभिरगृहीतत्वात् ॥ भागवतबुद्ध्यादत्तत्वाभावात् ॥ तदुक्तंछांदोग्यभाष्ये ॥ यद्भागवतबुद्ध्यैवदत्तंब्रह्मादयःसु राः ॥ वैदिकाःप्रतिगृह्णीयुरपभ्रष्टास्तथेतरदिति ॥ प्रत्युतायोग्यकृतयज्ञान्ब्रह्मादिशब्दवाच्यादैत्याअपभ्रष्टदेवनामकागृह्णं ति ॥ तदुक्तंछांदोग्यभाष्ये ॥ अपभ्रष्टाअदेवाश्चब्रह्माद्याख्यायुताअपि ॥ देवसंज्ञाश्चदीनत्वादिति ॥ गीतातात्पर्येपि ॥ दीनत्वाद्देवनामानस्त्वन्येब्रह्मादिनामकाः ॥ अवैष्णवकृतोयज्ञोदीनैर्देवैश्चभुज्यते ॥ वैष्णवैश्चकृतोयज्ञोदेवैर्हिमनुनामकैरि ति ॥ नन्वेवंदुर्योधनस्यपौंडरीकादियज्ञैःस्वर्गप्राप्तिर्निर्णयोक्ताकथंस्यात् ॥ तथाहि ॥ सर्वेषामुत्तमंलोकमैंद्रंप्राप्येदमेवते ॥ स्थानमित्युदितेदेवैर्दुर्योधनमपश्यत ॥ सभ्रातृकंज्वलंतंचसर्वेषामुपरिस्थितं ॥ तंदृष्ट्वापरमक्रुद्धोनिमील्यनयनेशुभे ॥ भ्रातरौ मेक्वकृष्णाचसकर्णाःक्वचबांधवाइत्यादीतिचेन्न ॥ दुर्योधनस्यनस्वकृतयज्ञेनस्वर्गप्राप्तिः ॥ दक्षिणातर्पितानामाचार्याणांतेज सैवेत्यंगीकारात् ॥ तदुक्तंगीतातात्पर्ये ॥ बहिर्मुखाभगवतोनिवृत्ताश्चविकर्मणः ॥ दक्षिणातर्पितानांतेआचार्याणांतुतेजसा ॥

---

३१३ द्वेषपरिपाकानंतरंचकृतंपापंतमसिदुःखातिशयहेतुः ॥ ३१४ तेषामनित्यपुण्यमैहिकपुरुषार्थहेतुः ॥ नतुस्वर्गादिपारलौकिकसुखहेतुः ॥

यांतिस्वर्गंततःक्षिप्रंतमोंधंप्राप्नुवंतिच ॥ तदन्येनैवचस्वर्गंयांतिविष्णुबहिर्मुखाइति ॥ नित्यसंसारिणांतुसांकल्पिकःस्वर्गो नतुप्रसिद्धःस्वर्गः ॥ तदुक्तंगीतातात्पर्ये ॥ श्रद्धेत्यास्तिक्यनिष्ठोक्तासायेषांदेवतोत्तमे ॥ विष्णौतद्भक्तबुद्ध्यैवरमाब्रह्मादिकेषुच ॥ तेसात्त्विकाइतिज्ञेयास्तैरिष्टंविष्णुरेवतु ॥ श्रीश्चसाध्यक्षविद्याख्याब्रह्मेंद्राख्याश्चदेवताः ॥ विबुधत्वात्तुमन्वाख्याभुंजतेप्रीतिपूर्वकं ॥ व्यामिश्रयाजिनोयेतुविष्ण्वाधिक्येससंशयाः ॥ राजसास्तेतुविज्ञेयास्तैरिष्टंयक्षराक्षसाः ॥ दीनत्वाद्देवनामानोब्रह्मेंद्रादिसनामकाः ॥ गृह्णंतियेहरिंत्वन्येदेवादिसममेवतु ॥ नीचंब्रह्माद्यनन्यंवामन्यंतेनेतिचाखिलं ॥ तत्तच्छ्रद्धायुतास्तेतुतामसाःपरिकीर्तिताः ॥ भूतप्रेताश्चतैरिष्टंशिवस्कंदादिनामकाः ॥ साक्षाच्छिवपरीवाराभुंजतेह्यतितामसाः ॥ मोक्षःसांकल्पिकःस्वर्गोभूतादित्वंफलंक्रमादिति ॥ द्वेषपरिपाकेनचेति ॥ ३१५ ॥ मुक्तियोग्यानामपरोक्षज्ञानेजातेयथासंचितस्यानिष्टपुण्यस्यनाश उत्तरपापस्याश्लेष उत्तरपुण्यस्यमुक्तावनुस्यूतिस्तद्वत्तमोयोग्यानांद्वेषपरिपाकेनपुण्यनाशो द्वेषस्यमुक्तावनुस्यूतिरितिसमुदायार्थः ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐ इतरस्याप्येवमसंश्लेषःपातेतु ॐ ॥ पुण्यस्याप्येवमसंश्लेषःपाते ॥ यथाश्लेषोविनाशश्चमुक्तस्यतुविकर्मणः ॥ एवंसुकर्मणश्चापिपततस्तमसिध्रुवं ॥ द्विषतोवाभवेत्पुण्यनाशोनास्त्यत्रसंशयइति ॥ ननुमोक्षयोग्यानांतमोयोग्यानांचप्रारब्धस्यकथंविनाशइत्यतआह ॥ प्रारब्धेति ॥ ३१६ ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐभोगेनत्वितरेक्षपयित्वा

३१५ द्वेषपरिपाकेनचसंचितस्येष्टपुण्यस्यसर्वस्यापिविनाशः ॥ अनिष्टपुण्यस्याविनाशः ॥ अनिष्टपापस्यतुतमस्यनुस्यूतिः ॥ ३१६ प्रारब्धपुण्यपापयोस्तुभोगेनैवविनाशः ॥

थसंपत्स्यते ॐ ॥ आरब्धपुण्यपापेभोगेनक्षपयित्वाब्रह्मसंपत्स्यते ॥ आरब्धपुण्यपापस्यभोगेनक्षपणादनु ॥ प्राप्नोत्येवतमोघोरंब्रह्मवानात्रसंशयइति ॥ अत्राल्पानामपिप्रारब्धानांभोगंविनापिज्ञानेनविनाशइतिपूर्वमेवोक्तं ॥ उपमर्दोपिकेषांचित्प्रारब्धानांबोध्यः ॥ उपमर्दशब्दार्थस्तु ज्ञानपादीयानुव्याख्यायामुक्तः प्रारब्धकर्मजस्यैवविषभक्षान्मृतेरिव ॥ प्राप्तस्याप्यनिवर्त्यस्यकिंचिद्भुक्तस्यसंविदा ॥ उपमर्दइहप्रोक्तोदेवादीनांयथाक्रममिति ॥ एतदर्थःसन्न्यायरत्नावल्यामुक्तः ॥ अत्रयदुपमर्दंचेतिसूत्रंतत्किंचिदुपभुक्तयोरेवारब्धपुण्यपापयोर्ब्रह्मज्ञानेनोपमर्दमभिदधातीति ॥ सुधायामपि ॥ यथाविषभक्षान्मृतिरनिवर्त्यतयाप्रसक्तैव ॥ पुनरनिवर्त्यैव ॥ विषहरमंत्रौषधादिनानिवृत्तेर्दर्शनात् ॥ तथाप्रारब्धकर्मफलभोगोप्यनिवर्त्यतयाप्रसक्तएव ॥ नत्वनिवर्त्यएव ॥ ज्ञानादिनानिवृत्तेरिति ॥ नयचंद्रिकायामपि ॥ यथाविषभक्षात्प्राप्तायामृतेःसर्वथासर्वात्मनात्वनिवर्त्यमोहादिरूपेणकिंचिद्भुक्तायाविषहरमंत्रसंविदोपमर्दस्तथैवप्रारब्धकर्मजातस्यफलस्यप्राप्तस्यसर्वात्मनात्वनिवृत्यस्यकिंचिद्भुक्तस्यभगवदपरोक्षसंविदोपमर्दइति ॥ नन्वदृष्टंनामगुणांतरमस्ति ॥ तत्कुतोननिरूपितमित्यतआह ॥ एतयोरिति ॥ ३१७ ॥ तथाचधर्माधर्मयोरेवादृष्टरूपत्वान्नतत्परित्यागइत्यर्थः ॥ अदृष्टस्यप्रयोजनांतरंचाह ॥ तच्चकार्यमात्रमिति ॥ ३१८ ॥ तत्तद्भोजकादृष्टवशादेवसर्वेषांसुखदुःखादिवैचित्र्यंदृश्यते ॥ अन्यथातन्नस्यादित्यर्थः ॥ नन्वदृष्टस्यकारणत्वेमानाभावः ॥ सुखदुःखादिवैचित्र्यस्यदृष्टसामग्र्यैवोपपत्तेः ॥ यत्रचनिर्निमित्तंसहसैवसुखदुःखादितत्रेश्वरेच्छाकालादिकमेवकारणं ॥ नत्वदृष्टं ॥

३१७ एतयोरेवादृष्टमितिनाम ॥ ३१८ तच्चकार्यमात्रंप्रतिकारणं ॥

किंचादृष्टस्यकार्यमात्रंप्रतिकारणत्वेस्वंप्रत्यपिकारणत्वप्रसंगात् ॥ ततश्चात्माश्रयः ॥ अदृष्टोत्पत्तावदृष्टांतरस्वीकारेऽनवस्थापत्ते
रितिचेन्न ॥ अदृष्टानंगीकारेमहदादिसृष्टिप्रलयौनस्यातां ॥ नचेश्वरेच्छयातदुपपत्तिः ॥ तस्याजीवादृष्टसाहित्येनैवकार्यजन
कत्वात् ॥ अन्यथेश्वरस्यवैषम्यनैर्घृण्येस्यातां ॥ तदुक्तंनिर्णयेहठवादे ॥ स्वभावाख्यायोज्ञतायाहठाख्यायानादिसिद्धासर्वजी
वेषुनित्या ॥ साकारणंप्रथमंतुद्वितीयमनादिकर्मैवतथातृतीयः ॥ जीवप्रयत्नःपौरुषाख्यस्तदेतत्त्रयंविष्णोर्वशगंसर्वदैव ॥ ए
तानपेक्ष्यैवफलंददामीत्यस्यैवसंकल्पइतिस्वतंत्रता ॥ किंचयागादेःस्वर्गादिकारणत्वंश्रुत्यादिसिद्धंमध्येऽदृष्टंविनाकालांतरकायां
तरभाविस्वर्गादिफलंननिर्वहेत् ॥ नचातींद्रियत्वान्नादृष्टंप्रामाणिकमितिवाच्यं ॥ तर्ह्यतींद्रियत्वात्प्रलयाद्यसिद्धिप्रसंगात् ॥ त
दुक्तंयुक्तिपादीयानुव्याख्याने ॥ अदृष्टंकारणंनोचेल्लयेमानंचकिंभवेदिति ॥ किंच वंध्यास्त्रीसंप्रयोगेपिपुत्रोत्पत्तिर्नदृश्यते ॥
निरपवादंसमंशास्त्रमभ्यसतोरपि पंडितएको नपंडितोन्यइत्यादिकमदृष्टंविनाकथंघटते ॥ दृष्टसामग्रीसाम्यात् ॥ नचादृष्टंप्र
त्यदृष्टस्याकारणत्वान्नकार्यंप्रतिकारणत्वंसंभवतीतिवाच्यं ॥ पूर्वपूर्वादृष्टानामुत्तरोत्तरादृष्टजनकत्वेनादृष्टाजन्यकार्यस्यैवा
भावात् ॥ संसारस्यानादित्वेनबीजांकुरानवस्थावददोषत्वात् ॥ तदुक्तंसूत्रेभाष्येच ॥ नकर्माविभागादितिचेन्नानादित्वादिति ॥
पूर्वकर्मप्रयत्नंचसंस्कारंचाप्यपेक्ष्यतु ॥ ईश्वरःकारयेत्सर्वंतच्चेश्वरकृतंस्वयमिति ॥ पुण्यपापादिकंविष्णुःकारयेत्पूर्वकर्मणा ॥ अ
नादित्वात्कर्मणश्चनविरोधःकथंचनेति ॥ सन्न्यायरत्नावल्यामपि ॥ अतोदृष्टपरंपराश्रयस्यानादेर्जीवस्यप्रलयेप्यवस्थानमंगीक
र्तव्यमिति ॥ तच्चादृष्टंनसाक्षात्कार्यकारणं ॥ किंतुदृष्टसामग्रीमेलनद्वारैव ॥ तदुक्तंयुक्तिपादीयसुधायां ॥ धर्माधर्मयोरप्यारं

भक्तप्रेरणादिरूपेणैवोपयोगांगीकारादिति ॥ तार्किकास्तु ॥ अनुमानेनैवादृष्टसिद्धिंमन्यंते॥ तथाहि ॥ देवदत्तशरीरं देवदत्त विशेषगुणजन्यं देवदत्तस्यैवभोगहेतुत्वात् ॥ देवदत्तप्रयत्नजन्यस्रक्चंदनादिवदिति ॥ तन्न ॥ देवदत्तप्रयत्नाराधितेश्वरेच्छयै वोपपत्तावदृष्टकल्पनानवश्यंभावात् ॥ किंचदेवदत्तशरीरं नदेवदत्तविशेषगुणजन्यं कार्यत्वाद्यज्ञदत्तशरीरवदितिसत्प्रतिपक्ष दुष्टमित्यलं ॥ इतिधर्माधर्मप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ संस्कारंविभजति ॥ **संस्कारश्चतुर्विधइति** ॥ ३१९ ॥ अना दियोग्यतायामपि संस्कारोबलवान्यतइतिसंस्कारशब्दप्रयोगादित्यर्थः ॥ तदुक्तंगीताभाष्ये ॥ प्रकृतिःपूर्वसंस्कारः ॥ संस्का रोबलवानेवब्रह्माद्याअपितद्वशाइति ॥ भाष्येपिपूर्वकर्मप्रयत्नंचसंस्कारंचाप्यपेक्ष्यतु ॥ ईश्वरःकारयेत्सर्वमिति ॥ **धावनेति** ॥ ३२० ॥ अश्वादौबाणादौचप्रत्यक्षेणैवदर्शनादितिभावः ॥ **नित्यईशेति** ॥ ३२१ ॥ तद्धावतोन्यानत्यतितिष्ठदित्यादि श्रुत्यापरमात्मनोधावनक्रियायाःप्रसिद्धत्वेनवेगस्यापिसंभवात् ॥ कृष्णावतारे कृष्णकेलीविलासे धावनजवादेर्भागवतहरिवं शादावुक्तेः ॥ नृसिंहस्यसप्तमस्कंधेवेगोक्तेः ॥ कृत्वाट्टहासंखरकेसरोल्बणोनिमीलिताक्षंजगृहेमहाजवइति ॥ ऋग्भाष्येपि ॥ तुरोवेगाद्धरिर्वायुररुद्वातिरोषणादिति ॥ वेगवांस्तूतुजानइतिच ॥ लक्ष्म्याश्चप्रलयकालीनजलवाय्वाद्यात्मिकायावेगोयुक्तए व ॥ मुक्तानांतुमनोजवेष्वसमाबभूवुरितिश्रुतिप्रसिद्धोजवः ॥ यद्यपिमनोजवशब्दोज्ञानार्थकतयाव्याख्यातस्तथापिबाधका

---

३१९ संस्कारश्चतुर्विधः ॥ वेगोभावनायोग्यतास्थितस्थापकश्चेति ॥ ३२० धावनादिक्रियाहेतुर्गुणोवेगः ॥ सद्विविधः ॥ नित्योऽनित्यश्च ॥ ३२१ नित्यईशलक्ष्मीप्रकृतिजीवस्वरूपभूतः ॥

भावाद्वेगार्थत्वमप्यस्तु ॥ मध्वविजयेपि ॥ सुरतोत्सवोत्सुकतयात्वरयन्करपल्लवंनिवसवग्रहणे ॥ कररुद्धमायतदृशःसहसात्व
रयत्यथद्विगुणमिष्टतमः ॥ रभसावपातितपृथूरसिजइत्यादि ॥ अनित्योवेगइति ॥ ३२२ ॥ अव्याकृताकाशवर्णानांव्या
प्तत्वेनक्रियायाएवाभावेनवेगाकल्पनात् ॥ क्षणादिकालस्यव्याप्तत्वेपिकालप्रवाहस्यवेगवत्त्वंयुक्तं ॥ भावनास्वरूपमाह ॥
अनुभवजन्यइति ॥ ३२३ ॥ सागंगासामातेत्यादिस्मृतिःपूर्वानुभूतएवजायते ॥ साचनसाक्षात्पूर्वानुभवजन्या ॥तस्यनष्ट
त्वात् ॥ अतोमध्येसंस्कारआवश्यकइत्यर्थः ॥ नचवासनातिरिक्तभावनाख्यसंस्कारसद्भावेमानाभावइतिवाच्यं ॥ स्वप्नपदा
र्थोपादानतयैववासनायाः ॥ स्मृतिजनकत्वेनैवभावनायाधर्मिग्राहकप्रमाणसिद्धत्वेनतयोर्भेदात् ॥ नचभावनापरनामकाःसं
स्कारावासनाइतिस्वप्नाधिकरणसुधाविरोधइतिवाच्यं ॥ अनुभवजन्यत्वसाम्येनोभयशब्दवाच्यत्वोपपत्तेः ॥ कार्योन्नेयधर्मा
णांयथाकार्यंकल्प्यत्वात् ॥ योग्यतांनिरूपयति ॥ हठाख्येति ॥ ३२४ ॥ तदुक्तंनिर्णये ॥ स्वभावाख्यायोग्यतायाहठाख्या
यानिदिसिद्धासर्वजीवेषुनित्येति ॥ तदनंगीकारेबाधकमाह ॥ मोक्षतमसोरिति ॥ ३२५ ॥ तदनंगीकारेकेषांचिदेवमोक्षः
केषांचिदेवतमइतिव्यवस्थानस्यादित्यर्थः ॥ प्रत्युतसर्वेषांमोक्षोवातमोवास्यात् ॥ नचयेनपुरुषेणतमःसाधनमनुष्ठितंतस्यतमो
येनचमोक्षसाधनमनुष्ठितंतस्यमोक्षइतिसाधननियमेनफलनियमइतिवाच्यं ॥ कारणंविनासाधननियमस्याप्यभावात् ॥ प्रत्यु ॥ ९१ ॥

३२२ अनित्योवेगोव्याकृताकाशवर्णव्यतिरिक्तेषुसर्वद्रव्येषु ॥ ३२३ अनुभवजन्यःस्मृतिहेतुस्संस्कारोभावना ॥ अनित्यैव ॥ ईशलक्ष्मीमु
क्तानांस्मरणाभावान्नभावना ॥ ३२४ हठाख्ययोग्यतानादिरूपा ॥ ३२५ मोक्षतमसोस्तत्साधनानांतारतम्यस्यचव्यवस्थापिका ॥ अन्यथासांकर्यात् ॥

तमोक्षाख्यसुखस्यैवसर्वापेक्षितत्वेनतत्साधनएवसर्वेषांप्रवृत्तिप्रसंगात् ॥ किंच ॥ मोक्षेआनंदादितारतम्यंश्रुत्यादिसिद्धं ॥ त
च्चतत्तद्योग्यतानिबंधनमेव ॥ नचसाधनतारतम्येनैवतत्सिद्धिः ॥ नियामकाभावेसर्वेषामपिमहासुखार्थमेवसाधनकरणप्रसंगा
त् ॥ अपिच ॥ ब्रह्मरुद्रेंद्रादिपदप्राप्तिस्तत्तत्पदयोग्यानामेव ॥ नतुसर्वेषामपिनचतत्रापिसाधनवशादितिवक्तुंयुक्तं ॥ अयो
ग्यमारोढुंप्रयतन्पतन्हिदृश्यतइत्यादिश्रुतिभिर्निषिद्धत्वात् ॥ तमोयोग्यानांकल्यादीनामप्येवमेव ॥ तदुक्तंनिर्णये ॥एवंनरोत्त
मपरास्तुविमुक्तियोग्याअन्येचसंसृतिपराअसुरास्तमोगाः ॥ एवंसदैवनियमःक्वचिदन्यथानेति ॥ ब्रह्मत्वयोग्याऋजवोनामदेवाः
पृथग्गणाः ॥ तैरेवाप्यंतत्पदंतुनैवान्यैःसाधनैरपि ॥ एवंसर्वपदानांतुयोग्याःसंतिपृथग्गणाः ॥ तस्मादनाद्यनंतंहितारतम्यंचि
दात्मनां ॥ तच्चनैवान्यथाशर्तुंशक्यंकेनापिकुत्रचित् ॥ अयोग्यमिच्छन्पुरुषःपतत्येवनसंशयः ॥ तस्माद्योग्यानुसारेणसेव्यो
विष्णुःसदैवहीति ॥ कलिर्दुःखाधिकस्तेषुतेप्येवंब्रह्मवद्गणाः ॥ तथान्येप्यसुराःसर्वेगणायोग्यतयासदेति ॥ हठश्चासौतारतम्यस्थि
तोहिब्रह्माणमारभ्यकलिश्चयावत् ॥ हठाच्चकर्माणिभवंतीति॥गीतातात्पर्येपि॥अनादियोग्यताभेदात्पुंसादर्शनसाधनं॥नानैवेति॥
भाष्येपि॥असुराआसुरेणैवस्वभावेनचकर्मणा॥ज्ञानेनविपरीतेनतमोयांतिविनिश्चयात् ॥ देवादैवस्वभावेनकर्मणाचाप्यसंशयं॥
सम्यग्ज्ञानेनपरमांगतिंगच्छंतिवैष्णवीं ॥ नानयोरन्यथाभावःकदाचित्क्वापिविद्यतइति ॥ असुरजातेरेवासुरत्वं देवजातेरेवदेवत्व
मित्यादि ॥ बृहद्भाष्येपि ॥ तत्तद्योग्यतयापूर्तौविष्णोर्दृष्टिःप्रजायते ॥ यथोदंचनकुंभादेःसरित्सागरयोरपि॥अल्पेनमहतावापिपू
र्तिर्योग्यतयाभवेत् ॥ एवंनरादिब्रह्मांतजीवानांसाधनैरपि॥अनादिसिद्धैर्भक्त्याद्यैःपूर्तिर्योग्यतयाभवेदिति ॥साचयोग्यताकेषा

मित्याकांक्षायामाह॥साब्रह्मादीति॥३२६॥ उपलक्षणमेतत् ॥ पूर्वप्रज्ञारूपायोग्यताब्रह्मादीनांतारतम्येनास्तीतिद्रष्टव्यं॥तदु क्तंबृहद्भाष्ये ॥ पूर्वप्रज्ञायोग्यतास्याद्रमातदभिमानिनी ॥ अनादिकालसंबंधायाप्रज्ञाविष्णुसंश्रया ॥ पूर्वप्रज्ञेतिसाप्रोक्ताब्रह्मा देस्तारतम्यतइति ॥ स्थितस्थापकस्वरूपमाह ॥ पूर्वावस्थापादकइति ॥ नित्यइति ॥ ३२७ ॥ कृष्णादिरूपेषुयशोदादि भिःपाशैर्बंधनादिप्रयत्नेकृतेपिपूर्वंयथास्थितोभगवांस्तथैवस्थितोभवतीतिप्रत्यक्षसिद्धमित्यर्थः ॥ इतिसंस्कारप्रकरणं ॥ ॥ ७ ॥ ७ ॥ ७ ॥ आलोकंनिरूपयति ॥ रूपादीति ॥ ३२८ ॥ आदिशब्देनचक्षुर्योग्यद्रव्यपरिग्रहः ॥ ईशलक्ष्मीति ॥ ३२९ ॥ तस्यभासासर्वमिदंविभातीत्यादिश्रुतेरित्यर्थः ॥ सहस्रलक्षामितभानुदीधितिं ॥ अनंतचंद्राधिककांतिकांतइतिच निर्णयोक्तेः ॥ तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राःप्रपतंतिविष्णवितिगीतोक्तेः ॥ मुक्तानांतु पिशंगवस्त्राःसुरुचःसुपेशसइ तिभागवतोक्तेः ॥ नन्वालोकोनगुणः ॥ पीतादिरूपाश्रयत्वादित्यतआह ॥ दीपेनेति ॥ ३३० ॥ नचदीपंविहायान्यत्रवृत्ते र्नदीपगुणत्वमालोकस्येतिवाच्यं ॥ ध्वन्यात्मकशब्देव्यभिचारात् ॥ किंचालोकोद्रव्यमितिवदन्प्रष्टव्यः ॥ कार्यमकार्यंवा ॥ नाद्यः ॥ उपादानाभावात् ॥ नचदीपएवोपादानं ॥ दीपंविनाप्यन्यत्रवृत्तेः ॥ नचदीपावयवाउपादानमितिवाच्यं ॥ दीपाप

---

३२६ साब्रह्मादिसर्वजीवानांस्वरूपभूतैव ॥ ३२७ पूर्वावस्थापादकःस्थितस्थापकः ॥ नित्योऽनित्यश्चेतिद्विविधः ॥ नित्यईशलक्ष्म्यादिस्वरू पभूतः ॥ अनित्यःकटधनुरादिवर्ती ॥ ३२८ रूपादिज्ञानहेतुरालोकः ॥ सद्विविधः नित्योऽनित्यश्च ॥ ३२९ नित्यईशलक्ष्मीमुक्तजीवानांस्वरूपं ॥ अनित्योनित्यतेजोमात्रवृत्तिः ॥ ३३० दीपेनैवसहगमनागमनरूपानुविधानाद्गुणत्वं ॥

गमनेतेषांसहगमनाभावप्रसंगात् ॥ नहिजीर्णकंथातंतवःकतिचनविकीर्णाःकंथयासहगच्छंति ॥ नचदीपापगमेपिदीपान्निर्गतादीपावयवानगच्छंति ॥ किंतुतत्रैवतिष्ठंतीतिवाच्यं ॥ दीपापगमेप्रत्यक्षेणोपलब्धिप्रसंगात् ॥ नचतमसानदृश्यंतइतिवाच्यं ॥ व्याहतेः ॥ नद्वितीयः ॥ सर्वदोपलब्धिप्रसंगात् ॥ यच्चोक्तंपीतरूपाश्रयत्वान्नालोकोगुणइति ॥ तन्न ॥ गुणेपिगुणांतरस्वीकारात् ॥ अतआलोकोगुणएव ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐ गुणाद्वालोकवत् ॐ ॥ यथालोकस्यप्रकाशगुणेनव्याप्तिरिति ॥ टीकायामप्येतत्सर्वमुक्तमिति ॥ इत्यालोकप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ शमदमादिगुणान्निरूपयति ॥ **शमइत्यादिना** ॥ ३३१ ॥ शमोमन्निष्ठताबुद्धेर्दमइंद्रियनिग्रहइतिभागवतोक्तेरितिभावः ॥ **नित्यईशेति** ॥ ३३२ ॥ ईशलक्ष्म्योरपिभगवन्निष्ठबुद्धेःसत्त्वादित्यर्थः ॥ **शमवदिति** ॥ ३३३ ॥ यथाशमोनित्यईशलक्ष्म्योःस्वरूपभूतस्तथादमइत्यर्थः ॥ व्यासऋषभादिरूपेष्विंद्रियनिग्रहस्यप्रत्यक्षसिद्धत्वादितिभावः ॥ कृपांनिरूपयति ॥ **कृपेति** ॥ **ईशलक्ष्मीति** ॥ ३३४ ॥ तदुक्तमष्टमस्कंधभागवते ॥ तंवीक्ष्यपीडितमजस्सहसावतीर्यसग्राहमाशुसरसःकृपयोज्जहारेति ॥ **नित्यंबलंचेति** ॥ ३३५ ॥ स्वाभाविकीज्ञानबलक्रिया

---

३३१ शमोबुद्धेर्भगवन्निष्ठता ॥ नित्यानित्यभेदेनद्विविधः ॥ ३३२ नित्यईशलक्ष्मीब्रह्मादिसज्जीवस्वरूपभूतः ॥ अनित्यःसकलजीवानांबाह्यः ॥ ३३३ इंद्रियनिग्रहोदमः ॥ नित्यानित्यभेदेनद्विविधश्शमवत् ॥ ३३४ कृपादया ॥ नित्यानित्यभेदेनसापिद्विविधा ॥ नित्याईशलक्ष्मीसज्जीवस्वरूपभूता ॥ अनित्यासर्वजीवानां ॥ सुखदुःखादिद्वंद्वसहिष्णुतातितिक्षा ॥ कृपावन्नित्यानित्याच ॥ ३३५ परापेक्षांविनाकार्यानुकूलगुणोबलं ॥ तद्विविधं ॥ नित्यानित्यभेदात् ॥ नित्यंबलंचेतनमात्रस्य ॥ अनित्यंसंसारिणांबाह्यं ॥ भयंनित्यानित्यभेदेनद्विविधं ॥ नित्यंभयंदैत्यस्वरूपभूतं ॥ अनित्यंभयंब्रह्मादिसर्वजीवानांबाह्यं ॥

च ॥ ज्ञानंनित्यंबलंनित्यमित्यादिश्रुतेः ॥ शुद्धानंदोरुसंविद्युतिबलबहुलौदार्यवीर्यादिदेहमितिटीका ॥ अत्युद्रिक्तविदोषस
त्सुखमहाज्ञानैकतानप्रभासर्वप्राभवशक्तिभोगबलसत्सारात्मदिव्याकृतिमितिच्छांदोग्यभाष्यं ॥ निर्णयेपि ॥ विकृष्यमाणंतद
नंतराधसापरेणनिःसीमबलेनलीलया ॥ अभज्यतासह्यममुष्यतद्बलंप्रसोढुमीशंकुतएवतद्भवेदिति ॥ शिवस्तदादेवगणाःसम
स्ताःशशंसुरुच्चैर्जगतोहरेर्बलमित्यादि ॥ लज्जांनिरूपयति ॥ लज्जेति ॥ स्वरूपभूतालज्जेति ॥ ३३६ ॥ ममयोनिरप्स्वंत
स्समुद्रइतिलक्ष्म्यालज्जयातत्रकंपोक्तेः ॥ कंपस्यलज्जार्थकत्वमुक्तमृग्भाष्ये ॥ कंपोशेषग्रहेक्वापिलज्जायांवापुरातनइति ॥ अत्र
लक्ष्म्याःपतिनामग्रहणेलज्जासद्भावात् ॥ गांभीर्यादीनिसामान्याकारेणविभजति ॥ गांभीर्यादीनीति ॥ ३३७ ॥ आश्रय
माह ॥ पूर्ववदिति ॥ नित्यानिगांभीर्यादीनीशलक्ष्म्योर्मुक्तानांच ॥ अनित्यानिब्रह्मादिजीवानामित्यर्थः ॥ तार्किकास्तु ॥ श
मादयोगांभीर्यादयश्चनगुणाइत्याहुः ॥ तन्न ॥ किं त्वत्संकेतमात्रेणागृहीतत्वात्तेषामगुणत्वं उतशास्त्रेगुणत्वेनव्यवहाराभावा
द्वा ॥ नाद्यः ॥ त्वत्संकेतस्यनिर्मूलत्वेनाप्रामाणिकत्वात् ॥ नद्वितीयः ॥ शास्त्रेषुगुणवर्णनकालेगांभीर्यादीनामेवादौगुणत्वे
नोक्तेः ॥ तथाहिप्रथमस्कंधभागवतंश्रीकृष्णगुणप्रतिपादकं ॥ सत्यंशौचंदयादानंत्यागःसंतोषआर्जवं ॥ शमोदमःस्तपःसाम्यं
तितिक्षोपरतिःश्रुतं ॥ ज्ञानंविरक्तिरैश्वर्यंशौर्यंतेजोधृतिःस्मृतिः ॥ स्वातंत्र्यंकौशलंकांतिःसौभगंमार्दवंक्षमा ॥ प्रागल्भ्यंप्रश्र

३३६ लज्जापिस्वरूपास्वरूपभेदेनद्विविधा ॥ स्वरूपभूतालज्जालक्ष्म्यादीनामपि ॥ अनित्यासंसारिणां ॥ ३३७ गांभीर्यादीनिसौंदर्यांतानिद्वि
विधानिपूर्ववज्ज्ञेयानि ॥ प्रभृतिशब्देनशब्दादयोग्राह्याः ॥

यःशीलंसहओजोबलंभगः ॥ गांभीर्यंस्थैर्यमास्तिक्यंकीर्तिर्मानोनहंकृतिः ॥ इमेचान्येचभगवन्नित्यायत्रमहागुणाः ॥ प्रार्थ्या
महत्त्वमिच्छद्भिर्नचयांतिस्मकर्हिचित् ॥ तेनाहंगुणपात्रेणश्रीनिवासेनसांप्रतमिति ॥ वैशेषिकाधिकरणसुधासन्न्यायरत्नाव
ल्योरपि ॥ चतुर्विंशतिगुणाइत्येतन्निर्मूलं ॥ गांभीर्यप्रागल्भ्याद्यनेकेषांगुणानांसद्भावादिति ॥ अनुव्याख्यानेपि ॥ नचामंद
सदानंदस्यंद्यनंतगुणार्णवः ॥ ईश्वरोष्टगुणत्वेनप्रमेयोप्रमितत्वतइति ॥ तार्किकास्तु रूपादिचतुष्टयमेवपृथिवीपरमाणुमारभ्य
पृथिव्यांपाकजमनित्यमित्याचक्षते ॥ तदसदितिभावेनाह ॥ रूपरसेति ॥ ३३८ ॥ शब्दोपिपृथिवीगुणइतिपूर्वंप्रमाणोदा
हरणेनोक्तत्वाद्घटादौरूपादिवत्पाकजएव ॥ प्रत्यक्षसिद्धत्वादितिभावः ॥ पृथिवीपरमाणौतेजःपरमाणुसंयोगेनरूपोत्पत्तिरिति
तन्मतं ॥ तन्न ॥ प्रलयकालेपरमाणुषुक्रियायाएवाभावेनपार्थिवतैजसपरमाणुद्वयसंयोगाभावेनरूपोत्पादायोगात् ॥ अन्यथा
पृथिवीपरमाणुद्वयसंयोगेनद्व्यणुकादिक्रमेणमहापृथिव्याद्युत्पत्तिप्रसंगेनप्रलयएवनस्यात् ॥ तेजोजलादौरूपांतरोत्पत्तिरेवनास्ती
त्याह ॥ अन्यत्रेति ॥ ३३९ ॥ पीलुपाकवादिनस्तु ॥ घटादावग्निसंयोगेनतद्घटमारभ्यद्व्यणुकपर्यंतंनाशः ततःपरमाणुषुतेजः
संयोगेनरूपांतरोत्पत्तौ तत्परमाणुद्वयसंयोगेनपुनर्द्व्यणुकोत्पत्तिक्रमेणघटपर्यंतमुत्पद्यतइत्याहुः ॥ तन्न ॥ प्रत्यक्षविरुद्धत्वेनैतत्क
ल्पनायाअप्रामाणिकत्वात् ॥ प्रत्युतघटाग्निसंयोगेनघटेपूर्वरूपादिविनाशाद्रूपांतरोत्पत्तेरेवयुक्तत्वेनपिठरपाकवादिमतस्यैवप्रा
माणिकत्वात् ॥ नचसमवायिकारणनाशस्यैवसमवेतकार्यनाशप्रयोजकत्वेनघटनाशाभावेकथंतत्रपूर्वरूपविनाशइतिवाच्यं ॥

३३८ रूपरसगंधस्पर्शशब्दाः पृथिव्यांपाकजाअपाकजाश्च ॥ ३३९ अन्यत्रापाकजाः ॥

विरोधिद्रव्यसंयोगेनरूपरसादिगुणमात्रस्यनाशसंभवात् ॥ किंच ॥ विरोधिसद्भावआश्रयाश्रितयोरुभयोरपियुगपदेवनाशसं भवेनसमवायिकारणनाशेनैवकार्यनाशइतिव्याप्तिरेवायुक्ता ॥ वेदांतिनामपरोक्षज्ञानेनभावरूपाज्ञाननाशवत् ॥ तदुक्तंसुधा यांपीलुपाकवादस्यायुक्तत्वादिति ॥ कार्यकारणादौतार्किकादिमतापेक्षयाबहुव्यत्यासस‌द्भावात्तत्परिशुद्ध्येकारणादिकंनिरूप यति ॥ कारणमिति ॥ ३४० ॥ असमवायिकारणस्यापादानकारणएवांतर्भावसंभवान्नकारणस्यत्रित्वमितिभावः ॥ ननुदं डादेर्घटादिकंप्रतिनापादानकारणत्वं ॥ विश्लेषावधित्वाभावेनापादानसंज्ञायोगादित्यतआह ॥ अपादानकारणमेवेति ॥ ३४१ ॥ भेदनिमित्तोगौणोव्यपदेशइतिभावः ॥ कार्यस्वरूपंनिरूपयति ॥ कार्यमिति ॥ ३४२ ॥ ननुघटादिकार्यस्यस दसदात्मकत्वंविरुद्धंकथंस्यादित्यतआह ॥ उत्पत्तेःपूर्वमिति ॥ ३४३ ॥ तार्किकास्तु समवायिकारणेनकार्यंपूर्वमसदेवजायत इत्याहुः ॥ तन्न ॥ अत्यंतासंतःशशशृंगादेरपिउत्पत्तिप्रसंगात् ॥ नचतस्यसामग्रीनास्तीतिवाच्यं ॥ मृत्पिंडादेरेवतत्सामग्री त्वात् ॥ नह्यसतिविशेषोंगीकर्तुंशक्यः ॥ असतःसामग्र्यभावाच्च ॥ प्राभाकरास्तुसदेवकार्यंकारणेनाभिव्यज्यतइत्याहुः ॥ तन्न ॥ आकाशादेरप्युत्पत्तिप्रसंगात् ॥ अतःकार्यात्मनाऽसतःकारणात्मनासतश्चोत्पत्तिरित्येवांगीकर्तव्यं ॥ अतएवविरोधोपिपरा स्तः ॥ रूपभेदेनाविरोधात् ॥ तदुक्तंयुक्तिपादीयानुव्याख्याने ॥ असद्यत्कार्यरूपेणकारणात्मतयास्तिहीति ॥ सुधानयचं

३४० कारणंद्विविधं ॥ उपादानकारणमपादानकारणंचेति ॥ परिणामिकारणमेवोपादानकारणं ॥ ३४१ अपादानकारणमेवनिमित्तकारणमि त्युच्यते ॥ ३४२ कार्यंसदसदात्मकं ॥ ३४३ उत्पत्तेःपूर्वंकारणात्मनासत् कार्यात्मनाऽसच्च ॥ उत्पत्त्यनंतरंकार्यात्मनासत् कारणात्मनाऽसच्च ॥

द्रिकयोरपि ॥ यत्प्रागसिद्धंघटादिकंतदामृदादिकारणरूपेणाप्यस्त्येवेति ॥ ननुनकार्यस्यकारणात्मनासत्त्वं ॥ उभयोरत्यंत भेदादित्यतआह ॥ उपादानेति ॥ ३४४ ॥ तंतुपटयोरत्यंतभेदइतिवदन्प्रष्टव्यः ॥ किंतंतुभ्यःपटोजन्यतेनवेति ॥ नेतिप क्षेप्रत्यक्षविरोधः ॥ कार्यार्थिनउपादानेप्रवृत्त्यनुपपत्तिश्च ॥ आद्येतंतवःपटमुत्पाद्यपटाश्रयतयावर्तंत उतनष्टाभवंतीति ॥ ना द्यः ॥ पृथक्कुंडबदरवददर्शनात् ॥ किंचोभयोःपृथिवीत्वेनगुरुत्वस्यावश्यकत्वे पटेगुरुत्वाधिक्यंस्यात् ॥ नद्वितीयः ॥ समवा यिकारणनाशस्यकार्यनाशप्रयोजकत्वेनतंतुनाशेनपटनाशप्रसंगात् ॥ अतोभेदाभेदावंगीकार्यौ ॥ तदुक्तंयुक्तिपादीयानुव्या ख्याने ॥ नित्यभेदोनिमित्तेनह्युपादानेनतुद्वयमिति ॥ तत्वविवेकेपि ॥ कार्यकारणयोश्चैवेति ॥ उपादानेनद्वयंकार्यस्योपा दाने नभेदाभेदावितिसुधा ॥ कार्यकारणपदमुपादानोपादेयपरमितितत्वविवेकटीका ॥ गीतातात्पर्येपि ॥ तंतुभ्योन्यःपटः साक्षात कस्यदृष्टिपथंगतइति ॥ सुधायामपि ॥ व्यतिषंगविशेषविशिष्टाएवतंतवःपटइति ॥ तार्किकास्तु गुणक्रियाजातिभिर्गु ण्यादेरत्यंतभेदइत्याहुः ॥ तान्निराकरोति ॥ यावद्द्रव्यभाविनामिति ॥ ३४५ ॥ अत्रप्रमाणानिपूर्वमेवोक्तानि ॥ न पुनरत्रनिरूप्यंते ॥ नैयायिकास्तुकारणगुणाःकार्यगुणानारभंतइत्याहुः ॥ तन्नेत्याह ॥ उपादानगताएवेति ॥ ३४६ ॥ यदिकारणगुणैःकार्यगुणोत्पत्तिस्तर्हिकार्यगुणानुत्पाद्यकारणगुणानष्टाभवंतीत्यंगीकर्तव्यं ॥ अन्यथातंतुपटयोरूपादिद्वयप्रती

---

३४४ उपादानोपादेययोर्भेदाभेदौ ॥ ३४५ यावद्द्रव्यभाविनांगुणक्रियाजातीनांगुण्यादिभिरत्यंताभेदएव ॥ अयावद्द्रव्यभाविनांतुभेदाभेदौ ॥
३४६ उपादानगताएवगुणाःकार्यगाः ॥

त्यापत्तेः ॥ ततश्चतंतुषुरूपाद्यभावेनाप्रत्यक्षत्वप्रसंगात् ॥ तदुक्तंसमयपादीयानुव्याख्याने ॥ कारणस्यगुणास्तेनभवेयुःकार्य गाअपीति ॥ सुधायामपि ॥ यतःकारणान्येवकार्याकारेणोत्पद्यंते तेनकारणगुणाएवकार्यगाभवेयुरिति ॥ आत्ममनःसंयोगा दिक्रमेणात्मन्येवज्ञानंजन्यतइतितार्किकाः ॥ तन्निरासायाह॥ **ज्ञानोत्पत्तिक्रमस्त्विति ॥ आत्मामनसासंयुज्यतइति** ॥ ३४७ ॥ आत्ममनःसंयोगाभावेसुप्त्यादौबाह्यार्थज्ञानप्रसंगात् ॥ अतआत्ममनःसंयोगआवश्यकः ॥ तदुक्तंप्रमेयदीपिका यां ॥ सुप्त्यादौ सत्यपिमनसिज्ञानादर्शनात् ॥ एवंतर्ह्यात्मापिज्ञातानस्यादितिचेन्न ॥ तदातस्यमनःसन्निकर्षाभावादिति ॥ नचेंद्रियार्थसन्निकर्षाभावादेवसुप्त्यादौनबाह्यार्थज्ञानमितिवाच्यं ॥ त्वग्भूतलसंयोगादेर्विद्यमानत्वादिति ॥ मनइंद्रियेणेति ॥ येनेंद्रियेणज्ञानंजन्यतेतर्दिंद्रियस्यमनसासन्निकर्षआवश्यकः ॥ मनसोविषयांतरसंचारेसतिचक्षुरादिसन्निकर्षेविद्यमानेपिज्ञा नाभावस्यानुभवसिद्धत्वादितिभावः ॥ तदुक्तंबृहद्भाष्ये ॥ कर्मारस्तुतथाबाणंतीक्ष्णमंजलिकाभिधं ॥ संदधानःशरेयांतंराजा नंनददर्शहेति ॥ इंद्रियमर्थेनेति ॥ कुड्यव्यवहितघटादिज्ञानाभावेनेंद्रियार्थसन्निकर्षस्यावश्यकत्वादितिभावः ॥ तदुक्तंप्रमेयदी पिकायां ॥ तत्तद्विषयाणांतैस्तैरिंद्रियैर्येसन्निकर्षास्तैस्तद्विषयसाक्षात्कारोभवतीति ॥ ततोंतःकरणमेवेति ॥ निरुपादानकसृष्टे रभावेनेंद्रियजन्यज्ञानस्यात्मन्ययोगादितिभावः ॥ नचैवंजानामीत्यनुव्यवसायोनस्यादितिवाच्यं ॥ आत्मनोज्ञानकर्तृतया स्वामित्वेनचतादृशानुभवोपपत्तेः ॥ तदुक्तंप्रमेयदीपिकायां ॥ जन्यज्ञानंमनोनिष्ठमितिसिद्धांतइति ॥ सुधायामपि ॥ वृत्ति

३४७ ज्ञानोत्पत्तिक्रमस्तु ॥ आत्मामनसासंयुज्यते ॥ मनइंद्रियेणेंद्रियमर्थेन ॥ ततोंतःकरणमेवज्ञानात्मनापरिणमते ॥

ज्ञानस्यांतःकरणोपादानकत्वादिति ॥ घटादिकार्योत्पत्तौनज्ञानादेःसाक्षात्कारणत्वमित्याह ॥ **ज्ञानादिति** ॥ ३४८ ॥ आदौ जानातीच्छतियततइतिसर्वानुभवसिद्धत्वादितिभावः ॥ तार्किकास्तु ॥ अपरोक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षःषड्विधः ॥ संयो गः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायो विशेषणविशेष्यभावश्चेति ॥ घटतन्नीलनीलत्वशब्द शब्दत्वजातयः ॥ अभावसमवायौचग्राह्याःसंबंधषट्कतइति ॥ तन्मतमपाकरोति ॥ **अपरोक्षज्ञानहेतुरित्यादिना** ॥ ३४९ ॥ समवायस्यनिराकृतत्वेनतद्घटितसंबंधानामयोगे संयोगस्यैवन्यायप्राप्तत्वादितिभावः ॥ तदुक्तंसुधायां ॥ गुणादि भिरपिसंयोगएवेति ॥ अत्रज्ञानविषययोस्तुनसंयोगः ॥ किंतुविषयविषयिभावइतिसयुक्तिकमुपपादयति ॥ **ज्ञानविषययो रिति** ॥ ३५० ॥ तदुक्तंगीताभाष्ये ॥ आत्मनश्चतैर्विषयविषयिभावसंबंधादन्यःसंबंधोनास्तीति ॥ तद्व्याख्यातंप्रमेयदीपिका यां ॥ तैरितिज्ञानसुखदुःखपरामर्शः ॥ मनोवृत्तिरूपाणिज्ञानादीनिविषयभूतानि ॥ आत्माचविषयी ॥ साक्षिचैतन्यस्यतद्वि षयत्वादिति ॥ एवंवृत्तिरूपज्ञानस्यापिघटादिविषयेणविषयविषयिभावोबोध्यः ॥ तत्वोद्द्योतटीकादौज्ञानविषयत्वमेवज्ञा नकर्मत्वमित्याद्युक्तेः ॥ इतिपाकजादिप्रक्रिया ॥ ७ ॥ ७ ॥ ७ ॥ प्रत्यक्षानुमानोपमानशब्दभेदाच्चत्वारिज्ञानकरणानि ॥ तान्ये वयथार्थज्ञानकरणानीतितार्किकाः ॥ तान्निराकरोति ॥ **ज्ञानकरणमिति** ॥ ३५१ ॥ उपमानादेरनुमानएवांतर्भावात्त्रैविध्यंयु

३४८ ज्ञानादिच्छा ॥ इच्छातःप्रवृत्तिः ॥ ३४९ अपरोक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षस्संयोगएव ॥ गुणादिभिरपींद्रियस्यसंयोगएव ॥ ३५० ज्ञानविषययोस्तुविषयविषयिभावः ॥ अंतःकरणस्थितस्यज्ञानस्यबाह्यघटादिनासंयोगाभावात् ॥ ३५१ ज्ञानकरणंत्रिविधं ॥ प्रत्यक्षानुमानशब्दभेदात् ॥

क्कमितिभावः॥ तदुक्तंप्रमाणलक्षणे ॥ अर्थापत्त्युपमेअनुमाविशेषः॥ अभावोनुमाप्रत्यक्षंचेति॥ भक्तिपादीयानुव्याख्यानेपि॥ अर्थापत्त्युपमाभावाअनुमांतर्गताक्कचिदिति॥ तत्वनिर्णयेपि॥ अर्थापत्तिश्चोपमाचह्यनुमाभेदएवत्विति ॥ अंतर्भावप्रकारश्च तत्तट्टीकातोवगंतव्यः॥ विस्तरभयान्नेहलिख्यते॥ प्रमाणसामान्यलक्षणमाह॥ तत्रेति॥ ३५२॥ तच्चयथार्थज्ञानसाधनरूपानुप्रमाणस्यलक्षणं ॥ यथार्थज्ञानेपिप्रामाण्यव्यवहारात्तत्साधारणंलक्षणंतुयाथार्थ्यमेव॥ यथार्थंप्रमाणमितिप्रमाणलक्षणोक्तेः ॥ युक्तिपादीयानुव्याख्यानेपि ॥ याथार्थ्यमेवमानत्वंतन्मुख्यंज्ञानशब्दयोरिति ॥ तत्वनिर्णयेपि ॥ याथार्थ्यमेवप्रामाण्यंतन्मुख्यंज्ञानशब्दयोरिति ॥ तार्किकास्तु ॥ नयथार्थज्ञानंप्रमाणमित्याहुः ॥ तन्नेत्याह ॥ **यथार्थज्ञानमपीति** ॥ ३५३ ॥ लोकेव्यवहारबलादुक्तप्रमाणबलाच्चेत्यर्थः ॥ ननुषडिंद्रियाणांप्रामाण्यांगीकारेमनःकुत्रार्थेप्रमाणं ॥ नतावदात्मनि सुखदुःखादौचप्रमाणं ॥ तेषांसाक्षिवेद्यत्वोक्तेः ॥ नापिबाह्यार्थे ॥ तत्रस्वातंत्र्याभावादित्यतआह ॥ **संस्कारद्वारेति** ॥ ३५४ ॥ एतेनमनसोबाह्यार्थैःसन्निकर्षाभावान्नस्मरणजनकंमनइतिपरास्तं॥ संस्कारस्यैवसंबंधरूपत्वादितिभावः॥ तदुक्तंयुक्तिपादीयानुव्याख्याने॥ प्रामाण्यंनानुवादस्यस्मृतेरपिविहीयते ॥ याथार्थ्यमेवप्रामाण्यंशब्दार्थोयद्विवक्षितः ॥ अंगीकृतंचेत्प्रामाण्यंस्मृत्यादेःकाविरुद्धतेति ॥ पद्धत्यादावपि स्वातंत्र्येणस्मरणसाधनंमनइति॥ नन्विंद्रियाणांनप्रामाण्यं॥ कदाचिदयथार्थज्ञानजनकत्वादित्यत

---

३५२ तत्रयथार्थज्ञानकरणानिप्रमाणानि ॥ अयथार्थज्ञानकरणान्यप्रमाणानि ॥ ३५३ यथार्थज्ञानमपिप्रमाणं ॥ स्वरूपेंद्रियंसाक्ष्यपिप्रत्यक्षरूपं प्रमाणं ॥ इंद्रियार्थसन्निकर्षद्वाराचक्षुरादिषडिंद्रियाणिज्ञानजनकानि ॥ ३५४ संस्कारद्वारामनःस्मरणसाधनं ॥ यथार्थस्मृतिरपिप्रमाणं॥

आह ॥ **दोषसहकारेणेति** ॥ ३५५ ॥ तदानप्रमाणमित्यर्थः ॥ प्रत्यक्षसहकारिणंनिरूप्यानुमानसहकारिणंनिरूपयति ॥ **व्याप्तिज्ञानमिति** ॥ ३५६ ॥ अज्ञातव्याप्तेर्लिंगादनुमित्यदर्शनाद्व्याप्तिज्ञानमनुमानसहकारीत्यर्थः ॥ **समुचितदेशादाविति** ॥ यद्देशेयत्कालेचस्थित्वापक्षेसाध्यानुमितिजननसमर्थंलिंगंतस्यतद्देशेतत्कालेचसिद्धिरनुमितिसहकारि ॥ यथोर्ध्वदेशोवृष्टिमानधोदेशेनदीपूरात् ॥ उपरिसविताभूमेरालोकात् ॥ अयंकालोरोहिण्युदयासत्तिमान्कृत्तिकोदयवत्त्वादिति ॥ नह्यत्रपरंपरासंबंधेनवा पक्षभेदेनवापक्षधर्मतावक्तुंशक्येतिवाच्यं ॥ लौकिकवैदिकपरीक्षकाणांतथाप्रतीतेरभावात् ॥ तदुक्तंप्रमाणलक्षणे ॥ व्याप्तिरेवहिप्रयोजिकेति ॥ भक्तिपादीयानुव्याख्यानेपि ॥ रोहिण्युदयआसन्नःकृत्तिकाभ्युदितायतः ॥ इत्युक्तेसाधनंनोकिंनह्याज्ञैवात्रसाधिकेति ॥ शाब्दज्ञानकारणमाह ॥ **शक्तिज्ञानमिति** ॥ ३५७ ॥ शक्त्याकांक्षासन्निधिविशिष्टपदप्रत्यक्षमित्यर्थः ॥ नतुशक्त्यादेःप्रत्येकंज्ञानं ॥ ननुपदार्थस्मरणस्याप्यावश्यकत्वात्तत्कुतोनोक्तमितिचेन्न ॥ शक्तिज्ञानएवांतर्भूतत्वात् ॥ तदुक्तंजिज्ञासाधिकरणसुधायां ॥ पदनिचयश्रवणवाक्यार्थबोधावंतरा पदार्थस्मृतीनामेवानभ्युपगमादिति ॥ योग्यताज्ञानंशाब्दज्ञानेकारणमितिनैयायिकाः ॥ तन्नेत्याह ॥ **नत्विति** ॥ ३५८ ॥ नन्वेवमग्निनासिंचेदित्याद्ययोग्यवाक्येप्यन्वयबोध

---

३५५ दोषसहकारेणेंद्रियाण्ययथार्थज्ञानजनकानि ॥ ३५६ व्याप्तिज्ञानंसमुचितदेशादौसिद्धिश्चानुमानसहकारि ॥ नतुपक्षधर्मताज्ञाननियमः ॥ ३५७ शक्तिज्ञानमाकांक्षासत्योश्चज्ञानंशाब्दज्ञानकारणं ॥ ३५८ नतुयोग्यताज्ञानमपि ॥

प्रसंगादित्यतइष्टापत्त्यापरिहरति ॥ **अत्यंतासत्यपीति** ॥ ३५९ ॥ अत्यंतासत्यपिह्यर्थेज्ञानंशब्दःकरोतिहीत्युक्तेः ॥ तदुक्तं भक्तिपादीयसुधायां ॥ अग्निनासिंचेदित्यादौयोग्यताभावेप्यन्वयप्रतीतेःप्रकृतानुपयोगाद्योग्यतापिनोक्तेति ॥ व्याप्त्यादिस्व रूपमाह ॥ **साहचर्येति** ॥ ३६० ॥ यद्यप्यविनाभावोव्याप्तिरितिपद्धत्यादावुक्तं ॥ तथापिसाहचर्यनियमइतियावदिति त त्रैवोक्तेः ॥ भक्तिपादीयसुधायामपि ॥ अविनाभावमात्रस्यव्याप्तित्वात् ॥ अविनाभावश्चक्वचिदेकाश्रयतामंतर्भाव्यभवतीत्या दिनासाहचर्यनियमएवपर्यवसानमुक्तं ॥ पदपदार्थयोरित्यादिग्रंथःपदशक्तिप्रकरणादौव्याख्यातः ॥ नामजात्यादियोजना हीनंनिर्विकल्पकंज्ञानांतरमस्तीतितार्किकाः ॥ शब्दादपरोक्षज्ञानमितिमायावादिनः ॥ तान्दूषयति ॥ **प्रत्यक्षादीति** ॥ ३६१ ॥ ननुजागराव्यवहितोत्पन्नंगौरितिविशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दंडीतिज्ञानवत् ॥ तच्चविशेषणज्ञानं न विशिष्टज्ञानं ॥ तत्रापिविशेषणज्ञानांतरस्यकारणत्वे तत्राप्येवं तत्राप्येवं इत्यनवस्थापत्तेः ॥ अतस्तन्निष्प्रकारकमेवांगीकर्तव्यमि तिचेन्न ॥ विशिष्टप्रत्यक्षेविशेषणेंद्रियसन्निकर्षस्यैवकारणत्वोपपत्तौविशेषणज्ञानस्यापिकारणत्वेमानाभावात् ॥ दंडीदेवदत्तइत्या दिविशिष्टवैशिष्ट्यावगाहिज्ञानेविशेषणतावच्छेदकप्रकारकज्ञानस्यानन्यगत्याकारणत्वांगीकारात् ॥ अधिकंतुतर्कतांडवेबोध्यं ॥

---

३५९ अत्यंतासत्यप्यर्थेशब्दस्यज्ञानजनकत्वदर्शनात् ॥ स्वातंत्र्येणपदार्थस्मरणंनहेतुः ॥ शक्तिज्ञानएवांतर्भूतत्वात् ॥ ३६० साहचर्यनियमो व्याप्तिः ॥ पदपदार्थयोर्वाच्यवाचकभावसंबंधःशक्तिः ॥ तद्ग्रहश्चसादृश्यपुरस्कारेणसर्वधूमाग्न्योःसर्वपदार्थयोश्चभवति ॥ नतुसामान्यप्रत्यासत्त्या ॥ ३६१ प्रत्यक्षादिजन्यंज्ञानंसविकल्पकमेव ॥ नतुनिर्विकल्पकं ॥ मानाभावात् ॥

प्रत्यक्षप्रमाणंविभजति ॥ **प्रत्यक्षप्रमाणमिति** ॥ ३६२ ॥ ननुप्रमाणलक्षणेप्रत्यक्षंसप्तविधं ॥ साक्षिषडिंद्रियभेदेनेति प्रत्य क्षस्यसप्तविधत्वमुक्तं ॥ युक्तिपादीयानुव्याख्यानेतु ॥ प्राकृतंशुद्धचैतन्यमक्षंतुद्विविधंमतं ॥ पंचेंद्रियमनोभेदात्प्राकृतंषड्विधंस्मृ तमितिषड्विधत्वमुक्तं ॥ बृहद्भाष्येतु ॥ चेतनंचजडंचेतिचक्षुराद्यंतथैवच ॥ चेतनंत्विंद्रियंह्यात्मस्वरूपंनापरंस्मृतं ॥ मुक्तानांचेतनं त्वेवबद्धानामुभयंतथेतिद्वैविध्यमुक्तं ॥ तत्कथमष्टविधत्वमुच्यतइतिचेदुच्यते ॥ सर्वत्रप्रमाणलक्षणादौविवक्षाभेदेनानुप्रमाण स्यैवसप्तविधत्वादिकमुक्तं ॥ अत्रकेवलप्रमाणमपिस्वीकृत्याष्टविधत्वमुक्तमित्यविरोधः ॥ अतएवप्रमाणलक्षणेआदिभागे त द्विविधं ॥ केवलमनुप्रमाणंचेति ॥ यथार्थज्ञानंकेवलमिति यथार्थज्ञानस्यापिकेवलप्रमाणत्वमुक्तमितिद्रष्टव्यं ॥ अनुमानंविभ जति ॥ **अनुमानमिति** ॥ ३६३ ॥ प्रमाणलक्षणटीकायां पद्धतौचैवमेवविभागकरणादितिभावः ॥ केवलान्वय्यनुमानलक्ष णमाह ॥ **अन्वयेति** ॥ ३६४ ॥ मात्रपदाभावेन्वयव्यतिरेकिण्यतिव्याप्तिः ॥ अतोमात्रेति ॥ तस्योभयसहचारग्राह्यव्याप्ति कत्वादित्यर्थः ॥ यथाघटोभिधेयःप्रमेयत्वादित्यनुमानंकेवलान्वयि ॥ नचसिद्धांतेप्रमेयत्वाभिधेयत्वयोःप्रतिव्यक्तिभिन्नत्वेन कथंकेवलान्वयित्वमितिवाच्यं ॥ सर्वपदार्थवृत्त्यनुगतैकधर्मत्वंकेवलान्वयित्वमित्यनंगीकारात् ॥ किंतुयोधर्मोयत्रदृश्यतेतत्स दृशाधर्मा अन्यत्रसर्वत्रापिसंतिचेत्सएवधर्मःकेवलान्वयी ॥ अभिधेयत्वप्रमेयत्वादिकंचतथा ॥ घटत्वादिकंतुनतथा ॥ घटत्व

---

३६२ प्रत्यक्षप्रमाणमष्टविधं ॥ साक्षिषडिंद्रिययथार्थज्ञानभेदात् ॥ ३६३ अनुमानंत्रिविधं ॥ केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभे दात् ॥ ३६४ अन्वयसहचारमात्रग्राह्यव्याप्तिकंकेवलान्वयि ॥

सदृशघटत्वांतरस्यपटादावबृत्तेः ॥ केचित्तु ॥ आकाशात्यंताभावःसंयोगात्यंताभावश्चकेवलान्वयीत्याहुः ॥ तन्न ॥ आकाशस्यसंयोगवृत्त्यासर्वगतत्वेनतदत्यंताभावस्यालीकत्वात् ॥ अत्यंताभावप्रतियोगित्वेगगनस्यालीकत्वापाताच्च ॥ संयोगस्यापिसर्वत्रसुलभत्वेनतदत्यंताभावस्यापिकेवलान्वयित्वाभावात् ॥ किंतुशशशृंगाद्यलीकात्यंताभावएवकेवलान्वयीति ॥ केवलव्यतिरेकिवत्केवलान्वयीनपरंपरयानुमितिहेतुः किंतुसाक्षादेवेत्याह ॥ स्वातंत्र्येणेति ॥३६५॥ केवलव्यतिरेकिणंनिरूपयति ॥ व्यतिरेकसहचारमात्रेति ॥३६६॥ व्यतिरेकिणिव्यतिरेकव्याप्तिग्रहस्यानुपयुक्तत्वेनाग्रहणादसंभववारणायान्वयव्याप्तिकमिति ॥ तदेवविवृणोति ॥ व्यतिरेकव्याप्तीति ॥ ३६७ ॥ व्यतिरेकसहचारेणव्यतिरेकव्याप्तिज्ञानं सामग्रीसत्त्वेकार्यजन्यतइत्यभिप्रेत्य ॥ वस्तुतस्तुसाक्षान्नानुमितिहेतुरित्यत्रतात्पर्यं ॥ ननुव्यतिरेकिणिव्यतिरेकसहचाराद्व्यतिरेकव्याप्तिग्रहः ॥ ततःसाध्याभावव्यापकाभावप्रतियोगिमानयमितिव्यतिरेकपरामर्शः ॥ ततःपक्षेसाध्यानुमितिः ॥ यथाजीवच्छरीरंसात्मकंप्राणादिमत्त्वादित्यादावित्यतआह ॥ व्यधिकरणत्वादिति ॥ ३६८ ॥ पक्षधर्मताव्यधिकरणत्वादित्यर्थः ॥ पक्षधर्मतासमानाधिकरणव्याप्तिज्ञानस्यैवानुमानमात्रेकारणत्वेनक्लृप्तत्वात् ॥ अत्रविजातीयसामग्र्यपरिकल्पनात् ॥ नहिसाध्याभावेव्याप्तिज्ञानंसाधनेनसाध्यानुमितावुपयोगि ॥ परंपरासंबंधस्यातिप्रसक्तत्वात् ॥ तथाचसाधनंसाध्यव्याप्यं ॥ साध्याभावव्यापकाभावप्रतियोगि

---

३६५ स्वातंत्र्येणानुमितिहेतुः ॥ ३६६ व्यतिरेकसहचारमात्रग्राह्यान्वयव्याप्तिकंकेवलव्यतिरेकि ॥ ३६७ व्यतिरेकव्याप्तिज्ञानमन्वयव्याप्तिज्ञानद्वारानुमितिहेतुः ॥ नतुसाक्षात् ॥ ३६८ व्यधिकरणत्वाद्व्यतिरेकव्याप्तेः ॥

त्वादित्यन्वयव्याप्तिज्ञानद्वारेणैवव्यतिरेकिणोगमकत्वंवाच्यं ॥ तदुक्तंभक्तिपादीयानुव्याख्याने ॥ व्याप्तिश्चव्यतिरेकेणतत्रतै
श्चावगम्यतइति ॥ तद्व्याख्यातंतत्रैवसुधायां ॥ तत्रजीवच्छरीरंसात्मकं प्राणादिमत्त्वादित्यादिकेवलव्यतिरेकिसमूहैस्तैरप्रसि
द्धैरपिसात्मकत्वादिभिःसाध्यैर्व्याप्तिश्चास्ति ॥ व्यतिरेकेणसाध्याभावस्यसाधनाभावव्याप्यत्वेनलिंगेनावगम्यतेचसेति ॥ पद्ध
तावपि ॥ कथंकेवलव्यतिरेकिणःसंव्यवहारः ॥ इत्थं ॥ प्राणादिमत्त्वं सात्मकत्वेनव्याप्तं तदभावव्यापकाभावप्रतियोगित्वा
दित्यादि ॥ अन्वयव्यतिरेकिणंलक्षयति ॥ उभयेति ॥ ३६९ ॥ नन्वत्रोभयव्याप्तिज्ञानस्यापिसंभवादुभयोरप्यनुमितिहेतु
त्वेकिमपराद्धंव्यतिरेकिणेत्यतआह ॥ अत्रापीति ॥ ३७० ॥ नन्वेवमनुमानत्रयेप्यन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुत्वेकथ
मनुमानत्रैविध्यमित्यतआह ॥ व्याप्तिज्ञानेति ॥ ३७१ ॥ केवलान्वयिन्यन्वयसहचारेणैवव्याप्तिज्ञानं ॥ केवलव्यतिरेकि
णिव्यतिरेकसहचारेणैवान्वयव्याप्तिज्ञानं ॥ अन्वयव्यतिरेकिण्युभयसहचाराभ्यामन्वयव्याप्तिज्ञानंजन्यतइतिकारणभेदा
दित्यर्थः ॥ प्रकारांतरेणानुमानंविभजति ॥ स्वार्थमिति ॥ ३७२ ॥ परार्थानुमानेप्रतिज्ञाहेतूदाहरणोपनयनिगम
नानिपंचावयवा नियमेनप्रयोक्तव्याइतिनैयायिकाः ॥ तेभ्रांताइत्याह ॥ यावताविनेति ॥ ३७३ ॥ परोपदेश

३६९ उभयसहचारग्राह्यव्याप्तिकमन्वयव्यतिरेकि ॥ ३७० अत्राप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुः ॥ ३७१ व्याप्तिज्ञानकारणभेदा
द्भेदः ॥ ३७२ स्वार्थपरार्थचेतिपुनर्द्विविधमनुमानं ॥ स्वार्थस्वानुमितिहेतुः ॥ परानुमितिहेतुःपरार्थं ॥ ३७३ यावताविनानानुमितिस्तावदवयवाः
प्रयोक्तव्याः ॥ नतुपंचावयवनियमः ॥

स्यपंचावयवनियतिंवदन्प्रष्टव्यः ॥ किमेतत्पंचावयववाक्यमागमतयाव्याप्तिपक्षधर्मताविशिष्टलिंगप्रतिपादकं उतस्मरणमा
त्रोपयुक्तं ॥ नाद्यः ॥ वादिप्रतिवादिनोरितरेतरस्मिन्ननाश्वासात् ॥ आश्वासेवाप्रतिज्ञामात्रेणार्थसिद्धौहेत्वाद्यभिधानवै
यर्थ्यात् ॥ नद्वितीयः ॥ यत्रस्मारकाभावस्तत्रैवस्मरणार्थमेकैकमेवप्रयोक्तव्यं नतुसर्वेप्यवयवाः ॥ किंचाविवादेनैवप्र
तिज्ञार्थसिद्धौप्रमाणाकांक्षायांहेतूपन्यासएवयुक्तो नत्ववयवांतरोपन्यासः ॥ यदिचलिंगंपक्षेज्ञातं तदाकुतोस्यगमकत्वमि
त्याकांक्षायांव्याप्तिप्रदर्शनायोदाहरणमात्रंप्रयोक्तव्यं ॥ नत्ववयवांतरं ॥ आधिक्यंस्यात् ॥ किंचहेतूपनयौ किंपक्षेलिंगानुसं
धानवतःप्रयोक्तव्यावुततद्रहितंप्रति ॥ नाद्यः ॥ व्यर्थत्वात् ॥ नद्वितीयः ॥ लिंगस्यैवाज्ञानेप्रमाणप्रवृत्तेरेवाभावेनकथायाए
वानुदयात् ॥ नचयावत्पर्यंतंविवादस्तावत्पर्यंतंवाक्यानिप्रयोक्तव्यानीतिवाच्यं ॥ तर्हिपंचावयवनियमोनस्यात् ॥ नहिपंचाव
यवपर्यंतमेवविवादोनत्वनंतरमित्यत्रप्रमाणमस्ति ॥ तस्मान्ननियमपक्षोयुक्तः ॥ तदुक्तंयुक्तिपादीयानुव्याख्याने ॥ प्रतिज्ञाता
र्थसिद्ध्यर्थंव्याप्तिरेवयदोदिता ॥ अवशिष्टंकिमत्रास्तिलिंगंतत्रविजानतः ॥ यदिलिंगमसिद्धंस्यात्कुतएवास्यमान्यता ॥ यदिस्मार
कमात्रंस्यात्स्मर्तुर्नात्रप्रयोजनं ॥ नपंचावयवोक्तौचविवादावसतिर्भवेदिति ॥ तत्वनिर्णयेपि ॥ प्रतिज्ञाहेतुगर्भैवपृथक्प्रामाण्य ॥ ९९ ॥
मेष्यति ॥ सिद्धत्वेनप्रतिज्ञायाहेतुर्मानंपृथग्भवेदिति ॥ प्रमाणलक्षणेपि ॥ हेतुगर्भाप्रतिज्ञाकेवलापि ॥ सिद्धौप्रतिज्ञायांहेतु
मात्रंच ॥ दृष्टांतःसप्रतिज्ञोहेतुगर्भइति ॥ इतिप्रत्यक्षानुमानप्रकरणं ॥ १ ॥ १ ॥ १ ॥ आगमंविभजति ॥ आगम

इति ॥ **यथाभारतादीति** ॥ ३७४ ॥ नारायणावतारेणव्यासेनकृतत्वाद्भारतादिसर्वंप्रमाणमित्यर्थः ॥ तदुक्तंगीताभा
ष्ये ॥ कोह्यन्यःपुंडरीकाक्षान्महाभारतकृद्भवेदिति ॥ ब्रह्माद्यैःप्रार्थितोविष्णुर्भारतंसचकारह ॥ भारतंचापिकृतवान्पंचमंवे
दमुत्तममिति ॥ गीतातात्पर्येपि ॥ स्वयंनारायणोदेवोब्रह्मरुद्रेंद्रपूर्वकैः ॥ अर्थितोव्यासतांप्राप्यकेवलंतत्वनिर्णयं ॥ चकारपं
चमंवेदंमहाभारतसंज्ञितमिति ॥ निर्णयेपि ॥ द्वैपायनःसोथजगाममेरुंचतुर्मुखाद्यैरनुगम्यमानः ॥ समस्तशास्त्रार्थविनिर्णया
त्मकंचक्रेमहाभारतनामधेयं ॥ वेदोत्तमंतच्चविधातृशंकरप्रधानकैस्तन्मुखतःसुरैःश्रुतमिति ॥ वेदार्थानुसारित्वंचभारतस्यनसर्व
त्रापि ॥ किंतुकतिपयार्थेष्वेव ॥ केवलेश्वरप्रत्यक्षविषयीकृतार्थप्रतिपादकत्वात् ॥ तदुक्तंगीताभाष्ये ॥ ततःप्रसन्नोभगवा
न्व्यासोभूत्वाचतेनच ॥ अन्यावताररूपैश्चवेदानुक्तार्थभूषितं ॥ केवलेनात्मबोधेनदृष्टंवेदार्थसंयुतं ॥ वेदादपिपरंचक्रेपंचमंवे
दमुत्तमं ॥ भारतंपंचरात्रंचमूलरामायणंतथा ॥ पुराणंभागवतंचेतिसंभिन्नःशास्त्रपुंगवइति ॥ सर्ववेदाद्यर्थोपबृंहितांतदनुक्त
केवलेश्वरज्ञानदृष्टार्थयुक्तांचसर्वप्राणिनामवगाह्यानवगाह्यरूपांकेवलभगवत्स्वरूपपरांमहाभारतसंहितामचीक्लृपदिति ॥ पौरुषे
यवाक्यवदपौरुषेयवेदेक्वापिनाप्रामाण्यमित्याह ॥ **अपौरुषेयस्त्विति** ॥ ३७५ ॥ ननुवेदस्यापौरुषेयत्वेप्रमाणाभावइत्यत
आह ॥ **वेदापौरुषेयत्वंचेति** ॥ ३७६ ॥ तत्प्रमाणंतुतत्वनिर्णयेप्रतिपादितं ॥ वाचाविरूपनित्यया ॥ नित्ययानित्ययास्तौ

३७४ आगमोद्विविधः ॥ पौरुषेयापौरुषेयभेदात् ॥ पौरुषेयआप्तोक्तएवप्रमाणं ॥ वक्तुराप्तताचविवक्षितार्थतत्वज्ञानं ॥ भ्रमप्रमादविप्रलिप्साकर
णापाटवादिशून्यत्वंच ॥ वेदानुसारित्वंवा ॥ यथाभारतादि ॥ ३७५ अपौरुषेयस्तुसर्वोऽपिवेदः प्रमाणं ॥ ३७६ वेदापौरुषेयत्वंचवेदेनैवसिद्धं ॥

मिब्रह्मतत्परमंपदं ॥ श्रुतिर्वावनित्या ॥ अनित्यावावस्मृतयः ॥ अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा ॥ नित्यावेदाःस
मस्ताश्चशाश्वताविष्णुबुद्धिगाइत्यादि ॥ तत्वसंख्यानेपि ॥ नित्यावेदाःपुराणाद्याइत्यादि ॥ ननुवेदः पौरुषेयो वाक्यत्वा
द्भारतादिवदितिचेन्न ॥ उक्तप्रमाणविरुद्धत्वेनबाधितत्वात् ॥ विपक्षेबाधकतर्काभावेनाप्रयोजकत्वात् ॥ यदिवेदःपौरुषेयः
स्यात्तदाधर्माधर्माद्यसिद्धिःस्यादितिप्रतिकूलतर्कपराहतेश्च ॥ तदुक्तंतत्वनिर्णये ॥ तदभावेसर्वसमयाभिमतधर्माद्यसिद्धेरिति ॥
गीताभाष्येपि ॥श्रुतेश्च ॥अपौरुषेयत्वात् ॥ नह्यपौरुषेयेपौरुषेयाज्ञानादयःकल्पयितुंशक्याइति ॥ नचऋचःसामानिजज्ञिरइत्या
दिश्रुतिभिर्वेदानामुत्पत्तिःप्रतीयतइतिवाच्यं ॥ तस्याअभिव्यक्तिविषयत्वेनोत्पत्तिविषयकत्वाभावात् ॥ नचचक्रेवेदतरोःशा
खाः ऋचःसऋचउद्धृत्यऋग्वेदंकृतवान्प्रभुरित्यादिपुराणवाक्यैरुत्पत्तिरेवावगम्यतइतिवाच्यं ॥ शाखाविभागकरणविषयकत्वे
नवेदोत्पत्तिविषयकत्वाभावात् ॥ अध्ययनविश्रमार्थंशाखादिविभागस्यावश्यकत्वात् ॥ तदुक्तमृग्भाष्ये ॥ ऋचःसऋचउद्धृ
त्यऋग्वेदंकृतवान्प्रभुः ॥ यजूंषिनिगदाच्चैवतथासामानिसामतः ॥ ऋचःशाखात्वमापन्नाःशिष्यतच्छिष्यकैरिमाः ॥ अष्टकाध्या
यवर्गादिभेदंचकृतवान्स्वयं ॥ स्वाध्यायविश्रमार्थायतस्मात्क्रमविपर्ययइति ॥ तदर्थस्तुतट्टीकायामुक्तः ॥ तथाहि ॥ ऋङ्नि
गदसामानीतिमूलवेदादुद्धृताउपवेदाउच्यंते ॥ ततोमूलवेदादुपवेदाः ॥ ततश्चावांतरवेदाउद्धृताइत्येवंपुराणवचनादवगम्यत
इत्यर्थः ॥ यथोपवेदादिप्रबंधःकृत्रिमएवंशाखाप्रभेदोपीत्येतत्प्रसंगादाह ॥ ऋचइतीति ॥ एवंभाष्यटीकयोरपिवेदमुत्सन्नंव्यंज
यंश्चतुर्धाव्यभजत् ॥ चतुर्विंशतिधैकशतधासहस्रधाद्वादशधाचेति ॥ प्रागेवचतुर्धाविभक्तंवेदंऋङ्निगदादिरूपंव्यक्तीकृत्यैकैक

स्मादेकैकोभागइतिचतुर्धाव्यभजत् ॥ एकैकंचावांतरमृगादिवेदंचतुर्विंशत्यादिशाखाभेदेनव्यभजदित्यर्थइति ॥ सर्वकर्मकृतौ यस्मादशक्ताःसर्वजंतवः ॥ शाखाभेदंकर्मभेदंव्यासस्तस्मादचीक्लृपदिति ॥ आथर्वणभाष्येपि ॥ एकोवेदःकृतेह्यासीत्रेतायांस त्रिधाभवत् ॥ सएवपंचधाजातोद्वापरंप्राप्यवैयुगमिति ॥ नन्वस्तुवेदोपौरुषेयः ॥ अथापिनसर्वोपिवेदःप्रमाणं ॥ अहंब्रह्मास्मि तत्वमसीत्यादेरैक्यभ्रमजनकत्वेनाप्रमाणत्वादित्यतआह ॥ उपक्रमादीति ॥ ३७७ ॥ तथाचापाततस्तत्वमस्यादिवाक्या नामैक्यभ्रमजनकत्वेप्युपक्रमादिषड्विधतात्पर्यलिंगसहितस्यभेदप्रमाजनकत्वादितिभावः ॥ तदुक्तंसमन्वयाधिकरणभाष्ये ॥ उपक्रमोपसंहारावभ्यासोपूर्वताफलं ॥ अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयइति ॥ अनुव्याख्यानेपि ॥ उपक्रमादिलिंगेभ्योना न्यःस्यादनुमानतः ॥ तएवान्वयनामानस्तैःसम्यक्प्रविचारिते ॥ मुख्योर्थोभगवान्विष्णुःसर्वशास्त्रस्यनापरइति ॥ ननुसर्वस्या पिवेदस्यपरमात्ममात्रप्रतिपादकत्वंपूर्वोक्तमयुक्तं ॥ तत्रतत्रब्रह्मरुद्रादिप्रतिपादकत्वस्यापिदर्शनादित्यतआह ॥ वेदार्थस्त्रिवि धइति ॥ ३७८ ॥ तमेवाह ॥ परमात्मेत्यादिना ॥ तदुक्तमृग्भाष्ये ॥ त्रयोर्थाःसर्ववेदेषुदशार्थाःसर्वभारते ॥ विष्णोःसहस्रनामा पिनिरंतरशतार्थकं ॥ पृथग्रूपाणिविष्णोस्तुदेवतांतरगाणिच ॥ अग्न्यादिसूक्तवाच्यानिनाम्नासूक्तभिदाभवेदिति ॥ मध्वविज येपि ॥ त्र्यर्थतांश्रुतिषुवित्तदशार्थं ॥ भारतंननुशतार्थमपिस्याद्वैष्णवंपदसहस्रतयंहीति ॥ सर्वस्यापिशब्दस्यपरमात्मप्रतिपादक

३७७ उपक्रमादिषड्विधतात्पर्यलिंगैर्निर्णीतार्थकएववेदःप्रमापकः ॥ अन्यथाभ्रमजनकः ॥ ३७८ वेदार्थस्त्रिविधः ॥ परमात्माब्रह्मादिदेवास्त दंतर्गतभगवद्रूपाणिचेति ॥

त्वंकयावृत्त्येत्यतआह ॥ **परममुख्ययेति** ॥ ३७९ ॥ नपरमात्मवदन्यप्रतिपादकतेत्याह ॥ **तदन्यप्रतिपादकताचेति** ॥ ३८० ॥ तदुक्तंन्यायविवरणे ॥ रूढिर्योगो रूढियोगो महारूढियोगो रूढोपचारो रूढलक्षणोपचारो लक्षणेतिशब्दवृत्तिभेदादिति ॥ ननुयोगरूढ्योर्योगरूढेश्चकुत्रांतर्भावइत्यतआह ॥ **मुख्यवृत्तिरपीति** ॥ ३८१ ॥ तथा चतेषांमुख्यवृत्तावंतर्भावइत्यर्थः ॥ रूढिस्वरूपमाह ॥ **प्रयोगेति** ॥ ३८२ ॥ प्रयोगमात्रबाहुल्यंरूढिरित्यभिधीयतइत्यनुव्याख्यानोक्तेरितिभावः ॥ **अवयववृत्तिरिति** ॥३८३॥ पचतेर्ण्वुलिकृतेपाचकशब्दस्यप्रवृत्तेरित्यर्थः ॥ योगरूढेरुदाहरणमाह ॥ **पंकजादिशब्दानामिति**॥३८४॥लक्षणास्वरूपमाह ॥**मुख्येति** ॥ ३८५॥ तदुक्तंप्रकृत्यधिकरणानुव्याख्याने॥पूर्वायोगेपरग्रहइति ॥ गौण्याःस्वरूपमाह ॥ **मुख्यार्थसादृश्यवतीति** ॥ ३८६ ॥ तदुक्तंप्रकृत्यधिकरणानुव्याख्याने ॥ प्रयोगयुक्तसा

---

३७९ परममुख्ययावृत्त्यापरमात्मप्रतिपादकः ॥ ३८० तदन्यप्रतिपादकताचमुख्ययालक्षणयागौण्योपचारेणरूढोपचारेणरूढलक्षणयाचेति ॥ ३८१ मुख्यवृत्तिरपित्रिविधा ॥ योगोरूढिर्योगरूढिश्चेति ॥ ३८२ प्रयोगबाहुल्यमात्रंरूढिः ॥ यथागोघटादिशब्दानांगोघटादिषु ॥ ३८३ अवयववृत्तिर्योगः ॥ यथापाचकादिशब्दानांदेवदत्तादौ ॥ ३८४ तदुभयंयोगरूढिः ॥ यथापंकजादिशब्दानांपद्मादौ ॥ ३८५ मुख्यान्वयानुपपत्तिपूर्वकंमुख्यसंबंधवतिवृत्तिर्लक्षणा ॥ यथागंगायांघोषइत्यत्रगंगापदस्यतीरे ॥ ३८६ मुख्यार्थसादृश्यवतिवृत्तिर्गौणी ॥ यथाग्निशब्दस्यमाणवके ॥ उपचारमात्रंयथा ॥ चित्रलिखितसिंहादौसिंहशब्दस्य ॥ तत्रप्रयोगबाहुल्यंचेद्रूढोपचारः ॥ यथातप्तायःपिंडेदग्धृशब्दस्य ॥ रूढलक्षणायथा ॥ मार्गाश्चलंतीत्यादौमार्गादिशब्दानांतत्स्थे ॥

दृश्यंसंबंधोवाप्यमुख्यतः ॥ वृत्तिहेतुरितिज्ञेयइति ॥ अत्रसुधाटीकादावुदाहरणव्यत्यासोविवक्षाभेदाद्बोध्यः ॥ लक्षणांविभजति ॥ **लक्षणापित्रिविधेति** ॥ ३८७ ॥ लक्षितलक्षणास्वरूपमाह ॥ **लक्ष्यंसंबंधीकृत्येति** ॥ **च्विप्रत्ययस्येति** ॥ ॥ ३८८ ॥ तदुक्तंतत्वनिर्णयटीकायां ॥ विषयैक्यान्मतीनामैक्यं ॥ तदैक्यान्मतिमतामैक्यमितिलक्षितलक्षणेत्यर्थइति ॥ अस्मिन्नर्थेअभूततद्भावेकृभ्वस्तियोगेसंपद्यकर्तरिच्विरितिच्विप्रत्ययमुख्यार्थस्यालाभाल्लक्षणेतिबोध्यं॥ एवंप्रमेयदीपिकायामपिलक्षितलक्षणोक्ता ॥ तथाहि ॥ शीतोष्णसुखदुःखदाइतिगीतायाभाष्यं ॥ देहेशीतोष्णादिसंबंधाद्धिशीतोष्णाद्यनुभवआत्मनः॥ ततश्चसुखदुःखेइति॥ तत्रटीका देहशब्देनात्रेंद्रियाणिलक्ष्यंते ॥ अनेनशीतोष्णशब्दौसकलविषयोपलक्षकौ ॥ विषयोक्त्याचतत्साक्षात्कारोलक्ष्यतइतिलक्षितलक्षणेयमिति ॥ सर्वाअपिवृत्तयोनपरमात्मनि नवाजगतीत्यतोव्यवस्थामाह ॥ **एतावृत्तय इति** ॥ ३८९ ॥ महायोगमहारूढिरूपपरममुख्यवृत्तिव्यतिरिक्तावृत्तयोयथायोग्यंजगतितत्रतत्रद्रष्टव्याइत्यर्थः ॥ परमात्मनिशब्दानांवृत्तिमाह ॥ **परमात्मनीति** ॥३९०॥ केषांशब्दानांपरमात्मनिमहायोगइत्यतआह ॥ **इंद्रादीति** ॥३९१॥ इंद्रादिशब्दानांपरमात्मन्यज्ञरूढेरभावेनपरमैश्वर्याह्लादकारित्वादिरूपयोगेनैवप्रवृत्तेर्वक्तव्यत्वात् ॥ अन्यथागुणपूर्त्यलाभप्रसंगाच्चेति

---

३८७ लक्षणापित्रिविधा ॥ जहदजहल्लक्षितलक्षणाभेदात् ॥ मुख्यार्थपरित्यागोयत्रतत्रजहल्लक्षणा ॥ गंगापदस्यतीरे ॥ मुख्यार्थस्यापरित्यागोयत्रतत्राजहल्लक्षणा ॥ छत्रिपदस्याच्छत्रिष्वपि ॥ ३८८ लक्ष्यसंबंधीकृत्यतत्संबंधिनिवृत्तिर्लक्षितलक्षणा ॥ एकीभवंतीत्यादौच्विप्रत्ययस्यमत्यैक्यद्वारामतिमत्सु ॥ ३८९ एतावृत्तयोजगति ॥ ३९० परमात्मनिमहायोगोमहारूढिश्च ॥ ३९१ इंद्रादिजगद्वाचिशब्दानांपरमात्मनिमहायोगः ॥

भावः ॥ ननुपरमैश्वर्यरूपयोगार्थस्येंद्रादौपरमात्मनिचसाम्येपरमात्मन्येवमहायोगइंद्रादौयोगमात्रमित्यत्रकिंनियामकमित्यत आह॥योगार्थस्येति ॥ निरवधिकत्वादिति॥३९२॥ इंद्रादिगतैश्वर्यापेक्षयाब्रह्मादिगतैश्वर्यस्याधिक्यवत्परमात्मगतैश्वर्यापेक्षयान्यत्राधिक्याभावेननिरवधिकत्वादित्यर्थः॥नन्वेवमल्पपंकजेपंकजशब्दस्यामुख्यत्वंबहुपंकजेमुख्यत्वंचस्यादित्यतआह॥ इंद्रादिगतेति ॥ ३९३ ॥ परमात्मन्यैश्वर्यस्यमहत्त्वमात्रेणेंद्रादिशब्दस्यपरममुख्यत्वंनब्रूमः ॥ येनातिप्रसंगःस्यात्॥ किंत्विंद्रादिगताल्पैश्वर्यस्यापिपरमात्माधीनत्वेनापि ॥ नह्यल्पपंकजगतपंकजन्मकर्तृत्वस्यमहापंकजाधीनत्वं ॥ येनतत्रपंकजशब्दस्य तदपेक्षयामुख्यतास्यात् ॥ अतोनदोषइतिभावः ॥ महायोगरूढेरुदाहरणमाह ॥ नारायणादीति ॥ ३९४ ॥ नारायणशब्दार्थस्यगुणपरिपूर्णत्वस्यपरमात्मन्येवमुख्यत्वात् ॥ अज्ञरूढेश्चसद्भावान्महायोगरूढिरित्यर्थः॥ ननुयमिंद्रमाहुर्वरुणंयमाहुरितींद्रादिशब्दानामपिपरमात्मनिमहारूढिसद्भावान्महायोगरूढिरेवकिंनस्यादितिचेत्सत्यं ॥ महायोगरूढावज्ञरूढिरपिप्रयोजिका ॥ नतुविद्वद्रूढिमात्रं ॥ अतोनेंद्रादिशब्दानांपरमात्मनिमहायोगरूढिरितिभावः ॥ तदुक्तंप्रकृत्यधिकरणसुधायां ॥ नारायणादिशब्दानांपरमात्मनिमहायोगरूढिः ॥ तदितरेषांमहायोगइति ॥ अनुव्याख्यानेपि ॥ तस्मात्परममुख्यत्वंविष्णावन्यत्रमुख्यता ॥ प्रवृत्तिहेतोर्बाहुल्यंज्ञेयंपरममुख्यता ॥ तत्रप्रयोगबाहुल्यंयदितत्परताकिमु ॥ उभयंदृश्यतेविष्णौशब्दानाम ॥१०२॥

---

३९२ योगार्थस्यैश्वर्यादेःपरमात्मनिनिरवधिकत्वात् ॥ ३९३ इंद्रादिगताल्पैश्वर्यस्यापिपरमात्माधीनत्वाच्च ॥ ३९४ नारायणादिशब्दानांमहायोगरूढिः ॥

पिसर्वेशइति ॥ अत्रपरमात्मनिलक्षणयापिकचिच्छब्दप्रवृत्तिःसंमता ॥ यथासुषिरशब्दस्यपरमात्मनिलक्षणा ॥ तस्यांतेसु
षिरंसूक्ष्ममित्यादौ ॥ तत्रभाष्यंतदंतःस्थत्वापेक्षत्वान्नसुषिरश्रुतिविरोधइति ॥ तत्रटीकाचमंदिरेमणिमालेत्यत्रमंदिरपदेनतदं
तःस्थमंजूषाविवक्षावत्सुषिरश्रुतेरपितदंतःस्थभगवदपेक्षयाप्रवृत्तत्वादित्यर्थइति ॥ अत्रसुषिरशब्दस्यसुषिरस्थेलक्षणायाःस्वी
कृतत्वात् ॥ यथाकथंचित्सुषिरशब्दस्ययोगेनप्रवृत्त्यंगीकारेसुषिरस्थत्वरूपार्थस्यप्रकृतोपयुक्तस्यलक्षणांविनाऽयोगात् ॥ एवंवा
मनाधिकरणेअंगुष्ठमात्रःपुरुषोंतरात्मेत्यत्रांगुष्ठमात्रपदस्यपरमात्मनिलक्षणांगीकृता ॥ तथाहि ॥ तत्रभाष्यं ॥ सर्वगतस्याप्यं
गुष्ठमात्रत्वंहृद्यवकाशापेक्षयायुज्यतइति ॥ तट्टीकापि ॥ भिन्नेष्वपिस्थानैक्योक्तिवद्धृदयाकाशस्यांगुष्ठमात्रत्वेनतत्संबंधात्स
र्वगतेपिहरावुपचारेणांगुष्ठमात्रत्वोक्तिरित्यर्थइति ॥ वामनाधिकरणचंद्रिकायामपि ॥ अंगुष्ठमात्रत्वंचस्थानहृदयगतस्यस्थानि
निब्रह्मण्युपचाराद्वायुक्तमिति ॥ एवंतद्गुणसारत्वात्तद्व्यपदेशःप्राज्ञवदितिसूत्रेसर्वंखल्विदंब्रह्मेतिश्रुतेःपरमात्मनिगौणत्वमंगीक
र्तव्यमेव ॥ तदुक्तंकर्मनिर्णयटीकायां ॥ तथाहितत्रवाक्यानि ॥ अस्तुतर्हीश्वरेगौणाद्यभावइतिचेन्न ॥ अंगुष्ठमात्रश्रुतेःसुषिरश्रु
तेश्चेश्वरएवलाक्षणिकत्वेनोक्तत्वात् ॥ प्राज्ञवदितिसर्वंखल्विदंब्रह्मेतिश्रुतेश्चगौणत्वेनस्वीकृतत्वादित्यलमिति ॥ आनंदमयाधि
करणसुधायामपि ॥ तस्येदमेवशिरइत्यादाविदमादिशब्दानांपरमात्मशिरआदौलक्षणोक्ता ॥ इदमितिनिर्देशःपरमेश्वरशिरः
प्रभृतौलक्षणयाभवेदिति ॥ अनुव्याख्यानेपि ॥ इदमित्येवनिर्देशोवस्त्रप्रावृतजानुवदिति ॥ टीकायामपि ॥ इदमितिनिर्दे
शस्यलाक्षणिकत्वमंगीकृत्यापीति ॥ एवंलक्षितलक्षणयापिपरमात्मनिशब्दप्रवृत्तिरंगीकर्तव्या ॥ उपलक्षणत्वंशब्दानामानंदम

यपूर्विणामित्यनुव्याख्यानबलादानंदमयोभ्यासादितिसूत्रेतावदानंदमयशब्दस्यान्नमयादिशब्देषुलक्षणास्वीकृता ॥ तथाचा
न्नमयादिशब्दवाच्यत्वमप्यस्मिन्नेवसूत्रेप्रतिपाद्यमेव ॥ तच्चलक्षितलक्षणयाभवति ॥ आनंदमयशब्दस्यान्नमयादिशब्दाँ
ल्लक्षितान्संबंधीकृत्यान्नमयादिशब्दवाच्यत्वेलक्षणायायुक्तत्वात् ॥ नचैवमानंदमयशब्दस्यान्नमयादिशब्देष्वेवलक्षणास्तु ॥
अनंतरमन्नमयादिशब्दैरेवान्नमयादिशब्दवाच्यत्वंपरमात्मनिबोध्यतइतिवाच्यं ॥ तर्हिद्विरेफंपश्येत्यादावपिद्विरेफशब्दस्यभ्रम
रपदेलक्षणा भ्रमरपदाच्चशक्त्याषट्पदोपस्थितिसंभवेद्विरेफादिशब्देष्वपिलक्षितलक्षणानस्यात् ॥ नचद्विरेफंपश्येत्यत्रप्रत्ययानां
प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्षट्पदरूपार्थस्यद्विरेफपदार्थत्वाभावेनतत्रद्विरेफपदसमभिव्याहृतद्वितीयाविभक्त्यर्थक
र्मत्वान्वयबोधोनस्यात् ॥ नहिभ्रमरपदंपश्येतिवाक्यार्थः ॥ किंतुषट्पदरूपार्थंपश्येति ॥ तथाचद्विरेफपदस्यषट्पदरूपार्थेलक्षित
लक्षणास्वीकर्तव्येतिवाच्यं ॥ प्रकृतेप्यानंदमयशब्दसमभिव्याहृतप्रथमाविभक्त्यर्थस्यप्रातिपदिकार्थादेरन्नमयादिशब्दैरभेदा
न्वयायोगात् ॥ नह्यानंदमयाभिन्नोन्नमयादिशब्दइतिवाक्यार्थः ॥ किंत्वानंदमयशब्दवाच्याभिन्नोन्नमयादिशब्दवाच्यइति ॥
तथाचानंदमयशब्दस्यलक्षितलक्षणयान्नमयादिशब्दवाच्यत्वंपरमात्मन्यंगीकृतमेव ॥ एवमाकाशादिशब्दानामपीति ॥ न
चैवंपरममुख्ययावृत्त्यासर्वेषांशब्दानांपरमात्मनिसमन्वयप्रतिपादनार्थंप्रवृत्तानंदमयोऽभ्यासादित्यादिसूत्राणांकथंपरमात्मनि
लाक्षणिकत्वमितिवाच्यं ॥ अन्योंतरआत्मानंदमयः तस्यप्रियमेवशिरइत्यादिश्रुतीनांपरमात्मनिपरममुख्ययावृत्त्याप्रवृत्तिप्रद
र्शनार्थसूत्राणांप्रवृत्तत्वेनस्वस्यापिपरममुख्यत्वप्रतिपादनायप्रवृत्तत्वाभावात् ॥ अतएवटीकायांप्रत्यधिकरणमानंदमयादिशब्द

वाच्योभगवानितिसिद्धमित्यानंदमयशब्दवाच्यत्वेलक्षणांगीकृतेत्यलं ॥ शक्तिज्ञानंशाब्दज्ञानसहकारीत्युक्तं ॥ साचशक्तिर्जाति
विशिष्टव्यक्तावितितार्किकाः ॥ जातावेवशक्तिर्व्यक्तिस्त्वाक्षेपलभ्येतिमीमांसकाः ॥ कार्यान्वितस्वार्थेशक्तिरितिप्राभाकराः ॥
तान्निराकरोति ॥ **शक्तिश्चेति** ॥ ३९५ ॥ घटमानयेत्यादौघटशब्दस्यानयनान्वितेघटेशक्तिः आनयेतिपदस्यापिघटान्वितान
यनक्रियायांशक्तिरित्यर्थः ॥ नचैवंघटपदेनैवानयनस्याप्युपस्थितावानयेतिपदस्यवैयर्थ्यं ॥ तथानयेतिपदेनैवघटस्याप्युपस्थि
तौघटपदस्यवैयर्थ्यमितिवाच्यं ॥ घटपदस्यानयनान्वितस्वार्थेशक्तिरित्यस्यकोर्थः ॥ इतरत्वेनानयनान्वितस्वार्थेशक्तिरित्यर्थः ॥
नत्वानयनत्वेनानयनान्वितस्वार्थइत्यर्थः ॥ एवमानयनपदस्यापि ॥ नचैवंघटपदादितरान्वितोघटइतिपदार्थस्मरणापत्तिः ॥
आनयनपदादपीतरान्वितमानयनमितिस्मरणापत्तिः ॥ तथाचघटकर्मकमानयनमित्यन्वयबोधोनस्यादितिवाच्यं ॥ सामान्या
कारेणगृहीतायाएवशक्तेर्विशेषपदसमभिव्याहारमहिम्नाविशेषान्वयबोधेपर्यवसानसंभवात् ॥ यथाधूमोवह्निव्याप्यइतिसामा
न्याकारेणगृहीतायाव्याप्तेःपर्वतीयधूमेंद्रियसन्निकर्षरूपविशेषसामग्रीबलात्पर्वतीयधूमोवह्निव्याप्यइतिविशेषाकारेणव्याप्तिज्ञा
नं तथेहापि ॥ आनयनस्येतरत्वेनोपस्थितावप्यानयनत्वेनोपस्थित्यर्थमानयनपदस्यसार्थकत्वात् ॥ अन्यथान्वयस्याशक्यत्वे
शाब्दबोधविषयत्वाभावप्रसंगात् ॥ नहिपदानुपस्थितस्यशाब्दबोधविषयत्वं ॥ अतिप्रसंगात् ॥ अतोन्वयांशेपिशक्तिरंगीकर्त
व्या ॥ तदुक्तंजिज्ञासाधिकरणानुव्याख्याने ॥ शक्तिश्चैवान्वितेस्वार्थेशब्दानामनुभूयतइति ॥ भक्तिपादीयानुव्याख्यानेपि ॥

३९५ शक्तिश्चयोग्येतरान्वितस्वार्थेव्यक्तावेव ॥ नतुजातिविशिष्टे ॥ गौरवात् ॥

अतःसामान्यतोज्ञातःपदांतरबलात्पुनः ॥ भवेद्विशेषतोज्ञातस्तेनस्यादन्वितोक्तिता॥अन्वयस्यकथंज्ञानंशब्दार्थत्वंयदास्यनेति॥ यच्चोक्तंजातिविशिष्टेशक्तिरितितन्न ॥ गौरवेणव्यक्तावेवशक्तेर्लघुत्वात् ॥ ननुव्यक्तावेवशक्त्यंगीकारेजातेरपदार्थस्यान्वयबोधविषयत्वंनस्यादित्यतआह ॥ **जातिभानंचेति** ॥ **अविनाभावादिति** ॥३९६॥ जातेःशक्यतावच्छेदकत्वेननियमेनशक्तिग्रहविषयतयाशाब्दबोधविषयत्वसंभवादितिभावः ॥ यदिघटपदस्यघटत्वविशिष्टेशक्तिस्तर्हिघटपदाद्धटत्वविशिष्टोयमितिप्रतीतिप्रसंगात् ॥ त्वन्मतेघटघटत्वसंसर्गस्यसंसर्गमर्यादयाभासमानत्वेनपदशक्यत्वानुपपत्तेः ॥ यदिशक्यतावच्छेदकत्वेनैवशक्तिग्रहविषयत्वंतदासिद्धंनःसमीहितं ॥ कार्यान्वितेशक्तिरितिपक्षोप्ययुक्तएव ॥ इयंमातायंपितासुरूपोसीत्यादौसिद्धार्थेप्यंगुलिप्रसारणादिनादर्शितेसतिमातापित्रादिशब्दानांसिद्धार्थएवशक्तिग्रहात् ॥ अत्यपूपांस्तवभ्रातेत्यत्रभ्रात्रादिपदानांप्रभिन्नमलोकरदेमधूनिमधुकरःपिबतीत्यत्रमधुकरशब्दस्य सहकारतरौमधुरंपिकोरौतीत्यादौपिकपदस्य देवदत्तपुत्रस्तेजात इत्यादौजातादिपदानांचसिद्धार्थएवव्युत्पत्तिग्रहात् ॥ एतत्सर्वंतत्वनिर्णयानुव्याख्यानसुधादौनिपुणतरमुपपादितंद्रष्टव्यं ॥ जातावेवशक्तिरितिमीमांसकपक्षोप्यनुपपन्नः ॥ घटपदाज्जातिविशेष्यकबोधापत्तेः ॥ अग्नीषोमीयंपशुमालभतेत्यत्रपशुत्वजातेरालंभनापत्तेः ॥ व्रीहीनवहंतीत्यादौव्रीहित्वजातेरवहननप्रसंगात् ॥ नचाक्षेपाद्व्यक्तिलाभइतिवाच्यं ॥ आक्षेपोह्यन्यथानुपपत्तिः ॥ तथाचप्रथमंमुख्यार्थजातिबोधस्तदनंतरंलक्षणयाव्यक्तिबोधइत्यन्वयबोधद्वयपरिकल्पनापत्तेः ॥ पदमात्रस्य

३९६ जातिभानंचाविनाभावात् ॥

लाक्षणिकत्वापत्तेश्चेत्यादितर्कतांडवेद्रष्टव्यं ॥ द्वारमित्यादौपिधानरूपार्थाध्याहारेणैवान्वयबोधइतिमीमांसकाः ॥ तन्मतमपाकरोति ॥ **अन्वयबोधश्चेति** ॥ ३९७ ॥ पदाध्याहारेणेत्युपलक्षणं ॥ वाक्याध्याहारेणापिक्वचिदन्वयबोधइतिद्रष्टव्यं ॥ तदुक्तंभाष्ये ॥ यत्रानवसरोन्यत्रपदंतत्रप्रतिष्ठितं ॥ वाक्यंवेतिसतांनीतिःसावकाशेनतद्भवेदिति ॥ अथातोब्रह्मजिज्ञासेत्यत्रकर्तव्यपदाध्याहारः ॥ तथायतोनारायणप्रसादमृतेनमोक्षः ॥ नचज्ञानंविनात्यर्थप्रसादः ॥ नचजिज्ञासांविनाज्ञानंअतइतिवाक्याध्याहारः॥क्वचिदावृत्त्येति ॥ घटंपटंचानयेत्यादावानयेतिपदस्यावृत्त्याघटमानयपटमानयेतिवाक्यार्थद्वयबोधः ॥ ज्ञेयंगम्यंगुरूंश्चापिनत्वेत्यत्रनत्वेत्यस्यावृत्तिः ईक्षतेर्नाशब्दमित्यादौतत्तुसमन्वयादितिसूत्रस्थतत्पदस्यावृत्तिरित्यादिद्रष्टव्यं ॥ क्वचित्तात्पर्यादिति ॥ भोजनप्रकरणेसैंधवमानयेत्यादिनानार्थपदस्थलेवक्तृतात्पर्यवशादेवलवणरूपार्थविशेषोपस्थितिरित्यर्थः ॥ विधिप्रत्ययविशिष्टःशब्दएवप्रवर्तकइतिकेचित् ॥ तन्नेत्याह ॥ **विधिनेति** ॥३९८॥ विधिजन्यज्ञानादेवप्रवृत्तेर्निषेधजन्यज्ञानान्निवृत्तेश्चदर्शनादित्यर्थः ॥ कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वंविध्यर्थइतिनैयायिकाः ॥ तन्निरासायाह ॥ **विध्यर्थश्चेति** ॥ ३९९ ॥ विधिप्रत्ययात्समूहालंबनज्ञानस्यजायमानत्वात्तस्यैवप्रवर्तकत्वादितिभावः ॥ विशिष्टेविधेःशक्त्यंगीकारएकस्यान्यावच्छेदकत्वापत्त्यात्रयाणांस्वातंत्र्यंनस्यात् ॥ अन्यथादंडादीनामपिचक्राद्यव

---

३९७ अन्वयबोधश्चक्वचित्पदाध्याहारेणक्वचिदावृत्त्याक्वचित्तात्पर्यात् ॥ ३९८ विधिनाप्रवर्तकंज्ञानं ॥ निषेधेननिवर्तकंज्ञानं ॥ ३९९ विध्यर्थश्चबलवदनिष्टाननुबंधित्वं कृतिसाध्यत्वं इष्टसाधनत्वंच ॥

च्छेदकत्वप्रसंगादित्यादितर्कतांडवेद्रष्टव्यं ॥ प्राभाकरास्तुस्वर्गकामोयजेतेत्यादौविधिवाच्यमपूर्वं ॥ तथाचस्वर्गकामनियोज्य कंयागविषयकंकार्यमितिज्ञानाद्यागादौप्रवृत्तिरित्याहुः ॥ तन्नेत्याह ॥ **नत्विति** ॥ ४०० ॥ अपूर्वस्याप्रसिद्धत्वेनतत्रविधेः शक्तिग्रहस्यैवाभावेनशक्तेरकल्पनात् ॥ कार्यत्वस्यातिप्रसक्तत्वेनतेनरूपेणापिशक्तेर्ग्रहीतुमशक्यत्वात् ॥ अधिकंतुतर्कतांडवेद्रष्ट व्यं ॥ ननुतर्ह्यपूर्वस्यावाच्यत्वेतदसिद्धिप्रसंगइत्यतआह ॥ **तस्येति** ॥ ४०१ ॥ यागस्यस्वर्गसाधनत्वंश्रुतिसिद्धं ॥ तच्चनसा क्षादितिमध्येऽपूर्वंपरिकल्प्यतइत्यर्थः ॥ ननुपुत्रकृतगयाश्राद्धात्पितुर्नरकाद्युत्थानेनस्वर्गप्राप्तिःपुराणादौश्रूयते ॥ तच्चापूर्वंक स्मिन्कल्प्यमित्याकांक्षायांकर्तरिपुत्रादौकल्प्यमितिकेचित् ॥ तान्निराकरोति ॥ **तच्चापूर्वमिति** ॥ ४०२ ॥ फलोपपादकंफ लाश्रयेकल्प्यतइतिन्यायेनफलभोक्तरिपितर्येवकल्पनौचित्यात् ॥ नचपितरियागक्रियाभावान्नादृष्टोत्पत्तिरितिवाच्यं ॥ तद भावेपितदुद्देशेनपुत्रेणकृतत्वात्तत्रैवोत्पत्तिरितिभावः ॥ नन्वभिचारस्यश्येनयागादेर्नरकसाधनत्वात्कथमिष्टसाधनत्वंविध्यर्थ इत्यतआह ॥ **श्येनेनेति** ॥ ४०३ ॥ केचित्तुतत्रविधिनेष्टसाधनताभ्रांतिरेवनतुतत्रप्रवृत्तिकल्पनेत्याहुः ॥ ननुनकलंजंभक्ष यीतेत्यादौनिषेधस्थलेविध्यर्थत्रयस्याप्यभावोवक्तुमशक्यः ॥ तस्यापिकृतिसाध्यत्वादित्यतआह ॥ **बलवदनिष्टाननुबंधित्व मिति** ॥ ४०४ ॥ तात्कालिकेष्टापेक्षयानरकादिरूपानिष्टस्यबलवत्त्वमितिबोध्यं ॥ नन्वपभ्रंशैरन्वयबोधःशक्तिसाध्यइत्यत ॥१०५॥

४०० नतुकार्यमपूर्वं ॥ ४०१ तस्यकल्प्यत्वात् ॥ ४०२ तच्चापूर्वंफलसमानाधिकरणं ॥ नतुकृतिसमानाधिकरणं ॥ ४०३ श्येनेनाभिच रन्यजेतेत्यादौविधेरिष्टसाधनत्वेनलक्षणा ॥ तस्यनरकादिबलवदनिष्टानुबंधित्वात् ॥ ४०४ बलवदनिष्टानुबंधित्वमिष्टसाधनत्वाभावश्चनिषेधार्थः ॥

आह ॥ **अपभ्रंशानांत्विति** ॥ ४०५ ॥ तर्हिशक्त्यभावेकथंतस्माद्वाक्यार्थबोधइत्यतआह ॥ **किंत्विति** ॥ ४०६ ॥ अप भ्रंशआधुनिकैरेवसंकेतस्यकृतत्वेनस्वाभाविकसंबंधरूपशक्तेरभावादित्यर्थः ॥ नन्वपभ्रंशानामप्यर्थज्ञानजनकत्वाविशेषाद्यज्ञा दौप्रयोगापत्तिरित्यतःसाधुत्वाभावादित्याह ॥ **वैदिकाइति** ॥४०७॥ साधुत्वासाधुत्वेकिंनिबंधनेइत्यतआह ॥ **व्याकर णेति** ॥ ४०८ ॥ नह्यपभ्रंशेप्रकृतिप्रत्ययविधानेनव्याकरणंप्रवर्तते ॥ येनसाधुत्वंस्यात् ॥ अतोसाधुत्वाद्यज्ञादौनतत्प्रयोगः ॥ साधुभिर्भाषितव्यंनासाधुभिर्नम्लेच्छितवैनापभ्रंशितवैइत्यादिश्रुतिभिर्निषेधादित्यर्थः ॥ व्याकरणप्रामाण्यंतुतत्वनिर्णयेप्रति पादितं ॥ व्याकरणनिरुक्तादीनामपिसिद्धमात्रेप्रामाण्यंसर्ववादिनां ॥ तदनंगीकारेसर्वशाब्दव्यवहारासिद्धिरिति ॥ प्रमाणा नांप्रामाण्यमुत्पत्तौज्ञप्तौचपरतइतितार्किकाः ॥ तान्निराकरोति ॥ **प्रमाणानामिति** ॥ ४०९ ॥ उत्पत्तौस्वतस्त्वंनिरूपयति ॥ **ज्ञानकारणेति** ॥ ४१० ॥ अत्रमात्रशब्देनज्ञानकारणातिरिक्तगुणजन्यत्वंव्यावर्तयति ॥ ज्ञप्तौस्वतस्त्वंनिरूपयति ॥ **ज्ञा नग्राहकेति** ॥ ४११ ॥ यत्रयत्रप्रामाण्यग्रहस्तत्रतत्रसाक्षिणैवप्रामाण्यग्रहोनियतइत्यर्थः ॥ प्रामाण्यस्यस्वतस्त्वानंगीकारेबा धकमाह ॥ **अथन्येति** ॥ ४१२ ॥ यदिप्रामाण्यंपरतोग्राह्यंतदाप्रामाण्यग्राहकस्यापिप्रामाण्यंपरतएवग्राह्यमित्यनवस्थापत्ते

४०५ अपभ्रंशानांतुनशक्तिः ॥ ४०६ किंतुशक्तिभ्रमादाधुनिकसंकेताद्वार्थबोधः ॥ ४०७ वैदिकाश्शब्दाःसाधवः ॥ अपभ्रंशाश्चासाधवः ॥ ४०८ व्याकरणव्युत्पाद्यत्वंसाधुत्वं ॥ तदभावोऽसाधुत्वं ॥ ४०९ प्रमाणानांप्रामाण्यस्योत्पत्तौज्ञप्तौचस्वतस्त्वं ॥ ४१० ज्ञानकारणमात्रजन्यत्वमुत्पत्तौ स्वतस्त्वं ॥ ४११ ज्ञानग्राहकसाक्षिग्राह्यत्वनैयत्यंज्ञप्तौस्वतस्त्वं ॥ ४१२ अन्यथानवस्थानात् ॥

रित्यर्थः ॥ ननुप्रामाण्यस्यस्वतोग्राह्यत्वेकदाचिदनभ्यासदशापन्नज्ञानप्रामाण्येसंशयोनस्यात् ॥ तथाहि ॥ ज्ञानग्रहेधर्मिज्ञाना
भावात्तद्धर्मिकप्रामाण्यसंदेहासंभवः ॥ ज्ञानग्रहेचज्ञानग्राहकेणतत्प्रामाण्यंगृहीतंनवा ॥ नेतिपक्षेप्रामाण्यस्यस्वतस्त्वभंगः ॥
आद्येप्रामाण्यनिश्चयरूपविरोधिसद्भावात्सुतरांनप्रामाण्यसंशयइत्यभिप्रायेणाशंक्यनिराकरोति ॥ स्वतस्त्व इति ॥४१३॥
औत्सर्गिकत्वादितिऔत्सर्गिकत्वमेवोपपादयति ॥ बाधकेसतीति॥४१४॥ज्ञानस्यदोषकलुषितत्वेज्ञानंगृह्णन्साक्षीतत्प्रामाण्यं
नगृह्णाति ॥ तदभावेगृह्णात्येवातोनसंशयानुपपत्तिः ॥ नवाप्रामाण्यस्यस्वतस्त्वहानिरित्यर्थः ॥ नचैवंप्रामाण्यस्यस्वतोग्रा
ह्यत्वेऽप्रामाण्यस्यापिस्वतोग्राह्यत्वापत्तिः ॥ ज्ञानधर्मत्वाविशेषादित्यतआह ॥ अप्रामाण्यमिति ॥४१५॥ ज्ञानकारणाति
रिक्तदोषरूपकारणजन्यत्वमप्रामाण्यस्योत्पत्तौपरतस्त्वं॥ ज्ञानग्राहकातिरिक्तेनविसंवादादिनाऽप्रामाण्यंगृह्यतइतिज्ञप्तावपिपर
तस्त्वमित्यर्थः ॥ तथाचयत्रयत्रसाक्षिणाऽप्रामाण्यग्रहस्तत्रसर्वत्रापिपरीक्षायाआवश्यकत्वान्नप्रामाण्यप्रतिबंदी ॥ नचदोषकलु
षितस्थलेप्रामाण्यग्रहस्यापिपरीक्षासहकृतत्वात्परतस्त्वापत्तिरितिवाच्यं ॥ नियमेनदोषस्याभावेनपरीक्षायाःसर्वत्रसहकारित्वा
भावात् ॥ आवश्यकत्वेपिपरीक्षायाबुद्धिदोषनिरासमात्रकारणत्वात् ॥ अस्तुवाबाह्यार्थज्ञानस्यक्वचित्परतस्त्वं॥ साक्षिप्रामाण्यं
तुस्वतएवेतिनकोपिदोषः ॥ तदुक्तंप्रकृत्यधिकरणसुधायां॥यदिज्ञानग्राहकातिरिक्तस्ययथाकथमपिप्रवेशात्प्रामाण्यस्यपरतस्त्व ॥१०६॥

---

४१३ स्वतस्त्वेसंशयानुपपत्तिर्बाधिकेतिचेन्न ॥ स्वतस्त्वस्यौत्सर्गिकत्वात् ॥ ४१४ बाधकेसतिसाक्षीप्रामाण्यंनगृह्णातीत्यभ्युपगमात् ॥
४१५ अप्रामाण्यंचपरतोज्ञायते ॥ उत्पद्यतेचेति ॥

मितिमतं तदासाक्षिणएवस्वतःप्रामाण्यं॥अन्यस्यपरतइत्यंगीकारेनकश्चिद्विरोधइति संक्षेपइति॥तथैतत्सर्वंजिज्ञासाधिकरणसु धायांतत्वनिर्णयटीकायांचोपपादितंद्रष्टव्यं॥ इहतुविस्तरभयादुपरम्यतइति ॥ इतिश्रीमत्पद्मनाभसूरिविरचितेपदार्थसंग्रहव्या ख्यानेमध्वसिद्धांतसारेगुणप्रकरणंसमाप्तं ॥ ७ ॥ ७ ॥ ७ ॥ ननुपरमात्ममाहात्म्यज्ञानमेवमोक्षसाधनं ॥ नतुतदतिरिक्तप दार्थज्ञानमपि ॥ तमेवैकंजानथआत्मानमन्यावाचोविमुंचथेति ॥ नान्यःपंथाअयनायविद्यतइतिश्रुतेरितिचेन्न ॥ पदार्थज्ञान स्यसाक्षान्मोक्षसाधनत्वाभावेपितत्सृष्ट्याद्यष्टकर्तृत्वेनपरमात्मज्ञानद्वारामोक्षसाधनत्वमित्यभिप्रायेणाह ॥ एवंपदार्थैर्निरूपि तइति ॥ ४१६ ॥ यद्वातार्किकोक्तसृष्टिप्रक्रियानिरासायाह ॥ एवमिति ॥ अत्रयद्यपिपूर्वंद्रव्यप्रकरणएवप्रकृत्यादिसृष्टिर्नि रूपिता॥अथाप्यत्रपद्मसृष्ट्यादौविशेषस्यवक्ष्यमाणत्वात्पुनरनुवादइतिनपौनरुक्त्यं॥सृष्ट्यादिकर्तृत्वेनपरमात्मज्ञानंमोक्षसाधन मित्यत्रप्रमाणंतु निर्णयेप्रतिपादितं ॥ सृष्टिरक्षाहृतिज्ञाननियत्यज्ञानबंधनान् ॥ मोक्षंचविष्णुतस्त्वेवज्ञात्वामुक्तिर्नचान्यथे ति ॥ ईशावास्यभाष्येपि ॥ तस्मात्सर्वगुणात्मकं ॥ सर्वकर्तारमीशेशंसर्वसंहारकारकं ॥ योवेदसंहृतिज्ञानाद्देहबंधाद्विमुच्यत इति ॥ **सिसृक्षाभवतीति** ॥ ४१७ ॥ जगृहेपौरुषंरूपंभगवान्महदादिभिः ॥ संभूतंषोडशकलमादौलोकसिसृक्षयेतिप्रथम स्कंधभागवतोक्तेः ॥ ईशावास्यभाष्येपि ॥ अनाद्यनंतकालीनंससर्जात्मेच्छयाविभुरिति ॥ मांडूकभाष्येपि ॥ अविकारस्यचि न्मात्रस्वेच्छयैवाखिलंजगत् ॥ उत्पद्यतइतिप्राज्ञाःप्राहुर्ब्रह्मादयोखिलाइति ॥ इच्छामात्रंप्रभोःसृष्टिरितिश्रुतिः ॥ क्षोभय

---

४१६ एवंपदार्थैर्निरूपितेतत्सृष्ट्यादिकर्तृत्वेनभगवज्ज्ञानंमोक्षसाधनमितिसृष्ट्यादिकंनिरूप्यते ॥ ४१७ परमात्मनःप्रलयांतेसिसृक्षाभवति ॥

तीति ॥ ४१८ ॥ कार्योन्मुखंकरोतीत्यर्थः ॥ प्रकृतिंक्षोभयामासप्रविश्यपुरुषोत्तमइतिभाष्योक्तेः ॥ तृतीयतात्पर्येपि ॥ प्रकृतेःक्षोभकंरूपंदैवंनारायणाभिधं ॥ प्रकृतौमहतःस्रष्टापरमःपुरुषोत्तमइति ॥ ततोगुणत्रयात्मनेत्यारभ्यपद्मंजनयतीतिपर्यंतस्यप्रमाणानिपूर्वमेवोदाहृतानि ॥ तत्पद्मंकदाजातमित्याकांक्षायामाह ॥ तच्चेति ॥ ४१९ ॥ तदुक्तंतृतीयस्कंधभागवते ॥ पूर्वस्यादौपरार्धस्यब्राह्मोनाममहानभूत् ॥ कल्पोयत्राभवद्ब्रह्माशब्दब्रह्मेतियंविदुः ॥ तस्यैवचांतेकल्पोभूद्यंपाद्ममभिचक्षते ॥ यद्धतेर्नाभिसरसआसील्लोकसरोरुहमिति ॥ पद्मदलैश्चेति ॥ ४२० ॥ तदुक्तंतृतीयस्कंधभागवते ॥ पद्मकोशंतदाविश्यभगवान्कर्मचोदितः॥एकंव्यभाङ्क्षीदुरुधात्रिधाभाव्यद्विसप्तधेति॥ अत्रपूर्वंपरमात्मनासूक्ष्मरूपेणसृष्टान्येवचतुर्दशभुवनानिचतुर्मुखःपंचभूतैःस्थूलानिचकारेतिबोध्यं॥ तदुक्तमैतरेयभाष्ये ॥ भूतेभ्योनंतरंत्वंडंसृष्ट्वाविष्णुःपुराप्रभुः ॥ लोकभेदांश्चचक्रेत्रपश्चाद्ब्रह्माविशेषतः ॥ सम्यक्चकारलोकांस्ताँल्लोककर्ताततःसचेति ॥ नन्वंडांतर्नसर्वेषामुत्पत्तिः ॥ लक्ष्म्यव्याकृताकाशादीनांनि

४१८ ततःप्रकृतिंप्रविश्यक्षोभयति ॥ ततोगुणत्रयात्मनाविभजति ॥ ततोमहदाद्यंडपर्यंतंतत्वानितदभिमानिब्रह्मादिदेवांश्चसृजति ॥ ततश्चेतनाचेतनानामंशानुदरेनिक्षिप्यब्रह्मांडंप्रविशति ॥ ततोदिव्यवर्षसहस्रांतेस्वनाभितःपद्मंजनयति ॥ ४१९ तच्चपद्मंआद्यब्रह्मणःप्रथमपरार्धांतेजायते ॥ तत्पद्मेचतुर्मुखोजनि ॥ चतुर्मुखोजगत्सृष्टौसाधनास्मृत्यादिव्यवर्षसहस्रपर्यंतंतपःकरोति ॥ तत्तपसाप्रसन्नोभगवान्स्वदेहतःपंचभूतानिसृजति ॥ ४२० ततश्चतुर्मुखांतर्गतस्संस्तन्नामकोभूत्वापंचभूतैःपद्मदलैश्चतुर्दशभुवनानिसृजति ॥ पुनःसर्वेदेवाअंडांतर्जायंते ॥

त्यानामनुत्पत्तेरित्यतआह ॥ लक्ष्म्यादीति ॥४२१॥ तदुक्तंवियत्पादीयानुव्याख्याने ॥ प्रकृतिःपुरुषःकालोवेदास्तदभिमानिनः ॥ महदाद्याश्चजायंतेपराधीनविशेषतः ॥ इदंसर्वंससर्जेतिजनिमत्त्वमिहोदितं ॥ तथापिमूर्तसंबंधपरतंत्रविशेषयुक् ॥ खमेवोत्पत्तिमन्नामश्रुतिशब्दविवक्षितं ॥ प्रकृतिःपुरुषःकालइत्येतेचसमस्तशः ॥ ईशाधीनविशेषेणजन्याइत्येवकीर्तिताः ॥ वेदस्यापीश्वरेच्छया ॥ व्यक्तिर्नामविशेषोस्तितस्मात्तद्वशतैवहि ॥ उत्पत्तिरत्रकथितेति ॥ न्यायविवरणेपि ॥ पराधीनविशेषमात्रंत्वव्याकृताकाशस्यतदभिमानिप्रकृतेश्चसममेवेति ॥ वियत्पादीयसुधायामपि ॥ प्रकृत्यादित्रयाभिमानिदेवतायाःपराधीनविशेषावाप्तिंविशदयति ॥ पुरुषेति ॥ यस्मात्पुरुषादीनांरमाभिमानिनी साचैकैव ॥ देहदेह्यादिभेदरहिता तत्तस्मात्साक्षाद्भगवादिच्छयासिसृक्षुत्वविशेषंप्राप्तैवसृष्टेत्युदितेति ॥ महदादिसृष्टिवद्ब्रह्मकल्पेभूरादिलोकत्रयस्यनैकवारंसृष्टिः ॥ किंतुप्रतिदिनमित्याह ॥ ब्रह्मणइति ॥ ४२२ ॥ तदुक्तंतृतीयस्कंधभागवते ॥ एषदैनंदिनःसर्गोब्राह्मस्त्रैलोक्यवर्तनः ॥ तिर्यङ्नृपितृदेवानांसंभवोयत्रकर्मभिरिति ॥ ब्रह्मणःप्रतिदिनंसृष्टिलयावित्युक्तं ॥ तत्रब्रह्मदिनंकीदृशमित्याकांक्षायांतत्परिमाणमाह ॥ चतुर्युगेति ॥ ४२३ ॥ तदुक्तंतृतीयभागवते ॥ त्रैलोक्याद्युगसाहस्रंबहिराब्रह्मणोदिनं ॥ तावत्येवनिशातत्रयन्निमीलतिविश्वसृगिति ॥ निर्णयेपि ॥ मनुष्यमानात्रिशतंसषष्टिकंदिवौकसामेकमुशंतिवत्सरं ॥ द्विषट्सहस्रैरपितैश्चतुर्युगंत्रेतादिभिःपादशएव

४२१ लक्ष्म्यादिनित्यानामपिपराधीनविशेषावाप्तिलक्षणोत्पत्तिः ॥ ४२२ ब्रह्मणःप्रतिदिनंभूर्भुवःस्वरितिलोकत्रयस्यसृष्टिविनाशौ ॥
४२३ चतुर्युगसहस्राणिब्रह्मणएकंदिनं ॥

हीनैः ॥ सहस्रवृत्तंतदहःस्वयंभुवोनिशाचतन्मानमितंशरच्छतमिति ॥ चतुर्युगसहस्राणिब्रह्मणोदिनमुच्यतइतिपुराणवाक्यं
च ॥ एकस्मिन्ब्रह्मदिनेचतुर्दशमनूंस्तद्भुक्तिकालांश्चतुर्दशेंद्रान्भगवान्सृजतीत्याह ॥ तत्रेति ॥ ४२४ ॥ एकैकस्मिन्दिनइ
त्यर्थः ॥ चतुर्दशमनवस्तु ॥ स्वायंभुवः ॥ स्वारोचिषः ॥ उत्तमः ॥ तापसः ॥ रैवतः ॥ चाक्षुषः ॥ वैवस्वतः ॥ सावर्णिः ॥
दक्षसावर्णिः ॥ ब्रह्मसावर्णिः ॥ धर्मसावर्णिः ॥ रुद्रसावर्णिः ॥ देवसावर्णिः ॥ इंद्रसावर्णिरिति ॥ तदुक्तमष्टमस्कंधभागव
ते ॥ स्वायंभुवस्येहमनोर्वंशोयंविस्तराच्छ्रुतः ॥ आद्यस्तुकथितोयत्रदेवादीनांचसंभवः॥ स्वारोचिषोद्वितीयस्तुमनुरग्नेःसुतोभ
वत् ॥ तृतीयउत्तमोनामप्रियव्रतसुतोभवत् ॥ चतुर्थउत्तमभ्रातामनुर्नाम्नाचतापसः ॥ पंचमोरैवतोनाममनुस्तापससोदरः ॥
षष्ठस्तुचक्षुषःपुत्रश्चाक्षुषोनामवैमनुः ॥ मनुर्विवस्वतःपुत्रःश्राद्धदेवइतिश्रुतः ॥ सप्तमोवर्तमानोयस्तदपत्यानिमेशृणु ॥ मनोर्वै
वस्वतस्यैतेतदापुत्राःपरंतप ॥ अष्टमेंतरआयातेसावर्णिर्भवितामनुः ॥ नवमोदक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भवितादक्षसाव
र्णीराजन्द्वादशमोमनुः ॥ मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् ॥ मनुर्वाइंद्रसावर्णिश्चतुर्दशमइष्यते ॥ राजंश्चतुर्दशैता
तित्रिकालानुगतानिते ॥ प्रोक्तान्येभिर्मितःकल्पोयुगसाहस्रपर्ययइति ॥ गीताभाष्येपि ॥ चत्वारःप्रथमाःस्वायंभुवाद्याः ॥ स्वायं
भुवंरोचिषंचरैवतंचतथोत्तममिति ॥ प्रमेयदीपिकायामपि ॥ ब्रह्मसावर्णीरुद्रसावर्णिर्धर्मसावर्णिर्दक्षसावर्णिरितिचत्वारः ॥ स्वायं
भुवस्वारोचिषरैवतोत्तमाःप्रथमाः ॥ मेरुसावर्णिरपि ॥ तापसस्यभगवदवतारत्वं ॥ चतुर्दशमनवइत्यादि ॥ चतुर्दशमनूनांप्रत्ये

४२४ तत्रचतुर्दशमन्वंतराणि ॥

कंभुक्तिकालमर्यादामाह ॥ एकैकस्यमनोरिति ॥४२५॥ तदुक्तंतृतीयस्कंधभागवते ॥ यावद्दिनंभगवतोमनून्भुंजंश्चतुर्दश ॥ स्वंस्वंकालंमनुर्भुंक्तेसाधिकामेकसप्ततिमिति ॥ तृतीयतात्पर्येपि ॥ युगैकसप्ततेरूर्ध्वंसार्धाष्टादशलक्षकं ॥ वत्सराणांमनोर्भुक्तिरिति ॥ चतुर्दशमनूनांप्रलयकालस्तु ॥ स्वायंभुवमनोर्द्विसहस्रवर्षाणिप्रलयकालः ॥ स्वारोचिषमनोःपंचशतोत्तरसहस्रवर्षाणि॥ उत्तममनोस्तुचतुःशतोत्तरसहस्रवर्षाणिप्रलयकालः ॥ तापसाद्येकादशमनूनांतुद्विशतोत्तरसहस्रवर्षाणिप्रत्येकंप्रलयकालाइति ॥ तदुक्तंतृतीयतात्पर्ये ॥ सहस्रंचतुरुत्तरं ॥ शतानांप्रलयश्चैवपंचोत्तरमथापिवा ॥ आद्येषुषट्सुप्रथमेद्विसहस्रंप्रकीर्तितं ॥ वत्सराणां मनोरंतरेवमिंद्रादिनांभवेदिति ॥ मनुन्यायमिंद्रादीनामतिदिशति ॥ एवमिति ॥ ४२६ ॥ चतुर्दशेत्युपलक्षणं ॥ भुक्तिकालःप्रलयकालाश्चमनुवदेवेतिद्रष्टव्यं ॥ अत्रैकस्मिन्मन्वंतरएकैकएवेंद्रइतिद्रष्टव्यं ॥ एवमिंद्रादीनांभवेदितितात्पर्योक्तेरितिभावः॥चतुर्दशेंद्राश्च ॥ यज्ञनामाभगवानिंद्रःस्वायंभुवमन्वंतरे॥ रोचननामेंद्रःस्वारोचिषमन्वंतरे॥ सत्यजिन्नामकइंद्रउत्तममन्वंतरे॥ तापसमन्वंतरेतापसनामाभगवानिंद्रः॥ रैवतमन्वंतरेविभुरिंद्रः॥चाक्षुषमन्वंतरेमंद्रद्युम्नइंद्रः॥वैवस्वतमन्वंतरेपुरंदरइंद्रः॥ सावर्णिमन्वंतरेबलिरिंद्रः ॥ दक्षसावर्णिमन्वंतरेअद्भुतनामेंद्रः ॥ ब्रह्मसावर्णिमन्वंतरेशंभुरिंद्रः ॥ धर्मसावर्णिमन्वंतरेवैधृतिनामेंद्रः ॥ रुद्रसावर्णिमन्वंतरेऋतुधामेंद्रः ॥ देवसावर्णिमन्वंतरेदिवस्पतिरिंद्रः ॥ इंद्रसावर्णिमन्वंतरेशुचिरिंद्रः॥ इदंचाष्टमस्कं

४२५ एकैकस्यमनोःसार्धाष्टादशलक्षवर्षाधिकैकसप्ततिमहायुगाभुक्तिकालः ॥ ४२६ एवंस्वर्गलोकाधिपतयइंद्राश्चतुर्दश ॥

धभागवतएवोक्तमनुसंधेयं ॥ अत्रमैंद्रद्युम्नःपुरंदरएव ॥ तस्यद्विवारमिंद्रपदं ॥ तदुक्तमैतरेयभाष्ये ॥ इंद्रोहिप्रथमोविष्णुर्य
ज्ञनामाजगत्पतिः ॥ तत्प्रसादादथेंद्रत्वंद्वादशान्येप्रपेदिरे ॥ पुरंदरस्त्वेकएववासुदेवप्रसादतः ॥ द्विवारमिंद्रतामापतस्माद्द्वाद
शतेपरइति ॥ नच अतीतेंद्राएवतेविष्णुषष्ठाःपूर्वैंद्रोसौयज्ञनामारमेशइतिनिर्णयेवाय्वादीनामिंद्रपदोक्तेस्तद्विरोधइतिवाच्यं ॥
वाय्वादीनामेवरोचनादिशब्दवाच्यत्वोपपत्तेः ॥ इंद्रादीनांमन्वंतरकालएवस्वर्गाधिपत्यमित्यत्रच्छांदोग्यभाष्यंमानं ॥ इंद्राद
योहिमन्वंतरमात्रंतिष्ठंतीति ॥ महायुगपरिमाणंवक्तुंकृतत्रेतादियुगपरिमाणमाह ॥ **कृतेति** ॥४२७॥ तदुक्तंतृतीयस्कंधभाग
वते ॥ कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगं ॥ दिव्यैर्द्वादशसाहस्रैर्वर्षैःसाधुनिरूपितं ॥ चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमं ॥ सं
ख्यातानिसहस्राणिद्विगुणानिशतानिच ॥ संध्यासंध्यांशयोरंतर्यःकालःशतसंख्ययोः ॥ तमेवाहुर्युगंतज्ज्ञाइति ॥ निर्णयेपिमनुष्य
मानात्रिशतंसषष्टिकंदिवौकसामेकमुशंतिवत्सरं ॥ द्विषट्सहस्रैरपितैश्चतुर्युगंत्रेतादिभिःपादशएवहीनैरिति ॥ महाकल्पादिनिरूप

---

४२७ कृतत्रेताद्वापरकलिभेदेनयुगचतुष्टयं ॥ तत्रदेवतामानेनचतुस्सहस्रवर्षाणिकृतयुगस्य ॥ पूर्वोत्तरंचप्रत्येकंचतुश्शतवर्षाणिसंधिकालाः ॥
तथात्रेतायुगस्यत्रिसहस्रवर्षाणि ॥ पूर्वोत्तरंचप्रत्येकंत्रिशतवर्षाणिसंधिकालाः ॥ एवंद्वापरयुगस्यद्विसहस्रवर्षाणि ॥ पूर्वोत्तरंप्रत्येकंद्विशतवर्षाणिसं
धिकालाः ॥ तथाकलियुगस्यैकसहस्रवर्षाणि ॥ पूर्वोत्तरंशतवर्षाणिसंधिकालाः ॥ तथाचद्वादशसहस्रवर्षाणिचतुर्युगस्य ॥ एतच्चतुर्युगस्याप्यावृत्तावे
कोमहायुगः ॥

यितुंकल्पशब्दार्थमाह ॥ **सृष्टिकालेति** ॥ **अंडेपद्मचतुर्मुखयोरिति** ॥४२८॥ इदमुपलक्षणं ॥ अंडाद्बहिराद्यब्रह्मसृष्टिका
लोपिब्रह्मकल्पइतिध्येयं ॥ तदुक्तंतृतीयभागवते ॥ पूर्वस्यादौपरार्धस्यब्राह्मोनाममहानभूत् ॥ कल्पोयत्राभवद्ब्रह्माशब्दब्रह्मे
तियंविदुः ॥ तस्यैवचांतेकल्पोभूद्यंपाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरसआसील्लोकसरोरुहं ॥ अयंतुप्रथमःकल्पइति ॥ यत्रब्रह्मां
तरोत्पत्तिर्ब्रह्मकल्पइतीरितइतितात्पर्यंच ॥ ब्रह्मकल्पःपरश्चेतिमहाकल्पश्चकीर्त्यतइतिसप्तमतात्पर्यमपि ॥ **ब्रह्मकल्पोपीति**
॥ ४२९ ॥ ब्रह्मांडांतर्वर्तिब्रह्मकल्पोपीत्यर्थः ॥ **प्रतिदिनमिति** ॥ ४३० ॥ प्रतिदिनंभूरादिलोकत्रयस्यनाशेनपुनःपुनर्लोक
त्रयस्यसृष्टेरितिभावः ॥ तदुक्तंतृतीयभागवते ॥ एषदैनंदिनःसर्गोब्राह्मस्त्रैलोक्यवर्तनः ॥ तिर्यङ्नृपितृदेवानांसंभवोयत्रकर्मभि
रिति ॥ दिनकल्पाःकतीत्याकांक्षायामाह ॥ **अष्टादशेति** ॥ आद्यब्रह्मणःप्रथमपरार्धातिमदिनेपद्मस्योत्पत्तिः ॥ तत्रचतुर्मुखो
त्पत्तिः ॥ तेनचप्रतिदिनंभूरादिसृष्टिः ॥ इतिपूर्वोदाहृतभागवतेप्रतिपादितं ॥ तथाचद्वितीयपरार्धएवदिनकल्पः ॥ सचाष्टा
दशसहस्रात्मकोभवतीत्यर्थः ॥ केचित्तुषट्त्रिंशत्सहस्रात्मकोदिनकल्पः ॥ भारतादिकमपिषट्त्रिंशत्सहस्रात्मकमितिमन्यंते ॥
तन्न ॥ प्रथमपरार्धेलोकसृष्टेरभावेनचतुर्मुखस्याप्युत्पत्तेरभावेनदिनकल्पाभावात् ॥ नचभूतेभ्योनंतरंत्वंडंसृष्ट्वाविष्णुःपुराप्रभुः ॥

---

४२८ सृष्टिकालविशेषःकल्पः ॥ सद्विविधः महाकल्पःपाद्मकल्पश्चेति ॥ महदाद्यंडपर्यंतंसृष्टिकालोमहाकल्पः ॥ अंडेपद्मचतुर्मुखयोःसृष्टिकालः
पाद्मकल्पः ॥ सएवब्रह्मकल्पइत्युच्यते ॥ ४२९ ब्रह्मकल्पोपिद्विविधः ॥ दिनकल्पोमनुकल्पश्चेति ॥ ४३० प्रतिदिनंसृष्टिकालोदिनकल्पो
ष्टादशसहस्रात्मकः ॥

लोकभेदांश्चचक्रेत्रपश्चाद्ब्रह्माविशेषतः ॥ सम्यक्कुचकारलोकांस्ताँल्लोककर्तातत:सचेति ॥ ऐतरेयभाष्येसूक्ष्मरूपेणलोकानांपर
मात्मनासृष्टत्वोक्तेः प्रथमपरार्धेपिदिनकल्पोस्तीतिवाच्यं ॥ तत्प्रमाणबलेनैवप्रथमपरार्धेचतुर्मुखस्याजातत्वेनतेनभूरादिसृष्टेर
भावात् ॥ परमात्मनाप्रतिदिनंभूरादिविनाशपूर्वकंभूरादिकंसृष्टमित्यत्रप्रमाणाभावात् ॥ ब्रह्मांडांतश्चतुर्दशभुवनात्मकपद्मस्यो
दकैःपूर्णत्वेनप्रतिदिनसृष्टेरयुक्तत्वाच्च ॥ प्रथमपरार्धेवसिष्ठशक्तिपराशरसत्यवतीव्यासादीनामभावेनभारतादिनिर्माणस्यदूरो
त्सारितत्वाच्च ॥ वैवस्वतमन्वंतरेष्टाविंशतिमेद्वापरेव्यासावतारेणभारतस्यकृतत्वेनप्रथमपरार्धेवैवस्वतमन्वंतरादेरसंभवाच्च ॥
नचलयस्यत्वष्टमोभागःसृष्टिकालउदाहृतइतिदशमतात्पर्योक्तेःप्रथमपरार्धेपिसृष्टिःसंभवतीतिवाच्यं ॥ महदादिब्रह्मांडांतस्सृष्टि
परत्वेनाप्युपपत्तौभूरादिसृष्टिविनाशसाधकत्वाभावात् ॥ नचद्विपरार्धधिष्ण्यमध्यासितःसकललोकनमस्कृतंयदितिद्वितीय
स्कंधभागवतेसत्यलोकस्यद्विपरार्धधिष्ण्यत्वमुच्यते ॥ तदर्थस्तुद्विपरार्धसंबंधिधिष्ण्यंद्विपरार्धधिष्ण्यंतदध्यासितइति ॥ तथा
चप्रथमपरार्धेपिसत्यलोकादिकंचतुर्मुखश्चोत्पन्नइतिवाच्यं ॥ द्वेपरार्धेयस्याद्यब्रह्मणःसद्विपरार्धस्तस्यधिष्ण्यंचतुर्मुखरूपेणेतित
दर्थोपपत्तेः ॥ यद्वापद्मस्यप्रथमपरार्धांतिमदिनेजातत्वेनसत्यलोकस्यद्विपरार्धसंबंधित्वोपपत्तेः ॥ सूक्ष्मरूपेणसत्यादिलोकानांप
रमात्मनापूर्वंजातत्वाच्च ॥ तस्मादष्टादशसहस्रात्मकएवदिनकल्पइतिसिद्धं ॥ मनुकल्पसंख्यामाह ॥एकैकस्मिन्निति॥४३१॥ ॥११०॥
तदुक्तंतृतीयभागवते ॥ निशावसानआरब्धोलोककल्पोनुवर्तते ॥ यावद्दिनंभगवतोमनून्भुंजंश्चतुर्दशेति ॥ तथाचद्वितीयपरा

४३१ ब्रह्मणएकैकस्मिन्दिनेचतुर्दशमनुकल्पाः ॥

र्धेद्विसहस्राधिकसार्धद्विलक्षसंख्याकामनुकल्पाभवंतीतिबोध्यं ॥ प्रयोजनोक्तिपूर्वकंभगवदवतारानाह ॥ ब्रह्मणःप्रतिदिन
मिति ॥ राजसतामसैरिति ॥ ४३२ ॥ तदुक्तंद्वितीयस्कंधतात्पर्ये ॥ सात्विकेषुत्रिषुयदात्वेकस्यप्रतिपादनं ॥ रजस्तमो
भ्यांविष्णुर्हितदाप्रादुर्भवत्यजः ॥ राजसांस्तामसान्हत्वासात्विकान्वर्धयिष्यतीति ॥ गीतायामपि ॥ यदायदाहिधर्मस्यग्लानि
र्भवतिभारत ॥ अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं ॥ परित्राणायसाधूनांविनाशायचदुष्कृतां ॥ धर्मसंस्थापनार्थायसंभ
वामियुगेयुगइति ॥ प्रथमस्कंधभागवते ॥ एतेस्वांशकलाःपुंसःकृष्णस्तुभगवान्स्वयं ॥ इंद्रारिव्याकुलंलोकंमृडयंतियुगेयुगइ
ति ॥ वैवस्वतमन्वंतरइति ॥ ४३३ ॥ आदौमत्स्यावतारः ॥ तदुक्तंप्रथमस्कंधभागवते ॥ रूपंसजगृहेमात्स्यंचाक्षुषांतरसं
प्लवे ॥ नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुमिति ॥ अष्टमस्कंधभागवतेपि ॥ सतुसत्यव्रतोराजाज्ञानविज्ञानसंयुतः ॥ विष्णोः
प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतोमनुः ॥ सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः ॥ संवादंमहदाख्यानंश्रुत्वामुच्येतकिल्बिषा
दिति ॥ द्वितीयवारमपिमत्स्यावतारः ॥ सचहयग्रीवासुरेणापहृतान्वेदानुज्जहार ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ विस्रंसि
तानुरुभयेसलिलेमुखान्मआदायतत्रविजहारहवेदमार्गानिति ॥ कूर्मावतारोपिद्विवारं ॥ अमृतमथनस्यद्विवारत्वात् ॥
तदुक्तमष्टमस्कंधतात्पर्ये ॥ अनंतोठोमंदरस्तुयदावैवस्वतांतरं ॥ अमृतार्थंसुपर्णोढोरैवतस्यांतरेमनोरिति ॥ वराहस्या
प्यवतारद्वयं ॥ तदुक्तंतृतीयतात्पर्ये ॥ ब्रह्मजस्तुहिरण्याक्षःप्रथमंदंष्ट्रयाहतः ॥ सएवपार्षदाविष्टोद्वितीयंकर्णताडनादिति ॥

४३२ ब्रह्मणःप्रतिदिनंराजसतामसैर्जनैःसात्विकजनोपद्रवेसतिमत्स्यकूर्माद्यवताराभविष्यंति ॥ ४३३ तत्रापिवैवस्वतमन्वंतरेदशावताराः ॥

नृसिंहावतारएकएवसप्तमस्कंधोक्तः ॥ वामनस्याप्यवतारद्वयं ॥ तस्यैवत्रिविक्रमत्वात् ॥ तदुक्तंपंचमतात्पर्ये ॥ वाराहे
वामपादंतुतदन्येषुतुदक्षिणं ॥ पादंकल्पेषुभगवानुज्जहारत्रिविक्रमइति ॥ रामावतारोप्येकएवत्रेतायुगेनवमस्कंधोक्तः ॥
परशुरामावतारोप्येकएवनवमस्कंधोक्तः ॥ कृष्णावतारएकएवदशमस्कंधोक्तः ॥ बुद्धावतारःकल्क्यवतारश्चैकएवनिर्णयोक्तः ॥
दशावताराइत्युपलक्षणं ॥ वैवस्वतमन्वंतरेव्यासावताराःद्वापरयुगेषुपंचद्रष्टव्याः ॥ तदुक्तंद्वितीयतात्पर्ये ॥ तृतीयेसप्तमेचै
वषोडशेपंचविंशके ॥ अष्टाविंशेयुगेकृष्णःसत्यवत्यामजायत ॥ व्यासाचार्यस्तुपूर्वेषुचरमेस्वयमेवतु ॥ विव्यासवेदांश्चक्रेचभार
तंवेदसंमितमिति ॥ प्रथमतात्पर्येपि ॥ रामावतारात्पूर्वमप्यस्तिव्यासावतारः ॥ तृतीयंयुगमारभ्यव्यासोबहुषुजज्ञिवानिति ॥
अन्यत्रान्यावताराइति ॥ ४३४ ॥ स्वायंभुवमन्वंतरादिषुयज्ञऋषभाद्यवताराइत्यर्थः ॥ तेचावताराअष्टमस्कंधभागवता
दावुक्ताज्ञातव्याः ॥ स्वायंभुवमन्वंतरेयज्ञऋषभावतारद्वयं ॥ तदुक्तंपंचमस्कंधतात्पर्ये ॥ दुष्टानांमोहनार्थाययज्ञइंद्रपदेस्थि
तः ॥ पस्पर्धऋषभेणैवस्वरूपेणहरिःस्वयमिति ॥ अवताराणांप्रयोजनमाह ॥ **एतैरिति** ॥ ४३५ ॥ एतच्चतत्रतत्रभागवता
दौद्रष्टव्यमिति ॥ इतिसृष्टिप्रकरणं ॥ ५ ॥ ५ ॥ ५ ॥ लब्धजन्मनःस्थित्यादीतिटीकोक्तेःसृष्टिनिरूपणानंतरंस्थितिंनि
रूपयितुंस्थितिस्वरूपमाह ॥ **भगवतेति** ॥ ४३६ ॥ प्रत्यक्षादिप्रमाणप्रमितत्वादितिभावः ॥ अवस्थांविभजति ॥ **अवस्था**

४३४ अन्यत्रान्यावताराअपि ॥ ४३५ एतैरवतारैरयोग्यजनसंहारःसज्जनोद्धारश्चभविष्यति ॥ इतिसृष्टिप्रकरणं ॥ ४३६ भगवताना
नारूपैर्जगत्प्रविश्यजाग्रदाद्यवस्थाभिःपोषणंस्थितिः ॥

श्चेति ॥ ४३७ ॥ जाग्रदवस्थालक्षणमाह ॥ **देहेंद्रियाद्यभिमानेनेति** ॥ ४३८ ॥ नचब्रह्मातुनिरभिमानाच्छरीर्यप्यशरी
रवानित्युक्तेः ॥ कथंब्रह्मवाय्वोर्जाग्रदवस्था ॥ बालोन्मत्तानामप्यभिमानाभावाच्चेतिवाच्यं ॥ भगवद्दत्तशरीरादिनाभगवदा
ज्ञयासर्वंपश्यामिसृजामीतिज्ञानस्यैवब्रह्मणोभिमानशब्दार्थत्वात् ॥ अन्यथाप्रवृत्त्याद्यनुपपत्तेः ॥ मत्तादीनामपिशरीरयात्रान्य
थानुपपत्त्येषदभिमानोस्त्येवेतिभावः ॥ तत्प्रवर्तकभगवद्रूपं तस्यस्थानं तल्लक्षणंचाह ॥ **तत्प्रवर्तकइति** ॥४३९॥ तदुक्तंमां
डूकभाष्ये ॥ चतुर्धावस्थितोदेहेपरमात्मासनातनः ॥ वैश्वानरोजागरितस्थानगोगजवक्रकः ॥ निर्माताबाह्यसंवित्तेर्जीवानांत
दगोचरः ॥ अष्टादशमुखान्यस्यपुमाकाराणिसर्वशः ॥ मध्यमंतुगजाकारंचतुर्बाहुःपरःपुमान् ॥ पादौहस्तिकरोहस्ताइतिसप्तां
गईरितइति ॥ मांडूकोपनिषद्यपि ॥ जागरितस्थानोबहिःप्रज्ञःसप्तांगएकोनविंशतिमुखः ॥ दक्षिणाक्षिमुखेविश्वोमनस्यंतस्तु
तैजसइति ॥ बृहद्भाष्येपि ॥ यच्चक्षुषिस्थितंरूपंविष्णोश्चक्षुस्तदुच्यते ॥ शब्दादेरप्यापरोक्ष्येतद्धेतुर्विश्वनामकं ॥ जाग्रतांसर्व
जीवानांसविष्णुर्दक्षिणाक्षिगइति ॥ एकादशतात्पर्येपि ॥ दक्षिणाक्षिस्थितोविष्णुर्भुंक्तेर्थाञ्जाग्रदादिकान् ॥ कंठसंस्थस्तथास्व
प्नाञ्जीवानंदंचसुप्तिगइति ॥ ननुविश्वस्यदक्षिणाक्षिगतत्वेहृदिह्येषआत्मेत्यादिश्रुत्याहृद्गतजीवावस्थाप्रवर्तकत्वंकथमित्यतआह ॥
तदाहृदयस्थेति ॥ ४४० ॥ तदुक्तंभाष्ये ॥ हृदयस्थात्पराज्जीवोदूरस्थोजाग्रदेष्यतीति ॥ ननुजीवस्यहृदयमेवनियतस्थानंत

४३७ अवस्थाश्चजाग्रत्स्वप्नसुषुप्तिमोहतुरीयभेदात्पंचविधाः ॥ ४३८ देहेंद्रियाद्यभिमानेनतत्तद्विषयानुभवात्सुखदुःखोत्पादोजाग्रदवस्था ॥
४३९ तत्प्रवर्तकोविश्वनामकःपरमात्मादक्षिणाक्ष्यग्रेस्थितः ॥ सचसप्तांगएकोनविंशतिमुखः ॥ ४४० तदाहृदयस्थजीवस्यदक्षिणाक्षिस्थविश्वप्राप्तिः ॥

तपरित्यज्यनचक्षुःस्थविश्वंप्रतिगमनंयुक्तं ॥ बिंबरूपस्यहृद्येवावस्थानस्यवक्ष्यमाणत्वात् ॥ तदुक्तमैतरेयभाष्ये ॥ नहिजीवस्याक्षिणिपृथक्शिरोबाह्वादिकंविद्यते ॥ हृदिस्थितमेवहितस्यस्वरूपमिति ॥ अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहीतिसूत्रंच ॥ अतोनजीवस्यचक्षुर्गमनमित्यतआह ॥ **सांशजीवानामिति** ॥४४१॥ तथाचसांशजीवानामेकांशेनचक्षुर्गमनागमनादिकंयुक्तंभाष्यप्रमाणबलात् ॥ निरंशानांतुप्रकाशतोव्याप्तिः ॥ तदुक्तमैतरेयभाष्यएव ॥ जागरितेप्यक्ष्यादिषुविशेषतःसन्निहितोभवतिदीपप्रकाशवदिति॥ गुणाद्वालोकवदितिसूत्रंचेति ॥ जाग्रदवस्थायाःस्थानमाह॥ **साचेति** ॥४४२॥ नन्वीशलक्ष्मीमुक्तानांसुषुप्त्याद्यवस्थाभावाज्जाग्रदवस्थावक्तव्या ॥ तेषांदक्षिणाक्षिस्थविश्वप्राप्तेरभावात्कथंसेतिचेन्न ॥ परमात्मनःस्वतंत्रत्वेनस्वप्राप्त्यनपेक्षणात् ॥ लक्ष्म्यादौतुविश्वादीनांनियामकत्वेबाधकाभावात् ॥ मुक्तानांतुरीयरूपेणप्रवृत्तिसंभवाच्च ॥ तदुक्तंमांडूकभाष्ये ॥ सर्वज्ञानप्रदश्चापिमुक्तस्यैवतुरीयकः ॥ मुक्तस्यसर्वव्यापारहेतुरेवतुरीयकइति ॥ स्वप्नावस्थांनिरूपयति ॥ **देहेंद्रियादीति** ॥ ४४३ ॥ देहेंद्रियाद्यभिमानेतुतत्तद्व्यापारप्रसंगादितिभावः ॥ तदुक्तंमांडूकभाष्ये ॥ देहाभिमानादुद्धृत्यकर्षतिस्वप्नमंडलइति ॥ स्वाप्नपदार्थानामनुभवोयत्रेतिबहुव्रीहिः ॥ तत्प्रवर्तकभगवद्रूपं तस्यस्थानं तल्लक्षणंचाह ॥ **तत्प्रवर्तकइति** ॥४४४॥ तदुक्तंमांडूकोपनिषदि ॥ मनस्यंतस्तुतैजसइति ॥ मांडूकभाष्येपि ॥ चित्तस्थोदर्शयेत्तस्मात्तैजसःस्वप्नकृद्धरिरिति॥

---

४४१ सांशजीवानामंशेन ॥ निरंशजीवानांतुप्रकाशतः ॥ ४४२ साचावस्थाब्रह्मादिसर्वचेतनानां ॥ ४४३ देहेंद्रियाद्यभिमानेनमनसः स्वाप्नपदार्थानुभवःस्वप्नावस्था ॥ ४४४ तत्प्रवर्तकस्तैजसनामाभगवान्कंठदेशगतमनस्संस्थः ॥

बृहद्भाष्येपि ॥ तद्गतस्यततोविष्णोःकंठस्थानागमोयदा ॥ तदास्वप्नोभवेज्जाग्रद्दर्शनंनचजायतइति ॥ स्वप्नकालेस्वाप्नपदा र्थानुभवइत्युपलक्षणं ॥ केषांचिदिंद्रादिजीवानामर्जुनाद्यवतारेषुबहिर्गमनेनबाह्यपदार्थज्ञानमपिभवतीतिद्रष्टव्यं ॥ तदुक्तंबृह द्भाष्ये ॥ अंशेनजीवमादायक्वचिदीशोबहिर्नयेत् ॥ स्वप्नेतुफल्गुनंयद्वत्कृष्णःकैलासमानयत् ॥ वासनारूपकान्प्रायस्त्वंतरेवप्र दर्शयेदिति ॥ निर्णयेपि ॥ जयद्रथस्यैववधेनिशायांस्वप्नेनयत्तंगिरिशांतिकंहरिरिति ॥ ननुधृष्टद्युम्नोश्वत्थाम्नाकरिष्यमाणांस्व मृतिंकालरात्र्यादिकंचस्वप्नेप्रतिदिनंपश्यति ॥ तत्तत्पदार्थानांपूर्वमननुभूतत्वेनसंस्काराभावात्स्वाप्नपदार्थःकथंवासनामयः ॥ तदुक्तंनिर्णये ॥ अवश्यंभाविनंमृत्युंधृष्टद्युम्नोविचिंत्यतं ॥ तूष्णींबभूवस्वप्नेपिनित्यंपश्यतितांमृतिं ॥ द्रौणिंचकालरात्रिंचद्रोण पातादनंतरं ॥ विशसंतंकृपंतंचस्वप्नेपश्यतिपार्षतइतिचेन्न ॥ भारतयुद्धस्यप्रतिदिनंजायमानत्वेनपूर्वदिनेनुभूतस्वमृतिविषय कसंस्कारोपादानकस्वमृत्याद्यनुभवसंभवात् ॥ नचचतुर्मुखप्रथमदिनेकागतिरितिवाच्यं ॥ सर्वज्ञकल्पानांदेवानामागामिपदा र्थानुभवसंभवेनतज्जनितसंस्कारोपादानकपदार्थानांस्वप्नेनुभवसंभवात् ॥ शाब्दानुभवजनितसंस्कारसंभवाच्च ॥ श्रुतंचाश्रुतं चेत्यादिश्रुतेः ॥ अतएवबाणासुरपुत्र्याःसमुद्रद्वीपवासिन्याःकदाप्यननुभूतेनानिरुद्धेनस्वप्नेसंभोगोप्येतन्न्यायसिद्धः ॥ **सो पिसप्तांगइति** ॥ ४४५ ॥ तदुक्तंमांडूकोपनिषदि ॥ स्वप्नस्थानोंतःप्रज्ञःसप्तांगएकोनविंशतिमुखःप्रविविक्तभुक्तैजसोद्वितीयःपादइति ॥ स्वप्नावस्थायाआश्रयमाह ॥ **स्वप्नावस्थाचेति** ॥ ४४६ ॥ सुप्तास्तत्रयतोजीवाःसर्वेब्रह्मशिवादयः ॥ असुप्ताः

---

४४५ सोपिसप्तांगएकोनविंशतिमुखः ॥ ४४६ स्वप्नावस्थाचसर्वजीवानां ॥

श्रीश्चमुक्ताश्चेत्यैतरेयभाष्येब्रह्मणःसुप्त्युक्तेः ॥ सुप्तेश्चस्वप्नावस्थापूर्वकत्वाद्ब्रह्मणोपिस्वप्नावस्थास्वीकर्तव्येतिभावः ॥ रुद्रस्याश्व त्थामावतारेस्वप्नउक्तः ॥ प्रथमस्कंधतात्पर्येपार्थानुयातमात्मानंद्रौणिःस्वप्नेददर्शह ॥ बंधनंचात्मनस्तत्रद्रौपद्याचैवमोक्षणमिति तत्रजीवस्येति ॥४४७॥ समीपस्थस्तथास्वप्नमितिभाष्योक्तेरितिभावः ॥ सुप्त्यवस्थांनिरूपयति ॥ बाह्येति ॥४४८॥ तदुक्तं मांडूकभाष्ये ॥सुषुप्तंतुतमोज्ञेयंहरिंप्राप्यतदावृतः॥नकामयेन्नैवपश्येज्जीवःस्वात्मतमोविना॥कालंचतस्यस्थानस्यपतिःप्राज्ञोहरिः स्वयमिति॥बृहद्भाष्येपि॥यंविष्णुंश्येनवच्छ्रांतोजीवोजागरितेभ्रमन्॥स्वप्नेचसुप्तावभ्येतिसंश्रांतःसद्ब्रह्मंयथेति॥तत्प्रवर्तकमाह॥ तत्प्रवर्तकइति ॥ ४४९ ॥ प्राज्ञेनात्मनासंपरिष्वक्तइतिश्रुतिः ॥ मांडूकभाष्येपि ॥ नात्मानंनपरांश्चैवनसत्यंनापिचानृतं ॥ प्राज्ञःसंवेदयेत्किंचिज्जीवकालतमोविना ॥ सुप्त्यवस्थांसुखंचापिविनानान्यत्प्रदर्शयदिति ॥ ननुमुक्तियोग्यानांस्वरूपस्यसु खात्मकत्वात्सुप्तौतदनुभवसंभवेपितमोयोग्यानांस्वरूपस्यदुःखात्मकत्वात्कथंसुखानुभवः ॥ नचसुप्तौतेषांदुःखानुभवएवास्त्वि तिवाच्यं ॥ अनुभवविरोधात् ॥ एतावंतंकालंसुखमहमस्वाप्समित्याद्यौत्तरिकानुस्मृतिविरोधप्रसंगाच्च ॥ नचतेषांबाह्यसुखा नुभवइतिवाच्यं ॥ तदाविषयसन्निधानाभावेनमनसोप्युपरतत्वेनवृत्तिसुखोत्पत्तेरयोगात् ॥ एवंनित्यसंसारिणामपिसुप्तौसुखा नुभवानुपपत्तिरितिचेत् ॥ उच्यते ॥ तमोयोग्यानामपिसुप्तौसुखानुभवोस्त्येव ॥नचस्वरूपस्यदुःखात्मकत्वात्सुखानुभवानुपप

४४७ तत्रजीवस्यतैजसप्राप्तिः ॥ ४४८ बाह्यस्वाप्नपदार्थादर्शनेनस्वरूपानुभवःसुषुप्तिः ॥ तत्रसर्वेंद्रियाणामुपरमः ॥ ४४९ तत्प्रवर्तकः प्राज्ञः ॥ तदाजीवस्यतत्प्राप्तिः ॥

त्तिरितिवाच्यं ॥ प्राकृतसुखानुभवसंभवात् ॥ नचमनसउपरतत्वेनसुखोत्पत्त्यनुपपत्तिरितिवाच्यं ॥ ग्राहकत्वशक्तेरुपरत त्वेपिपरिणामशक्तेरनुपरतत्वात् ॥ नचविषयसन्निधानाभावात्सुखानुत्पत्तिरितिवाच्यं ॥ परमेश्वरसन्निधानसामर्थ्येनोत्पत्ति संभवात् ॥ तदुक्तंगरुडपुराणे ॥ सृजत्यनित्यसौख्यंतुस्वसंगात्तामसेष्वजः ॥ सुप्तिकालेतुभगवांस्तत्सुखंप्राकृतंस्मृतमिति ॥ षट्प्रश्नटीकायामपि ॥ परमेश्वरसन्निधानसामर्थ्येनोद्भूतंसुखमात्मस्वरूपज्ञानेनानुभवतीति ॥ एवंनित्यसंसारिणामपिस्वरूप स्योभयात्मकत्वेपिदुःखानुभवाभावेनसुखमात्रानुभवसंभवात् ॥ तदुक्तंवायुपुराणे ॥ सृतियोग्यस्वरूपस्यसुखदुःखात्मकत्वतः ॥ ईशेशवशतस्तत्रसुखमात्रंप्रतीयतइति ॥केचित्तुतमोयोग्यानांसुप्तिकालेदुःखाभावेसुखभ्रांतिः॥ यथाभारोद्वाहकस्यपुरुषस्यभा रापगमेसतिदुःखाभावेसुखानुभवस्तद्वदित्याहुः ॥ तन्न ॥ दुःखाभावेसुखत्वारोपांगीकारेसुप्तिकालेमयानुभूतंसुखंन किंतुदुःखा भावइत्युत्तरत्रबाधकज्ञानप्रसंगात् ॥ किंचसुखत्वभ्रमःस्वरूपभूतोवावृत्तिरूपोवा ॥ नाद्यः ॥ स्वरूपस्यदुःखात्मकत्वेनदुःखा भावेसुखात्मकत्वानुभवरूपत्वाभावात् ॥ नांत्यः ॥ मनसउपरतत्वेनभ्रमात्मनापरिणामायोगादितिभवद्भिरेवोक्तत्वात् ॥ य दिमनसःपरिणामोंगीक्रियतेतर्हिसुखात्मनापरिणामएवकिंनस्यात् ॥ अपिचदुःखाभावेसुखभ्रमो गृह्यमाणारोपोवास्मर्यमाणा रोपोवा ॥ नाद्यः ॥ तदानींप्राकृतसुखस्याभावेनगृह्यमाणारोपानुपपत्तेः ॥ नद्वितीयः ॥ सुखस्मरणंमनसावास्वरूपेणवा ॥ नाद्यः ॥ मनसउपरतत्वेनस्मरणजननसामर्थ्यायोगात् ॥ नद्वितीयः ॥ स्वरूपस्यदुःखानुभवात्मकत्वेनसुखस्मरणरूपत्वाभा वात् ॥ किंचाधिष्ठानत्वेनाभिमतदुःखाभावःस्वरूपभूतोवातदतिरिक्तोवा ॥ नाद्यः ॥ स्वरूपस्यदुःखात्मकत्वेनदुःखाभावा

त्मकत्वायोगात् ॥ नद्वितीयः ॥ मनसउपरतत्वेनतज्ज्ञानाभावेधिष्ठानज्ञानाभावेनारोपासंभवात् ॥ नचस्वरूपेंद्रियेणप्राकृत
दुःखाभावज्ञानमितिवाच्यं ॥ प्रतियोगिनोदुःखस्यस्मरणाभावेनदुःखाभावज्ञानासंभवात् ॥ नचैवंकस्यापिसुप्तौदुःखाभावा
नुभवोनस्यादितिवाच्यं ॥ मुक्तियोग्यस्यस्वरूपस्यदुःखाभावात्मकत्वेनस्वरूपेणैवतदनुभवसंभवात्॥ तमोयोग्यस्वरूपस्यदुःखा
भावानुभवस्वरूपत्वाभावेनेष्टापत्तेः ॥ अपिचदुःखाभावेसुखारोपपक्षेबहुकल्पनादोषः ॥ तथाहि ॥ अधिष्ठानज्ञानंसादृश्यज्ञा
नमारोप्यसदृशज्ञानंभ्रमरूपज्ञानंचेतिज्ञानचतुष्टयंकल्प्यं ॥ नचसुप्तिकालेवृत्तिज्ञानबाहुल्यंयुक्तं ॥ सुप्तित्वभंगप्रसंगात् ॥ वृ
त्तिसुखकल्पनेतुनानेककल्पना ॥ किंतुमनसःपरिणामशक्तिमात्रकल्पनेतिलाघवं ॥यच्चोक्तंभारापगमेसतिदुःखाभावेसुखभ्रांति
वदितितन्न ॥ तत्रापिभारापगमेनसुखांतरोत्पत्तेरेवांगीकृतत्वात् ॥ अन्यथासर्वेषामपिभ्रांतिपरिकल्पनाप्रसंगात् ॥ मयानुभू
तंनसुखंकिंतुदुःखाभावइत्युत्तरत्रबाधकज्ञानप्रसंगाच्च ॥ यदिभारवाहकस्यभारापगमेदुःखाभावेसुखत्वभ्रांतिस्तर्हिभारवहनका
लेपिसुखाभावेदुःखत्वभ्रमापत्त्यादुःखोत्पत्तिरेवनस्यात् ॥ नचतदादुःखजनकस्यभारवहनस्यसद्भावाद्दुःखोत्पत्तिरितिवाच्यं ॥
तर्हिभारापगमस्यदेहादिविषयदर्शनस्यचसुखजनकत्वेनसुखोत्पत्तिसंभवात् ॥ तस्माद्दुःखाभावेसुखभ्रांतिरित्येतदयुक्तमेव॥अप
रेतु सुप्तिकालेतमोयोग्यस्यस्वरूपंपरमेश्वरसन्निधानवशेनदुःखत्वोपमर्देनसुखात्मनापरिणमते ॥ यथाजपाकुसुमसन्निधानेनशु ॥११४॥
द्धस्फटिकस्वरूपंलोहितात्मनापरिणमतेतद्वदित्याहुः ॥तदपिन ॥ तमोयोग्यस्वरूपस्यदुःखैकरूपस्यसुखात्मनापरिणामेप्रमाणा
भावात् ॥ नचेश्वरसन्निधानवशात्सुखात्मनापरिणामइतिवाच्यं ॥ तमस्यापिबिंबभूतपरमात्मसन्निधानसत्त्वेनसुखात्मनापरि

णामापत्तेः ॥ यच्चोक्तंस्फटिकलौहित्यवदिति ॥ तन्न ॥ परिणामयोग्यावयवोपेतस्यस्फटिकस्यैवजपाकुसुमसन्निधानेनलोहि तात्मनारिणामसंभवात् ॥ उक्तंचतत्त्वनिर्णयटीकायां ॥ दर्पणस्यप्रतिमुखपरिणतिहेतुत्वसंभवादिति ॥ सुप्त्यवस्थायाःस्थानमाह ॥ **साचेति** ॥ ४५० ॥ यद्यपिचतुर्मुखस्यापिपूर्वोदाहृतैतरेयभाष्यबलेनसुप्त्यवस्थास्त्येव ॥ तथापिनरुद्रादिवत्सुप्तिस्तस्येत्यभिप्रा येणरुद्रादीत्युक्तं ॥ ननुजाग्रदाद्यवस्थासुविश्वादीनांदक्षिणाक्ष्यादितत्तत्स्थानगतत्वेजीवस्यनकाप्यवस्थास्यात् ॥ तत्तत्प्रवर्त कानांस्वस्वव्यापारस्यवक्तव्यत्वेनैकदानेकावस्थायोगादित्यतआह ॥ **जाग्रदवस्थायामिति** ॥ ४५१ ॥ तथाचतैजसप्राज्ञ योर्जाग्रदवस्थायांविश्वेनैकीभूतत्वाज्जीवस्यजाग्रदवस्थैवेतिभावः ॥ तदुक्तंमांडूकभाष्ये ॥ प्राज्ञस्तेनजनार्दनः ॥ एकीभावंव्र जेत्तांचतेनविश्वस्यतैजसः ॥ एकीभूतःस्वतःप्राज्ञइति ॥ सुप्तेरुत्थानेप्राज्ञाद्विभक्तोभवतिविश्वः ॥ स्वप्नादुत्थानेतैजसात् ॥ प्रतिदिवसंविभागएकीभावश्चविद्यतेविश्वादीनामितिच ॥ इत्यादीति ॥ स्वप्नावस्थायांतैजसस्यविश्वप्राज्ञाभ्यामेकीभावः ॥ सुप्त्यवस्थायांप्राज्ञस्यविश्वतैजसाभ्यामेकीभावइत्यर्थः ॥ मूर्च्छावस्थांनिरूपयति ॥ **मोहेति** ॥ ४५२ ॥ तस्याआश्रयमाह ॥ **साचेति** ॥ ४५३ ॥ रुद्रस्यभीमसेनप्रहारेणमूर्च्छा ॥ अश्वत्थाम्नोपियुद्धकालेभीमप्रहारेणमूर्च्छा ॥ लक्ष्मणस्यरावणशक्तिप्र हारेणमूर्च्छा ॥ बलरामस्यापिजरासंधयुद्धेमूर्च्छा ॥ इंद्रस्यदेवासुरयुद्धेमूर्च्छा ॥ अर्जुनस्यस्वपुत्रेणबभ्रुवाहनेनमूर्च्छाचनिर्ण

---

४५० साचावस्थारुद्रादिसर्वजीवानां ॥ ४५१ जाग्रदवस्थायांतैजसप्राज्ञाभ्यांविश्वस्यैकीभावइत्यादिबोध्यं ॥ ४५२ मूर्च्छावस्थामोहाव स्था ॥ तदादुःखमात्रानुभवः ॥ तत्प्रवर्तकोभगवान् ॥ रूपविषेशस्तुअस्माभिर्नबुद्धोमहांतःप्रष्टव्याः ॥ ४५३ साचावस्थारुद्रादिसर्वजीवानां ॥

याद्युक्तानुसंधेया ॥ जाग्रदाद्यवस्थायांजीवस्ययथाविश्वादिषुसमग्रप्राप्तिर्नतथामूर्च्छावस्थायामित्याह ॥ तदार्धप्राप्तिरिति ॥४९४॥ तदुक्तंसूत्रेभाष्येच ॥ मुग्धेर्धसंपत्तिःपरिशेषात् ॥ मोहावस्थायांपरमेश्वरेर्धप्राप्तिर्जीवस्येति ॥ यतएवंत्रयोवस्थामोहस्तुपरिशेषतः ॥ अर्धप्राप्तिरितिज्ञेयोदुःखमात्रप्रतिस्मृतेरिति ॥ तुरीयावस्थांनिरूपयति ॥ तुरीयेति ॥४९५॥ तुरीयायामवस्थायांप्राणादेवनिबोधनमिति छांदोग्यभाष्येमोक्षस्यतुरीयावस्थात्वोक्तेरितिभावः ॥ ननुजाग्रदाद्यवस्थावदिदानींसर्वैरनुभूयमानत्वाभावात्तुरीयावस्थानास्त्येवेत्यतआह ॥ साचेति ॥४९६॥ इदानीमननुभूयमानत्वेपिसाधनपूर्त्योलिंगभंगानंतरमनुभूयमानत्वादित्युत्तरत्रवक्ष्यतइत्यर्थः ॥ तत्प्रवर्तकमाह ॥ तत्प्रवर्तकइति ॥ ४९७ ॥ तदुक्तंमांडूकभाष्ये ॥ सर्वज्ञानप्रदश्चापिमुक्तस्यैवतुरीयकः ॥ सर्वंतुदर्शयेन्मुक्तौतुरीयःपरमेश्वरइति ॥ तस्यस्थानमाह ॥ नासिकामारभ्येति ॥ ४९८ ॥ तदुक्तंमांडूकभाष्ये ॥ विष्णुस्तुरीयरूपेणद्वादशांतेव्यवस्थितः ॥ मुक्तानांप्राप्यरूपोसौव्यवहारेनदृश्यतइति ॥ द्वादशांतइत्यस्यव्याख्यानंव्यासतीर्थैःकृतं ॥ नासिकामूलमारभ्यद्वादशांगुलांतेमस्तकमध्यइतिकेचित् ॥ मस्तकमध्यमारभ्योपरिद्वादशांगुलप्रदेशइत्यन्यइति ॥ अत्रजाग्रदादिपंचावस्थाइत्युपलक्षणं ॥ अपरोक्षज्ञानिनांसमाध्यवस्थाप्यन्याध्येया ॥ सा चनजाग्रदवस्था ॥ जाग्रत्पदार्थज्ञानाभावात् ॥ भेरीताडनादावपिपरमानंदमग्नत्वादितिगीताभाष्योक्तेः ॥ नापिसुषुप्त्यवस्थासा ॥ मनसापरमात्मावलोकनरूपत्वात् ॥ तदुक्तंगीताभाष्ये ॥ तस्यामिंद्रियसंयमयुक्तोज्ञानीजागर्तिसम्यगापरोक्ष्येणपश्यतीति ॥ नापिस्वप्नावस्थासा ॥ तैजसप्राप्तिरूपत्वाभावात् ॥ किंचस्वप्नाद्यवस्थांगतस्यसंध्यादिकालेतदकुर्वतःपापादिप्रसक्तिःप्रमाणप्रसिद्धा॥तत्कालेऽसंप्रज्ञातसमाधिस्थस्यसंध्याद्यकृतौपापादिप्रसक्तेरभावात् ॥ तदुक्तंगीताभाष्ये ॥ नहिसमाधिंकुर्वतस्तस्यशुभाशुभप्राप्तिरसंप्रज्ञातसमाधेः ॥ असंप्रज्ञातसमाधिस्थस्यैवकार्यंनविद्यते ॥ असंप्रज्ञातसमाधेरेवकार्याभावः ॥ नचसंध्याद्यकृतौकश्चिद्दोषोस्तीति ॥ नापिमोक्षावस्थासा ॥ प्राकृतशरीरवत्त्वात् ॥ अतोसंप्रज्ञातसमाधिर्नामावस्थांतरमंगीकर्तव्यं ॥ एवंद्रौपद्याःसंभोगावस्थापिजाग्रदाद्यवस्थातिरिक्तांगीकार्या ॥ तदुक्तंनिर्णये ॥ कृष्णाचतेषुपृथगेवचतुःस्वरूपारेमेतथैकतनुरप्यभिमानभेदादित्यारभ्य नोसुप्तिवत्त्विदमितोन्यवशत्वतोहिदेहस्यसंस्मृतितएवहरेर्नमोहः ॥ नावेशवच्चततएवस्मृतेःस्वरूपमेतत्ततःप्रतिदिनंजननाद्धिकन्येति॥एवमुभयज्ञानशब्दितावस्थान्यांगीकर्तव्या॥ तदुक्तंमांडूकभाष्ये॥ बहिःशब्दादिकंजानन्पश्यन्स्वप्नंतथैवच॥ यदाभवतिसावस्थाह्युभयज्ञानशब्दितेति ॥ जाग्रदाद्यवस्थावज्जीवस्यगर्भवासावस्थायामपिपरमात्मैवरक्षकइत्याह ॥एवमिति॥४९९॥ तदुक्तंछांदोग्यभाष्ये ॥ अनिरुद्धाश्रयत्वाद्गर्भाणां ॥ योनिक्लृप्तिर्वासुदेवाद्रूपंसंकर्षणाद्भवेत्॥ आसेककर्मप्रद्युम्नादनिरुद्धाच्चधारणमिति ॥ धातागर्भंदधातुतइतिश्रुतिः ॥ योमेगर्भगतस्यापिवृत्तिंकल्पितवान्प्रभुरित्यादिपुराणवाक्यानि ॥ इतिस्थितिप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ इदानींसंहारोपिपरमात्माधीनइतिवक्तुंसंहारस्वरूपमाह ॥ संहार

४९४ तत्रार्धप्राप्तिःपरमात्मनाजीवस्य ॥ ४९५ तुरीयावस्थामोक्षः ॥ ४९६ साचवक्ष्यते ॥ ४९७ तत्प्रवर्तकस्तुरीयनामाभगवान् ॥ ४९८ नासिकामारभ्यद्वादशांगुलपरिमितदेशगतः ॥

४९९ एवंगर्भादावपिभगवान्पोषकः ॥

स्त्विति ॥ ४६० ॥ मीमांसकास्तुमहाप्रलयएवनास्तीत्याहुः ॥ तन्निरासार्थंतद्द्विभागमाह ॥ **सचद्विविधइति** ॥ ४६१ ॥ तथाचतत्प्रतिपादकप्रमाणविरोधादितिभावः ॥ तार्किकास्तु ॥ भावकार्यविनाशोऽवांतरप्रलयः ॥ सर्वप्रागभावानामपिविनाशोमहाप्रलयः ॥ महाप्रलयानंतरंसृष्टेरभावादित्याहुः ॥ तन्निरासायमहाप्रलयस्वरूपमाह ॥ **गुणत्रयमारभ्येति**॥४६२॥ पुनःपुनर्महदादिसृष्टिप्रतिपादकबहुप्रमाणविरोधादितिभावः ॥ वासुदेवोवाइदमग्रआसीन्नब्रह्मानचशंकरइत्यादिश्रुतिभिःप्रलयेब्रह्मादीनामभावस्यप्रसिद्धत्वात् ॥ भावकार्यत्वेनप्रलयेमहदादिनाशस्यप्रामाणिकत्वादित्यर्थः ॥ असदेवेदमग्रआसीदित्यत्रासच्छब्दोविश्वप्रागभावपरइतिसुधाटीकयोरुक्तेर्नमहाप्रलयेसर्वप्रागभावविनाशः ॥ अतस्तार्किकमतमयुक्तं ॥ ननुमहाप्रलयेनसर्वनाशः ॥ नाशकाभावादित्यतआह ॥ **तदेश्वरस्येति** ॥ ४६३ ॥ परिसंजिघृक्षुः ॥ अव्याकृतंविशतीतिभागवताद्युक्तेः ॥ ननुसंकर्षणमुखाग्निनाब्रह्मांडादिविनाशोभागवतादौप्रसिद्धः ॥ तत्कथमीश्वरसंजिहीर्षयेत्यतआह ॥ **तयेति** ॥४६४॥ ईश्वरेच्छयैवसंकर्षणमुखाग्निर्जायते ॥ नतुस्वतएव ॥ तदुक्तंद्वादशस्कंधभागवते ॥ पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति ॥ तदानिरन्नेह्यन्योन्यंरक्ष्यमाणाःक्षुधार्दिताः ॥ क्षयंयास्यंत्यशनकैःकालेनोपद्रुताःप्रजाः ॥ सामुद्रंदैहिकंभौमंरसंसांवर्तको

---

४६० संहारस्तुप्रलयः ॥ ४६१ सचद्विविधः ॥ महाप्रलयोवांतरप्रलयश्चेति ॥ ४६२ गुणत्रयमारभ्यब्रह्मांडपर्यंतस्यतदभिमानिब्रह्मादीनांचविनाशोमहाप्रलयः ॥ ४६३ तदेश्वरस्यसंजिहीर्षाभवति ॥ ४६४ तयाशेषांतर्गतस्यपरमात्मनोमुखादग्निज्वालाजायते ॥ तयाब्रह्मांडस्यसावरणस्यभस्मीभावः ॥

रविः ॥ रश्मिभिःपिबतेघोरैःसर्वंनैवविमुंचति ॥ ततःसांवर्तकोवह्निःसंकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थःशून्यान्भूविव रानथ ॥ उपर्यधःसमंताच्चशिखाभिर्वह्निसूर्ययोः ॥ दह्यमानंविभात्यंडंदग्धगोमयपिंडवत् ॥ ततःप्रचंडपवनोवर्षाणामधिकं शतं ॥ परःसांवर्तकोवातिधूम्रंखंरजसावृतं ॥ ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः ॥ शतवर्षाणिवर्षंतिनदंतिरभसस्वरैरि ति ॥ तार्किकास्तु कार्याणांस्वरूपतएवविनाशोनकारणेषुलयइत्याहुः ॥ तान्निराकरोति ॥ **कार्याणामिति** ॥ ४६५ ॥ स- दसत्कार्यवादस्यपूर्वंसाधितत्वेनकारणात्मनावस्थानस्यैवनाशत्वादितिभावः ॥ तदुक्तंद्वादशस्कंधभागवते ॥ तदाभूमेर्गंधगुणं ग्रसंत्यापउपप्लवे ॥ ग्रस्तगंधातुपृथिवीसलिलत्वायकल्पते ॥ अपांस्नेहमथोतेजस्तालीयंतेथतेजसि ॥ ग्रसतेतेजसोरूपंवायुस्तद्र हितंतदा ॥ लीयतेचानिलस्तेजोवायोःसंग्रसतेगुणं ॥ सवैविशतिखंराजंस्ततश्चनभसोगुणं ॥ शब्दंग्रसतिभूतादिर्नभस्तमनुली यते ॥ तैजसानींद्रियाण्यंगदेवावैकारिकागुणैः ॥ महान्ग्रसत्यहंकारंगुणाःसत्त्वादयश्चतं ॥ ग्रसतेव्याकृतंराजन्गुणा न्कालेनचोदितइति ॥ तत्रमहत्तत्वलयेविशेषोस्ति ॥ महत्तत्वेप्रविष्टरजोभागादशशुद्धसत्त्वेप्रविशंति ॥ एकोभागस्तमसि प्रविशति ॥ अतस्त्रयाणांगुणानामपिमिश्रितत्वसाम्याल्लयंसाम्यावस्थामाहुः ॥ तदुक्तंतृतीयतात्पर्ये ॥ मूलजंयद्रजस्तुतत् ॥ विलयेदशांशतःसत्त्वएकांशेनतमस्यपि ॥ मिश्रितंभवतिह्येतांसाम्यावस्थांविदुर्बुधाइति ॥ ननुसर्वस्यापिनाशेउत्तरसृष्टावुपादा नाभावप्रसंगइत्यतआह ॥ **प्रकृतिमात्रेति** ॥ ४६६ ॥ मात्रशब्देनमहदादिकार्यव्यावृत्तिः ॥ **तत्रवटपत्रइति** ॥४६७॥ त

४६५ कार्याणांकारणेषुलयः ॥ ४६६ प्रकृतिमात्रावस्थानं ॥ तदालक्ष्म्यात्मकंमहोदकं ॥ ४६७ तत्रवपटत्रेलक्ष्म्यात्मकेशून्यनामानारायणःशेते॥

दुक्तंद्वादशस्कंधभागवते ॥ एकएवार्णवेभ्राम्यन्ददर्शपुरुषंकिल ॥ वटपत्रपुटेतोकंशयानंत्वेकमद्भुतमिति ॥ न्यग्रोधपोतंददृशेफ
लपल्लवशोभितं ॥ प्रागुत्तरायांशाखायांतस्यापिददृशेशिशुं ॥ शयानंपर्णपुटकेग्रसंतंप्रभयातमइति ॥ तृतीयभागवतेपि॥ सत्त्वं
भृतोमेजठरेणनाथकथंनुयस्योदरएतदासीत् ॥ विश्वंयुगांतेवटपत्रएकःशेतेस्ममायाशिशुरंघ्रिपानइति॥ शून्यनामेति॥ तदुक्तं
तृतीयतात्पर्ये ॥ यत्तस्यव्यापकंरूपंपरंनारायणाभिधं ॥ शून्यंब्रह्मेतितत्प्राहुरिति ॥ द्वितीयस्कंधतात्पर्येपि ॥ यःशेतेप्रलयेवि
ष्णुःशून्यनामामहाकृतिः ॥ सतुनारायणोनामनराणामयनत्वतइति ॥ ननुप्रलयेआश्रयाभावाज्जीवाःक्वतिष्ठंतीत्याकांक्षायामा
ह ॥ **सर्वेपिजीवाइति** ॥ ४६८ ॥ तदुक्तंनिर्णये ॥ संशांतसंविदखिलंजठरेनिधायलक्ष्मीभुजांतरगतःस्वरतोपिचाग्रे ॥ दृष्ट्वा
सचेतनगणाञ्जठरेशयानानानंदमात्रवपुषःसृतिविप्रमुक्तान् ॥ ध्यानंगतान्सृतिगतांश्चसुषुप्तिसंस्थान्ब्रह्मादिकान्कलिपरान्मनु
जांस्तथैक्षदिति ॥ एवंबृहद्भाष्यादावपिद्रष्टव्यं ॥ ननुश्वेतद्वीपादीनांविनाशेकथंनित्यलोकत्वमित्यतआह ॥ **श्वेतद्वीपेति**
॥ ४६९ ॥ तत्रश्रीभागस्यलक्ष्म्यात्मकत्वं छांदोग्यभाष्यगीतातात्पर्यानुसारेणबोध्यं ॥ वराहपुराणादौभूभागदुर्गाभागयोर
मुक्तस्थानयोर्नाशउक्तोद्रष्टव्यः ॥ **अंधतमसस्येत्यादि** ॥ ४७० ॥ रौरवोथमहांश्चैववह्निर्वैतरणीतथा ॥ कुंभीपाकइतिप्रोक्ता
न्यनित्यनरकाणितु ॥ तामिस्रश्चांधतामिस्रोद्वौनित्यौसंप्रकीर्तितावितिभाष्योक्तेरितिभावः ॥ प्रलयकालेपिकालसृष्टिःपूर्वप्रमा

---

४६८ सर्वेपिजीवास्तदुदरंप्रविशंति ॥ ४६९ श्वेतद्वीपानंतासनवैकुंठेषुश्रीभागानांननाशः ॥ ४७० अंधतमसस्यनविनाशः ॥ रौरवाद्य
नित्यनरकाणांचविनाशः ॥ प्रकृत्याक्षणलवादिकालमात्रसृष्टिः ॥

णेनोक्ताद्रष्टव्या ॥ अवांतरप्रलयंविभजति ॥ **अवांतरप्रलयइति** ॥ ४७१ ॥ अत्रप्रमाणानितुकल्पप्रकरणएवोक्तानि ॥ त
त्रभूरादीति ॥ ४७२ ॥ संकर्षणमुखाग्निनेतिशेषः ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ अथोअनंतस्यमुखानलेनदंदह्यमानंस
निरीक्ष्यविश्वं ॥ निर्यातिसिद्धेश्वरधिष्ण्यजुष्टंयद्द्वैपरार्ध्यंतदुपारमेष्ठ्यमिति ॥ तृतीयभागवतेपि ॥ त्रिलोक्यांदह्यमानायांश
क्त्यासंकर्षणाग्निनेति ॥ ननुदैनंदिनप्रलयेइंद्रादयोदेवानश्यंतिकिंवान्यत्रगच्छंति ॥ नाद्यः ॥ तेषांमहाप्रलयएवशरीरलयस्य
वक्ष्यमाणत्वात् ॥ नद्वितीयः ॥ अनुक्तेरित्यतआह ॥ **इंद्रादयस्त्विति** ॥ ४७३ ॥ तदुक्तंतृतीयभागवते ॥ यांत्यूष्मणामह
र्लोकाज्जनमृभ्वादयोर्दिताः ॥ तावत्त्रिभुवनंसद्यःकल्पांतेविषसिंधवः ॥ प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ॥ अंतःसतस्मि
त्सलिलआस्तेनंतासनोहरिः ॥ योगनिद्रामीलिलाक्षःस्तूयमानोजनालयैरिति ॥ ननुमन्वंतरायुषःस्वर्ग्यामहर्लोकेतुकाल्पिकाइ
तिद्वितीयस्कंधतात्पर्येस्वर्गस्थानांमन्वंतरायुष्ट्वोक्तेःकथमिंद्रादीनांमहरादिगमनमितिचेन्न ॥ देवादिव्यतिरिक्तानांकर्मणास्व
र्गगतानांमनुष्यादीनामेवतादृशायुष्ट्वोक्तेः ॥ अतोनविरोधः ॥ मनुप्रलयंनिरूपयति ॥ **एकैकेति** ॥४७४॥ अत्रप्रमाणंतुमनुक
ल्पनिरूपणावसरएवोक्तं ॥ दिनप्रलयइवमनुप्रलयेनलोकत्रयनाशइत्याह ॥ **तदेति** ॥ ४७५ ॥ तर्हिमनुप्रलयेकस्यविनाशइत्य

---

४७१ अवांतरप्रलयस्तुद्विविधः ॥ दैनंदिनप्रलयोमनुप्रलयश्चेति ॥ प्रतिदिनंब्रह्मणोरात्र्यागमेविनाशोदैनंदिनप्रलयः ॥ ४७२ तत्रभूरादिलो
कत्रयमात्रस्यविनाशः ॥ ४७३ इंद्रादयस्तुतदामहर्लोकादिकंगच्छंति ॥ ४७४ एकैकमनुभुक्तिकालसमाप्तौयोविनाशःसमनुप्रलयः ॥
४७५ तदाभूरादिलोकत्रयनाशोनास्ति ॥

तआह ॥ भूलोकस्थेति ॥ ४७६ ॥ उपलक्षणमेतत् ॥ स्वर्गस्थानांकर्मिणामपिविनाशइतिबोध्यं ॥ चिरजीविनामश्वत्थामकृ
पादीनामपिमन्वंतरपर्यंतमवस्थानंद्रष्टव्यं ॥ हनूमतस्तुमनुप्रलयेस्वेच्छयाजनलोकादिकंगत्वादिनप्रलयपर्यंतमवस्थानंवामनुप्र
लयमात्रेवस्थानंवायुक्तं ॥ मनुप्रलयेभूरादिलोकत्रयनाशाभावइत्यत्रप्रमाणंतु ॥ आसीदतीतकल्पांतेब्राह्मोनैमित्तिकोलयः ॥
समुद्रावप्लुतास्तत्रलोकाभूरादयोनृपेति ॥ सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम ॥ मिमंक्षत्यप्ययांबोधौत्रैलोक्यंभूर्भुवादिकमिति
भागवतं ॥ इतिश्रीपद्मनाभसूरिविरचितेमध्वसिद्धांतसारेसंहारप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ ॐ नियमनमपिभगवदधीन
मितिवक्तुंतत्स्वरूपमाह ॥ **नियमनंचेति** ॥ ४७७ ॥ नऋतेत्वत्क्रियतेकिंचनारइतिश्रुतेरिति ॥ ननुचेतनानांभगवत्प्रेरणयैव
सर्वव्यापारवत्त्वेप्यनित्यपर्वतादिजडानामाकाशादिनित्यानांचव्यापाराभावात्कथंतत्रभगवन्नियमनमितिचेन्न ॥ नभोदशाति
श्वसतांमार्गंयन्नियमाददइतिभागवतोक्तेराकाशेमार्गदातृत्वस्यभगवन्नियमनसाध्यत्वात् ॥ द्रव्यंकर्मचकालश्चस्वभावोजीवए
वच ॥ यदनुग्रहतःसंतिनसंतियदुपेक्षयेत्यनुव्याख्यानोदाहृतप्रमाणबलेनस्वस्वसत्तायाएवभगवत्प्रेरणाधीनत्वात् ॥ नित्यंनि
त्यात्मनायतइतिन्यायविवरणोक्तेराकाशादिनित्यत्वस्यभगवन्नियमनेनैवसत्त्वात् ॥ पर्वतादीनांभारदार्ढ्यादेःपरमात्माधीनत्वा
च्च ॥ शिलाद्येषुस्थितोविष्णुर्भारदार्ढ्यादिकारणमित्यैतरेयभाष्योक्तेरितिभावः ॥ इतिनियमनप्रकरणं ॥७॥७॥७॥ ज्ञानमपिपर

---

४७६ भूलोकस्थमनुष्यादिमात्रविनाशः ॥ लोकद्वयस्थानांतुमहर्लोकादिगमनं ॥ तदालोकत्रयस्याप्युदकेनपूर्तिः ॥ ४७७ नियमनंचयेनयेन
क्रियतेतत्सर्वंपरमात्मप्रेरणयैवक्रियतइतिपरमात्मप्रेरणमेव ॥

मात्माधीनमित्याह ॥ येनयेनेति ॥४७८॥ अज्ञानांज्ञानदोविष्णुर्ज्ञानिनांमोक्षदश्चसइत्यनुव्याख्यानोक्तेरितिभावः ॥ संसारहेतुत्वमेवज्ञानस्यदर्शयति ॥ देहेति ॥४७९॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥भ्रांत्याजीवस्यसंसारईशज्ञानाद्विलीयते॥भ्रांतिर्देहाद्यभिमतिरतोज्ञानाद्विनश्यतीति ॥ नैषांममाहमितिधीःश्वसृगालभक्ष्यइत्यादिभागवतोक्तेश्च ॥ योग्यापरोक्षरूपमिति ॥४८०॥ सामान्यदर्शनाल्लोकामुक्तिर्योग्यात्मदर्शनादितिभाष्योक्तेः॥ निर्णयेपि ॥ तदामुक्तिश्चदेवानांयदाप्रत्यक्षगोहरिः ॥ स्वयोग्ययोपासनयातन्वातद्योग्ययातथेति॥बृहद्भाष्येपि॥अपरोक्षदृशिश्चापिमहाचार्योक्तदर्शनं॥सोपियन्मोक्षनियतमनसासमुदीरयेत्॥ तस्यदर्शनतोयातिमुक्तिंनास्त्यत्रसंशयइति ॥ स्वयोग्यभगवद्दृष्टेःसर्वैर्मुक्तिरवाप्यते ॥ पुनर्ज्ञानांतराधिक्यात्सुखाधिक्यंविमोक्षगमितिच ॥ गीतातात्पर्येपि॥ सर्वेतेदर्शनात्तस्मात्स्वयोग्यान्मुक्तिगामिनइति ॥ ननुतर्हितद्योग्यापरोक्षज्ञानंसर्वेषांसर्वदास्यादित्यतआह ॥ तद्बहुसाधनेति ॥ ४८१ ॥ सर्वेषांचयुगपत्साधनपूर्तेरभावादितिभावः ॥ तर्हितमोयोग्यानामपिसाधनैरपरोक्षज्ञानंस्यादित्यतआह ॥ चतुर्मुखमिति ॥ ४८२ ॥ अत्रचतुर्मुखशब्दोऋजुयोगिपरः ॥ अन्यथा नदेवपदमन्विच्छेद्ब्रह्मदर्शनवर्जितइतिगीतातात्पर्यप्रमाणबलेनप्राप्तपदानांजातापरोक्षत्वेनसाधनसंपत्त्यापुनर्ज्ञानाजननात्तद्विरोधापत्तेः ॥ नचैवंयोगि

---

४७८ येनयेनसाधनेनयस्ययस्ययद्यज्ज्ञानंजायतेतत्सर्वपरमात्मनाजन्यतइतिज्ञानमपिपरमात्माधीनं ॥ तद्विविधं ॥ संसारहेतुर्मोक्षहेतुश्चेति ॥
४७९ देहापत्यकलत्रादिषुममतादिरूपंज्ञानंसंसारहेतुः ॥ ४८० मोक्षसाधनंचज्ञानंयोग्यापरोक्षरूपं ॥ ४८१ तद्बहुसाधनसंपत्तिजन्यं ॥
४८२ चतुर्मुखमारभ्यमनुष्योत्तमपर्यंतंसज्जीवानामेवापरोक्षज्ञानंजायते ॥

ज्ञानमृजूनामनादिनित्यमितिप्रमाणलक्षणाद्यनुरोधेनऋजूनामपरोक्षज्ञानस्यापिप्रवाहतोनादिनित्यत्वेनसाधनसंपत्त्यनपेक्षणा
दितिवाच्यं ॥ प्रवाहतोनाद्यपरोक्षज्ञानस्यमोचकापरोक्षत्वाभावात् ॥ मोचकापरोक्षज्ञानस्यचशतजन्मसुपूर्वंतुज्ञानोदयउदी
रितइत्येकादशस्कंधतात्पर्यबलेनसाधनसंपत्तिसाध्यत्वोपपत्तेः ॥ ब्रह्मासर्वगुणैश्चैवक्रियासामान्यतश्चगीरित्यनुव्याख्यानेयो
ग्यापरोक्षज्ञानसाधनोपासनोक्तेश्च ॥ अन्यथातद्वैयर्थ्यापत्तेः ॥ नत्विति ॥ ४८३ ॥ तमोयोग्यानांतुभगवद्द्वेषपरिपाकादेव
तमःप्राप्तिःनतुब्रह्मापरोक्षज्ञानादितिभावः ॥ तदुक्तमेकादशस्कंधतात्पर्ये ॥ पारोक्ष्येणहरेस्तत्वंलोकंचापिविदंतिये ॥ तेपितत्स्ने
हनिर्मुक्तास्तमोयांतिविनिश्चयात् ॥ आपरोक्ष्यान्नतुज्ञानंतेषामुत्पद्यतेक्वचिदिति ॥ नन्वेवंतमोयोग्यानांसम्यज्ज्ञानरूपापरोक्ष
ज्ञानाभावेपिहीनत्वेनवाब्रह्मात्म्यैक्येनवामिथ्याभूतापरोक्षज्ञानमंगीकर्तव्यं ॥ अन्यथातेषामज्ञाननिवृत्तिर्नस्यात् ॥ नचद्वेषादे
वाज्ञाननिवृत्तिरितिवाच्यं॥ज्ञानाज्ञानयोरेवविरोधेनद्वेषस्यतन्निवर्तकत्वायोगात्॥ किंचपश्यतोब्रह्मनिर्द्वंद्वंहीनंचब्रह्मपश्यतः॥
द्विषतोवाभवेत्पुण्यनाशोनास्त्यत्रसंशयइतिभाष्येतमोयोग्यानामप्यपरोक्षज्ञानोक्तेः ॥ तथामिथ्याज्ञानेनचतमोज्ञानेनैवपरंपद
मित्यणुभाष्येपितमोयोग्यानांमिथ्यापरोक्षज्ञानोक्तेरितिचेत् उच्यते॥ तमोयोग्यानांनापरोक्षज्ञानमुत्पद्यते ॥ द्वेषिणस्तदपरोक्ष
ज्ञानस्यलोकविरुद्धत्वात्॥नहिलोकेराजद्वेषिणोपरोक्षज्ञानंराजानुमन्यते॥ प्रत्युतदूरएवनिष्कासनताडनकारागृहप्रवेशादिकं॥
तद्वद्भगवद्द्वेषिणोपिद्वेषपरिपूर्तेरेवतमःप्राप्तिः ॥ तदुक्तमनुव्याख्यानेकर्मक्षयपादे ॥ तद्विषश्चैवंपुण्यनाशोप्यसंगता ॥ ब्रह्मद्वि

४८३ नतुनमोयोग्यानां ॥

ड्ब्रह्मदर्शीचतमोमोक्षाववाप्नुतइति ॥ तत्रसुधायामपि ॥ ब्रह्मद्विषश्चैवं ज्ञानिवत् ॥ द्वेषपरिपूर्तेः पूर्वस्यपुण्यस्यनाशोभवत्युत्तर
स्यासंगतापीति ॥ सन्न्यायरत्नावल्यामपिदैत्यानांतुविष्णावुत्कटद्वेषोत्पत्तेरनंतरस्यसुकर्मणः पूर्वकृतस्यानारब्धकार्यस्यविनाशः॥
तच्चोक्तमाग्नेये ॥ यथाश्लेषोविनाशश्चमुक्तस्यतुविकर्मणः ॥ एवंसुकर्मणश्चापिपततस्तमसिध्रुवमिति ॥ नयचंद्रिकायामपि ॥
भगवद्विषोपिद्वेषपरिपाकेसत्येवपूर्वस्यपुण्यस्यविनाशः ॥ उत्तरस्यासंगताचेति ॥ टीकायामपि ॥ भगवद्द्वेषिणःपातेप्रत्यासन्नेय
थाज्ञानिनांपापस्यैवंतत्पुण्यस्याश्लेषोविनाशश्चभवतीत्यादिबहुस्थलेष्वपरोक्षज्ञानसमानकक्ष्यात्वेनतद्द्वेषपरिपाकस्यैवोक्तिः ॥
निर्णयेपि ॥ अनादिद्वेषिणोदैत्याविष्णौद्वेषोविवर्धितः ॥ तमस्यंधेपातयतिदैत्यानंतेविनिश्चयादिति ॥ नचहीनंचब्रह्मपश्यत
इतिभाष्यविरोधइतिवाच्यं ॥ तस्यपरोक्षज्ञानविषयत्वात् ॥ पश्यार्थैश्चानालोचनइतिसूत्रेपाणिनिनाज्ञानसामान्येपिदृशेरुक्त
त्वात् ॥ नचतत्वप्रदीपिकायामितरस्यभगवद्द्वेषिणःपुण्यस्याप्येवमुत्तरस्याश्लेषःपूर्वस्यविनाशःअधःपातेआसन्ने ॥ अन्यथाज्ञा
नेपरिपूर्णेचपुण्यस्याश्लेषोयमुच्यतइत्यादिनामिथ्याज्ञानपरिपूर्तिरुक्तेतिवाच्यं ॥ नहिमिथ्याज्ञानपरिपूर्तिरेवनास्तीतिब्रूमः ॥
किंत्वपरोक्षज्ञानं ॥ नचमिथ्याज्ञानपरिपूर्तिरेवापरोक्षज्ञानमितिवाच्यं ॥ साधकाभावात् ॥ अज्ञाननिवृत्तिस्तुमिथ्याज्ञान
परिपूर्त्यैवभवतीतिनकश्चिद्दोषइतिसंक्षेपः ॥ अपरोक्षज्ञानंतुब्रह्मादीनांनयुगपत्किंतुक्रमेणैवेत्याह ॥ एकैकस्मिन्निति ॥
॥ ४८४ ॥ शतजन्मसुपूर्वंतुज्ञानोदयउदीर्यतइत्येकादशतात्पर्येशतब्रह्मकल्पात्पूर्वंमोचकापरोक्षज्ञानंजायतइत्युक्तं ॥ तथा

४८४ एकैकस्मिन्ब्रह्मकल्पे एकैकस्यऋजोरपरोक्षज्ञानं ॥ एकैकस्यमुक्तिः ॥

ब्रह्मणांशतकालात्तुपूर्वमारब्धसंक्षयइत्यनुव्याख्यानेशतब्रह्मकल्पपर्यंतंप्रारब्धानुभवश्चाभिहितः ॥ तथाऋजवोनामयेदेवायो
ग्याब्रह्मपदस्यतु ॥ तएवशतजन्मानिविशेषोपासकाहरेः ॥ सर्वदापिविशेषेणशतजन्मप्रयत्नतः ॥ स्वपदप्राप्तिरुद्दिष्टात
तोमुक्तिरवाप्यतइतिचतुर्थस्कंधतात्पर्येऋजूनांशतजन्मसुसाधनंविहितं ॥ एतद्बहुप्रमाणपर्यालोचनयासत्यलोकाधिपत्येवि
द्यमानब्रह्मणःपूर्वंएकोनशतब्रह्मकल्पेएकस्यऋजोरपरोक्षज्ञानंजायते ॥ तेनसहशतसंख्याकाऋजवोजातापरोक्षाः ॥ सर्वस्मि
न्ब्रह्मकल्पेसंत्येवनियमतः ॥ तत्रैतच्चतुर्मुखस्यमुक्तौसत्यांपूर्वकल्पस्थवायोरेष्यत्कल्पेब्रह्मपदप्राप्तिः ॥ तत्रैकस्यऋजोरपरोक्षज्ञा
नंनियमेनजायते ॥ एवंशेषगरुडपदयोग्ययोरप्येकोनपंचाशद्ब्रह्मकल्पात्पूर्वमपरोक्षज्ञानंजायते ॥ तेनसहपंचाशत्संख्याका
गारुडपदयोग्याःशेषपदयोग्याश्चप्रत्येकंजातापरोक्षानियमेनसंत्येव ॥ इंद्रकामपदयोग्ययोस्त्वेकोनविंशतिकल्पात्पूर्वमपरोक्ष
ज्ञानंजायते ॥ तेनसहविंशतिसंख्याकाजातापरोक्षाःसर्वदासंत्येव ॥ तत्रैकस्यमुक्तिरेकस्यापरोक्षज्ञानं ॥ एवंसूर्यचंद्रपदयो
ग्ययोरपिदशब्रह्मकल्पात्पूर्वमपरोक्षज्ञानमित्यादिबोध्यं ॥ अत्रप्रमाणानित्वपरोक्षज्ञानोत्पत्तिप्रकरणेवक्ष्यंते ॥ पूर्वमपरोक्ष
ज्ञानंबहुसाधनसंपत्तिजन्यमित्युक्तं ॥ तानिसाधनान्याह ॥ **मोक्षसाधनीभूतेति** ॥ ४८९ ॥ परीक्ष्यलोकान्कर्मचिता

---

४८९ मोक्षसाधनीभूतापरोक्षज्ञानसाधनानिच विविधसांसारिकदुःखदर्शनेनसज्जनसंगत्याचेहामुत्रफलभोगविरागः शमदमादिसंपत्तिः अध्ययन
संपत्तिः शरणागतिः गुरुकुलवासः तदुपदेशेनसच्छास्त्रार्थज्ञानरूपंश्रवणं श्रुतस्यतत्वस्यदृढीकरणायमीमांसापरपर्यायोविचारोमननं गुरुभक्तिर्यथायो
ग्या परमात्मभक्तिः स्वाधमेषुसत्सुदया स्वसमेषुस्वात्मवत्स्नेहः उत्तमेषुभक्तिः निवृत्तकर्मानुष्ठानं निषिद्धसंत्यागः सर्वसमर्पणं तारतम्यपरिज्ञानं
पंचभेदज्ञानं प्रकृतिपुरुषविवेकज्ञानं अयोग्यनिंदा उपासनाचेति ब्रह्मादिसर्वयोग्यजीवसाधारणानि ॥

न्ब्राह्मणोनिर्वेदमायादितिश्रुतेः ॥ तथाटीकाकारैःसर्वग्रंथेषुविविधसांसारिकदुःखदर्शनेनविरक्तस्येत्युक्तेः ॥ वैराग्यस्यमोक्ष
साधनत्वेप्रमाणंतु ॥ अरागाद्विहितात्यागादित्येतैरेवसंयुतैः ॥ अपरोक्षदर्शनंविष्णोर्जायतेनान्यथाक्वचिदितिगीतातात्प
र्ये ॥ भाष्यमपि ॥ आब्रह्मस्तंबपर्यंतमसारंचाप्यनित्यकं ॥ विज्ञायजातवैराग्योविष्णुपादैकसंश्रयः ॥ सउत्तमोधिकारीस्या
दिति ॥ यावद्रागविनाशःस्याद्विरक्तोभक्तिसंयुतः ॥ सर्वदैवाप्रमत्तश्चपश्येदेवहरिंपरमितिछांदोग्यभाष्यं ॥ गीतायामपि ॥
असक्तिरनभिष्वंगःपुत्रदारगृहादिषु ॥ विविक्तदेशिसेवित्वमरतिर्जनसंसदि ॥ त्यक्त्वाकर्मफलासंगमित्यादि ॥ भागवतेपिस
र्वत्रवैराग्यस्यमोक्षसाधनत्वमभिहितं ॥ भाष्येपिवैराग्यार्थेगत्यादिनिरूपणाप्रथमेपादइत्याद्युक्तं ॥ तच्चवैराग्यंनसाक्षान्मोक्ष
साधनंकिंतुभक्तिदार्ढ्यद्वारा ॥ तदुक्तमुपासनापादीयानुव्याख्याने ॥ वैराग्यतोभक्तिदार्ढ्यंतेनोपासायदाभवेत् ॥ आपरोक्ष्यं
भवेद्विष्णोरितिपादक्रमोभवेदिति ॥ सज्जनसंगत्येति ॥ तदुक्तमेकादशतात्पर्ये ॥ असज्जनैश्चसंवासोनकर्तव्यःकथंचन ॥
यावद्यावच्चबहुभिःसज्जनैःसतुमुक्तिदइति ॥ पंचमभागवतेपि ॥ अहोनृजन्माखिलजन्मशोभनंकिंजन्मभिस्त्वपरैरप्यमुष्मिन् ॥
नयद्धृषीकेशयशःकृतात्मनांमहात्मनांवःप्रचुरःसमागमः ॥ नह्यद्भुतंत्वच्चरणाब्जरेणुभिर्हतांहसोभक्तिरधोक्षजेऽमला ॥ मौ
हूर्तिकाद्यस्यसमागमाच्चमेदुस्तर्कमूलोपहतोऽविवेकइति ॥ दशमेपि ॥ सत्संगमोयर्हितदैवसंगमःपरावरेशेत्वयिजायतेमतिरि
त्यादिसर्वत्र ॥ एकादशतात्पर्ये ॥ तस्मात्सत्सूत्तमेष्वेषुसंगःकार्योविशेषतः ॥ अनाद्यनंतकालेषुनचहेयःकथंचनेति ॥ साधनां
तरमाह ॥ शमदमादिति ॥ शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्येदितिश्रुतेः ॥ शमादिसंयुक्तोमध्य

म:समुदाहृतइतिभाष्योक्तेः ॥ शमदमाद्युपेतःस्यादितिसूत्रेच ॥ साधनांतरमाह ॥ अध्ययनसंपत्तिरिति ॥ अध्ययनमात्र
वतइतिसूत्रोक्तेः ॥ तस्मादध्ययनान्वितइतिभाष्योक्तेः ॥ नन्वध्ययनंतमोयोग्यानामपिदृश्यते तत्कथंमोक्षसाधनमित्यतउक्तं
संपत्तिरिति ॥ अधिकारपूर्वकाध्ययनमेवमोक्षसाधनंनत्वनधिकारिभिरधीतमित्यर्थः ॥ तमोयोग्यानांतुविष्णुभक्तेरभावान्ना
ध्ययनाधिकारः ॥ तदुक्तंभाष्ये ॥ अवैष्णवस्यवेदेपिह्यधिकारोनविद्यतइति ॥ तथायस्तित्याजसचिविदंसखायंनतस्यवाच्य
पिभागोअस्ति ॥ यदींशृणोत्यलकंशृणोतिनहिप्रवेदसुकृतस्यपंथामितिश्रुतिः ॥ तदर्थस्त्वैतरेयभाष्यएवोक्तः ॥ कर्मसंचयवे
त्तारंत्यजेन्नारायणंहियः ॥ प्रीत्यैकदेशसंस्थत्वात्सखायमितिचोदितं ॥ नविद्यायाःफलंतस्यश्रुतंचनरकावहं ॥ नैवप्राप्नोतिसुकृ
तंसंत्यागात्परमात्मनइति ॥ तथाचायंश्रुत्यर्थः ॥ योजनःसचिविदंसचिःकर्मसंचयस्तंवेत्तीतिसचिवित् ॥ तंकर्मसंचयवेत्तारंस
खायंप्रीत्यैकदेशेनदेहेस्थितत्वात्परमात्मानंतित्याजतत्याजत्यजेत् परमात्मनिभक्त्यादिमान्नभवेदितियावत् ॥ तस्यजनस्यवा
चिवेदविद्यायामधीतायांसत्यामपिभागःभोगः फलमितियावत् ॥ नास्ति ॥ अपिशब्देनप्रत्युतश्रुतंचाध्ययनंनरकावहंभवति ॥
तदेवविवृणोति ॥ यदीमिति ॥ यदिशृणोतितर्हिअलकंईनरकमुद्दिश्यैवशृणोति ॥ तत्कुतइत्यतआह ॥ नहिप्रवेदेति ॥ सु
कृतस्याध्ययनादेःकर्मणःपंथांपंथानंमार्गप्रदंपरमात्मानंनप्रवेदहीति ॥ एवमृग्भाष्यैतरेयभाष्यादावपि ॥ मानःस्तेनेभ्योयेअ
भिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृधुः ॥ येषांन्नैतन्नापरंकिंचनैकंब्रह्मणस्पतेब्रूहितेभ्यःकदाचिदिति ॥ तमोयोग्यानांविद्या
नदेयेतिवायुंप्रतिविद्यादेवताप्रार्थनमित्युक्तं ॥ तद्व्याख्यातमैतरेयभाष्ये ॥ वायुंविद्याःसमासाद्यसर्वासांपतिमूचिरे ॥ स्तेनेभ्यो

नैवनोब्रूहिब्रूह्यथोवैष्णवेषुचेति ॥ तथाचायंश्रुत्यर्थः येजनाःअभिद्रुहस्पदेअभितोद्रोहस्यनित्यनिरतिशयस्यदुःखस्यांधतमसो
योग्याःनिरामिणःरामस्यरमणरूपस्यपूर्णानंदस्वरूपस्यविष्णोर्जीवस्वरूपतादिज्ञानेननीचताविदःअतएवरिपवः अन्नेषुजागृधुः
भोगमात्रगृध्नवः ॥ तथायेषांनैतन्नपरंब्रह्माख्यंअपरमपिजगत् ॥ वस्तुनास्तीतिपक्षःकिंतर्हिकिंचनैकमेववस्त्वस्तिनपरमपरंचेति
द्वयमितिपक्षस्तेभ्यस्तेनेभ्यःहेब्रह्मणस्पतेब्रह्मणोवेदस्यपतेवायोकदाचिदपिनःमाब्रूहीति ॥ भारतेपि ॥ वेदभारसमाक्रांतः
सर्वैब्राह्मणगर्दभइति ॥ नचाध्ययनवतएवमोक्षयोग्यत्वेस्त्रीणांमोक्षोनस्यात् ॥ वेदाध्ययनाभावादितिवाच्यं ॥ भारतादिरूप
वेदाध्ययनसद्भावात् ॥ तदुक्तंगीताभाष्ये ॥ वेदानधिकारिणांस्त्रीशूद्रादीनांचधर्मज्ञानद्वारामोक्षोभवेदितिकृपालुर्महाभारत
संहितामचीकॢपत् ॥ लोकेशाब्रह्मरुद्राद्याःसंसारेक्लेशिनंजनं ॥ वेदार्थाज्ञमधीकारवर्जितंचस्त्रियादिकं ॥ अवेक्ष्यप्रार्थयामासु
र्देवेशंपुरुषोत्तमं ॥ ततःप्रसन्नोभगवान्व्यासोभूत्वाचतेनच ॥ अन्यावताररूपैश्चवेदानुक्तार्थभूषितं ॥ केवलेनात्मबोधेनदृष्टंवे
दार्थसंयुतं ॥ वेदादपिपरंचक्रेपंचमंवेदमुत्तमं ॥ भारतंपंचरात्रंचमूलरामायणंतथा ॥ पुराणंभागवतंचेतिसंभिन्नःशास्त्रपुंगव
इति ॥ इत्यध्ययनप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ साधनांतरमाह ॥ **शरणागतिरिति** ॥ तदुक्तंगीतातात्पर्ये ॥ सर्वोत्त
मत्वविज्ञानपूर्वंतत्रमनःसदा ॥ सर्वाधिकप्रेमयुक्तंसर्वस्यात्रसमर्पणं ॥ अखंडात्रिविधापूजातद्रत्यैवस्वभावतः ॥ रक्षतीत्येव
विश्वासस्तदीयोहमितिस्मृतिः ॥ शरणागतिरेषास्याद्विष्णौमोक्षफलप्रदेति ॥ तथा सर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेतिगी
ता ॥ द्वादशस्तोत्रेपि ॥ भवममशरणमितिबहुस्थलेषुशरणप्रार्थना ॥ साधनांतरमाह ॥ गुरुकुलेति ॥ गुरुसेवेत्यर्थः ॥ तदु

क्तंपंचमस्कंधभागवते ॥ महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंगमिति ॥ तथाच्छांदोग्योपनिषदि ॥ सत्यकामोप
कोसलादीनांगुरुसेवयाविद्याप्राप्तिरुक्ता ॥ गुरुसेवयाचगुरुप्रसादोजायते तेनचमोक्षइत्यपिद्रष्टव्यं ॥ तदुक्तमुपासनापादीया
नुव्याख्याने ॥ सम्यग्गुरुप्रसादश्चमुख्यतोदृष्टिकारणमिति ॥ भाष्येपिगुरुप्रसादोबलवान्नतस्माद्बलवत्तरमिति ॥ सर्वलक्षण
संपन्नःसर्वज्ञोविष्णुतत्परः ॥ यद्गुरुःसुप्रसन्नःसन्दद्यात्तन्नान्यथाभवेत् ॥ लभेद्गुरुप्रसादंचतस्मादेवचतद्भवेदिति ॥ निर्ण
येपि ॥ सम्यग्लक्षणसंपन्नोयद्दद्यात्सुप्रसन्नधीः ॥ शिष्यायसत्यंभवतितत्सर्वंनात्रसंशयइति ॥ नचैवंगुरुप्रसादस्यावश्यकत्वेक
दाचिद्गुरुकोपादिनाज्ञानमोक्षादिविषयकशापेसतिमोक्षाभावप्रसंगइतिवाच्यं ॥ तच्छापस्यज्ञानविलंबे मोक्षेआनंदह्रासेच
कारणत्वेनसर्वथाज्ञानमोक्षाभावसाधकत्वाभावात् ॥ तदुक्तंन्यायविवरणे ॥ ज्ञानिनोगुरुशापेपिनामुक्तिःसंसृतेःक्वचित् ॥
आनंदह्रासदोषेणसैवमुक्तिर्विदुष्यतीति ॥ चतुर्थतात्पर्येपि ॥ येज्ञानविषयाःशापामुक्तिगाश्चाधिकारिणां ॥ कादाचित्कास्तेभ
वंतिनैवतेसार्वकालिकाः ॥ भगवन्नियतत्वात्तुशापादिर्नात्रकारणमिति ॥ साधनांतरमाह ॥ तदुपदेशेनेति ॥ गुरूपदेशेनेत्य
र्थः ॥ तथाचगुरूपदेशंविनायस्यपुस्तकावलोकनादिनाशास्त्रार्थज्ञानंतन्नमोक्षसाधनमित्यर्थः ॥ तदुक्तंछंदोगश्रुतौ ॥ आचा
र्याद्ध्येवविद्याविदितासाधिष्ठंप्रापयतीति ॥ सप्तमांते आहारशुद्धौसत्त्वशुद्धिरिति ॥ गुरोर्विद्याहृतिर्यातुसआहारइतिस्मृतः ॥
तच्छुद्धौज्ञानशुद्धिःस्यादिति ॥ षष्ठस्कंधतात्पर्येपि ॥ अप्रसादाद्गुरोर्विद्यानयथोक्तफलप्रदाः ॥ विद्याःकर्माणिचसदागुरोःप्रो
क्ताःफलप्रदाः ॥ अन्यथानैवफलदाःप्रसन्नोक्ताःफलप्रदाइति ॥ न्यायविवरणेपि ॥ श्रवणादित्रयोत्पन्नदृष्टौवस्वेच्छयाहरिः ॥

प्रसन्नोमुक्तिदोनित्यंनान्यथातुकथंचनेति ॥ सूत्रेभाष्येपिं ॥ ॐप्रदानवदेवतदुक्तं ॥ नचश्रवणादिमात्रेणदृष्टिर्भवतिकिंतुसेति कर्तव्येन ॥ यथागुरुदत्तंतथैवभवति ॥ आचार्यवान्पुरुषोवेदेतिश्रुतेरिति ॥ बृहद्भाष्येपि ॥ श्रवणंमननंचैवध्यानंभक्तिस्तथा दृशिः ॥ ज्ञानंचोक्तविशेषाणांसर्वेषांसाधनंभवेत् ॥ त्यक्त्वैतानिनकस्यापिभवेन्मोक्षःकदाचनेति ॥ तंत्रसारेपि ॥ अपरोक्षदृ शिश्चैवश्रवणान्मननादनु ॥ सम्यङ्निश्चिततत्वस्यनिदिध्यासनयाभवेदिति ॥ उपासनापादीयानुव्याख्यानेपि ॥ श्रवणंमननं चैवकर्तव्यंसर्वदैवहि ॥ मतिश्रुतिध्यानकालविशेषंगुरुरुत्तमः ॥ वेत्तितस्योक्तिमार्गेणकुर्वतःस्याद्धिदर्शनं ॥ श्रवणादिविनानै वक्षणंतिष्ठेदपिक्वचित् ॥ अत्यशक्येतुनिद्रादौपुनरेवसमाचरेदिति ॥ नन्वेवंगुरूपदेशाभावेपिकेषांचिदिदानींसम्यज्ज्ञानदर्श नान्नश्रवणनियमइतिचेन्न ॥ तेषांजन्मांतरश्रवणबलेनेदानीमीषज्ज्ञानसंभवात् ॥ तदुक्तंतत्वनिर्णये ॥ जन्मांतरेश्रुतास्ता स्तुवासुदेवप्रसादतः ॥ मुनीनांप्रतिभास्यंतिभागेनैवनसर्वशइति ॥ देवोत्तमानांभूमौजातानांकेषांचिन्नोपदेशनियमः किंतु स्वतएवज्ञानाभिव्यक्तिः ॥ तदुक्तंगीतातात्पर्ये ॥ अश्रुतप्रतिभायस्यश्रुतिस्मृत्यविरोधिनी ॥ विश्रुतानृषुजातंचतंविद्याद्दे वसत्तममिति ॥ छांदोग्यभाष्येपि ॥ देवामनुष्यतांप्राप्ताविज्ञेयादेवमानुषाः ॥ ब्रूयुरर्थवतींवाचंनैवस्युर्बहुभाषिणः ॥ ध्या नंकुर्वंतइवतइति ॥ ननुगुरूपदेशस्यसर्वथापेक्षितत्वेस्वापेक्षयाज्ञानाधिकस्यगुरोरलाभेकागतिरितिचेन्न ॥ स्वयमेवाभ्यासस्य कर्तव्यत्वात् ॥ तदुक्तमुपासनापादीयानुव्याख्याने ॥ यदितादृग्गुरुर्नास्तिनिर्णयज्ञात्समाचरेत् ॥ अभावेनिर्णयज्ञस्यस च्छास्त्राण्येवसर्वदा ॥ शृणुयाद्यदिसज्ज्ञानप्राचुर्यमुपलभ्यते ॥ महद्भ्योविष्णुभक्तेभ्योयथाशक्तिचसंशयान् ॥ छिंद्यात्स्व

तोधिकाभावेस्वयमेवसमभ्यसेत् ॥ ब्रूयादपिचशिष्येभ्यःसत्सिद्धांतमहापयन्निति ॥ यद्यहंकारेणबोधकेविद्यमानेपितस्मान्न
शृणोतिसनरकंव्रजेदेव ॥ तदुक्तंबृहद्भाष्ये ॥ बोधकेविद्यमानेपियेविदुर्नपरंहरिं ॥ तेपियांतितमोघोरंनित्योद्रिक्तासुखा
त्मकमिति ॥ साधनांतरमाह ॥ **श्रुतस्येति** ॥ अज्ञानमिथ्याज्ञाननिरासपूर्वकमिदमित्थमितिज्ञानंजिज्ञासापरपर्यायमनन
जन्यमित्यर्थः ॥ तदुक्तमनुव्याख्याने ॥ इदमित्थमितिज्ञानंजिज्ञासायाःप्रयोजनमिति ॥ भाष्येपि ॥ श्रुत्वामत्वातथाध्या
त्वातदज्ञानविपर्ययौ ॥ संशयंचपराणुद्यलभतेब्रह्मदर्शनमिति ॥ साधनांतरमाह ॥ **गुरुभक्तिरिति** ॥ यस्यदेवेपराभक्तिर्य
थादेवेतथागुरावितिश्रुतेः ॥ स्वोत्तमानांसर्वेषांगुरुत्वात्तेषुनैकप्रकाराभक्तिःकार्येत्याह ॥ यथायोग्यतेति ॥ तत्तदाधिक्यक्रमे
णभक्तिःकर्तव्येत्यर्थः ॥ तदुक्तंछांदोग्यभाष्ये ॥ विष्णौभक्तिर्विशेषेणमोक्षावाप्तौहिकारणं ॥ तद्भक्तेषुक्रमेणैवरमाद्येषुत्वनंतरं ॥
तृतीयमपिवैराग्यंनचान्यन्मोक्षकारणमिति ॥ बृहद्भाष्येपि ॥ विष्णुभक्तिर्देवभक्तिर्गुरुभक्तिस्तथैवच ॥ तत्तच्छ्रैष्ठ्यानुसारेण
मुक्तौनियतसाधनं ॥ भक्तिपूर्तौभवेन्मुक्तिस्तदभावेचनोभवेदिति ॥ तंत्रसारेपि ॥ सर्वेभ्योभ्यधिकाभक्तिर्विष्णौस्यादतिनि
श्चला ॥ लक्ष्मीब्रह्मादिषुततःक्रमेणस्यात्सुभाविता ॥ एवंविद्याःफलिष्यंतिनान्यथातुकथंचनेति ॥ साधनांतरमाह ॥ **परमा
त्मभक्तिरिति** ॥ भक्तिस्वरूपंतुनिर्णयेप्रतिपादितं ॥ माहात्म्यज्ञानपूर्वस्तुसुदृढःसर्वतोधिकः ॥ स्नेहोभक्तिरितिप्रोक्तस्तया
मुक्तिर्नचान्यथेति ॥ बृहद्भाष्येपि ॥ सर्वस्मादुत्तमइतिसम्यक्स्नेहयुतामतिः ॥ सुस्थिराभक्तिरुद्दिष्टातयामुक्तिर्नचान्यत
इति ॥ गीतातात्पर्येपि ॥ ब्रह्मरुद्ररमादिभ्योप्युत्तमत्वंस्वतंत्रतां ॥ सर्वस्यतदधीनत्वंसर्वसद्गुणपूर्णतां ॥ निर्दोषत्वंचविज्ञाय

विष्णोस्तत्राखिलाधिकः ॥ स्नेहोभक्तिरितिप्रोक्तःसर्वोपायोत्तमोत्तमइति ॥ ननुतमोयोग्यानामपिसत्संगत्यापरमात्मभक्तेर्जाय
मानत्वेनतेषामपिमोक्षःस्यादितिचेन्न ॥ स्वरूपभूतभक्त्याद्यैर्जातस्यैवभक्त्यादेर्मोक्षहेतुत्वांगीकारात् ॥ तदुक्तंबृहद्भाष्ये ॥ भ
क्तिज्ञानादयःसर्वेसर्वेषामप्यनादयः ॥ अनादिकालादारभ्यवृद्धानामुत्तरोत्तरं ॥ तत्तद्योग्यतयापूर्तौविष्णोर्दृष्टिःप्रजायते ॥
एवंनरादिब्रह्मांतजीवानांसाधनैरपि ॥ अनादिसिद्धैर्भक्त्याद्यैःपूर्तिर्योग्यतयाभवेदिति ॥ निर्णयेपि ॥ भक्त्यैवतुष्टिमभ्येति
विष्णुर्नान्येनकेनचित् ॥ सएवमुक्तिदाताचभक्तिस्तत्रैवकारणं ॥ ब्रह्मादीनांचमुक्तानांतारतम्येचकारणं ॥ तारतम्यस्थिता
नादिर्नित्याभक्तिर्नचेतरत् ॥ अनादिभक्तिर्देवानांक्रमाद्वृद्धिंगतैवसा ॥ अपरोक्षदृशेर्हेतुर्मुक्तिहेतुश्चसापुनरिति ॥ भाष्येपिय
द्गुरुःसुप्रसन्नःसन्दद्यात्तन्नान्यथाभवेत् ॥ तथाप्यनादिसंसिद्धभक्त्यादिगुणपूगतः ॥ लभेद्गुरुप्रसादंचतस्मादेवचतद्भवेदिति ॥
साधनांतराण्याह ॥ **स्वाधमेष्वित्यादिना** ॥ तमोयोग्यानांसर्वजीवावरत्वात्तत्रनदयाकार्येत्याह ॥ सत्स्विति ॥ तदुक्तमुपा
सनापादीयानुव्याख्याने ॥ अतोविष्णौपराभक्तिस्तद्भक्तेषुरमादिषु ॥ तारतम्येनकर्तव्यापुरुषार्थमभीप्सता ॥ स्वादरःसर्वजं
तूनांसंसिद्धोहिस्वभावतः ॥ ततोधिकःस्वोत्तमेषुतदाधिक्यानुसारतः ॥ कर्तव्योवासुदेवांतंसर्वथाशुभमिच्छता ॥ नकदाचि
त्त्यजेत्तंचक्रमेणैनंविवर्धयेत् ॥ समेषुस्वात्मवत्स्नेहःसत्स्वन्यत्रततोदया ॥ कार्यैवमापरोक्ष्येणदृश्यतेक्षिप्रमीश्वरइति ॥ साधनां
तरमाह ॥ **निवृत्तकर्मेति** ॥ निष्कामंज्ञानपूर्वंतुनिवृत्तमिहचोच्यते ॥ निवृत्तंसेवमानस्तुब्रह्माभ्येतिसनातनमितिगीताभाष्यो
क्तेः ॥ सूत्रेभाष्येपि ॥ ॐअग्निहोत्रादितुतत्कार्यैवतद्दर्शनात्ॐ ॥ अग्निहोत्राद्यपिमोक्षानुभवायैवेति ॥ अग्नौक्रियावतांवि

ष्णुर्योगिनांहृदयेहरिरितिच ॥ ऐतरेयभाष्येपि ॥ अग्नौकर्माणिकृत्वैवमानुषामुक्तिभागिनः ॥ कर्मभिःशुद्धसत्त्वानांकर्मत्या
गोपिनान्यथेति ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइतीशावास्योपनिषदि ॥ यज्ञदानतपःकर्मनत्याज्यंकार्यमेवतदित्या
दिबहुशोगीतायां ॥ नचाग्निमुग्धोहवैधूमतांतःस्वंलोकंनप्रतिजानातीतिगीताभाष्येयज्ञादिकर्मणोनिंदितत्वात्कथंकर्मणोमोक्ष
साधनत्वमितिवाच्यं ॥ तस्यनिषेधस्यकाम्यकर्मविषयत्वात् ॥ अन्यथापूर्वोदाहृतबहुप्रमाणविरोधप्रसंगात् ॥ नचसंन्यासिनां
यज्ञदानादेरभावात्तेषांकथंज्ञानादीतिवाच्यं ॥ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्चयतयःशंसितव्रता
इतिगीतायांयतीनामपिस्वाध्यायज्ञानयज्ञाद्युक्तेः ॥ तथास्वभोक्तव्यान्नदानंविद्यादानमभयदानंचतेषामस्त्येव ॥ तदुक्तंगीता
तात्पर्ये ॥ वाचिकोमानसोयज्ञोन्यासिनांतुविशेषतः ॥ वनस्थस्याक्रतुर्यज्ञःक्रत्वादिर्गृहिणोखिलः ॥ शिश्रूषाद्यात्मकोयज्ञो
विहितोब्रह्मचारिणः ॥ विद्याभयादिदानंचसर्वेषामपिसंमतं ॥ गृहिणोवित्तदानंचवनस्थस्यान्नपूर्वकं ॥ सर्वैःकार्यंतपोघोरमिति
सर्वेत्रिकर्मिणइति ॥ न्यायदीपिकायांयतीनांस्वभोक्तव्यान्नदानमित्याद्युक्तेः ॥ स्वर्गापवर्गादिगमनप्रतिबंधकपरिघात्रयनिरा
साययज्ञोगृहस्थानामावश्यकः ॥ तदुक्तंछांदोग्यभाष्ये॥ त्रिलोकप्राप्तिपरिघास्त्रयःसंतिसनातनाः ॥ तेषामग्न्यादिगोविष्णुरपहं
तास्मृतोभवेत् ॥ मृतःसन्सुखभोगाययत्रगच्छतितत्रह ॥ एकैकःपरिघोग्रेस्याद्गतेतास्मिंस्तुविष्णुना ॥ यजमानःपृथिव्यादिलो
कान्भोगाययातिहीति ॥ एवंयत्यादिसाधारणोयज्ञःस्वस्वायुरेवयज्ञत्वेनभावितं ॥ तदुक्तंछांदोग्यभाष्ये ॥ विष्णुपूजार्थय
ज्ञोहमित्युपासनमादरात् ॥ कुर्वीतपुरुषोनित्यंतस्ययत्षोडशोत्तरं ॥ शतमायुस्तुसवनत्रयमीरितमुत्तमं ॥ चतुर्विंशत्तुयत्पूर्व

प्रातःसवनमेवतत् ॥ प्रार्थयित्वावसूंस्तद्वंपुमान्मृत्युमपानुदेत् ॥ मध्येचतुश्चत्वारिंशन्मध्यमंसवनंस्मृतं ॥ रुद्राणांप्रार्थनेनात्र पुमान्मृत्युमपानुदेत् ॥ ततोष्टचत्वारिंशत्तुतृतीयंसवनंस्मृतं ॥ आदित्यानांप्रार्थनेनतद्वंमृत्युमपानुदेदिति ॥ सर्वाण्यपिकर्मा णिपापनिरासद्वाराज्ञानसाधनानि ॥ नतुसाक्षान्मोक्षसाधनानि ॥ तदुक्तंगीताभाष्ये ॥ यत्रचतीर्थाद्येवमुक्तिसाधनत्वेनोच्य ते॥ब्रह्मज्ञानेनवामुक्तिःप्रयागमरणेनवा ॥ अथवास्नानमात्रेणगोमत्यांकृष्णसन्निधावित्यादौ तत्रपापान्मुक्तिःस्तुतिपरतावा ॥ यानितीर्थादिवाक्यानिकर्मादिविषयाणिच ॥ स्तावकान्येवतानिस्युरज्ञानांमोहकानिवा ॥ भवेन्मोक्षस्तुमद्दृष्टेर्नान्यतस्तुकथं चन ॥ अतोपरोक्षज्ञानादेवमोक्षः ॥ कर्मतुतत्साधनमेवेति ॥ साधनांतरमाह ॥ निषिद्धेति ॥ तदुक्तंछांदोग्यभाष्ये ॥ नि षिद्धकर्मणांत्यागःस्वधर्मस्यकृतिस्तथा ॥ सर्वदैवाप्रमत्तश्चपश्येदेवहरिंपरमिति ॥ चतुर्थतात्पर्येपि ॥ यथावत्कर्मकर्तुस्तुज्ञानसा हाय्यकारणं ॥ अन्यथाकर्मकर्तुस्तुनिरयायभविष्यतीति ॥ ऐतरेयभाष्येपि ॥ निषिद्धकर्मकरणंविहितस्यचवर्जनं ॥ त्यागस्तृ तीयोहिहरेश्चतुर्थोयोग्यपूरुषे॥ उपदेश इत्याद्युक्त्वा तृतीयान्निरयप्राप्तिश्चतुर्थान्नदिवंव्रजेदित्याद्युक्तं ॥ गीतातात्पर्येपि ॥ भ क्त्याज्ञानान्निषिद्धानांत्यागान्नित्यंहरिस्मृतेः॥ अपरोक्षदर्शनंविष्णोर्जायतेनान्यथाक्वचिदिति ॥ ऋग्भाष्येपि ॥ निषिद्धकर्मसं त्यागोविहितस्यसदाक्रियेति॥ एकादशतात्पर्येपि ॥ निषिद्धकर्मजन्यपापानितत्फलानिचोक्तानितत्परित्यागाय ॥ क्षुद्रपापानि पापानिचोपपातकपातके ॥ महापातकनामानिसुमहापातकान्यपि॥ तथास्वतिमहांतीतिपातकानिविदोविदुः॥ पिपीलिकाव धादीनिक्षुद्रपापोदितानिच॥ पापमस्थिमतांहत्याफलचौर्यादिरेववा॥ परदारादिकंचापिह्युपपातकसंज्ञितं॥ पातकंशूद्रहत्यादि

ब्रह्महत्यादिकंमहत् ॥ देवस्वहरणादीनिसुमहांतिविदोविदुः ॥ देवावज्ञासतांचैवततोपिसुमहत्तरा ॥ महन्महत्तरातस्याअवज्ञाके शवेतुया ॥ केशवस्यसमोस्तीतिकेशवोस्म्यहमित्यपि ॥ ब्रह्माद्याःकेशवात्मानःश्रीर्वानिर्गुणवत्यपि ॥ मुक्तस्यतद्भावमतिररूपत्व मतिस्तथा ॥ त्रिगुणात्मकदेहोस्याप्यस्तीत्यपितुयामतिः ॥ जन्ममृत्यादिबुद्धिर्वादुःखाज्ञानादिबोधनं ॥ तस्यापिपरतंत्रत्ववि ज्ञानंचतदुत्तमः ॥ अस्तीतियामतिस्तस्यावशादन्यस्यकस्यचित् ॥ अस्तीतिभावनेत्याद्याअवज्ञासंप्रकीर्तिता ॥ तथा ॥ परदार दृशिःप्रोक्ताक्षुद्रपातकसंज्ञिता ॥ उपपातकंतद्गतिश्चवर्णबाह्येषुपातकं ॥ महापातकसंज्ञंतुपित्रादेर्दारधर्षणं ॥ दारदृष्टिःस्वोत्त मानांमानुषाणांस्वभावतः ॥ सुमहापातकंचोक्तंतद्गतिःसुमहत्ततः ॥ ऋषिदारेषुमनसागतिरेवततोधिका ॥ देवदाराभिका मानांसंगिसंगस्ततोधिकः ॥ किमुविष्णोस्ततोयोषित्संगस्यव्यत्ययस्थितेः ॥ नसमंपातकंक्वापिनहिस्वस्त्र्यभिकामतः ॥ अव ज्ञातामाधवादेस्तस्मात्तंदूरतस्त्यजेत् ॥ मानुषेषुतुदुःखित्वंक्षुद्रपापफलंस्मृतं ॥ पापात्तुवर्णबाह्यत्वंतिर्यग्योनिगतिस्तथा ॥ सह स्रवर्षनरकंक्षुद्रपातकजंफलं ॥ उपपातकतश्चापिनरकंयुगमात्रकं ॥ चतुर्युगावस्थानंतुपातकस्यफलंस्मृतं ॥ महापातकजन्यं चकल्पावधिसमीरितं ॥ सुमहापातकाच्चापियावद्ब्रह्मलयोभवेत् ॥ तत्पराणांपातकानांफलमंधंतमःस्मृतं ॥ अधोधोदुःखब हुलंविष्णुदाराभिमर्शनात् ॥ वधादपिचदारस्यधर्षणंकोपकारणं ॥ तस्माद्देव्यःसदावंद्याअग्निवन्नाभिकामतइति ॥ इतिनि षिद्धकर्मसंत्यागप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ साधनांतरमाह ॥ **सर्वसमर्पणमिति** ॥ हरावितिशेषः ॥ नाहंकर्ताहरिःकर्तातत्पू जाकर्मचाखिलं ॥ तथापिमत्कृतापूजातत्प्रसादेननान्यथा ॥ तद्भक्तिस्तत्फलंमह्यंतत्प्रसादःपुनःपुनः ॥ कर्मन्यासोहरावेवंविष्णो

स्तुष्टिकरःसदा ॥ स्वातंत्र्यंममनक्वचित् ॥ इतिमत्वानसक्तःस्यात्प्रीतोस्यभवतिप्रभुरितिगीतातात्पर्योक्तेः ॥ दारान्सुतान्प्रिया न्प्राणान्परस्मैसंनिवेदयेत् ॥ कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावः ॥ करोतियद्यत्सकलंपरस्मैनारायणायेति समर्पयेत्तदितिसदाचारस्मृत्युक्तेः ॥ मयिसर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसेतिगीतोक्तेः ॥ बृहद्भाष्येपि ॥ व्याधीन्शवह तिंचैवशवदाहादिकंतथा ॥ विष्णवेतपइत्येवचिंतयन्यातितत्पदं ॥ अक्लेशतोपिक्लेशादीनतीतैष्यानपीहयः ॥ विष्णवेतपइत्ये वप्रार्थयेत्सपरंव्रजेदिति ॥ सप्तमतात्पर्येपि ॥ मयिस्थश्चोदयत्येकोविष्णुर्मासर्वदैवतु ॥ इतिसप्रीतकंज्ञानंविद्यादात्मसमर्पण मिति ॥ साधनांतरमाह ॥ **तारतम्यपरिज्ञानमिति** ॥ तदुक्तंनिर्णये ॥ तारतम्यंततोज्ञेयंसर्वोच्चत्वंहरेस्तथा ॥ एतद्विनानक स्यापिविमुक्तिःस्यात्कथंचनेति ॥ ईशावास्यभाष्येपि ॥ मानुषादिविरिंचांतंतारतम्यंविमुक्तिगं ॥ ततोविष्णोःपरोत्कर्षसम्य ग्ज्ञात्वाविमुच्यतइति ॥ छांदोग्यभाष्येपि ॥ तारतम्यापरिज्ञानादनुत्थानंतमोव्रजेदित्यादिसर्वत्र ॥ साधनांतरमाह ॥ **पंच भेदज्ञानमिति** ॥ तदुक्तंनिर्णये ॥ पंचभेदांश्चविज्ञायविष्णोःस्वाभेदमेवच ॥ निर्दोषत्वंगुणोद्रेकंज्ञात्वामुक्तिर्नचान्यथेति ॥ छांदोग्यभाष्येपि ॥ प्रकृष्टमोक्षहेतुत्वात्तज्ज्ञानंप्रेतिकथ्यते ॥ प्रकृष्टपंचकत्वाद्वाप्रपंचोयंप्रकीर्तितइति भेदपंचकस्यप्रपंचत्वमु क्तं ॥ तत्वनिर्णयतट्टीकयोरपि प्रकृष्टःपंचविधोभेदःप्रपंचः ॥ प्रकृष्टत्वंमोक्षहेतुज्ञानविषयत्वमित्यादि ॥ एवमेवप्रकृत्यधिकरण सुधानुव्याख्यानयोरप्युक्तंद्रष्टव्यं ॥ तारतम्यंपंचभेदाश्चोत्तरत्रवक्ष्यंते ॥ तत्रैवस्फुटतरमुपपादयिष्यामः ॥ साधनांतरमाह ॥ **प्रकृतिपुरुषेति** ॥ तदुक्तंतृतीयतात्पर्ये ॥ नारायणोब्रह्मवायूवींद्रशेषौहरस्तथा ॥ कामःशक्रगुरुदक्षमन्वाद्याभास्करादयः ॥

सर्वजीवाश्चक्रमशःपुरुषाख्याभिशब्दिताः ॥ एतत्पत्न्योबंधशक्तिःस्त्रियःसर्वास्तथाजडं ॥ क्रमात्प्रकृतिशब्दोक्तास्तज्ज्ञानाद्वि
प्रमुच्यतइति ॥ साधनांतरमाह ॥ अयोग्यनिंदेति ॥ अयोग्यनिंदासमुच्चितसम्यज्ज्ञानस्यैवमोक्षहेतुत्वादितिभावः ॥ तदु
क्तमीशावास्यभाष्ये ॥ अन्यथोपासकायेतुतमोंधंयांत्यसंशयं ॥ ततोधिकमिवव्यक्तंयांतितेषामनिंदकाइति ॥ बृहद्भाष्येपि ॥
अन्यथोपासकायेस्यतेपियांत्यधरंतमः ॥ ततःकिंचिद्विशेषेणदुर्ज्ञानस्याविनिंदकाः ॥ सम्यगाचार्यवचनमविज्ञायविरोधिनि ॥
सत्त्वबुद्धिंयतःकुर्युरतस्तेधिकपापिनः ॥ अप्राप्तत्यागिनःप्राप्तनिष्ठाहीनोतिदोषवानिति ॥ नन्वत्रमिथ्याज्ञानानिंदकाःके ॥
मुक्तियोग्यावातमोयोग्यावा ॥ नाद्यः ॥ मुक्तियोग्यानांमुक्तेर्नियतत्वेनमिथ्याज्ञानानिंदनमात्रेणतमःप्राप्तेरयोगात् ॥ अन्य
थामुक्तियोग्यत्वभंगप्रसंगात् ॥ नद्वितीयः ॥ तमोयोग्यानांसम्यज्ज्ञानप्रसक्तेरभावात् ॥ यद्यस्तितर्हितमोयोग्यत्वानुपपत्तिः ॥
यदिनास्तितर्हितस्यमिथ्याज्ञानित्वेनांधतमसस्यसिद्धत्वेनकेवलसम्यज्ज्ञान्यपेक्षयाधिक्यकथनानुपपत्तेरितिचेत् ॥ उच्यते ॥
अन्यथाज्ञानानिंदकास्तमोयोग्याएव ॥ नचतेषांसम्यज्ज्ञानप्रसक्तिरेवनास्तीतिवाच्यं ॥ सज्जनसंगत्यादिनेषज्ज्ञानभक्त्योःसंभ
वात् ॥ तदुक्तंनिर्णये ॥ अन्येपिभूमावसुराःप्रजातास्त्वयाहतायेसुरदैत्यसंगरे ॥ व्यासावतारेनिहतस्त्वयायःकलिःसुशास्त्रोक्ति
भिरेवचाद्य ॥ श्रुत्वात्वदुक्तीःपुरुषेषुतिष्ठन्नीषच्चकारेवमनस्त्वयीश ॥ येकेशवत्वद्बहुमानयुक्तास्तथैववायौनहितेतमोंधं ॥ यो
ग्याःप्रवेष्टुंतदतोहिमार्गाच्चाल्यास्त्वयाजनयित्वैवभूमाविति ॥ तथाबुद्धावतारकालेपिनिर्णयएवोक्तंदैत्यानांसम्यज्ज्ञानं ॥
व्यासेप्रयातेपिसुतत्वविद्यातत्संप्रदायादपितैरवाप्ता ॥ उत्सादितत्वात्तुदुरागमानांतत्संप्रदायस्यचनाशितत्वात् ॥ प्रसारित

त्वाच्चसदागमानांपापाअपिज्ञानमवापुरेतत् ॥ शुनापुरोडाशमिवावलीढंवेदश्रुतिंचांत्यजनैरवाप्तामिति ॥ तथाचतमोयोग्या
नांसम्यग्ज्ञानसद्भावेपिमिथ्याज्ञाननिंदायाअभावात्तेचाधिकपापिनः ॥ नचसम्यग्ज्ञानसद्भावात्कथंतेषांतमइतिवाच्यं ॥ अ
नादिसिद्धभक्तिज्ञानसहकृतस्यसम्यग्ज्ञानस्यमोक्षसाधनत्वमित्युक्तत्वात् ॥ अतोनकोपिदोषः ॥ साधनांतरमाह ॥ उपा
सनाचेति ॥ श्रोतव्योमंतव्योनिदिध्यासितव्यइत्यादिश्रुतेः ॥ भाष्येपि ॥ उपासनात्वापरोक्ष्यंगमयेत्तत्प्रसादतइति ॥ उपास
नाप्रकारश्चोत्तरत्रनिरूप्यते ॥ गुरुप्रसादादिकंमोक्षसाधनमित्युक्तं ॥ तत्रकेतेगुरवइत्याकांक्षायांविभज्यविशेषंदर्शयति ॥
गुरवोपिद्विविधाइति ॥ ४८६ ॥ नियतगुरुस्वरूपमाह ॥ शिष्यस्वरूपमिति ॥ ४८७ ॥ तदुक्तंभाष्ये ॥ दृष्टैवह्यव
ताराणांमुच्यंतेकेचिदंजसा ॥ दर्शनेनांतरेणान्येदेवाःसर्वत्रदर्शनात् ॥ तेषांविशेषमाचार्योवेत्तिसर्वज्ञतांगतइति ॥ बृहद्भा
ष्येपि ॥ अपरोक्षदृशिश्चापिमहाचार्योक्तदर्शनं ॥ सोपियन्मोक्षनियतमनसासमुदीरयेत् ॥ तस्यदर्शनतोयातिमुक्तिंनास्त्यत्र
संशयइति ॥ उपासनापादीयानुव्याख्यानेपि ॥ मतिश्रुतिध्यानकालविशेषंगुरुरुत्तमः ॥ वेत्तितस्योक्तिमार्गेणकुर्वतःस्याद्धिद
र्शनमिति ॥ ययायस्यविमुक्तिःस्यात्तद्दातामुख्यतोगुरुः ॥ एकदेशगुरुत्वंस्यादन्यविद्याप्रदस्यत्वितिबृहद्भाष्ये ॥ एकादशता
त्पर्येपि ॥ ध्रुवंतयैवमुच्यंतेयांमूर्तिंप्रदिशेद्गुरुः ॥ शिष्याणांयोग्यताभिज्ञोविघ्नहानिस्तुतद्युगे ॥ नृसिंहमूर्त्याचतथायांयोग्यां

४८६ गुरवोपिद्विविधाः ॥ नियतगुरवोऽनियतगुरवश्चेति ॥ ४८७ शिष्यस्वरूपंसम्यग्ज्ञात्वातद्योग्यविशिष्टभगवद्रूपविशेषविषयकविद्योपदे
शकर्तारोनियतगुरवः ॥

प्रदिशेद्गुरुरिति ॥ मनुष्योत्तममारभ्यनियतगुरूनाह ॥ **मनुष्योत्तमस्येति** ॥ ४८८ ॥ शिष्यस्वरूपमुत्तमएवगुरुर्वेत्तीतिभा
ष्योक्तेर्मनुष्योत्तमानामृषयएववोत्तमाः ॥ तएवशिष्ययोग्यतांज्ञात्वोपास्यगुणानुपदिशंति ॥ नचमनुष्येष्वेवोत्तमाअधमानांमनु
ष्याणांनियतगुरवइतिवाच्यं ॥ तेषांचतुर्गुणोपासकत्वसाम्येनपरस्परनियतगुरुत्वासंभवात् ॥ वर्णाश्रमादिभेदेनोत्तमत्वस्याप्र
योजकत्वात् ॥ नचचक्रवर्तिनांमनुष्योत्तमत्वात्तएवतेषांनियतगुरवइतिवाच्यं ॥ तेषामध्यापनस्यनिषिद्धत्वेनगुरुत्वासंभवात् ॥
नचच्छांदोग्योपनिषदिपंचाग्निविद्यायाउद्दालकादिऋषिभिःपौत्रायणराजात्प्राप्तेस्तथावैश्वानरविद्यायाअश्वपतिनाम्नोराज्ञःस
काशात्प्राप्तेश्चोक्तत्वात्कथंराजानोनगुरवइतिवाच्यं ॥ उद्दालकादिऋषीणांस्वगुरूपदेशेनजातापरोक्षाणामेवानंदातिशयार्थमु
पदिष्टविद्याविषयत्वात् ॥ अतएवच्छांदोग्यभाष्ये ॥ उत्तमाचार्यसंप्राप्त्यैनावराचार्यतःक्वचित् ॥ इच्छेदनुज्ञामित्युक्त्वा उत्त
माचार्यामनुष्योत्तमादीनामुक्ताः ॥ ऋषिभ्यस्तूत्तमादेवादेवेभ्योवायुरुत्तमः ॥ वायोश्चभगवान्विष्णुर्नतस्मादुत्तमोगुरुरिति ॥
चक्रवर्तिनामृषीणांचनियतगुरूनाह ॥ **ऋषीणांचेति** ॥ ४८९ ॥ छांदोग्येबृहदारण्यकवंशब्राह्मणेचोत्तमऋषीणामधमगुरु
त्वोक्तेः ॥ सत्यकामोपकोसलादीनांगौतमसत्यकामाद्युपदेशेनापरोक्षज्ञानोक्तेश्च ॥ चक्रवर्तिनोपिऋष्युपदेशाउपनिषदादौ
श्रूयंते ॥ नारदभृगुवसिष्ठादीनांचदेवाएवनियतगुरवइत्यर्थः ॥ तदुक्तंचतुर्थतात्पर्ये ॥ सनकाद्यारुद्रशिष्यास्तेषामन्येतुयोगि ॥१२७॥
नः ॥ ब्रह्मशिष्यस्तथारुद्रोब्रह्मानारायणस्यचेति ॥ देवानांस्वोत्तमादेवागुरवइत्युक्तं ॥ तदेवविशेषेणाह ॥ तत्रापीति

४८८ मनुष्योत्तमस्यऋषयः ॥ ४८९ ऋषीणांचक्रवर्तिनांचऋषयोदेवाश्च ॥ देवानांचस्वोत्तमादेवाः ॥

॥ ४९० ॥ सूर्यचंद्रपदयोग्यावित्यारभ्यसार्धपरार्धकालपर्यंतंनियतगुरवःश्रवणकालाश्चोच्यंते ॥ तत्रप्रमाणंतुकर्मक्षयपादीयानु
व्याख्याने ॥ लिंगाल्लातव्यतःपूर्वमृजोर्ब्रह्मत्वतःशतात् ॥ शुश्रावोग्रतपानामयोग्योरुद्रपदस्ययः ॥ सार्धपरार्धेविष्णोस्तुगुणा
न्भक्त्यासदोद्यतः ॥ तत्रिभागमुपासांचचक्रेसंभृतमानसः ॥ दशमन्वंतरंशक्रपदयोग्योगरुत्मतः ॥ पदयोग्यात्सुमनसःसुमं
तोनामचाश्रृणोत् ॥ उपासांचक्रउद्युक्तोमन्वंतरचतुष्टयं ॥ सूर्याचंद्रमसोश्चैवपदयोग्यौसुतेजसौ ॥ सुरूपःशांतरूपश्चमन्वंत
रचतुष्टयं ॥ अश्रृण्वतांसुमनसोमन्वंतरमुपासतां ॥ ततःप्रोक्तास्तुतेसर्वेभक्त्योग्रतपआदयः ॥ अपश्यन्परमंविष्णुंतत्प्रसादै
धिताःसदेति ॥ अत्रोपासनाकालोप्युक्तः ॥ तस्योपयोगस्तूत्तरत्रभविष्यति ॥ लातव्यइति ॥ आदातव्यइत्यर्थः ॥ जातापरो
क्षाणांशतसंख्याकऋजूनांमध्येएकस्यचतुर्मुखस्यमुक्तौसत्यामेकस्यचापरोक्षज्ञानेजातेतस्यशतसंख्यापूरणार्थमादातव्यत्वात् ॥
तदुक्तंसन्न्यायरत्नावल्यां ॥ लातव्योनामऋजुरेकोनशतब्रह्मस्वतीतेषुब्रह्माभविष्यति ॥ तस्मादुग्रतपानामरुद्रपदयोग्यएको
नशतब्रह्ममहाकल्पेभ्यःपूर्वमहाकल्पस्यादितआरभ्यब्रह्ममानपरिगणितपंचसप्ततिसंवत्सरकालंविष्णुगुणांच्छुश्रावेत्यादि ॥ सु

४९० तत्रापिसूर्यचंद्रपदयोग्यौदेवौसुरूपशांतरूपनामकौयौतयोःसुमनोनामकगरुडपदयोग्योदेवोनियतगुरुः ॥ तथाशक्रपदयोग्यस्यसुमंतनामक
स्यसुमनोनामकगरुडपदयोग्यएवनियतगुरुः ॥ सुमनोनामकगरुडपदयोग्यस्योग्रतपोनामकरुद्रपदयोग्यस्यचब्रह्मपदयोग्यःऋजुर्लातव्योनियतगुरुः ॥
तत्रमनुष्यादीनांबहुजन्मसुश्रवणं ॥ सूर्यचंद्रपदयोग्ययोस्तुमन्वंतरचतुष्टयंश्रवणकालः ॥ इंद्रपदयोग्यस्यदशमन्वंतरंश्रवणकालः ॥ गरुडपदयोग्ययो
स्तुसार्धपरार्धकालः ॥

धायांतुलातव्यःशिष्यैरुपासितव्यइत्युक्तं ॥ तस्याप्येवमेवतात्पर्यंबोध्यं ॥ तत्रमनुष्यादीनामिति ॥ बहूनांजन्मनामंतेज्ञानवा न्मांप्रपद्यतइतिगीतोक्तेः ॥ तदर्थस्तुगीताभाष्यएवोक्तः ॥ बहूनांजन्मनामंतेज्ञानवान्भवतीति ॥ अनियतगुरुस्वरूपमाह ॥ अनियतगुरवस्त्विति ॥ ४९१ ॥ मात्रपदेनमोक्षसाधनीभूतविद्योपदेष्टृत्वंव्यावर्तयति ॥ तर्हिताद‍ृशविद्योपदेशस्यव्यर्थ त्वान्नतेभ्यःश्रवणंस्यादित्यआह ॥ तेभ्योपीति ॥ ४९२ ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐअतिदेशाच्चॐ ॥ यथामामुपचरेर्येचा न्येस्मद्विधाःश्रेयसश्चतानुपास्स्वतानुपचरस्वतेभ्यःश्रृणुहितेत्वामवंत्विति ॥ तथाचान्यविद्यापूर्वकमेवनियतविद्यामोक्षसाधन मित्यनियतगुरुभ्योपिश्रवणमावश्यकमेवेतिभावः ॥ गुरुनियमआवश्यकइत्याह ॥ पूर्वप्राप्तेति ॥ ४९३ ॥ तदुक्तमुपासना पादीयानुव्याख्याने ॥ गुणाधिकंगुरुंप्राप्यतद्धीनंनाप्नुयात्क्वचित् ॥ विपर्ययस्तुकर्तव्यःसर्वथाशुभमिच्छतेति ॥ गुरुमंत्रपरि त्यागीरौरवंनरकंव्रजेदितिपुराणवाक्यं ॥ ननुपूर्वप्राप्तगुरोःसमग्रानुग्रहकर्तृत्वाभावेकिंकर्तव्यमित्यतःपूर्वानुज्ञयागुर्वंतरस्वीकारए वभविष्यति ॥ तत्रपूर्वगुर्वपेक्षयाज्ञानाधिकश्चेत्पूर्वानुज्ञानमृग्या ॥ समश्चेद्विकल्पः ॥ अधमश्चेत्सर्वथापूर्वानुज्ञामृग्यतइत्याह ॥ तदुत्तमेति ॥ तदुक्तमुपासनापादीयानुव्याख्याने ॥ समेविकल्पएवस्यात्पूर्वानुज्ञाचसर्वथा ॥ तदुत्तमगुरुप्राप्त्यैपूर्वानुज्ञानमृ ग्यतइति ॥ सूत्रेभाष्येच ॥ ॐपूर्वविकल्पःप्रकरणात्स्यात्क्रियामानसवत् ॐ ॥ नचपूर्वप्राप्तएवगुरुरितिनियमः ॥ समग्रानुग्रहं

४९१ अनियतगुरवस्तुभगवत्तत्वमात्रोपदेष्टारः ॥ ४९२ तेभ्योपिश्रोतव्यमेव ॥ ४९३ पूर्वप्राप्तगुरुस्सर्वथानत्याज्यः ॥ तदुत्तमप्राप्त्यैपूर्वा नुज्ञानमृग्यते ॥ समप्राप्तौविकल्पः ॥ अधमप्राप्तौपूर्वानुज्ञामृग्यतएव ॥

चेत्पश्चात्तनःकरोतिस्वयमेवतदाविकल्पःस्यात् ॥ पूर्वस्मादुत्तमोलब्धःस्वयमेवगुरुर्यदि ॥ गृह्णीयादविचारेणविकल्पःसमयोर्भवेत् ॥ समग्रानुग्रहाभावात्सत्यकामःस्वकंगुरुं ॥ ऋषभानुज्ञयाचैवप्रापतस्माद्धियुज्यते ॥ समग्रानुग्रहंकश्चित्स्वयमेवसमो यदि ॥ कुर्यात्पुनश्चगृह्णीयादविरोधेनकामतइति ॥ नचैवंपूर्वप्राप्तगुरुपरित्यागदोषःस्यादितिवाच्यं ॥ उत्तमगुरुप्राप्तिपक्षेदोषस्यैवाभावात् ॥ तदुक्तंन्यायविवरणे ॥ नचोत्तमगुरुस्वीकारार्थत्वेनप्राप्तसंत्यागनिमित्तदोषः ॥ तत्रदोषसत्त्वेमानाभावादिति ॥ टीकायामपि ॥ दोषवचनंवृथागुर्वेतरस्वीकारविषयं अधमगुरुस्वीकारविषयंचेति ॥ तंत्रसारेपि ॥ तस्मादुत्तमआचार्येलब्धे नातोऽवमंव्रजेत् ॥ एकस्यशिष्यतांप्राप्यतदाज्ञांनविनासमं ॥ अवरंवाव्रजेदुच्चगुरुश्चेन्नविदुष्यतीति ॥ केतेगुरवइत्यतआह ॥ स्वोत्तमाइति ॥ ४९४ ॥ तदुक्तंभक्तिपादीयानुव्याख्याने ॥ गुरुर्ब्रह्माखिलानांचविद्याचैवसरस्वती ॥ स्वोत्तमास्तुक्रमेणैव सर्वेषांगुरवःस्मृताइति ॥ तंत्रसारेपि ॥ ब्रह्मांतागुरवश्चैवसंप्रदायप्रवर्तकाः ॥ तत्तद्गुणानुसारेणपूज्यामान्याश्चकृत्स्नशइति ॥ ननुस्वावराणांगुरुत्वेतुनतेपूज्याः ॥ अधमत्वात् ॥ नचस्वावराणांगुरुत्वप्रसक्तिरेवनास्तीतिवाच्यं ॥ लीलयास्वीकारसंभवात् ॥ तदुक्तंबृहद्भाष्ये ॥ नीचादप्युत्तमाज्ञानंश्रृणुयुर्लीलयाक्वचित् ॥ श्रोतृवक्तृविभेदोयंनाधिक्यज्ञापकस्ततइतिचेन्न ॥ मर्यादार्थंतेषामपिपूज्यत्वात् ॥ तदुक्तंनिर्णये ॥ स्वावराणांगुरुत्वंतुभवेत्कारणतःक्वचित् ॥ मर्यादार्थंतेपिपूज्यानतुयद्वत्परोगुरुरिति ॥ ननुस्वोत्तमानांसर्वेषांनगुरुत्वंस्वोपदेष्टृत्वाभावादित्यतआह ॥ **मोक्षार्थमिति** ॥ ४९५ ॥ तदुक्तंनिर्णये ॥ विष्णुर्हि

---

४९४ स्वोत्तमास्सर्वेपिगुरवोब्रह्मपर्यंतं ॥ तेषुतत्तन्माहात्म्यानुसारेणभक्तिःर्कतव्या ॥ ४९५ मोक्षार्थमनुज्ञाप्रदातृत्वात् ॥ ज्ञानप्रयोजकत्वात् ॥

दातामोक्षस्यवायुश्चतदनुज्ञया ॥ मोक्षोज्ञानंचक्रमशोमुक्तिगोभोगएवच ॥ उत्तरेषांप्रसादेननीचानांनान्यथाभवेदिति ॥ ऋग्भाष्येपि ॥ तस्माद्वंद्याश्चपूज्याश्चब्रह्माद्याज्ञानयोजकाः ॥ गुरुत्वेनक्रमादेवविशेषेणैवकेशवः॥ आरभ्यस्वगुरुंयावद्विष्णुरेवोत्तरोत्तराइति ॥ बृहद्भाष्येपि॥ वायुमेवाद्रवत्येषजीवोमोक्षायतत्ववित् ॥ तदनुज्ञयैवज्ञानित्वमतस्तंपुनराव्रजेत् ॥ सर्वेपिवायुमासाद्यजायस्वज्ञानमाप्नुहि ॥ इतितस्यवरादेवजायंतेज्ञानिनोखिलाः ॥ पुनस्तंप्राप्यमुक्तिंचप्राप्नुयुस्तदनुज्ञयेति ॥ आथर्वणभाष्येपि॥ नान्यैर्देवैर्हरिंपश्येज्ज्ञानरूपेणवायुना ॥ ब्रह्मणापरमज्ञानरूपेणहरिणातथा ॥ प्रसन्नेनैवतंपश्येदन्येनुज्ञाप्रदायिनः ॥ प्राणद्वारेणयज्ज्ञानदीपनंज्ञानिनःसदेति ॥ तथाविद्याप्रवर्तकाश्चस्वोत्तमाःसर्वेपिपूज्याः ॥ तदुक्तमृग्भाष्ये ॥ हयग्रीवादिमाविद्याःश्वसितत्वेननिःसृताः ॥ ब्रह्मणास्वीकृतास्ताश्चरुद्रशेषविपाअपि ॥ दक्षाद्याःसनकाद्याश्चशक्राद्यामनवस्तथा ॥ जगृहुस्तेचविश्वस्मिंश्चक्रुर्व्याप्तास्ततोखिलाइति ॥ दशमतात्पर्येपि ॥ अतोब्रह्मपदेयोग्याजीवाहंसाःप्रकीर्तिताः ॥ तेषांपरंपराप्राप्तंयैर्ज्ञानंनियमेनतु ॥ तेमुच्यंतेनचैवान्येगुरुर्ब्रह्मायतोनृणामिति ॥ ब्रह्मांतागुरवश्चैवसंप्रदायप्रवर्तकाइतितंत्रसारे ॥ दशमतात्पर्येपि ॥ उत्तमाअपिदेवेशाअवरान्विदुषोनृणां ॥ पूजायैसंप्रयच्छंतिपरोक्षत्वप्रियायतः ॥ तेषुस्थित्वास्वयंपूजांगृह्णंत्यनुपमांसदा ॥ ज्ञानानिचप्रयच्छंतितस्मादेवंविदासदा ॥ पूजिताःस्युःसुरवराःसब्रह्माणःसकेशवाइति ॥ स्वोत्तमानांपूज्यत्वेयुक्त्यंतरमाह ॥ **शिष्यानुष्ठितेति** ॥ ४९६ ॥ तदेवोपपादयति ॥ तत्रगुरोरित्यादिना ॥ तदुक्तंज्ञानपादीयानुव्याख्याने ॥ ज्ञानदाअपि

४९६ शिष्यानुष्ठितश्रवणादिफलभोक्तृत्वाच्च ॥ तत्रगुरोःशिष्यापेक्षयाष्टभागाधिकफलंभविष्यति ॥ तस्मादपितद्गुरोर्द्विगुणंफलं ॥ तस्मात्सार्धफलमपरेषां ॥ तेभ्यःसहस्रगुणितंफलंदेवानां ॥ तेभ्यश्चतुर्मुखस्यमहौघगुणितंफलं ॥

चाचार्याविशेषात्फलमाप्नुयुः ॥ मुक्तावष्टगुणंशिष्याद्गुरुराप्नोतिशोभनं ॥ तद्गुरुर्द्विगुणंतस्मात्सार्धंतावत्ततोपरे ॥ देवाःसहस्रगुणितंक्रमाद्यस्माद्यथोत्तरं ॥ ब्रह्मामहौघगुणितमेवंफलविनिर्णयइति ॥ अतोयथाक्रमंधर्मज्ञानयोःफलमंजसा ॥ सर्वप्राणिगतंदेवाःप्राप्नुवंत्याविरिंचतः ॥ देवाएवहिदेवानांविशिष्टाविनियामकाः ॥ ब्रह्मात्वखिलदेवानांनराणांचनियामकः ॥ अतःसर्वगुणानेषप्राप्नोत्यधिकमन्यतइतिच ॥ भाष्येपि ॥ ज्ञानादिदानंदेवानांविष्णुनासाधुचोदितं ॥ वेदेचतेषांविहितंतत्राचार्योमहत्तरः ॥ विहितःसहकारित्वेसहकार्यतरंप्रजाः ॥ पातृत्वेनयथाराज्ञोयथाशिष्यागुरोरपि ॥ तस्माच्छ्रुतंफलंतासामाचार्याणांमहत्तरं ॥ ततोमहत्तरंप्रोक्तंदेवानामुत्तरोत्तरमिति ॥ ननुसर्वथागुरुःपूज्यइत्युक्तं ॥ तर्हिगुरोःस्वोत्तमापराधेउन्मादेचसति किंकर्तव्यमितिचेदुच्यते ॥ यथाशक्तिबोधनीयएव ॥ अन्यथापरित्याज्यः ॥ महात्मातुनत्याज्यः ॥ तदुक्तंगीतातात्पर्ये ॥ उन्मादेबंधनाद्यैर्वाताडनंचगुरोःक्वचित् ॥ पापंचरंतस्त्वन्येपिसर्वैर्दृष्टिपथंगताः ॥ शक्तितोवारणीयाःस्युर्देशकालानुसारतः ॥ तदुत्तमविरोद्धारःसंत्याज्यागुरवोपितु ॥ यथाशक्त्यानुशास्यैवकालतोपिनचेच्छुभाः ॥ विष्णौपरमभक्तस्तुनत्याज्यःशास्यएवच ॥ शिक्षयन्स्वगुरुंच्छिष्योगुरुवन्नैवशिक्षयेत् ॥ महांतोनानुशास्याश्चविरुद्धाचरिताअपीति ॥ ब्रह्मांतागुरवइत्युक्तं ॥ तेचसर्वेनसाम्येनगुरवःकिंतुतारतम्येनेत्याह ॥ **द्वात्रिंशदिति** ॥ ४९७ ॥ द्वात्रिंशल्लक्षणानितुपंचमतात्पर्यप्रकाशिकायांलक्षणग्रंथोक्तान्युदाहृतानि ॥ पंचदीर्घःपंचसूक्ष्मःसप्तरक्तःषडुन्नतः ॥ त्रिपृथुर्लघुगंभीरोद्वात्रिंशल्लक्षणास्त्वितीति ॥ अस्यार्थः ॥

४९७ तत्रद्वात्रिंशल्लक्षणवत्त्वाद्ब्रह्मोत्तमोत्तमगुरुः ॥ रुद्रादयस्तुक्रमाल्लक्षणहीनाअमुख्यागुरवः ॥

भुजनेत्रहनूकर्णनासास्थानेषुपंचदैर्घ्याणि ॥ तथात्वक्केशनखांगुलीपर्वसुपंचसौक्ष्म्याणि ॥ तथापादतलद्वयेनेत्रांतेतालुस्थानेजि
ह्वायामधरोष्ठेनखेषुचेतिसप्तस्थानेषुरक्तानि ॥ तथावक्षःकुक्ष्यलिकास्कंधकरचरणेषुषट्सुस्थानेषुऔन्नत्यानिषट् ॥ तथाललाटक
टिवक्षस्सुत्रिषुस्थानेषुत्रीणिपृथुत्वानि ॥ तथाजंघायांग्रीवायांमेढ्रेचत्रीणिह्रस्वानि ॥ तथानाभ्यादिषुत्रिषुस्थानेषुत्रीणिगंभीर
त्वानीतिद्वात्रिंशल्लक्षणानीति ॥ एतैर्लक्षणैःपूर्णत्वंक्रमेणह्रासश्चोक्तोबृहद्भाष्ये ॥ द्वात्रिंशल्लक्षणैःसम्यग्युक्तावायुत्वयोग्यकाः ॥
नियमेनैवविष्णोस्तुप्रादुर्भावोविशेषतः ॥ सहस्रारेणचक्रेणचिह्नितादक्षिणेकरे ॥ गदयाष्टाश्रयाचैवशतावर्तेनकंबुना ॥ वामे
करेतथाब्जेनसहस्रदलशोभिना ॥ अष्टाविंशल्लक्षणाश्चगिरीशपदयोगिनः ॥ चतुर्विंशतिमारभ्यषोडशादासुराःस्मृताः ॥ आष्ट
काद्दषयःप्रोक्तास्तदूनाश्चक्रवर्तिनइति ॥ लक्षणांतराण्यप्युक्तानिबृहद्भाष्ये ॥ दशतालोदशमुखोललाटत्रिंशकस्तथा ॥ सार्धो
न्नतश्चैवपुनःपर्यकृदशशिरास्तथा ॥ पंचोराःसप्तपादोयोनाशंक्यंतद्वचःक्वचित् ॥ नवांगुलमुखोयस्तुगलेचचतुरंगुलः ॥ चतु
र्विंशांगुलतनुस्तद्वाक्यंदेवपूजितं ॥ प्राधान्यलक्षणोपेतोदुर्लक्षणयुतोपिसन् ॥ तस्यापिवाक्यंमानंस्यात्किमुसर्वयुतस्यतु ॥ प्रा
योदेवाश्चऋषयोनसर्वशुभलक्षणाः ॥ ऋतेविष्णुंसुरश्रेष्ठंब्रह्माणंवाप्यनंतरं ॥ तस्मान्नविदुषांवाक्यंनाशंक्यंकेनचित्क्वचित् ॥ ष
ण्णवत्यंगुलोयस्तुन्यग्रोधपरिमंडलः ॥ दशतालश्चतुर्हस्तःसदेवैरपिपूज्यतइति ॥ गीतातात्पर्येपि ॥ यश्चस्वमुखमानेननवाधो
देहवान्पुमान् ॥ अष्टमानवतीस्त्रीचषण्णवत्यंगुलौपुनः ॥ दशतालौसप्तपादौविद्यात्तौचसुरोत्तमौ ॥ यावत्पंचांगुलोनंतद्देव
मानंक्रमावरं ॥ पादेत्र्यंगुलमात्रोमंतदूनंचतुरंगुलं ॥ यावद्देवोपदेवानांपादेचोनांगुलंपुनः ॥ तावन्मनुष्यमानंस्यात्ततोधस्त्वा

सुरंस्मृतं ॥ द्विचत्वार्यधिकंतस्मात्षण्णवत्यंगुलादधः ॥ ज्ञेयमंगुलमानंतदुपदेवादिषुस्फुटं ॥ देवेष्ववरवज्ज्ञेयमृषीणांचक्रव
र्तिनां ॥ यावद्यावल्लियोविष्णोस्तावत्स्त्रीपुंस्वरूपिणइति ॥ पंचमतात्पर्येपि ॥ द्वात्रिंशल्लक्षणैर्युक्तस्तीक्ष्णदंष्ट्रस्तुसौम्यरुक् ॥ घोर
रुक्केतिपुरुषःससर्वज्ञउदाहृतः ॥ षण्णवत्यंगुलोयस्तुन्यग्रोधपरिमंडलः ॥ सप्तपादश्चतुर्हस्तस्सदेवैरभिपूज्यते ॥ न्यग्रोधमंडलो
व्यामोबाहुन्यग्रोधउच्यतइति ॥ निर्णयेपि ॥ षण्णवत्यंगुलोयस्तुन्यग्रोधपरिमंडलः ॥ सप्तपादश्चतुर्हस्तोद्वात्रिंशल्लक्षणैर्युतः ॥
असंशयःसंशयच्छिद्गुरुरुक्तोमनीषिभिः ॥ तस्माद्ब्रह्मागुरुर्मुख्यःसर्वेषामेवसर्वदा ॥ अन्येपिस्वात्मनोमुख्याःक्रमाद्गुरवईरि
ताः ॥ क्रमाल्लक्षणहीनाश्चलक्षणालक्षणैःसमाः ॥ मानुषामध्यमाःसम्यग्दुर्लक्षणयुतःकलिरिति ॥ श्रुतिगीतातात्पर्येपि ॥ षण्ण
वत्यंगुलोयस्तुतालास्योदशतालकः ॥ दशप्रादेशकःसप्तपादोहस्तचतुष्टयः ॥ कलमत्रयांगुलश्चैववाग्मीसंदेहवर्जितः ॥ वासुदे
वैकशरणोगुरुरित्युच्यतेबुधैः ॥ गुरुलक्षणसंपूर्णःसाक्षादेकश्चतुर्मुखः ॥ ततःशेषेंद्रवद्व्याद्याःक्रमेणैवप्रकीर्तिताइति ॥ एतत्प्र
माणार्थस्तुतत्तट्टीकातोवगंतव्यः ॥ विस्तरभयान्नेहलिख्यते ॥ शिष्याश्चोक्तागीतातात्पर्ये ॥ शिष्यश्चस्वामिनास्वेनवा
र्पितः ॥ पुत्रानुजादयःसर्वेशिष्याएवनिसर्गतइति ॥ गुरुप्रकरणमुपसंहरति ॥ अतइति ॥ ४९८ ॥ इतिगुरु
प्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ तारतम्यज्ञानंमोक्षसाधनमित्युक्तं ॥ तच्चकथंज्ञेयमित्यतआह ॥ तारतम्यंचेति ॥
॥ ४९९ ॥ तत्रोक्तप्रकारंचलेशतोदर्शयिष्यामः ॥ मोक्षयोग्येषुसर्वावराःस्थावरजीवाः ॥ तेभ्यःपशुपक्षिणोजंगमाउत्तमाः ॥

४९८ अतोगुरुभक्त्यागुरुप्रसादस्संपादनीयः ॥ ४९९ तारतम्यंचास्मद्गुरुपादैस्सम्यगुपपादितंतारतम्यस्यसंग्रहेतत्रैवानुसंधेयं ॥

तेभ्योमानुषाउत्तमाः ॥ तेभ्योविप्रमानुषाउत्तमाः ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ तत्रस्थावरमुक्तेभ्योवराजंगममुक्तिगाः ॥ ते
भ्योमानुषमुक्ताश्चविप्रमुक्तास्ततोधिकाइति ॥ तेभ्यःशतगुणोत्तराश्चक्रवर्तिनः ॥ अन्येभ्यस्तुविमुक्तेभ्यआनंदश्चक्रवर्तिनां ॥ मु
क्तानांतुशतोद्रिक्तइतिबृहद्भाष्योक्तेः ॥ चक्रवर्तिभ्योमनुष्यगंधर्वाःशतगुणोत्तमाः ॥ यस्तुसाधुगुणैर्युक्तस्तस्यैवाप्यखिलामही ॥
त्रेतायुगेचक्रवर्तीत्यारभ्य एकानंदस्वरूपोसौमानुषोमुक्तइष्यते ॥ तस्माच्छतगुणानंदागंधर्वामानुषात्मकाइति तैत्तरीयभाष्यो
क्तेः ॥ तत्रचक्रवर्तिषुमानुषपदप्रयोगस्तुप्रियव्रतादिकर्मजदेवतासमानचक्रवर्तिव्यावृत्त्यर्थं पृथुकार्तवीर्यादिकर्मजदेवताव्यावृत्त्य
र्थंचेतिबोध्यं ॥ एकानंदइत्यत्रैकशब्दार्थस्तुउत्तमानंदंशतधाविभज्यतत्रैकोभागोयावत्परिमितस्तत्समानानंदोऽधमदेवानंदइ
तिसर्वत्रबोध्यं ॥ मनुष्यगंधर्वेभ्योदेवगंधर्वाःशतगुणोत्तमाः ॥ अत्रदेवगंधर्वमनुष्यगंधर्वस्वरूपकथनपूर्वकंशतगुणोत्तरत्वप्रति
पादकंबृहद्भाष्यंमानं ॥ तथाहि ॥ स्वमुखेनैवदेवैर्यआज्ञाप्यास्सर्वदागणाः ॥ आख्यातादेवगंधर्वायेत्वन्यमुखगोचराः ॥ मा
नुषास्तेतुगंधर्वास्तेभ्यस्तेचशतावराः ॥ तेभ्यःशतावराश्चैवमनुष्येषूत्तमागणाइति ॥ अत्रेदंबोध्यं ॥ सिद्धचारणकिन्नरकिंपुरुष
विद्याधरयक्षनागवेतालादीनांदेवगंधर्वसाम्यं ॥ नचतेमुक्तियोग्याएवनभवंतीतिवाच्यं ॥ येयक्षरक्षोरगनागनाथादैत्येंद्रसिद्धे
श्वरदानवेशाः ॥ अन्येचयेप्रेतपिशाचभूतकूश्मांडयादोमृगपश्वधीशाः ॥ इत्याद्युक्त्वातत्तत्पदंरूपवदस्यरूपमितितेषांभगवत्स
न्निधानपात्रत्वस्यद्वितीयभागवतोक्तेः ॥ सप्तमस्कंधभागवतेपि ॥ सिद्धाः वेतालाः किन्नरा इतिप्रत्येकंनरसिंहस्तावकत्वोक्तेः ॥
तथाचमध्यमाऋषिगंधर्वाइतिभाष्योक्तदिशातेषांमध्यमाधिकारिषुदेवगंधर्वेषुप्रवेशस्यन्यायप्राप्तत्वादिति ॥ देवगंधर्वेभ्यश्चिर

पितरःशतगुणाधिकाः ॥ अत्र पितृभ्यश्चशतावराः ॥ स्वमुखेनैवदेवैर्यआज्ञाप्याःसर्वदागणाः ॥ आख्यातादेवगंधर्वाइतिबृ
हद्भाष्यंमानं ॥ चिरपितृभ्यआजानजदेवाःशतगुणोत्तराः ॥ आजानेभ्यस्तुपितरोह्यष्टभ्योन्येशतावराइतिबृहद्भाष्योक्तेः ॥
अष्टपितृष्वेकोविश्वामित्रः ॥ सचब्रह्मपुत्रैर्वसिष्ठादिभिःसमः ॥ विश्वामित्रोब्रह्मपुत्रैःसमोमुनिरुदाहृतः ॥ आचार्यःपितॄणां
चासौपितृभिःसहपठ्यतइतिबृहद्भाष्योक्तेः ॥ विश्वामित्रःकसूनुवदित्यनुव्याख्यानोक्तेश्च ॥ अत्राजानजदेवतासमानाःशतोन
शतकोटिऋषयः ॥ नवकोट्योहिदेवानामृषयःशतकोटयइतिषष्ठस्कंधतात्पर्योक्ताज्ञेयाः ॥ तथाद्विनवतिगंधर्वाःकाश्चनाप्सरस
श्चाजानजदेवतासमाः ॥ तथा ॥ अग्निपुत्रास्तपसाप्सरस्त्वंप्राप्यश्रीकृष्णभार्यात्वंप्राप्ताः ॥ शताधिकषोडशसहस्रसंख्या
काः ॥ तथाकृष्णांगसंगयोग्याअप्सरस्स्वरूपागोपिकास्त्रियश्चाजानजदेवतासमाज्ञेयाः ॥ अत्रप्रमाणानितु ॥ द्व्यष्टौसहस्राणि
शतंसुरूपशीलोदाराअक्षताःसद्व्रतस्थाः ॥ पुत्राअग्नेःपूर्वमासंश्चतेथस्त्रीत्वप्राप्त्यैचक्रुरुग्रंतपश्च ॥ भार्यात्वार्थेवासुदेवस्य ॥ तथा
नारायणंतत्रशिश्रूषमाणाःप्राप्याप्सरस्त्वंराजकुलेषुजाताः ॥ केचित्स्वर्गे ॥ तथा आजानदेवैःसर्वगुणैःसमास्ताइतिनिर्णयोक्तिः ॥
तथा गोपांगनाअपिपुरावरमापिरेयत् ॥ संस्कारतःप्रथममेवसुसंगमोनोभूयात्तवेतिपरमाप्सरसःपुरायाइतिनिर्णयोक्तिश्च ॥
आजानजदेवेभ्यःशतगुणोत्तमाःकर्मजदेवाः ॥ तदुक्तंबृहद्भाष्ये ॥ कार्तवीर्यादिराजभ्योदेवभृत्याःशतावराः ॥ आजानदेवा
स्तेप्रोक्ताइति ॥ तैत्तरीयभाष्येपि ॥ तेभ्यःशतगुणानंदादेवप्रेष्यास्तुमुख्यतः ॥ येतेहिदेवगंधर्वामुक्तेभ्यस्तेभ्यएवच ॥ शताधि
काहिपितरस्तेभ्यआजानदेवताः ॥ अनाख्यातादेवतास्तुजातादेवकुलेचयाः ॥ आजानदेवतास्ताहिताभ्योग्र्याःकर्मदेवताः ॥ ब

ल्याद्याअंतराप्राप्तदेवताःकर्मदेवताइति॥कर्मजदेवताश्चबृहद्भाष्योक्ताज्ञेयाः॥कार्तवीर्यःपृथुश्चैवदौष्यंतिर्भरतस्तथा॥शशबिंदुश्च
मांधाताककुत्स्थाद्यास्तथापरइति ॥ सर्वेतेविष्णुनाविष्टाविष्णोर्भिन्नाःसदैवतु ॥ शतावराश्चदेवेभ्यःकर्मदेवाइतिस्मृताइति ॥
तथाबलिःअद्भुतःशंभुःविधृतःऋतुधामाबृहस्पतिःशुचिरितिसप्तचकर्मदेवाःपुराणादौप्रसिद्धाः ॥ कर्मदेवसमाःसप्तपितरः ॥
पितृणांसप्तकंयत्तत्कर्मदेवसमंमतमितिबृहद्भाष्योक्तेः ॥ सप्तपितरश्चपुराणादितोवगंतव्याः ॥ एवंनवकोटिदेवगणाःपावकप्रह्ला
दाद्याश्चकर्मजदेवतासमानाः ॥ तथा ॥ तापसस्वायंभुववैवस्वतमनुव्यतिरिक्तारैवतचाक्षुषादयएकादशमनवश्च्यवनोचथ्यौच
ऋषीप्रियव्रतगयौराजानौचकर्मजदेवतासमानाः॥तत्रप्रमाणानितु॥अन्येततोवराः॥च्यवनोचथ्यवैन्याश्चशशबिंदुश्चहैहयः॥
तद्वच्चविप्रराजन्यविशेषोत्रापिकश्चन ॥तद्वत्प्रियव्रतश्चापीत्युपासनापादीयानुव्याख्यानं॥ प्रियव्रतोगयश्चैवकर्मदेवसमौगुणैरि
तिपंचमभागवततात्पर्ये ॥अनुक्तदेवाश्चेतिसुधा ॥एवमष्टगंधर्वाःकर्मजदेवतासमानाः ॥ कर्मदेवगणाअष्टगंधर्वाइतिबृहद्भाष्यो
क्तेः॥अष्टगंधर्वाश्चतुंबरुधृतराष्ट्रचित्ररथहाहाहूहूप्रभृतयः ॥ गंधर्वपतिःसतुंबरुः ॥ गंधर्वराट्पवनावेशयुक्तः॥ गंधर्वाणांचित्र
रथः ॥ हूहूगंधर्वसत्तमइत्यादौतेषांगंधर्वोत्तमत्वप्रतीतेः ॥ तथाद्विनवतिसंख्याकाअप्सरसश्चकर्मजदेवतासमाज्ञेयाः ॥ पंचम
तात्पर्ये ॥ अप्सरसांशतं ॥ गंधर्वाणांतथेतिमिलितानामेवशतसंख्याज्ञेया ॥ ताश्चोर्वशीमेनकाघृताचीरंभाद्याःप्रसिद्धाज्ञेयाः॥
उर्वशीपूर्वचित्तिश्चसहजन्याचमेनका ॥ विश्वाचीचघृताचीचषडेताह्यप्सरोवराइत्यादिमहाभारतवचनात् ॥ एवंसनकाद्याश्च
कर्मजदेवतासमानाः ॥ सनकाद्यानारदश्चदक्षभृग्वादयोपिचेतिबृहद्भाष्येसनकादीनांदेवावरत्वमुक्त्वानारददक्षभृगूणांतत्रत

त्रापवाददर्शनेनसनकादीनांतददर्शनेनचशतस्थावरकर्मजदेवतासाम्यसिद्धेः ॥ किंचैकादशस्कंधतात्पर्येसनकादीनांज्ञानयोगित्वंदेवानांभक्तियोगित्वंचोक्त्वा तस्मात्तेभ्योधिकाह्येषुदेवाएवविशेषत इतिसनकादीनांदेवावरत्वकथनात् ॥ किंचवैकुंठेभगवद्धामगमनजयादिशापदानादिसामर्थ्यान्यथानुपपत्त्यापुष्कराद्यपेक्षयाधिक्यस्यवक्तव्यत्वात् ॥ अत्रचाजानजदेवेभ्योधिकाःकर्मजदेवेभ्योन्यूनामध्येकेचनदेवाबोध्याः ॥ तथाहि ॥ आजानजदेवेभ्यउत्तमःपुष्करः ॥ कलाभ्यश्चान्यदेवेभ्यःकर्मप्रत्यवरं यतः ॥ कलाभ्यःपृथगुक्तंतत्पुष्करःकर्मचोच्यतइत्याथर्वणभाष्योक्तेः ॥ ततःशनैश्चरोधिकः ॥ पृथिव्यात्माशनिश्चेतिषट्प्रश्नभाष्योक्तेः ॥ ततउषाअश्विभार्यादशगुणोत्तमा ॥ बुधस्तस्याउषानामात्मिकातथेतिषट्प्रश्नभाष्योक्तेः ॥ ततोबुधउत्तमः ॥ उदकात्मकोबुधश्चेतिषट्प्रश्नभाष्योक्तेः ॥ ततःस्वाहाऽग्निभार्योषसोदशोत्तरा ॥ छांदोग्यभाष्येनामादिप्राणपर्यंतंसर्वेत्वेतेदशोत्तराइतिसामान्यतउक्तत्वेनपर्जन्यादिवदपवादाविषयत्वात् ॥ स्वाहातःपर्जन्योद्विगुणोत्तमः ॥ पर्जन्यमित्रशिखिनोभूतवायुस्तथैवच ॥ द्विगुणाएवेतिदशोत्तरदेवेष्वपवादोक्तेः छांदोग्यभाष्ये ॥ एवंपर्जन्यसमावरुणभार्यागंगा सूर्यभार्यासंज्ञा चंद्रभार्यारोहिणी यमभार्याशामला अनिरुद्धभार्याविराट्चेतिपंचस्त्रियः ॥ तदुक्तमुपासनापादीयानुव्याख्याने ॥ पर्जन्यवद्वारुणीचतथासंज्ञाचरोहिणी ॥ धार्मीचेति ॥ विराडनिरुद्धभार्येतिसुधोक्तिश्च ॥ अत्रेदंबोध्यं ॥ पर्जन्याद्यवराःस्वाहातउत्तमाःकेचनजयविजयादयःसंति ॥ अनतिप्रसिद्धाधिकारिदेवाःकेचनपर्जन्यादवराइतिसन्न्यायरत्नावल्यामुक्तेः ॥ पर्जन्यादिभ्यःकर्मजदेवाउत्तमाः ॥ तथैवसुधोक्तेः ॥ कर्मजदेवेभ्यउत्तमाविष्वक्सेनाश्विगणपतिकुबेराउक्तशेषाःशतस्थाश्च ॥ अत्रमानंतुमित्रपर्जन्यमध्य

स्थावश्विनौविघ्नवित्तपावित्यनुव्याख्यानं ॥ विष्वक्सेनोवायुजःखेनतुल्यइतिनिर्णयोक्तिः ॥ तदन्याःशतदेवताः ॥ पर्जन्यमि
त्रांतरालइत्यनुव्याख्यानंच ॥ तदर्थस्तुसुधायामुक्तः ॥ तदन्याउक्ताभ्योन्याःशतदेवताःसोमार्हशतदेवतांतर्गतदेवाःपर्जन्यमि
त्रांतराले ॥ पर्जन्यादधिकामित्रादधमाइत्यर्थइति ॥ सोमार्हशतदेवाश्चतत्वप्रदीपिकायामुक्ताः ॥ मरुद्रुद्रादित्यवसुविश्वेदेवा
बृहस्पतिः ॥ ऋभ्वश्विनौचरोदस्यौपितृपाश्चशतंसुराइति ॥ तदर्थस्तु पंचाशन्मरुतः एकादशरुद्राः द्वादशादित्याः अष्टौवसवः
दशविश्वेदेवाः बृहस्पतिरेकः ऋभुगणएकः द्यावापृथिव्यौद्वे अश्विनौद्वौ पितृपास्त्रयइत्येताः सोमार्हशतदेवताः ॥ तदुक्तंसूत्रे
भाष्येच ॥ ॐविभागःशतवत् ॐ ॥ नवकोट्योहिदेवानांतेषांमध्येशतस्यतु ॥ सोमाधिकारोवेदोक्तोब्रह्मणीद्वेशताधिकेइति ॥ तत्र
मरुत्सुप्रधानवायुः आहंकारिकप्राणः प्रवहइतित्रयउत्तमकक्ष्यात्वेनोक्ताः ॥ तथा ॥ एकादशरुद्रेषुप्रधानरुद्रउत्तमत्वेनोक्तः ॥ द्वा
दशादित्येषुविवस्वान्पर्जन्यमित्रवरुणशक्राश्चोक्ताः ॥ उरुक्रमोभगवानुक्तः ॥ अष्टवसुष्वर्काग्नीउक्तौ ॥ बृहस्पतिश्चोक्तः ॥ ततश्चैत
द्व्यतिरिक्ताःशतसंख्यांतर्गताअश्विसमाइति ॥ नन्वेवंमरुतश्चसमाःसर्वेसप्ततेषुप्रधानकाइतिदशमतात्पर्येमरुत्सुसप्तानांप्राधान्यो
क्तेः ॥ प्राणादयःपंचमरुत्प्रवीराइतिपंचानांप्राधान्योक्तेर्निर्णये ॥ आकाशदेवताविघ्नस्ततोवायोःसुतोमरुदितिषट्प्रश्नभाष्येश
तस्थांतर्गतवायुसून्वपेक्षयागणेशस्याधिक्योक्तेश्च ॥ पृथिव्यामृभवोविलीयंतइतिऋभ्वपेक्षयापृथिव्याआधिक्योक्तेः ॥ पंचभूता
वरायायस्यांजज्ञेनरकःश्रीवराहादितिनिर्णये ॥ आकाशाभिमानिगणेशापेक्षयापृथिव्यान्यूनत्वोक्तेःकथमुक्तशेषाःसर्वेसमाइति
चेन्न ॥ किंचिन्न्यूनाधिक्यसद्भावेपितदविवक्षयाकामइंद्राधमोल्पइतिवत्साम्यव्यपदेशोपपत्तेः ॥ विघ्नेशादिभ्यो मित्रोद्वादशा

दित्यमध्येकश्चन तथाबृहस्पतिभार्यातारा तथाकोणाधिपोनिर्ऋतिः भूतवायुप्रवहपत्नीच आहत्यचत्वारउत्तमाः ॥ तत्र उषाः
स्वाहाचपर्जन्योमित्रोग्निर्वरुणोविधुः ॥ प्रवहोनिरुद्धइंद्रोमेरुद्रोवाणीचमारुतः ॥ उत्तरोत्तरतश्चैतेगुणैःसर्वैश्चमुक्तिगाइत्युक्त्वा
मित्रवत्त्वेवप्रावहीपरिकीर्तिता ॥ ताराचमित्रवत् ॥ निर्ऋतिर्मित्रसदृशइत्यनुव्याख्यानोक्तिर्मानं ॥ अत्रेदंबोध्यं ॥ पर्ज
न्यापेक्षयामित्रोद्विगुणाधिकः ॥ पर्जन्यमित्रशिखिनोभूतवायुस्तथैवच ॥ द्विगुणाएवेत्यपवादश्छांदोग्यभाष्योक्तेः ॥ पर्जन्या
त्किंचिदधिकामित्रात्किंचिन्न्यूनाविघ्नेशादयइति ॥ मित्रादिभ्यो मरीचिरत्रिरंगिराःपुलस्त्यःपुलहःक्रतुर्वसिष्ठइतिसप्तर्षयोब्रह्म
पुत्राः तथाविश्वामित्रोवैवस्वतमनुश्चेतिनवोत्तमाः ॥ अत्र मित्रस्तन्मध्येब्रह्मपुत्रकाः ॥ इतिमित्राग्निमध्येमरीच्यादीनुक्त्वावि
श्वामित्रःकसूनुवत् ॥ वैवस्वतमनुश्चेत्यनुव्याख्यानोक्तिर्मानं ॥ सुधायामपि ॥ विश्वामित्रःकसूनुवत् ॥ ब्रह्मपुत्रैर्मरीच्यादि
भिःसमानोवैवस्वतोमनुश्चकसूनुवदितिसंबंधइत्युक्तं ॥ मरीच्यादिभ्योभृगुऋषिःप्रधानाग्निर्दक्षभार्याप्रसूतिश्चेतित्रयउत्तमाः ॥
अत्रोषाः स्वाहाचपर्जन्योमित्रोग्निरितिमित्रोत्तममरीच्याद्युत्तमत्वमग्नेरुक्त्वा भृगुरग्निसमः ॥ प्रसूतिर्वह्निवदित्यनुव्याख्या
नोक्तिर्मानं ॥ अत्रेदंबोध्यं ॥ मित्राद्यपेक्षयाग्न्यादयोद्विगुणाधिकाः ॥ पर्जन्यमित्रशिखिनोभूतवायुस्तथैवच ॥ द्वि
गुणाएवेतिछांदोग्यभाष्योक्तेः ॥ तथाचमित्राद्यपेक्षयाकिंचिदधिकाअग्न्याद्यपेक्षयाकिंचिन्न्यूनामरीच्यादयइति ॥ अ
ग्न्यादिभ्योनारदउत्तमः ॥ वरुणाग्न्यंतरातत्रनारदइत्यनुव्याख्यानोक्तेः ॥ नारदाद्वरुणउत्तमः ॥ मित्रोग्निर्वरुणोवि
धुरित्युक्तेः ॥ अत्राग्न्याद्यपेक्षयावरुणस्यपादगुणाधिक्यंबोध्यं ॥ पादोनोवरुणादग्निरध्यर्धोनःसमोमतइतिछांदोग्यभा

ष्योक्तेः ॥ वरुणात्सूर्यश्चंद्रोयमःस्वायंभुवपत्नीशतरूपाचेतिचत्वारोध्यर्धोत्तमाः ॥ अत्रमित्रोग्निर्वरुणोविधुरितिचंद्रस्यवरुणा
दुत्तमत्वमुक्त्वासूर्यधर्मौयथासोमइतिसोमवच्छतरूपात्वित्यनुव्याख्यानोक्तिर्मानं ॥ पादोनोवरुणादग्निरध्यर्धोनःसमोमतइति
छांदोग्यभाष्यंच ॥ सूर्यादिभ्यःप्रवहउत्तमः ॥ अत्रमित्रोग्निर्वरुणोविधुःप्रवहोनिरुद्धइंद्रोमेइत्यनुव्याख्यानंमानं ॥ अत्रेदंबो
ध्यं ॥ अग्न्यपेक्षयाप्रवहोद्विगुणाधिकइति ॥ पर्जन्यमित्रशिखिनोभूतवायुस्तथैवच ॥ द्विगुणाएवानिरुद्धइतिछांदोग्यभाष्यो
क्तेः ॥ प्रवहाद्बृहस्पतिर्दक्षःकामपुत्रोनिरुद्धःस्वायंभुवमनुरिंद्रभार्याशचीकामभार्यारतिरितिषड्देवाउत्तमाः ॥ अत्रप्रवहो
निरुद्धइंद्रोमेरुद्रोवाणीचमारुतइतिप्रवहापेक्षयाऽनिरुद्धस्योत्तमत्वमुक्त्वा मनुर्दक्षोबृहस्पतिः ॥ शचीरतिश्चानिरुद्धसमाइत्य
नुव्याख्यानोक्तिर्मानं ॥ अत्रप्रवहापेक्षयानिरुद्धादयःपंचगुणाधिकाइतिबोध्यं ॥ अनिरुद्धोनिलात्पंचगुणाधिकइतिछांदोग्य
भाष्योक्तेः ॥ अनिरुद्धादिभ्यआहंकारिकप्राणउत्तमः ॥ अत्र अन्ननामानिरुद्धकः ॥ अन्ननामानादित्वात्तैजसाहंभवस्त
तः ॥ तथावरिष्ठःप्राणाख्योवायुस्सोपांचदेवतेतिछांदोग्यभाष्योक्तिर्मानं ॥ अनिरुद्धादिभ्यआहंकारिकप्राणउत्तमइत्युपास
नापादीयसुधापि ॥ एवमनिरुद्धादिभ्यआहंकारिकप्राणस्यदशोत्तरत्वंबोध्यं ॥ सर्वेत्वेतेदशोत्तराइतिसामान्यन्यायविषयत्वा
त् ॥ आहंकारिकप्राणादिंद्रकामौदशोत्तरौ ॥ प्रवहोनिरुद्धइंद्रोमेइत्यनिरुद्धोत्तमाहंकारिकप्राणोत्तमत्वमुक्त्वा प्रायइंद्रवत्काम
इत्यनुव्याख्यानोक्तेः ॥ सर्वेत्वेतेदशोत्तराइतिछांदोग्यभाष्योक्तेश्च ॥ अत्रप्रायइत्यनेनकामस्येंद्रापेक्षयाकिंचिन्न्यूनत्वमभ्युपै
ति ॥ सुधायांतथैवोक्तेः ॥ इंद्रकामाभ्यांगरुडपत्नीसौपर्णीशेषपत्नीवारुणीरुद्रपत्नीपार्वतीचेतितिस्रोदशोत्तराः ॥ इंद्रोमेरुद्रो

वाणीचमारुतइत्युक्त्वासौपर्णीचोमावदित्यनुव्याख्यानोक्तेः ॥ उमात्मकत्वाच्छेषभार्याचेतिसुधोक्तेश्च ॥ सर्वेत्वेतेदशोत्तराइतिछांदोग्यभाष्योक्तेश्च ॥ सौपर्ण्यादिभ्योनीलाभद्रामित्रविंदाकालिंदीलक्षणाजांबवतीचेतिविष्णोःषण्महामहिष्योद्विगुणोत्तमाः ॥ अत्रप्रमाणंतु यदावेशोबहुलःस्याद्रमायाः ॥ रामेणतुल्याजांबवतीप्रियत्वेकृष्णस्यान्याःकिंचिदूनाश्चतस्याइति ॥ यदावेशोह्रासमुपैतितत्रप्रद्युम्नतोविंशगुणाधिकाःस्युरितिनिर्णयोक्तिर्मानं ॥ तथाहि छांदोग्यभाष्ये ॥ सर्वेत्वेतेदशोत्तराइतींद्रकामापेक्षयोमादेर्दशोत्तरत्वमुमापेक्षयाचरुद्रादेर्दशोत्तरत्वंचोक्तं ॥ निर्णयेप्रद्युम्नतोविंशगुणाधिकाःस्युरितिषण्महिषीणांकामावतारप्रद्युम्नापेक्षयाविंशतिगुणाधिक्यमुच्यमानमिंद्रकामापेक्षयादशगुणोमाद्यपेक्षयाषण्महिषीणांद्विगुणाधिकत्वएवघटतेनान्यथेति ॥ नचतासांमध्येजांबवतीप्रधानेतिजांबवत्यानीलाद्यपेक्षयाप्राधान्योक्तेःकथंतासांसाम्यमितिवाच्यं ॥ किंचिन्न्यूनाधिकभावस्याविविक्षितत्वेनसाम्यव्यवहारोपपत्तेः ॥ जांबवत्यादिषण्महामहिषीभ्योगरुडशेषरुद्राःपंचगुणाधिकाः ॥ तत्रमानंतुप्रद्युम्नतोविंशगुणाधिकाःस्युरितिनिर्णयोक्तिः ॥ तथाहि ॥ उक्तरीत्यावारुण्यादीनांशेषादिभ्योदशावरत्वं ॥ शेषादिवारुण्यादिमध्यस्थानांषण्महिषीणांवारुण्याद्यपेक्षयाद्विगुणाधिकानांशेषादिभ्यःपंचावरत्वंसंपादयतीतिसूक्ष्मदृष्ट्याऽऽकलनीयं ॥ अत्ररुद्रापेक्षयाशेषस्यकिंचित्पदकृताधिक्यंबोध्यं ॥ शर्वादिवंद्यचरणोयदपांगलेशमितिद्वादशस्तोत्रोक्तेः ॥ गरुडशेषरुद्रेभ्यः सरस्वतीभारत्यौब्रह्मवायुभार्येशतगुणोत्तरे ॥ अत्रप्रवहोनिरुद्धइंद्रोमेरुद्रोवाणीचमारुतइत्यनुव्याख्यानेरुद्राद्यपेक्षयावाण्याआधिक्योक्तिः ॥ शिवादाशातथैवास्यामुख्यवायुःशतोत्तरइतिछांदोग्यभाष्येशिवादिभ्यआशायाःशताधिकत्वोक्तिश्चमानं ॥ सरस्व

तीभारतीभ्यांब्रह्मवायूशताधिकौ॥ अत्ररुद्रोवाणीचमारुतइत्यनुव्याख्यानोक्तिः शिवादाशातथैवास्यामुख्यवायुःशतोत्तरइति
छांदोग्यभाष्यंचमानं॥ अत्रमारुतग्रहणेनब्रह्मापिगृह्यते ॥ ततोमुख्यवायुस्तदात्मकत्वाद्ब्रह्मापीतिसुधोक्तेः॥ वायुपदापेक्षयाब्र
ह्मपदस्यकिंचिदाधिक्यंबोध्यं ॥ वायुत्वेकिंचिदूनतेतितृतीयतात्पर्योक्तेः ॥ ब्रह्मवायुभ्यांलक्ष्मीःकोटिगुणोत्तमा ॥ तदुक्तमु
पासनापादीयानुव्याख्याने ॥ एतेभ्योभ्यधिकाश्रीस्तुसदामुक्ताविशेषतइति ॥ कोटिगुणाधिकत्वेतुबृहद्भाष्यंमानं ॥ हिरण्य
गर्भायेतीतायेभाव्यायश्चवर्तते॥ सर्वेविष्णुवशानित्यंविमुक्तेरप्यनंतरं ॥ एतेभ्यःश्रीस्तुमुक्तेभ्योगुणैःकोटिगुणोत्तरेति ॥ तथा
विष्णोःप्रियत्वेतद्भक्तौतज्ज्ञानेचश्रियस्तुते ॥ मुक्ताअप्यवरानित्यंसर्वेकोटिगुणेनचेति॥ऋग्भाष्येपिश्रीब्रह्मवाय्वादिप्रकरणे ॥
अनंतकोटिशतकदशार्धाद्यंशतःक्रमादिति ॥ लक्ष्म्यालक्ष्मीपतिरनंतगुणोत्तमः ॥ तदुक्तंगीताभाष्ये ॥ विष्णुमाहात्म्यलेशस्य
विभक्तस्यचकोटिधा॥ पुनश्चानंतधातस्यपुनश्चापिह्यनंतधा ॥ नैकांशसममाहात्म्याःश्रीशेषब्रह्मशंकराइति ॥ परमात्मातुतारत
म्यांतगएवनतुततोधिकःकश्चन ॥ साकाष्ठासापरागतिरितिश्रुतेः ॥ तत्समोनास्तिपरमोहरिरेवनचापरइत्यनुव्याख्यानोक्तेश्च॥
अत्रविक्षिप्योक्तस्यसंग्रहायानुव्याख्यानमेवपठ्यते ॥ उषाःस्वाहाचपर्जन्योमित्रोग्निर्वरुणोविधुः ॥ प्रवहोनिरुद्धइंद्रोमेरुद्रोवा
णीचमारुतः ॥ उत्तरोत्तरतश्चैतेगुणैःसर्वैश्चमुक्तिगाः ॥ सूर्यधर्मौयथासोमोमनुर्दक्षोबृहस्पतिः ॥ शचीरतिश्चानिरुद्धसमास्ता
राचमित्रवत् ॥ सोमवच्छतरूपातुप्रसूतिर्वह्निवद्विराट् ॥ पर्जन्यवद्वारुणीचतथासंज्ञाचरोहिणी ॥ धार्मीचमित्रवत्त्वेवप्रावहीप
रिकीर्तिता ॥ मित्रपर्जन्यमध्यस्थावश्विनौविघ्नवित्तपौ ॥ भृगुरग्निसमोमित्रतन्मध्येब्रह्मपुत्रकाः ॥ वरुणाद्यंतरातत्रनारदः

प्रायइंद्रवत् ॥ कामःसुपर्णीचोमावद्वींद्रोरुद्रवदीरितः ॥ निर्ऋतिर्मित्रसदृशोविश्वामित्रःकसूनुवत् ॥ वैवस्वतोमनुश्चाश्विप
श्चादन्येततोवराः ॥ च्यवनोचथ्यवैन्याश्चशशिबिंदुश्चहैहयः ॥ तद्वच्चविप्रराजन्यविशेषोत्रापिकश्चन ॥ तद्वत्प्रियव्रतश्चापित
दन्याःशतदेवताः ॥ पर्जन्यमित्रांतरालेतदन्येतुततोवराः॥ एतेभ्योभ्यधिकाश्रीस्तुसदामुक्ताविशेषतः॥ तत्समोनास्तिपरमो
हरिरेवनचापरइति ॥ ननुउमायावदनंतांशान्पूर्वदृष्टेभ्यएवतु ॥ विशेषान्वासुदेवस्यपश्चादुक्ताविचक्षतइतिज्ञानपादीयानु
व्याख्यानउमापर्यंतंरमाद्यपेक्षयाविरिंचादीनामनंतन्यूनत्वोक्तेर्हरिभक्तितत्प्रियत्वयोरपिज्ञानानुसारित्वेनानंतन्यूनत्वस्यवक्त
व्यत्वादेतत्त्रितयानुसारेणानंदादिसर्वगुणानामप्यनंतांशन्यूनत्वावश्यंभावात्कथंकोटिगुणत्वदशगुणत्वमवरतायामुक्तमितिचे
दुच्यते ॥ भवत्येवोमापर्यंतंज्ञानभक्तिहरिप्रियत्वेष्वनंतांशन्यूनत्वं ॥ नचैवमानंदादिष्वपितदनुसारेणानंतांशन्यूनत्वंस्यादिति
वाच्यं ॥ भूम्नःक्रतुवज्ज्यायस्त्वंतथाचदर्शयतीतिसूत्रतद्भाष्यानुसारेणोपास्यसर्वगुणेषुप्रत्येकंपूर्णत्वस्योपास्यतयापूर्तिज्ञानावश्यं
भावात्॥ आनंदादिगुणपरिमाणस्यपूर्तिज्ञानानुसारित्वेनपूर्तिज्ञानस्यच शब्दोनुमातथैवाक्षोयोग्यताभेदतःसदा॥ब्रह्मादीनामे
कमर्थंबहुधादर्शयंतिहि॥अतःपूर्णत्वमीशस्यनानैवैषांप्रदृश्यते ॥ अतःफलस्यनानात्वंनानैवोपासनंयतइतिसूत्रभाष्योदाहृतप्रमा
णानुरोधेनयोग्यतानुसारितयाकोट्याद्यंशन्यूनत्वेनानंदादिगुणेष्वपिकोट्यादिन्यूनत्वोपपत्तेः॥ नचैवमनंतभगवद्विशेषज्ञानांगी
कारवैकल्यप्रसंगः॥नैवसर्वगुणाःसर्वैरुपास्यामुक्तिभेदतइतिप्रमाणेनानंतगुणज्ञानस्यापियथायोग्यानंदलाभार्थत्वात्॥तस्माज्ज्ञा
नभक्त्यादिकंविहायानंदादिष्वेवकोटिशतादिन्यूनत्वं॥अथवा॥ उदाहृतानुव्याख्याने अनंतांशान्विचक्षतइतिज्ञानएवानंतांश

न्यूनत्ववचनाज्ज्ञानव्यतिरिक्तसर्वगुणेषुकोव्यादिन्यूनत्वंयुक्तं ॥ नचैवंविष्णोःप्रियत्वेतद्भक्तौतज्ज्ञानेचेत्यादिबृहद्भाष्येण यथानं
देतथाज्ञानइत्यादितैत्तिरीयभाष्येणचविरोधइतिवाच्यं ॥ निरवकाशानुव्याख्यानानुसारेणतत्रकोव्यादिशब्दस्यज्ञानांशेनंतार्थ
त्वेनाविरोधात् ॥केचित्तूदाहृतानुव्याख्यानेविशेषान्वासुदेवस्येतिविशेषपदप्रयोगबलेनभगवदीयगुणगतविशेषज्ञानएवानंतांश
न्यूनत्वं गुणादिज्ञानेतुकोव्यादिन्यूनत्वमेवेत्याहुः॥अपरेतूक्तरीत्याज्ञानादिगुणानामनंतांशन्यूनत्वात्तदनुसारित्वाच्चेतरगुणानां
पूर्तिज्ञानस्यापिकोव्यादिन्यूनत्वस्यस्पष्टमप्रमितत्वेनतत्राप्यनंतांशन्यूनत्वसंभवादुमापर्यंतंसर्वेष्वपिगुणेष्वनंतांशन्यूनत्वमेव ॥
बृहद्भाष्यादिगतकोव्यादिशब्दास्त्वनंतपराः ॥ उमामारभ्यतुशताद्यवरत्वमितिमन्यंतइत्यलं ॥ अत्रकेचित् ॥ वैवस्वतमनोः
सप्तर्षिसाम्यंनमन्यंते ॥ तथागंगापर्जन्याद्युत्तमत्वंकर्मजदेवानांनमन्यंते ॥ किंतुपुष्करावरत्वमेव ॥ तथाहिभाष्ये ॥ क्षितिपा
मनुष्यगंधर्वादेवाश्चपितरश्चिराः ॥ आजानजाःकर्मजाश्चतात्विकाश्चशचीपतिः ॥ रुद्रोब्रह्मेतिक्रमशस्तेषुचैवोत्तरोत्तराः ॥ नि
त्यानंदेचभोगेचज्ञानैश्वर्यगुणेषुच ॥ सर्वेशतगुणोद्रिक्ताःपूर्वस्मादुत्तरोत्तरमितिपुष्करांततात्विकदेवापेक्षयाकर्मजदेवानांशताव
रत्वमुक्तं ॥ तत्कथंगंगापर्जन्यादिपुष्करांतदेवोत्तमत्वं ॥ तथाशतावराश्चदेवेभ्यःकर्मदेवाइतिबृहद्भाष्येकर्मजदेवानांदेवशब्द
वाच्यपुष्करांतदेवावरत्वमुक्तं ॥ तथातैत्तिरीयभाष्ये ॥ आजानदेवतास्ताहिताभ्योग्र्याःकर्मदेवताः ॥ बल्याद्याअंतराप्राप्तदे
वताःकर्मदेवताः ॥ ताभ्यश्चतात्विकादेवाःसृष्ट्यादौदेवतांगताः ॥ तेभ्योदक्षश्चेंद्रनामेतिपुष्करादिदेवाधमत्वमुक्तंकर्मजदेवा
नां ॥ तथागीतातात्पर्येपि ॥ भूपामनुष्यगंधर्वादेवाःपितरएवच ॥ आजानेयाःकर्मदेवास्तत्वरूपाःपुरंदरः ॥ शिवोविरिंचइत्ये

तेक्रमाच्छतगुणोत्तराइतिपुष्करांततत्वाभिमानिभ्यःकर्मजदेवानांशतावरत्वमुक्तं ॥ किंचपुष्करांतदेवानांतत्वाभिमानित्वे नकर्मजदेवानांतत्वाभिमानित्वाभावेनचपर्जन्याद्युत्तमत्वमयुक्तं ॥ अपिचसृष्ट्यादौदेवतांगताइतिपुष्करांतदेवानामादिसृष्टौ जातत्वेनकर्मजानामंतराप्राप्तदेवत्वेनचपुष्करांतावरत्वमेवयुक्तं ॥ किंचकार्तवीर्यप्रियव्रतादीनांस्वायंभुवमन्वंतरएवदेहादुत्क्र म्यगत्वेनपुष्करांतदेवानांचप्रलयउत्तमदेवताप्रवेशद्वारादेहलयवत्त्वेनोत्तमतयाकर्मजावरत्वमयुक्तं ॥ किंचपुष्करांतदेवानांसां शजीवत्वेननिरंशप्रियव्रताद्यधमत्वंकथंस्यात् ॥ किंचद्वितीयस्कंधतात्पर्ये स्वोत्पत्त्यंगेषुदेवानामन्येषांपादमूलतः ॥ मुक्तिस्तुवि हिताविष्णोर्निर्दिष्टेषुयथावचइतिपुष्करांतदेवानामंगसायुज्यरूपमुक्तिफलमुक्त्वा भेजेखगेंद्रध्वजपादमूलमितिपरीक्षितःपादमू लमुक्तिरभिहिता ॥ तत्समानन्यायेनप्रियव्रतादीनामपिपादमूलमुक्तिरेव ॥ तत्कथंपुष्कराद्युत्तमत्वंकर्मजदेवानां ॥ किंचैका दशस्कंधतात्पर्ये महिष्योष्टौविनायास्ताःकथिताःकृष्णवल्लभाः ॥ ताभ्यःसहस्रसमितायशोदानंदगेहिनी ॥ ततोह्यभ्यधिकादेवी देवकीभक्तितस्ततः ॥ वसुदेवस्ततोजिष्णुस्ततोरामोमहाबलइत्याजानजदेवतासमानाग्निपुत्रात्मककृष्णवल्लभाभ्योयशोदायाः सहस्रगुणोत्तमत्वमुक्तं ॥ तच्चपर्जन्यमित्रांतरालिकत्वेकर्मजदेवानामनुपपन्नंस्यात् ॥ तथाहि ॥ आजानजदेवेभ्यःकर्मजदेवाः शतोत्तराइतिहितेषांपक्षःकर्मजेभ्यउक्तशेषशतस्थानामेवकिंचिदाधिक्यं ॥ तदंतर्गतद्रोणनामकवस्ववताररूपनंदगोपस्यापिकिं चिदाधिक्यमेव ॥ तथाचयशोदायाःसहस्रोत्तमत्वेस्वभर्त्रपेक्षयाआधिक्यंस्यात् ॥ अतोबहुबाधकसद्भावात्साधकाभावाच्चनक र्मजदेवानांगंगापर्जन्याद्युत्तमत्वमिति ॥ अत्रोच्यते ॥ पर्जन्यादिपुष्करांतदेवापेक्षयाकर्मजदेवानामुत्तमत्वमंगीकर्तव्यमेव ॥

नचाजानजाःकर्मजाश्चतात्विकाइत्याद्युदाहृतप्रमाणेषुदेवशब्दस्यपुष्करांतदेवपरत्वात्कथमुत्तमत्वमितिवाच्यं ॥ देवशब्दस्यपु
ष्करांतदेवपरत्वेमानाभावात् ॥ प्रत्युतदेवशब्दस्यकर्मजदेवापेक्षयाशतगुणाधिकबृहस्पत्यादिपरत्वस्यैववक्तव्यत्वात् ॥ अतएव
गीतातात्पर्यटीकायांतत्वरूपास्तत्वाभिमानिनोबृहस्पत्यादयइत्युक्तं ॥ यदप्युक्तं पुष्करांतदेवानांतत्वाभिमानित्वंनकर्मजदेवाना
मिति॥तदप्ययुक्तं पुष्करांतदेवानांतत्वाभिमानित्वेप्रमाणाभावात्॥नचषट्प्रश्नभाष्ये ततःपर्जन्यउद्भूतःस्वाहाऽतोमंत्रदेवता॥
उदकात्मकोबुधस्तस्मादुषानामात्मिकाततः ॥ ततःशनिःपृथिव्यात्माकर्मात्मापुष्करःस्मृतइतिबुधादीनामुदकादितत्वाभिमानि
त्वमुक्तमितिवाच्यं ॥ अंडांतर्वर्त्युदकाभिमानित्वोपपत्त्यांडाद्बहिर्विद्यमानोदकाद्यभिमानित्वाभावात् ॥ अंडाद्बहिर्विद्यमाना
नामेवोदकादीनांमहानहं॥ बुद्धिर्मनःखानिदशमात्राभूतानिपंचचेतितत्वसंख्यानादौतत्वशब्देनव्यवहारात् ॥ षट्प्रश्नभाष्येपि
नामकर्मसमभिव्याहारेणोदकादीनांतत्वरूपत्वाभावात् ॥ किंचमरीच्यादीनामपिदेवशब्दवाच्यत्वाभावेनतत्वाभिमानित्वाभा
वेनचपुष्करावरत्वापातात् ॥ यच्चोक्तंसृष्ट्यादौदेवतांगताइति ॥ तन्न ॥ पर्जन्यादिपुष्करांतानामादिसृष्टावुत्पत्तौमानाभावा
त् ॥ प्रियव्रतादीनामपिमूलरूपेणादिसृष्ट्यंगीकारेबाधकाभावात् ॥ रूपांतरेणभूमावुत्पद्यकर्मणादेवत्वप्राप्तिसंभवाच्च॥ यदप्यु
क्तंप्रियव्रतादीनांदेहलयाभावादिति ॥ तन्न ॥ विशंतियेमनवोराजमुख्यामनुंप्रविश्यात्रगतामहेंद्रमित्यनुव्याख्यानेपृथुप्रिय
व्रतादीनामपिलयोक्तेः ॥ नचवर्णाश्रमाचाररतामनुष्याधर्मंमनुंसोपिसमेतिकालइत्यत्रमनुष्याणांयथाधर्मेप्रवेशमात्रंतथाप्रिय
व्रतादीनामपिप्रवेशमात्रमुक्तमितिवाच्यं ॥ पूर्वत्र भृग्वादयोदक्षमवाप्यतेनप्राप्यैंद्रमेतेनसुपर्णपत्नीमितिभृग्वादीनांलयस्योक्त

त्वेन तथा आकाशउर्वींचगुरुंप्रविश्यतेनैवयातःपुरुहूतदेवमित्युत्तरत्रलयस्यैवोक्तत्वेनसंदंशन्यायेनतन्मध्यपतितानामपिलय
स्यैववक्तव्यत्वात् ॥ नचैवंमनुष्याणामपिधर्मेलयःस्यादितिवाच्यं ॥ सुधासन्न्यायरत्नावल्योरुक्तस्यापवादमाहवर्णाश्रमेतील्य
वतारिकांदत्वा॥एतच्चप्रसंगादुक्तं॥मनुष्योत्तमानामुत्क्रांतिमत्त्वादित्युक्तत्वात् ॥ किंचपर्जन्यादिपुष्करांतानांदेहलयसद्भावेप्र
माणाभावः ॥ नचोत्क्रम्यमानुषामुक्तियांतिदेहक्षयात्सुराइत्यणुभाष्येदेवानांसर्वेषांलयोक्तिरितिवाच्यं ॥ तत्रदेवशब्दस्याजान
जदेवपर्यंतदेवपरत्वेनतदुत्तमकर्मजदेवपरत्वस्यापिसंभवात् ॥ नचतत्रदेवशब्दस्यपुष्करांतदेवमात्रपरत्वमितिवाच्यं ॥ साधका
भावात् ॥ शतस्थदेवमात्रपरत्वमित्यपिवक्तुंशक्यत्वात् ॥ नचप्रियव्रतादीनांस्वायंभुवप्रलयएवदेहनाशात्कथंतेषांप्रलयेदेह
लयइतिवाच्यं ॥ मूलरूपगतदेहस्यप्रलयेलयांगीकारात् ॥ नचतेषांमूलरूपेप्रमाणाभावइतिवाच्यं ॥ तर्हिप्रतिदिनंप्रियव्रतादी
नांभिन्नभिन्नानामेवोत्पत्तिरित्यस्याप्रामाणिकस्यस्वीकारापत्तेः॥यदपिचोक्तंपुष्करांतदेवानामेवसांशजीवत्वंनकर्मजानामिति॥
तदप्यसारं ॥ नदेवानांनदेवीनांसामस्त्येनजनिर्भुवि ॥ अंशांशेनैवजायंतेसर्वेत्वाजानजादयइतिप्रथमतात्पर्येआजानजदेवमा
रभ्यतदवराणामेवानंशत्वस्योक्तत्वेनाजानजदेवोत्तमकर्मजदेवानांसांशत्वेबाधकाभावात् ॥ किंचबृहद्भाष्ये तुंबुरुप्रमुखायेचत
थोर्वश्यादिकाअपीत्यारभ्यकर्मदेवगणा अष्टगंधर्वास्तत्परेशतमिति तुंबुर्वाद्यष्टगंधर्वाणांकर्मजदेवतासाम्यमुक्तं ॥ तस्यैवतुंबुरो
र्निर्णयेंऽशउक्तः ॥ अंशेनपुंस्त्वभावार्थपूर्वदेहेसमास्थितइत्यादिनाशिखंडिदेहप्रवेशार्थं ॥ तथाचतुंबुरुसमानकर्मजदेवानामप्यं
शसिद्धेः ॥ यदप्युक्तंपादमूलमुक्तेःस्वोत्पत्त्यंगसायुज्यमुक्त्यपेक्षयान्यूनत्वमिति॥ तद्युक्तमेव ॥ अथापिपुष्करांतदेवानांस्वोत्प

त्स्यंगानांक्वाप्यनुक्तत्वेनांगसायुज्यमुक्तौमानाभावात् ॥ सूर्येणसहप्रतिसूर्यतयागमनरथावृत्त्यासप्तसमुद्रनिर्माणसप्तद्वीपसप्तसमु
द्राधिपत्यवतांप्रियव्रतादीनामुत्तमत्वेनतदपेक्षयात्यंतावरस्याल्पसामर्थ्यवतःपरीक्षितःपादमूलमुक्तावपितन्न्यायस्यप्रियव्रतादि
ष्वनुचितत्वात् ॥ यच्चोक्तंताभ्यःसहस्रगुणितायशोदानंदगेहिनीत्यत्रभर्तुरधिकत्वंयशोदायाःस्यादिति ॥ तदपिन ॥ सहस्रश
ब्दस्ययथायोग्यबहुगुणपरत्वात् ॥ अन्यथाभवत्पक्षेपिकर्मजदेवानांपुष्करावरत्वेद्विशताधिक्यापत्त्यासहस्रसंख्यायाअप्राप्तेः ॥
तस्मात्कर्मजदेवानांपुष्कराद्युत्तमत्वेनकिंचिद्बाधकं ॥ यच्चोक्तंसाधकाभावादिति ॥ तदप्ययुक्तं ॥ तदन्येतुततोवराः ॥ च्यव
नोचथ्यवैन्याश्वशशिबिंदुश्चहैहयः ॥ तद्वच्चविप्रराजन्यविशेषोत्रापिकश्चन ॥ तद्वत्प्रियव्रतश्चापितदन्याःशतदेवताः ॥ पर्ज
न्यमित्रांतरालेतदन्येतुततोवराइत्यनुव्याख्यानस्य तथापर्जन्यादुत्तमामित्रादवराइतिसुधायाश्चमानत्वात् ॥ अधिकंतुगुरुपा
दकृततारतम्यटीकायांद्रष्टव्यं ॥ यदपिवैवस्वतमनुरपिपुष्कराधमइति ॥ तदपिन ॥ विश्वामित्रःकसूनुवत् ॥ वैवस्वतोमनुश्चे
त्यनुव्याख्यानविरोधप्रसंगात् ॥ नचवैवस्वतोमनुश्चाश्विपश्चादित्यत्रवैवस्वतोमनुश्चाश्विपश्चादित्युत्तरत्रान्वयइतिवाच्यं ॥ वै
वस्वतोमनुश्चकसूनुवदितिसंबंधइतिसुधाविरोधप्रसंगात् ॥ किंचवैवस्वतमनोरश्विपश्चात्तनत्वेपर्जन्याद्यपेक्षयोत्तमत्वापत्त्यापु
ष्करावरत्वालाभात् ॥ नचाश्विपश्चादित्यस्याश्विभ्यामव्यवहितानंतर्यंनविवक्षितं ॥ किंतुव्यवहितानंतर्यं ॥ तथाचपुष्करावर
त्वलाभइतिवाच्यं ॥ असंगतस्यपुष्करावरदेवस्यमध्येकथनेमानाभावात् ॥ अन्यथाऽऽजानजानामपिमध्येकथनप्रसंगात् ॥
किंचगुरूपदेशगम्यतारतम्येमहात्मभिष्टीकाकारैःसम्यगुपपादितेऽनाश्वासेतद्द्रोहप्रसंगः ॥ तदुक्तंकैश्चित् ॥ वैवस्वतोमनुश्चैव

विष्ण्वावेशीततोधिकइतिबृहद्भाष्येवैवस्वतमनोर्विष्ण्वावेशनिमित्ताधिक्योक्तेर्नस्वरूपाधिक्यं ॥ सुधायामपिकर्मजदेवानांविष्ण्वावेशनिबंधनमेवतारतम्यकथनमित्याहुः ॥ तन्न ॥ इंद्रकामादावपिविष्ण्वावेशस्याविशिष्टत्वेनस्वरूपतारतम्यस्यानिर्णयापत्तेरित्यलं ॥ इतितारतम्यप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ उपासनामोक्षसाधनमित्युक्तं ॥ तत्स्वरूपंवक्तुंविभजति ॥ उपासनाचेति ॥ ५०० ॥ तदुक्तमुपासनापादीयानुव्याख्याने ॥ सोपासनाचद्विविधाशास्त्राभ्यासस्वरूपिणी ॥ ध्यानरूपापराचैवतदंगंधारणादिकमिति ॥ तंत्रसारेपि ॥ अपरोक्षदृशिश्चैवश्रवणान्मननादनु ॥ सम्यङ्निश्चिततत्वस्यनिदिध्यासनयाभवेत् ॥ द्विविधासाचसंप्रोक्ताविष्णुशास्त्रावमर्शनं ॥ एकंध्यानंहरेरन्यच्चत्वार्यंगानितत्रचेति ॥ ननुनिदिध्यासनस्यसाक्षादपरोक्षज्ञानसाधनत्वात्कथंशास्त्राभ्यासस्यनिदिध्यासनरूपत्वमित्यतआह ॥ तत्रकेषांचिदिति ॥ ५०१ ॥ तदुक्तंतंत्रसारे ॥ अप्रयत्नासमाधिस्तुदर्शनंचिरयानया ॥ अथवासततंशास्त्रविमर्शेनभविष्यतीति ॥ उपासनापादीयसुधायामपि ॥ शास्त्राभ्यासस्यध्यानांगत्वेपिस्वतंत्रोपासनात्वंचास्ति ॥ ब्रह्मसाक्षात्कारहेतुत्वंचास्ति ॥ ब्रह्मसाक्षात्कारहेतुत्वाच्चित्तवृत्तिनिरोधत्वाच्च ॥ यथोक्तं ॥ अथवासततंशास्त्रविमर्शेनभविष्यतीति ॥ नयचंद्रिकायांशास्त्राभ्यासस्यापरोक्षज्ञानसाधनत्वेतृतीयस्कंधभागवतश्लोकःप्रमाणत्वेनोदाहृतः ॥ पानेनतेदेवकथासुधायाःप्रवृद्धभक्त्याविशदाशयाये ॥ वैराग्यसारंप्रतिलभ्यबोधंयथां

५०० उपासनाचद्विविधा ॥ सततंशास्त्राभ्यासरूपाध्यानरूपाचेति ॥ ५०१ तत्रकेषांचिदधिकारिणांसततंशास्त्रालोडनेनापरोक्षज्ञानंजायते ॥ केषांचिद्ध्यानेन ॥

जसात्वापुरकुंठधिष्ण्यं ॥ तथापरेत्वात्मसमाधियोगबलेनजित्वाप्रकृतिंबलिष्ठां ॥ त्वामेवधीराःपुरुषंविशंतितेषांश्रमःस्यान्न तुसेवयातइति ॥ गीतातात्पर्येपि ॥ अनादियोग्यताभेदात्पुंसांदर्शनसाधनं ॥ नानैवतत्रविष्णोस्तुप्रसादाद्वैष्णवंवपुः ॥ स्वयंविज्ञायतेकिंचिच्छ्रूयतेकिंचिदन्यतः ॥ तथाज्ञात्वाहरिंध्यात्वास्वांतःपश्यंतिकेचन ॥ ऋषयःकेचिद्दषयोनारदाद्याब हिस्त्वपि ॥ देवाविष्णुप्रसादेनलब्धसत्प्रतिभाबलात् ॥ सर्वंक्रमेणविज्ञायप्रतिभास्पष्टताक्रमात् ॥ पश्यंतिबहिरंतश्चवि ष्णुंध्यानमृतेपितु ॥ येषांध्यानमृतेदृष्टिस्तेषांध्यानेपिदर्शनं ॥ स्यादेवसांख्ययोगास्तेदेवाब्रह्माधिकोत्रच ॥ केचित्तुक्षत्रि यवराअश्वमेधादिकर्मभिः ॥ यजंतोभक्तिमंतश्चयज्ञभागार्थमागतं ॥ श्रवणप्रतिभाभ्यांचस्मरंतःपुरुषोत्तमं ॥ पश्यंत्यन्ये तथान्येभ्यःसर्वंश्रुत्वानुमत्यच ॥ उपास्यैवतुपश्यंतिनान्यथातुकथंचन ॥ ऋषीन्राज्ञस्तथारभ्यप्रतिभाभ्यधिकाक्रमात् ॥ या वद्ब्रह्माब्रह्मणस्तुप्रायोनाप्रतिभासितं ॥ विष्णोःप्रीत्यर्थमेवास्यश्रोतव्यंप्रायशोहरेः ॥ अन्येषांश्रवणाज्ज्ञानंक्रमशोमानुषो त्तरं ॥ अत्यल्पप्रतिभातत्वान्मानुषाःश्रुतवेदिनः ॥ सर्वेतेदर्शनात्तस्मात्स्वयोग्यामुक्तिगामिनइति ॥ प्रतिभास्वरूपंतुछांदोग्य भाष्योक्तंबोध्यं ॥ दृष्ट्यधीनास्मृतिश्चेयंप्रतिभास्मृतिसंभवेति ॥ ध्यानस्वरूपमाह ॥ **ध्यानंचेति** ॥ ५०२ ॥ तदुक्तंतंत्रसारे॥ खंडस्मृतिर्धारणास्यादखंडाध्यानमुच्यते ॥ अप्रयत्नासमाधिस्त्विति ॥ नैरंतर्यमनोवृत्तेर्ध्यानमित्युच्यतेबुधैरितिभाष्ये ॥ तदे

५०२ ध्यानंचेतरतिरस्कारपूर्वकभगवद्विषयकाखंडस्मृतिः ॥ तदेवनिदिध्यासनं ॥ तच्चश्रवणमननाभ्यामज्ञानसंशयमिथ्याज्ञाननिरासेनेदमित्थमितिनि श्चयवतोभवति ॥

वनिदिध्यासनमिति ॥ तदुक्तमुपासनापादीयसुधायां ॥ ध्यानसमाध्योरनतिभिन्नत्वाद्ध्यानशब्देनसमाधिरपिगृह्यतइति ॥ मनुष्योत्तममारभ्यब्रह्मपर्यंतमुपासनाप्रकारमाह ॥ **साचोपासनेति** ॥ ५०३ ॥ तदुक्तंभाष्ये ॥ आत्मेत्येवपरंदेवमुपास्यह रिमव्ययं ॥ केचिदत्रैवमुच्यंतेनोत्क्रामंतिकदाचनेति ॥ **सच्चिदानंदइति** ॥ ५०४ ॥ ॐआनंदादयःप्रधानस्येतिसूत्रेमनुष्यो त्तममारभ्यचतुर्गुणोपासनानियमस्योक्त्यासिद्धमेतत् ॥ तदुक्तंनिर्णये ॥ आनंदोज्ञःसदात्मेतिह्युपास्योमानुषैर्हरिरिति ॥ अणुभाष्येपि ॥ सच्चिदानंदआत्मेतिमानुषैस्तुसुरेश्वरैः ॥ यथाक्रमंबहुगुणैर्ब्रह्मणात्वखिलैर्गुणैरिति ॥ अन्येयथाक्रमंचैवमानु षैःकैश्चिदेवत्वितिभाष्येपि ॥ **देवर्ष्यादीनांत्विति** ॥ ५०५ ॥ गुणैःसर्वैरुपास्योसौब्रह्मणापरमेश्वरः ॥ अन्यैर्यथाक्रमं चेतिच ॥ तत्रविशेषंत्वनुपदमेववक्ष्यामः ॥ देवेषुविशेषमाह ॥ **देवेष्विति** ॥ ५०६ ॥ तदुक्तमुपासनापादीयानुव्याख्या ने ॥ ब्रह्मासर्वगुणैश्चैवक्रियासामान्यतश्चगीः ॥ गुणसामान्यतोरुद्रोद्रव्यसामान्यतःपरे ॥ अधिकारविशेषेणभक्तिज्ञानसु खादिभिः ॥ विशेषोदेवतादीनांमोक्षेचैवविशेषतइति ॥ नयचंद्रिकायांतुब्रह्मेत्यादेरयमर्थः ॥ ब्रह्मातुसर्ववेदोदितैःसर्वविशेष

५०३ साचोपासनाआत्मत्वमात्रगुणविशिष्टत्वेनभगवद्विषयाएकगुणोपासकानां ॥ ५०४ सच्चिदानंदआत्मेतिचतुर्गुणविशिष्टभगवद्रूपविषया मनुष्योत्तमानां ॥ ५०५ देवर्ष्यादीनांतुयथायोग्यंबहुगुणविशिष्टव्याप्तभगवद्रूपविषया ॥ ५०६ देवेष्वपिब्रह्मा वेदोक्तानंतगुणक्रियाविशिष्टानंत रूपोपासनांकरोति ॥ सरस्वतीतु क्रियांशेसामान्याकारेणैवोपासनांकरोति ॥ गरुडरुद्रौचगुणक्रिययोःसामान्याकारेणानंतभगवद्रूपोपासनांकुरुतः ॥ इंद्रादयस्तुगुणसामान्यतःक्रियासामान्यतोरूपसामान्यतउपासनांकुर्वंति ॥

सहितैर्गुणक्रियांशाद्यात्मकैःसर्वैर्गुणैःसहितत्वेनविष्णुमुपास्ते ॥ ब्रह्माणीतुतत्रक्रियाणांसामान्यतउपास्तिंकुर्यात् ॥ अन्येषां
विशेषतएव ॥ यथाघटस्रष्टापटस्रष्टेत्यादिविशेषान्विनासर्वस्रष्टेत्यादि ॥ रुद्रोगुणानांसामान्यतउपास्तिंकुर्यात् ॥ यथाघटज्ञ
इत्यादिविशेषान्विनैवसर्वज्ञइत्यादि ॥ किमुतद्रव्याणांक्रियाणांतुविशेषतः ॥ परेपार्वत्यादयोद्रव्याणांभगवद्रूपाणांसामान्य
तउपास्तिंकुर्युः ॥ किमुक्रियाणामित्युक्तं ॥ सुधायांतु ॥ वेदोक्तसमस्तगुणक्रियोपेततयाऽनंतरूपंहरिमुपासितुंब्रह्मैवयो
ग्यइत्यर्थः ॥ सरस्वतीतुक्रियासामान्यतःक्रियासंकोचेनोपास्ते ॥ सकलवेदोक्तगुणोपेततयानंतरूपंहरिमुपास्ते ॥ त्रिवि
क्रमादिक्रियास्तुनित्यविक्रांत्यादिष्वंतर्भावयंतीत्यर्थः ॥ गुणसामान्यतःसमस्तरूपाण्युपास्ते ॥ गुणान्क्रियाश्चसंकोचयती
त्यर्थः ॥ परे शक्रादयः द्रव्याणि रूपाणि गुणक्रियासंकोचस्तुसिद्धएवेति ॥ एवमेवसन्न्यायरत्नावल्यामुक्तं ॥ न्यायविवरणे
ब्रह्मब्रह्माण्योःसमविषमोपासनातत्फलंचोक्तं ॥ यथाशक्तिस्मृतान्धात्रागुणान्विष्णोःसरस्वती ॥ स्मरेत्त्रैविक्रमाद्यास्तुनित्य
विक्रांतिपूर्वकैः ॥ कदाचिल्लोपयेद्देवीस्थानैक्यंनगुणैस्ततः ॥ साम्यंतयोर्यथाविष्णोर्गुणोपासाफलंभवेदिति ॥ अत्रायंवि
शेषः ॥ प्रियशिरस्त्वत्रिविक्रमत्वादिगुणोपासनायोग्यश्चतुर्मुखएव नत्वन्ये ॥ तदुक्तंभाष्ये ॥ फलभेदार्थमुपचयापच
ययोर्भावान्नसर्वेषांप्रियशिरस्त्वादिगुणोपासाप्राप्तिः ॥ नैवसर्वगुणाःसर्वैरुपास्यामुक्तिभेदतः ॥ विरिंचस्यैवयन्मुक्तावानंद
स्यसुपूर्णतेति ॥ ॐप्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौहिभेदइतिसूत्रंच ॥ गुणास्त्रैविक्रमाद्याश्चसंहर्तव्यानसंशयः ॥ विरिंच
स्यैवनान्येषांसहिसर्वगुणाधिकइति ॥ संभृतिद्युव्याप्त्यादिगुणाश्चदेवैरेवोपास्याः ॥ नत्वन्यैः ॥ तदुक्तंभाष्ये ॥ देवादीना

मुपास्यास्तुभृतिव्याप्त्यादयोगुणाः ॥ आनंदाद्यास्तुसर्वेषामन्यथानर्थकृद्भवेदिति ॥ देवादीनामुपासनाप्रकारोदशमतात्पर्यो
क्तोनयचंद्रिकायामुदाहृतः ॥ कामभक्त्याप्सरस्त्रीणामन्येषांनैवकामतः ॥ उपास्यःश्वशुरत्वेनदेवस्त्रीणांजनार्दनः ॥ जार
त्वेनाप्सरस्त्रीणांकासांचिदितियोग्यता ॥ योग्योपासांविनानैवमुक्तिःकस्यापिसेत्स्यति ॥ अयोग्योपासनाकर्तुरनर्थश्चभवि
ष्यति ॥ तस्मात्तुयोग्यतांज्ञात्वाहरेःकार्यमुपासनं ॥ पतित्वेनश्रियोपास्योब्रह्मणामेपितेतिच ॥ पितामहतयान्येषांत्रिदशानां
जनार्दनः ॥ प्रपितामहोमेभगवानितिसर्वजनस्यतु ॥ गुरुःश्रीब्रह्मणोर्विष्णुःसुराणांचगुरोर्गुरुः ॥ मूलभूतगुरुःसर्वजनानां
पुरुषोत्तमः ॥ गुरुर्ब्रह्मास्यजगतोदैवंविष्णुःसनातनः ॥ इत्येवोपासनंकार्यंनान्यथातुकथंचनेति ॥ एवंदेवादीनामुपासनाप्रका
रास्तत्रतत्रोक्ताज्ञातव्याः ॥ ननुदेवादीनामुपासनायोग्यगुणोपदेशःकेनभवतीतिचेन्न ॥ तत्तन्नियतगुरुभिरित्युक्तेः ॥ यद्वा
ऋजूनांप्रतिब्रह्मकल्पमुत्पन्नानामुपदेशकत्वात् ॥ तदुक्तंछांदोग्यभाष्ये ॥ गुह्यादेशाब्रह्मपदेयेयोग्याब्रह्मणासह ॥ सर्वगुह्योपदे
ष्टारःसर्वेषांगुरवोहितइति ॥ पुनःसर्वेषामुपासनार्थंभगवद्रूपविशेषानाह ॥ देहांतर्गतेति ॥ ५०७ ॥ तदुक्तंसूत्रेभाष्येच ॥
ॐप्रज्ञांतरपृथक्त्ववद्दृष्टिश्चतदुक्तमिति ॥ उपासनाभेदवद्दर्शनभेदः ॥ अंतर्दृष्टयोबहिर्दृष्टयोवतारदृष्टयःसर्वदृष्टयइति ॥
देवावावसर्वदृष्टयइत्यादि ॥ ऋषयोंतःप्रकाशादेवावावसर्वप्रकाशामानुषाबहिःप्रकाशाइत्यादि ॥ अग्निप्रतिमयोरिति
॥ ५०८ ॥ अग्नौक्रियावतांविष्णुर्योगिनांहृदयेहरिः ॥ प्रतिमास्वप्रबुद्धानांसर्वत्रविदितात्मनां ॥ केषांचित्सर्वगत्वेनकेषांचिद्धृ

---

५०७ देहांतर्गतबिंबोपासनाकेषांचिदृषीणां ॥ ५०८ अग्निप्रतिमयोरुपासनामनुष्याणां ॥

दयेहरिः ॥ केषांचिद्धहिरेवासावुपास्यःपुरुषोत्तमइतिचभाष्योक्तेः ॥ अत्रापरोक्षज्ञानसाधनस्योक्तत्वेप्युपासनानुसारेणै वज्ञानस्यजायमानत्वादितिभावः ॥ व्याप्तोपासनादेवानामिति ॥ ५०९ ॥ व्याप्तापरोक्षज्ञानस्यवक्ष्यमाणत्वेनतदनुसारे णव्याप्तोपासनायावक्तव्यत्वादित्यर्थः ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐअप्रतीकालंबनान्नयतीतिबादरायणउभयथाचदोषात् ॥ प्र तीकंदेहउद्दिष्टोयेषांतत्रैवदर्शनं ॥ नतुव्याप्ततयाक्वापिप्रतीकालंबनास्तुते ॥ अप्रतीकादेवतास्तुऋषीणांशतमेवच ॥ राज्ञांतुशतमु द्दिष्टंगंधर्वाणांशतंतथा ॥ एतेधिकारिणोव्याप्तदर्शनेन्येनतुक्वचिदिति ॥ पंचमतात्पर्येपि ॥ प्रजापाश्चतथादेवामहाधीकारिणःस्मृ ताः ॥ ऋष्यशीतिस्तथासप्तपितरोप्सरसांशतं ॥ गंधर्वाणांतथेति ॥ नन्वृषीणामेवबिंबोपासनायोग्यत्वेदेवादीनांबिंबोपासनान स्यादित्यतआह ॥ **सर्वैरपीति** ॥ ५१० ॥ तदुक्तंबृहद्भाष्ये ॥ येषांबहिरुपासनेनमोक्षस्तेषामपिहृद्युपासनंकिंचित्कर्तव्यमेव ॥ स्वहृदिस्थेनभगवद्रूपेणविशेषसंबंधदर्शनार्थं ॥ हृद्युपास्यहरिंपुनः ॥ मुक्तिमेत्यथयोबाह्यान्मुक्तिमेष्यतिसोपितु ॥ हृदिकिंचिदुपास्यै वविष्णुंमुक्तिमनुव्रजेदिति ॥ बिंबोपासनंकर्तव्यमित्युक्तंतत्किमित्यपेक्षायामाह ॥ **बिंबरूपंचेति** ॥ ५११ ॥ हृदयेसर्व दाप्राज्ञस्यैवनियामकत्वेनाश्रयतयास्थितेरित्यर्थः ॥ तदुक्तंबृहद्भाष्ये ॥ हृदयेसर्वशोव्यापीप्रादेशःपुरुषोत्तमः ॥ जीवानांस्था नमुद्दिष्टःसर्वदैवसनातनः ॥ हृत्कर्णिकामूलगतःसोंगुष्ठाग्रप्रमाणकः ॥ मूलेशइतिनामास्मिन्सर्वेजीवाःप्रतिष्ठिताः ॥ अंगुष्ठमात्रेपुरु

५०९ व्याप्तोपासनादेवानां ॥ केषांचिदृषीणांगंधर्वाणामप्सरसांच ॥ ५१० सर्वैरपिबिंबरूपोपासनंकर्तव्यमेव ॥ ५११ बिंबरूपंचप्राज्ञ रूपमितिसंप्रदायविदः ॥ तत्त्रिविधं प्रादेशमूलेशाग्रेशभेदात् ॥

षेकर्णिकाग्रस्थितेहरौ ॥ प्रविशंतिसुषुप्तौतुप्रबुध्यंतेततस्तथा ॥ सोयंत्रिरूपोभगवान्हृदयाख्यःप्रकीर्तितइति ॥ केचित्तुबिं बरूपमात्मांतरात्मादिरूपमित्याहुः ॥ बिंबनामकंरूपांतरमित्यन्ये ॥ सर्वेषांप्रादेशाद्युपासनानेत्याह ॥ **हृदयस्थप्रादेशेति** ॥ ५१२ ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ केचित्स्वदेहांतर्हृदयावकाशेप्रादेशमात्रंपुरुषंवसंतं ॥ चतुर्भुजंकंजरथांगशंखगदा धरंधारणयास्मरंतीत्यादि ॥ काठकभाष्येपि देहांगुष्ठमितोदेहेजीवांगुष्ठमितोहृदि ॥ जीवस्यसतुविज्ञेयोजीवाच्छेदेनमुक्तयइति बृहदारण्यकभावबोधेपिप्रादेशाद्युपासकभेदउक्तः ॥ अंगुष्ठमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टइत्यादिकाठकोपनि षत् ॥ ऋजुगणमारभ्यमनुष्योत्तमपर्यंतमुपासनाकालप्रयत्नकालौसंकलय्याह ॥ **ऋजूनामिति** ॥ ५१३ ॥ तदुक्तंचतुर्थस्कंध तात्पर्ये ॥ ऋजवोनामयेदेवायोग्याब्रह्मपदस्यतु ॥ तएवशतजन्मानिविशेषोपासकाहरेः ॥ प्राप्यब्रह्मपदंपश्चाच्छ्रियंप्राप्यानुमो दिताः ॥ तयाततोहरिंयांतिवसंतिहरिसन्निधौ ॥ अनादिकालभक्ताश्चज्ञानिनस्तेनसंशयः ॥ विशिष्टज्ञानभक्त्यादौसर्वजीवनि कायतः ॥ सर्वदापिविशेषेणशतजन्मप्रयत्नतः ॥ स्वपदप्राप्तिरुद्दिष्टाततोमुक्तिरवाप्यते ॥ तथैवचत्वारिंशद्भिःपदंशैवंचजन्म

५१२ हृदयस्थप्रादेशोपासनायोग्याश्चकेचन ॥ हृत्कर्णिकामूलगतांगुष्ठाग्रपरिमाणरूपमूलेशोपासकाश्चकेचन ॥ हृत्कर्णिकाग्रगतांगुष्ठपरिमितभग वद्रूपोपासकाश्चकेचन ॥ ५१३ ऋजूनांशतब्रह्मकल्पउपासनाकालः ॥ रुद्रगरुडवदयोग्ययोस्तुचत्वारिंशद्ब्रह्मकल्पेषुमोक्षप्रयत्नः ॥ शक्रस्यविंशति कल्पेषुप्रयत्नः ॥ सूर्यादीनांदशकल्पेषुप्रयत्नः ॥ रुद्रपदयोग्यस्यसार्धपरार्धस्यत्रिभागकालउपासनाकालः ॥ शक्रपदयोग्यस्यमन्वंतरचतुष्टयमुपासना कालः ॥ सूर्यचंद्रपदयोग्ययोस्तुएकमन्वंतरमुपासनाकालः ॥ अन्येषांत्वेकमन्वंतरएवोपासनाकालाःकतिपयाः ॥

भिः ॥ विंशद्भिरैंद्रंदशभिरन्येषामप्युदीरितमिति ॥ चतुर्थभागवतेपि ॥ स्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिंचतामेतिततःप रंहिमामिति ॥ रुद्रादीनामुपासनाकालेप्रमाणंतुलिंगाह्लातव्यतःपूर्वमित्यादिकर्मक्षयपादीयानुव्याख्यानमुदाहृतंनियतगुरुप्र करणे ॥ इत्युपासनाप्रकरणं ॥ ७ ॥ ७ ॥ ७ ॥ पंचभेदज्ञानंमोक्षसाधनमित्युक्तं ॥ तत्सिंहावलोकनन्यायेनपंचभेदा नाह ॥ पंचभेदास्त्विति ॥ ५१४ ॥ अत्रप्रमाणानितुभेदप्रकरणएवोक्तानि ॥ ननुपंचभेदाइतिकथं ॥ किंप्रतियोगिभेदा द्भेदानांपंचविधत्वमुतप्रतियोगितावच्छेदकभेदात् ॥ नाद्यः ॥ जीवजडानामनंतत्वेनतद्भेदानामनंतत्वापत्तेः ॥ नद्वितीयः ॥ ईश्वरत्वजीवत्वजडत्वानांत्रित्वेनभेदत्रैविध्यापत्तेः ॥ अतएवाधिकरणभेदाद्भेदइतिपरास्तमितिचेत् ॥ उच्यते ॥ प्रतियोगिता वच्छेदकभेदादेवभेदः ॥ नचेश्वरत्वजीवत्वजडत्वरूपप्रतियोगितावच्छेदकानांत्रित्वेनकथंभेदपांचविध्यमितिवाच्यं ॥ तत्तज्जी वत्वतत्तज्जडत्वानामपिप्रतियोगितावच्छेदकत्वेनभेदबाहुल्योपपत्तेः॥नचैवंभेदानामनंतत्वापत्त्यापंचविधत्वंनस्यादितिवाच्यं ॥ प्रतियोगितावच्छेदकानामनंतत्वेपिसंग्राहकतावच्छेदकानांपंचविधत्वेनभेदस्यापिपंचविधत्वोपपत्तेः ॥ तथाहि ॥ जीवेश्वर भेदत्वमेकंसंग्राहकतावच्छेदकं ॥ तेनपरस्परजीवेश्वरप्रतियोगिकानांजीवेश्वराधिकरणकभेदानांसंग्रहः ॥ तथाजीवानांपर स्परभेदत्वमेकंसंग्राहकतावच्छेदकं ॥ तेनजीवपरस्परप्रतियोगिकानांजीवाधिकरणकानांभेदानांसंग्रहः॥ तथाजडेश्वरभेदत्व

५१४ पंचभेदास्तु जीवेशयोर्भेदः जीवानांचपरस्परंभेदः जडेशयोर्भेदः जडानांचपरस्परंभेदः जडजीवयोर्भेदः ॥ एतेपंचभेदाअनादिनित्यामु क्तावप्यनुस्यूताः ॥

मेकंसंग्राहकतावच्छेदकं ॥ तेनजडेश्वराधिकरणकानांजडेश्वरप्रतियोगिकानांभेदानांसंग्रहः ॥ तथापरस्परजडभेदत्वमेकंसंग्रा
हकतावच्छेदकं॥ तेनपरस्परजडप्रतियोगिकानांजडाधिकरणकानांभेदानांसंग्रहः॥ तथाजीवजडभेदत्वमेकंसंग्राहकतावच्छेदक
त्वं ॥ तेनजीवजडाधिकरणकानांजीवजडप्रतियोगिकानांभेदानांसंग्रहः ॥ गत्यंतराभावात् ॥ नचेश्वरत्वजीवत्वजडत्वरूपप्र
तियोगितावच्छेदकत्रयंस्वीकृत्यपंचविधानामपिभेदानांत्रिविधत्वमेवास्त्वितिवाच्यं॥पंचविधत्वेनैवभेदज्ञानस्यमोक्षसाधनतया
निर्णयाद्युक्तेःपंचभेदांश्चविज्ञायेत्यादिनेत्यलं ॥ ध ॥ ध ॥ ध ॥ अत्रवैराग्याद्युपासनांतानिसाधनानिप्राधान्येनोक्तानि ॥
एतद्व्यतिरिक्तान्यपिसाधनानिहरिस्मरणकीर्तनजपार्चनद्वादश्यादिव्रतादीनिसहस्रशःसंति ॥ तान्यपिभक्त्यादिद्वारामोक्षसा
धनानि ॥ अत्रोक्तान्यपिकानिचित्साधनानिभक्त्यादिद्वारैवमोक्षसाधनानि ॥ तदुक्तंबृहद्भाष्ये ॥ ध्यानंचगुरुशिश्रूषानित्य
नैमित्तिकाःक्रियाः ॥ तीर्थदानजपाद्याश्चस्वाध्यायोहरिकीर्तनं ॥ द्वादश्यादिव्रतंचैवतुलस्याद्यैरथार्चनं ॥ सर्वभक्त्यर्थमुद्दिष्टं
निष्फलंतुतयाविना ॥ विष्णुभक्तियुतोनित्यंयातिनान्यःकथंचन ॥ तुलापुरुषदानाद्यैरश्वमेधादिभिर्मखैः ॥ वाराणसीप्रया
गादितीर्थस्नानादिभिःप्रिये॥गयाश्राद्धादिभिःपित्र्यैर्वेदपाठादिभिर्जपैः॥तपोभिरुग्रैर्नियमैर्यमैर्भूतदयादिभिः ॥ गुरुशिश्रूषणैः
सत्यैर्धर्मैर्वर्णाश्रमोचितैः ॥ ज्ञानध्यानादिभिःसम्यक्करितैर्जन्मजन्मनि ॥ नयांतितत्परंश्रेयोविष्णुंसर्वेश्वरेश्वरं ॥ सर्वभावैरना
श्रित्यपुराणपुरुषोत्तममिति॥ निर्णयेपि ॥ दानतीर्थतपोयज्ञपूर्वाःसर्वेपिसर्वदा॥ अंगानिहरिसेवायांभक्तिस्त्वेकाविमुक्तयइति॥
तंत्रसारेतुव्याख्यानहरिपूजयोःसाधनेषुप्राधान्यमुक्तं ॥ यमश्चनियमश्चासौप्राणायामइतीरितः ॥ अहिंसासत्यमस्तेयंब्रह्मच

र्यापरिग्रहौ ॥ यमःशौचंतपस्तुष्टिःस्वाध्यायोहरिपूजनं ॥ नियमावीरपद्मेचस्वस्तिकाद्यानिचासनं ॥ रेचकःपूरकश्चैवकुंभकश्च त्रिधास्मृतः ॥ प्राणायामःस्मृतिंविष्णोर्विनानियमउच्यते ॥ अधीतिःस्मृतियुक्तातुनिदिध्यासनमेवहि ॥ आसाशौचंप्राणय मोनिष्परिग्रहपूर्वकाः ॥ तपआद्याःक्रमात्सर्वेउत्तरोत्तरतोधिकाः ॥ सर्वस्माच्छ्रवणाद्यास्तुमुख्यामुक्तिप्रसाधने ॥ अज्ञस्यश्रव णंश्रेष्ठमयुक्तेर्मननंतथा ॥ ध्यानंनिश्चिततत्वस्यविष्णुशास्त्रावमर्शनं ॥ वरंदशगुणंतस्माद्व्याख्यैकस्यशतोत्तरा ॥ अपरोक्षदृशाप्ये षाकर्तव्याविष्णुतुष्टिदा ॥ शौचासनेत्वंगमात्रंनपृथग्धर्मसाधने ॥ प्राणायामादयस्तुष्टिपर्यंताद्विगुणाधिकाः ॥ स्वाध्यायोतः कोटिगुणस्ततोनंतगुणाहरेः ॥ पूजातत्रिगुणंध्यानमितिधर्मक्रमःस्मृतइति ॥ ऋग्भाष्येतु ॥ स्वाध्यायस्तत्वविज्ञानंविष्णुभक्ति र्विरागता ॥ निषिद्धकर्मसंत्यागोविहितस्यसदाक्रिया ॥ सदाविष्णुस्मृतिश्चैवकेवलंमोक्षसाधनं ॥ एतैर्विनानमोक्षःस्याद्वेदैतै रपिध्रुवं ॥ स्वाध्यायेनैवमोक्षःस्याद्विरक्तस्यहरिस्मृतेः ॥ जप्येनैवतुसंसिद्धेद्ब्राह्मणोनात्रसंशयः ॥ कुर्यादन्यन्नवाकुर्यान्मैत्रो ब्राह्मणउच्यते ॥ तस्मान्नित्यंहरिंध्यायन्कुर्यात्स्वाध्यायमंजसा ॥ स्वाध्यायात्तुप्रवचनेसहस्रगुणितंफलं ॥ अर्थद्रष्टुःकोटिगुणं ततोनंतंनियामके ॥ तर्कागमाभ्यांनियतिंयःकरोत्यधिकंततः ॥ पूर्णवेदाखिलद्रष्टुर्ब्रह्मणःफलमुच्यतइति ॥ तैत्तिरीयभाष्ये व्याख्यानस्यप्राधान्यमुक्तं ॥ सम्यग्ज्ञात्वातुयोविष्णुंव्याख्यायीतजपेतच ॥ नतस्यकिंचिदकृतंकर्तव्यंमुच्यतेचसइति ॥ भाष्ये पि ॥ श्रवणंमननंचैवध्यानंभक्तिस्तथैवच ॥ साधनंज्ञानसंपत्तौप्रधानंनान्यदिष्यतइति ॥ अत्रायंविवेकः ॥ भक्तिप्रचुराःकेच न ॥ ज्ञानप्रचुराःकेचन ॥ कर्मप्रचुराःकेचन ॥ शास्त्रावमर्शप्रचुराःकेचन ॥ तत्रप्रमाणंतुगीतातात्पर्यैकादशतात्पर्ययोरुक्तं ॥

अतस्तत्तदधिकार्यपेक्षयातत्रतत्रतत्तदाधिक्योक्तिः ॥ सर्वथासर्वेषामपरोक्षज्ञानमेवमोक्षसाधनं ॥ तदुक्तंगीताभाष्ये ॥ निवृ त्तादीनिकर्माणिह्यपरोक्षेशदृष्टये ॥ अपरोक्षेशदृष्टिस्तुमुक्तौकिंचिन्नमार्गते ॥ सर्वंतदंतराधायमुक्तयेसाधनंभवेत् ॥ नकिंचिदं तराधायनिर्वाणायापरोक्षदृगिति ॥ इतिसाधनव्यवस्था ॥ ॐ ॥ ॐ ॥ ॐ ॥ यदर्थंसाधनान्युक्तानितदपरोक्षज्ञा नमेतत्साधनसंपत्त्याजायतइत्याह ॥ एतत्साधनेति ॥ ५१५ ॥ यथायोग्यमित्युक्तमेवविवृणोति ॥ तत्रमनुष्येति ॥ ५१६ ॥ तदुक्तंतैत्तिरीयभाष्ये ॥ विद्युद्वन्मानुषाविद्युःसूर्यमंडलमत्सुराः ॥ प्रतिबिंबवच्चगिरिशोब्रह्मैनंपश्यतिस्फुटं ॥ ब्रह्माहिस्थिर चिद्रूपोबहुलात्माविशेषतः ॥ अन्येक्रमादबहुलास्तथाचंचलतेजसः ॥ तस्मात्सम्यङ्पश्यंतिहरिंब्रह्मातुपश्यतीति ॥ व्या प्तोपासकानांव्याप्तभगवदपरोक्षज्ञानंयोग्यताक्रमेणजायतइत्याह ॥ व्याप्तोपासकानांकेषांचिदिति ॥ तदुक्तंज्ञानपादीया नुव्याख्याने ॥ ब्रह्मातुसर्वगंपश्येद्गुणानप्यन्यतोधिकं ॥ नतुसर्वेषुकालेषुतथापश्यत्यमुक्तिगः ॥ मुक्तस्तुसर्वदापश्येत्स र्वगत्वेनचापितु ॥ नरमावद्विशेषाणांदर्शनंशक्नुयात्क्वचित् ॥ स्वात्मानमन्यच्चसदाविशेषैरखिलैरपि ॥ पश्यत्यंजस्तथा वाणीविशेषांस्तावतोनतु ॥ त्रैगुण्यात्परतःपश्येद्व्याप्तंशतगुणंहरिं ॥ गिरिशोगरुडश्चैवतमोमात्रगतंहरिं ॥ पश्येद्विशे षानपिहिवाणीदृष्टान्नपश्यति ॥ उमासुपर्णीचमहत्तत्वंयावत्प्रपश्यति ॥ रुद्रदृष्टान्विशेषांश्चनैवपश्येत्कदाचन ॥ स्वरू

५१५ एतत्साधनसंपत्त्याब्रह्मादिमानुषांतमपरोक्षज्ञानंयथायोग्यंजायते ॥ ५१६ तत्रमनुष्योत्तमानांविद्युद्वद्ब्रह्मापरोक्षज्ञानं ॥ सूर्यमंडलवत्तेजः पुंजत्वेनभगवद्विषयमपरोक्षज्ञानंदेवानां ॥ प्रतिबिंबवद्गरुडरुद्रयोः ॥

पमन्यरूपंचमुक्तादेवाःसमस्तशः ॥ जानंतींद्रश्चकामश्चब्रह्मयावदहंकृतिः ॥ पश्यतोमनुदक्षाद्याबुद्धितत्वस्थितंहरिं ॥ प
श्यंतिसोमसूर्यौतुमनःस्थंपरमेश्वरं ॥ अन्येभूतस्थितंविष्णुंदेवाःपश्यंतिसर्वदा ॥ अन्येचैवयथायोगमंडांतर्वर्तिनंहरिं ॥ श्वे
तद्वीपपतिंचैवहृद्येवान्येतुकेचन ॥ कदाचिदेवतत्रापिकिंचित्पश्यंतिकेशवमिति ॥ सन्न्यायरत्नावल्यामिदंव्याख्यातं ॥ त
थाहि ॥ ब्रह्माजगदंतर्बहिःस्थितंविष्णुमव्यवच्छेदेनपश्यति ॥ सरस्वतीतुपंचाशत्कोटिविस्तीर्णब्रह्मांडपरिमितदेशमारभ्य
महदाद्यावरणरूपात्रैगुण्यात्परतःशतोत्तरपरिमितदेशपर्यंतमेवस्थितंविष्णुंपश्यति ॥ गिरिशगरुडौतुमहत्तत्वस्यावरणेनत
द्दशोत्तरेणतमोगुणेनपरिमितदेशपर्यंतमेवस्थितंविष्णुंपश्यतः ॥ उमासौपर्ण्यौतुतमोगुणात्परिणामतोदशगुणन्यूनेनाहंकारे
णपरिमितदेशपर्यंतमेवस्थितंविष्णुंपश्यतः ॥ मनुदक्षबृहस्पत्यादयस्त्वहंकारात्परतःपरिमाणहीनेनबुद्धितत्वेनपरिमितदेशप
र्यंतमेवस्थितंविष्णुंपश्यंति ॥ सोमसूर्यौतुबुद्धितत्वात्परिमाणहीनेनमनस्तत्वेनपरिमितदेशपर्यंतमेवस्थितंविष्णुंपश्यतः ॥ व
रुणादयस्त्वाकाशवाय्वादिभूतैःक्रमेणपरिणामतोदशहीनैःपरिमितदेशपर्यंतमेवस्थितंविष्णुंयोग्यतानुसारेणपश्यंतीति ॥ ए
वमेवनयचंद्रिकायामप्युक्तं ॥ ब्रह्मादीनांयोग्यापरोक्षज्ञानंकदोत्पद्यतइत्याकांक्षायामाह ॥ ब्रह्मणइति ॥ ५१७ ॥

---

५१७ ब्रह्मणस्तुयावदवयवविशिष्टत्वेनस्पष्टंभगवदपरोक्षज्ञानं ॥ व्याप्तोपासकानांकेषांचिद्ब्रह्मांडांतर्गततन्मात्रपरिमितभगवद्रूपापरोक्षज्ञानं ॥ सू
र्यवराणांदेवानांब्रह्मांडाद्बहिरपिपंचभूतपर्यंतंस्थितभगवद्रूपापरोक्षज्ञानं ॥ चंद्रसूर्यौतुमनस्तत्वपर्यंतंव्याप्तभगवद्रूपंपश्यतः ॥ उमासौपर्ण्यौमहत्तत्वपर्यंतं
व्याप्तरूपंपश्यतः ॥ गिरिशगरुडौतमोगुणपर्यंतंव्याप्तभगवद्रूपंपश्यतः ॥ वाणींत्रैगुण्यात्परतःशतगुणितंव्याप्तरूपंपश्यति ॥ ब्रह्मातुयावदव्याकृताका

तदुक्तमेकादशस्कंधतात्पर्ये ॥ शतजन्मसुपूर्वंतुज्ञानोदयउदीर्यते ॥ आपरोक्ष्येणपारोक्ष्यात्पूर्णज्ञानंसदैवत्विति ॥ रुद्रादीनांतुवक्ष्यमाणप्रमाणबलेनपंचाशद्ब्रह्मकल्पविंशतिब्रह्मकल्पादिक्रमेणप्रारब्धफलोक्त्या पंचाशद्ब्रह्मकल्पात्पूर्वमित्यादिक्रमेणापरोक्षज्ञानोत्पत्तेःसिद्धत्वादितिभावः ॥ जायमानमपरोक्षज्ञानंसर्वेषांस्वस्वरूपविषयकंस्वोत्तमदेवतारूपबिंबविषयकंचजायते ॥ तदुक्तमेकादशतात्पर्ये ॥ समाधियोगेसंपूर्णेहृदिपश्यंतिकेशवं ॥ जीवंतत्प्रतिबिंबंचतेनैवसहसंस्थितं ॥ तदाधारंतदंतःस्थंतेनैवसदृशंतदेति ॥ तृतीयतात्पर्येपि ॥ शेषस्यप्रतिबिंबास्तुदेवाःशेषश्चब्रह्मणः ॥ सपरब्रह्मणश्चैवतेस्वबिंबप्रदर्शकाः ॥ ततःस्वबिंबद्वारेणपरमात्मप्रदर्शनमिति ॥ अपरोक्षज्ञानंचस्वरूपभूतं ॥ तस्यसर्वदासत्त्वेनोक्तसाधनसाध्यत्वाभावात् ॥ किंतुमनोरूपेंद्रियेणपरमात्मविषयकमंतःकरणपरिणामरूपंप्राकृतमित्याह ॥ **अपरोक्षज्ञानंचेति** ॥ ५१८ ॥ मनःपरिणामरूपंमनःकरणंचेत्यर्थः ॥ एषोणुरात्माचेतसावेदितव्यः ॥ दृश्यतेत्वग्र्यया बुद्ध्या मनसैवेदमाप्तव्यमित्यादिश्रुतिभिर्मनोरूपेंद्रियजन्यत्वसिद्धेः ॥ निदिध्यासनसंस्कृतमनसाऽपरोक्षधीसंभवादितिन्यायामृतोक्तेः ॥ नचकेषांचिदवतारदर्शनेनमोक्षोक्तेस्तद्दर्शनंचाक्षुषमितिवाच्यं ॥ ज्ञानदृष्ट्यैवावतारदर्शनस्यमोक्षसाधनत्वेनबाह्येंद्रियजन्यज्ञानस्यासाधनत्वा

शंव्याप्तभगवद्रूपंपश्यति ॥ ब्रह्मणःशतब्रह्मकल्पात्पूर्वंयोग्यापरोक्षज्ञानंजायते ॥ पंचाशद्ब्रह्मकल्पात्पूर्वंशिवगरुडपदयोग्ययोः ॥ इंद्रकामयोर्विंशतिब्रह्मकल्पात्पूर्वमपरोक्षज्ञानं ॥ सूर्यादीनांतुदशब्रह्मकल्पात्पूर्वमपरोक्षज्ञानंजायते ॥ अन्येषामेकब्रह्मकल्पएवज्ञानंजायते ॥ ५१८ अपरोक्षज्ञानंच मानसं ॥

त् ॥ तदुक्तंकाठकभाष्ये ॥ प्रादुर्भावानपियदाज्ञानदृष्ट्यैवपश्यति ॥ तदैवमुच्यतेजीवोनदुष्टैरिंद्रियैःक्वचिदिति ॥ किंच
व्याप्तोपासकानांव्याप्तभगवदपरोक्षज्ञानंमनसैवेत्यंगीकर्तव्यं ॥ नहिचक्षुषोयावद्ब्रह्मांडांतर्बहिर्गतभगवद्ग्रहणेसामर्थ्यमस्ति ॥
नचमनसोबहिरस्वातंत्र्यान्मनसापितदपरोक्षज्ञानंनस्यादितिवाच्यं ॥ योगप्रभावलब्धातिशयेनमनसाबाह्यार्थापरोक्षज्ञानसं
भवात् ॥ नचार्जुनादीनांदिव्यंददामितेचक्षुरित्युक्तेश्चक्षुरिंद्रियेणैवविश्वरूपदर्शनमितिवाच्यं ॥ नहिचक्षुषापरमात्मज्ञानमेव
नास्तीतिब्रूमः ॥ किंतुमोचकापरोक्षज्ञानंमनसैवेत्यंगीकारात् ॥ अर्जुनादीनांचजातापरोक्षत्वेनविश्वरूपदर्शनस्यमोचकत्वाभावा
त् ॥ अपरोक्षज्ञानस्यांतःकरणपरिणामरूपत्वेप्रमाणंत्वेकादशस्कंधतात्पर्यं ॥ प्राकृतांतःकरणजंज्ञानमस्त्रंसृतिच्छिदं ॥ तदेव
तेनसंछेद्यंचित्तंप्रकृतिसंभवं ॥ तेनैवसहसंत्याज्यंनैवपूर्वंकथंचन ॥ ज्ञानंप्रकृतिजंचापिमूलनाशेविनश्यति ॥ ततःपरंस्वरूपे
णज्ञानेनैवजनार्दनं ॥ वेत्तिमुक्तस्तथात्मानंजीवानन्यांश्चसर्वशइति ॥ तथाज्ञानस्वरूपस्यजीवस्यकथंज्ञानोत्पादनमित्याशंक्य
तत्रैवोक्तं ॥ स्वरूपभूतंज्ञानंतुसदाजीवस्यविष्णुना ॥ नियतंप्राकृतंज्ञानंभक्त्यातेनैवदीयतइति ॥ चतुर्थतात्पर्येपि ॥ अपरो
क्षतयावृत्तिज्ञानेभेदनिरीक्षणं ॥ स्वरूपज्ञानसंस्थित्याज्ञानत्यागउदीर्यते ॥ स्वरूपज्ञानतःसम्यग्रतिर्विष्णुकथासुचेति ॥ ६ ॥
॥ ७ ॥ ७ ॥ अपरोक्षज्ञानप्रसंगाद्देवर्ष्यादीनामणिमाद्यष्टैश्वर्यंज्ञानसाध्यमित्याह ॥ **अणिमाद्यष्टैश्वर्यंचेति** ॥ ५१९ ॥ अणि ॥१४५॥
मामहिमाचैवलघिमागरिमातथा ॥ प्राप्तिःप्राकाश्यमीशत्वंवशित्वंचाष्टभूतयइति ॥ तेचपरमात्मनिनिरवधिकाःब्रह्मादिषुच

५१९ अणिमाद्यष्टैश्वर्यंचदेवादीनामपरोक्षज्ञानजन्यं ॥

तारतम्येनसंति ॥ तदुक्तमेकादशस्कंधतात्पर्ये ॥ सर्वाधिकाअणीमाद्याविष्णोर्नान्यस्यकस्यचित् ॥ स्वाभाविकाविरिं
चस्यमत्प्रसादात्पराधिकाइति ॥ अणिमादिस्वरूपमुक्तमेकादशतात्पर्ये ॥ चक्षुर्दृश्येष्वणुत्वंतुअणिमासंप्रकीर्तितः ॥ महिमा
चापिसंप्रोक्तस्त्रिलोकांतरपूरणात् ॥ चक्षुर्दृश्यैर्विवाह्यत्वंलघिमासंप्रकीर्तितः ॥ त्रिलोकसमभारस्तुगरिमाचप्रकीर्तितः ॥ पूर्व
शक्तेःकोटिगुणशक्त्युद्रेकस्तथेशता ॥ भुविस्थैःप्राणिभिःप्रोक्तकरणंचापिकीर्त्यते ॥ आज्ञाप्रतिहतिर्ब्रह्मादर्वागस्त्रविघातनं ॥
विनामहातपस्वींश्चशापाप्रतिहतिस्तथा ॥ अपराजयोमनुष्येभ्योवशित्वंचाप्यलोलता ॥ दाहादिसहनंचापिप्रतिस्तंभइतीर्य
ते ॥ श्रुतेषुतुयथायोगंक्षिप्रग्रहणमेवतु ॥ उक्तंप्राकाश्यमन्येषांदेवानामश्रुतेष्वपि ॥ ऋषीणांमिश्रभावेनभासतेकिंचिदश्रुतं ॥
प्राकाश्यंसर्ववेदादिज्ञानमेवविदोविदुः ॥ सहस्रयोजनानांतुदूरदर्शनमिष्यते ॥ दूरश्रवणमप्येवतस्मिन्नेवयुगेस्थिते ॥ वेदादि
कंविनाप्रोक्तात्रिकालज्ञानिताबुधैः ॥ शरीरस्थंविनादेहेपरचित्ताद्यभिज्ञता ॥ अन्येंद्रियैर्दर्शनादियथासंकल्पवेगिता ॥ प्राप्ति
रित्युच्यतेसद्भिःस्वमनःसमवेगिता ॥ मनोजवइतिप्रोक्तःपश्वाद्याकारतातथा ॥ कामरूपत्वमुद्दिष्टंस्वदेहात्यागतःपरे ॥ परकाय
प्रवेशःस्याद्युगादर्वाक्तनास्मृता ॥ स्वच्छंदमृत्युतादेवैःक्रीडाचेंद्रादिभिर्विना ॥ प्राकाम्यमप्यतिरिक्तमैश्वर्यंज्ञेयं ॥ यादृशानंद
कामःस्यात्तादृशानंदसंभवः ॥ भोगान्विनैवप्राकाम्यमणिमादेःपृथक्तइति ॥ तमोयोग्यानांनसज्जीववदपरोक्षज्ञानमित्याह ॥
तमोयोग्यानांत्विति ॥५२०॥ तर्हितेषांकथंतमःप्राप्तिरित्यतआह ॥ **किंत्विति** ॥५२१॥ अत्रप्रमाणानितुपूर्वमेवोक्तानि ॥

५२० तमोयोग्यानांतुनापरोक्षं ॥ ५२१ किंतुद्वेषपरिपाकएवतमस्साधनं ॥

तमःसाधनान्याह ॥ तत्साधनानित्विति ॥५२२॥ विषयलोलतेति ॥ निरामिणोरिपवोन्नेषुजागृधुरितिश्रुतेः ॥ मोघाशामोघकर्माणोमोघज्ञानाविचेतसः ॥ राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताइत्यादिगीतोक्तेः ॥ साधनांतरमाह ॥ त्रिविधइति ॥ तदुक्तंबृहद्भाष्ये ॥ स्वात्मोत्तमेषुविद्वेषात्तमोनियमतोव्रजेत् ॥ गुणानामल्पताज्ञानंतत्स्त्रीरागस्तथैवच ॥ तत्प्रतीपेचयाबुद्धिस्त्रिविधोद्वेषउच्यतइति ॥ अतएवकल्यादिदैत्यानांवाय्वादिदेवेषुतदवतारहनुमद्भीमादिषुचप्रतीपबुद्धिर्गुणादिदूषणंचनिर्णयाद्युक्तंबोध्यं ॥ तथाजरासंधशिशुपालादीनांरुक्मिणीकामना दुर्योधनदुःशासनकीचकादीनांद्रौपदीकामनाचनिर्णयोक्ताद्रष्टव्या ॥ देवतादिवनिताकामनायास्तमःसाधनत्वमेकादशतात्पर्यएवोक्तं ॥ महतांवनिताकामःपतत्यंधेतमस्यलं ॥ अन्यत्रनिरयंयातिदुःखवांत्स्याद्विपर्ययइति ॥ ननुब्रह्मादिदेवानांकथंदैत्यगुरुत्वंविद्योपदेष्टृत्वाभावादितिचेन्न ॥ विरोचनादिदैत्यानांविरिंचशिष्यत्वस्यछांदोग्यादावुक्तेः ॥ रुद्रस्यशुक्रादेश्चसर्वदैत्यगुरुत्वात् ॥ दुर्वाससोदुर्योधनगुरुत्वात् ॥ बलरामस्यापिदुर्योधनगुरुत्वादित्यादिबोध्यं ॥ साधनांतरमाह ॥ नवविधेति ॥ तदुक्तंनिर्णये ॥ जीवाभेदोनिर्गुणत्वमपूर्णगुणतातथा ॥ साम्याधिक्येतदन्येषांभेदस्तद्गतएवच ॥ प्रादुर्भावविपर्यासस्तद्भक्तद्वेषएवच ॥ तत्प्रमाणस्यनिंदाचद्वेषाएतेखिलामताइति ॥ अत्रभक्तद्वेषस्यहरिद्वेषांतर्भूतत्वेपि तस्यबहुविधत्वप्रदर्शनायगुरुत्वरूपप्रकारभेदेनवापृथगुक्तिः ॥ ननुमायावादिनांजीवब्रह्माभेदवादित्वेनब्रह्मसाम्याधिक्यज्ञानानुपपत्तिः ॥ जीवेश्वरभेदवादिनांतार्किकरामानुजशैवादीनांभेदवादित्वेनब्रह्माभेदज्ञानानुपपत्तिः ॥ नचैकैकस्यैवद्वेषस्य ॥१४६॥

५२२ तत्साधनानितु विषयलोलता त्रिविधगुरुद्वेषः नवविधहरिद्वेषः ॥

तमःसाधनत्वं ॥ नसर्वेषामितिवाच्यं ॥ नवविधभक्तिष्वपितथात्वापत्तेरितिचेन्न ॥ मायिनांरामकृष्णादिरूपेषुसाम्याधिक्य ज्ञानसद्भावात् ॥ तार्किकादीनामपिव्यासादिरूपेष्वयंकश्चनऋषिरितिजीवाभेदभ्रांतिसद्भावादिति ॥ सृष्ट्यादिज्ञानांतानांपर मात्मात्माधीनत्वमुक्तं ॥ तदुपसंहरति ॥ **एवमिति** ॥ ५२३ ॥ अज्ञानमपिपरमात्माधीनमित्याह ॥ **अज्ञानमिति** ॥५२४॥ अत्रप्रमाणंतुपूर्वमेवोक्तं ॥ ७ ॥ ७ ॥ ७ ॥ इदानींबंधस्यपरमात्माधीनत्वमाह ॥ **बंधोपीति** ॥ ५२५ ॥ केतेबंधाजीवस्येत्या कांक्षायामाह ॥ **ईश्वरेच्छेत्यादिना** ॥ ५२६ ॥ तदुक्तंद्वितीयतात्पर्ये ॥ अशरीरस्यजीवस्यशरीरोत्पत्तिकारणं ॥ ईश्वरेच्छा प्राथमिकीतांविनानहिकिंचन ॥ द्वितीयाप्रकृतिःप्रोक्तातद्रूपाहिगुणास्त्रयः ॥ तेषांसंपातजोभावोममाहमितियामतिः ॥ देहा त्परस्यदेहित्वमहंभावमृतेकुतइति ॥ मांडूकभाष्येपि ॥ अनादिमाययाविष्णोरिच्छयास्वापितोयदा ॥ तयाप्रबोधमायाति तदाविष्णुंप्रपश्यतीति ॥ अविद्याया आवरणत्वमुक्तमविद्याप्रकरणे ॥ गीतायामपि ॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवइति ॥ कामकर्मणोपिबंधकत्वं ॥ कर्मणाबध्यतेजंतुर्विद्ययाचविमुच्यतइत्युक्तेः ॥ समयपादीयानुव्याख्यानेपि ॥ अनादिकर्मणाबद्धो जीवःसंसारमंडले ॥ वासुदेवेच्छयानित्यंभ्रमतीतिहितद्वचइति ॥ गीताभाष्येतुयथोल्बेनावृत्यबद्धोभवतिगर्भस्तथाकामेनजी वइतिकामस्यैवबंधकत्वमुक्तंतच्चकाम्यकर्मणोमूलकारणत्वाभिप्रायेण॥ लिंगशरीरस्वरूपमुत्तरत्रवक्ष्यते॥ त्रिगुणात्मकंमनइति ॥

---

५२३ एवंज्ञानस्यपरमात्माधीनत्वं ॥ इतिज्ञानप्रकरणं ॥ ५२४ ताथाऽज्ञानमपिपरमात्माधीनं ॥ ५२५ बंधोपिजीवस्यपरमात्माधीनः ॥
५२६ बंधास्तु इश्वरेच्छाऽविद्याकामकर्मलिंगशरीरंत्रिगुणात्मकंमनःस्थूलशरीरमित्यादि ॥

मनएवमनुष्याणांकारणंबंधमोक्षयोरित्याद्युक्तेः॥ भक्तिपादीयानुव्याख्यानेपि॥ त्रिगुणात्मकंमनोस्त्येवयावन्मुक्तिःसदातनं॥ सूक्ष्मत्वेनलयेसच्चप्राकृतैरुपचीयते॥ सृष्टिकालेयदातन्नकुतःसंसारसंस्थितिरिरिति॥ स्थूलशरीरस्यनानाविधपुण्यपापजनकत्वेनबंधकत्वंप्रत्यक्षसिद्धमितिभावः॥ प्रकृतप्रमेयमुपसंहरति॥ **एवंचेति** ॥ ५२७॥छ॥छ॥छ॥ इतिबंधप्रकरणं॥छ॥छ॥छ॥ इदानीमवशिष्टस्यमोक्षस्यपरमात्माधीनत्वमुपपादयति॥ **तन्मोक्षोपीति** ॥ ५२८॥ जीवानांबंधान्मोक्षोपीत्यर्थः॥ बंधकोभवपाशेनभवपाशाच्चमोचकइत्याद्युक्तेः॥ कथंतस्यमोचकत्वमित्याकांक्षायांतदुपपादयति॥ **तथाहीति** ॥ ५२९॥ परमभक्तिर्जायतइति॥ स्वोदयात्फलदंज्ञानमादेहंकर्मवारवेरितिन्यायविवरणोक्तेरितिभावः॥ परमभक्तित्वरूपमुक्तंजिज्ञासाधिकरणसुधायां॥ परमेश्वरभक्तिर्नामनिरवधिकानंतानवद्यकल्याणगुणत्वज्ञानपूर्वकःस्वात्मात्मीयसमस्तवस्तुभ्योनेकगुणाधिकोंतरायसहस्रेणाप्यप्रतिबद्धोनिरंतरप्रेमप्रवाहइति॥ नचासौतत्साक्षात्कारमंतरेणोत्पद्यतइतिच॥ ततोत्यर्थप्रसादइति॥ जिज्ञासोत्थज्ञानजात्तत्प्रसाददेवमुच्यतइतिजिज्ञासाधिकरणानुव्याख्यानोक्तेः॥ यस्यप्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यतेनापरेणेतिश्रुतेः॥ भाष्येपि॥ प्रसादात्त्वधमाद्विष्णोःस्वर्गलोकःप्रकीर्तितः॥ मध्यमाज्जनलोकादिरुत्तमस्त्वेवमुक्तिदइति॥ अत्रपरमात्मप्रसादानामुत्तमत्वादिकंतुफलोत्तमत्वादिनोपचारात्॥ प्रसादोनामेच्छाविशेषोगुणांतरंवेतितत्रैवसुधाया ॥१४७॥

५२७ एवंचसृष्ट्याद्योबंधांताःपरमात्माधीनाः॥ ५२८ तन्मोक्षोपिपरमात्माधीनः॥ ५२९ तथाहि अपरोक्षज्ञानानंतरंपरमभक्तिर्जायते॥ ततोत्यर्थप्रसादः॥

मुक्तं॥ परमभक्तिप्रसादादीनांमोक्षसाधनत्वमुक्तंसुधायां॥ अतोजिज्ञासानिदिध्यासनपरमेश्वरानुग्रहतद्दर्शनपरमभक्तिपरमानुग्रहद्वारामोक्षसाधनत्वात्कर्तव्येति॥ **तस्मादिति**॥५३०॥अपरोक्षज्ञानादेःसकाशादित्यर्थः॥नन्वज्ञानादिबंधस्यजीवाश्रितत्वेऽपरोक्षज्ञानस्यांतःकरणपरिणामरूपत्वेनांतःकरणवृत्तित्वात्कथंतयोर्निवर्त्यनिवर्तकभावः॥ समानाधिकरणत्वाभावादितिचेन्न॥ अंतःकरणस्यापिजीवाश्रितत्वेनापरोक्षज्ञानात्मनापरिणतस्यापिजीवसंबंधसंभवात्॥ यथातप्तायःपिंडसंबद्धाग्नेःपिंडसंबद्धवस्त्रादिदाहकत्वंतद्वत्॥ तदुक्तंप्रथमस्कंधतात्पर्ये॥ प्रकृतिंस्वात्मसंश्लिष्टांगुणान्सत्वादिकानपि॥ कर्माणिसूक्ष्मदेहंचजायमानाहरेर्दृशिः॥ दहेत्तथापिसादग्धेंधनवच्चपुनःपुनः॥ यावदारब्धकर्मस्यादाविर्वापितिरोव्रजेदिति॥ नचाज्ञानमंतःकरणाश्रितं॥ नजीवाश्रितं॥ तस्यस्वप्रकाशरूपत्वादितिवाच्यं॥ स्वप्रकाशस्यापीश्वरेच्छयाऽविद्यावरणसंभवात्॥ तदुक्तंजिज्ञासाधिकरणसुधायां॥ तच्चस्वप्रकाशस्यापिजीवस्यपरमेश्वरेच्छयापरमेश्वरेस्वधर्मेषुचाज्ञानंसंभवत्येवेति॥ मोक्षंविभजति॥ **चतुर्विधइति**॥५३१॥ तदुक्तमुत्क्रांतपादीयानुव्याख्याने॥ कर्मक्षयस्तथोत्क्रांतिर्मार्गोभोगश्चतुष्टयं॥ फलंमोक्षइतिप्रोक्तःक्रमात्पादेषुचोदितइति॥ कर्मक्षयंनिरूपयति॥ **अपरोक्षज्ञानेजातइति** ॥ ५३२॥ अन्यथाकर्मणामनंतत्वेनभोगे

५३० तस्मात्प्रकृत्यविद्यादिभ्योमोक्षः॥ ५३१ सचतुर्विधः कर्मक्षयउत्क्रांतिलयोर्चिरादिमार्गोभोगश्चेति॥ ५३२कर्मक्षयस्त्वपरोक्षज्ञानेजातेसंचितस्यसर्वस्यापिपापस्यानिष्टस्यपुण्यस्यचसर्वात्मनाविनाशः॥ विनाशोनाम अनिष्टपुण्यस्यकस्यचित्सुहृद्भ्योदानं॥ पापस्यकस्यचिद्द्वेषिभ्योदानं॥ केषांचित्स्वरूपतएवनाशः॥

नविनानाशायोगात् ॥ भोगकालेप्यनेकमानुषादिशरीरापादककर्मणांकरणादसमाप्तिप्रसंगात् ॥ तदुक्तंगीताभाष्ये ॥ जीवं श्चतुर्दशादूर्ध्वंपुरुषोनियमेनतु ॥ स्त्रीवाप्यनूनदशकंदेहंमानुषमार्जते ॥ चतुर्दशोर्ध्वजीवीनिसंसारश्चादिवर्जितः ॥ अतोऽविद्वापरंदेवंमोक्षाशाकामहामुनइति ॥ भाष्यकृष्णामृतमहार्णवयोरपि ॥ आचतुर्दशमाद्वर्षात्कर्माणिनियमेनतु ॥ दशावराणां देहानांकारणानिकरोत्ययमिति ॥ अतोपरोक्षज्ञानेनसंचितस्यनाशोवक्तव्यएव ॥ तत्रप्रमाणानिपूर्वमेवोदाहृतानि ॥ अनिष्ट पुण्यस्येत्यादि ॥ अत्रप्रमाणंपूर्वमेवोक्तं ॥ नन्वपरोक्षज्ञानेनकर्मणांविनाशेसद्यएवमोक्षःस्यात् ॥ नचप्रारब्धकर्मणामविनष्टत्वान्नसद्योमुक्तिरितिवाच्यं ॥ तर्हिप्रतिबंधकसद्भावान्नकदापिमोक्षःस्यादित्याशंक्यभोगेननाशइत्याह ॥ प्रारब्धकर्मणस्त्विति ॥५३३॥ नन्वेवंप्रारब्धकर्मणामप्यनंतत्वेभोगेनापर्यवसानंस्यादित्यतोब्रह्मादिमानुषांतंप्रारब्धानांमर्यादामाह ॥ ब्रह्मणइत्यादिना ॥ ५३४ ॥ तदुक्तंकर्मक्षयपादीयानुव्याख्याने ॥ ब्रह्मणांशतकालात्तुपूर्वमारब्धसंक्षयः ॥ ब्रह्मणस्त्वेवतावत्त्वंपंचाशद्ब्रह्मणस्तथा ॥ रुद्रस्यविंशदेवस्यादिंद्रस्यार्कादिकेदश ॥ अन्येषांब्रह्ममात्रस्यत्वंतआरब्धसंक्षयइति ॥ भाष्येपि ॥ ब्रह्मणांशतकालात्तुपूर्वमारब्धसंक्षयः ॥ नियमेनभवेन्नात्रकार्याकाचिद्विचारणेति ॥ द्वितीयतात्पर्येपि ॥ वैश्वानरेद्युनद्यांवासूर्येवादेह

५३३ प्रारब्धकर्मणस्तुभोगेनैवनाशः ॥ ५३४ ब्रह्मणःशतब्रह्मकल्पपर्यंतंपुण्यंप्रारब्धफलस्यसत्यलोकाधिपत्यादेरनुभवः ॥ गरुडशेषयोः पंचाशद्ब्रह्मकल्पपर्यंतंपुण्यपापरूपप्राब्धस्यानुभवः ॥ इंद्रकामयोर्विंशतिब्रह्मकल्पपर्यंतंपुण्यपापप्रारब्धानुभवः ॥ सूर्यचंद्रादीनांदेवानांदशकल्पपर्यंतं प्रारब्धानुभवः ॥ अन्येषांमनुष्योत्तमानांत्वेकब्रह्मकल्पमात्रइति ॥

एववा ॥ विधूयसर्वपापानियांतिकिंस्तुष्ठकेशवमिति ॥ न्यायविवरणेपि प्रारब्धकर्मशेषस्तुविरजातरणावधिरिति ॥ ननुचतुर्थ स्कंधतात्पर्ये तथैवचचत्वारिंशद्भिःपदंशैवंचजन्मभिरितिरुद्रस्यचत्वारिंशद्ब्रह्मकल्पेषुप्रारब्धानुभवोक्तेर्विरोधइतिचेन्न ॥ शतेपंचाश न्न्यायेनोपपत्तेरिति ॥ एवमेवोक्तंचतुर्थतात्पर्यप्रकाशिकायां ॥७॥४॥७॥ इदानींदेहलयाधिकारिव्यतिरिक्तानांदेहादुत्क्रांतिमार्गौ निरूपयिष्यन्पीठिकामारचयति ॥ **प्रारब्धानुभवानंतरमिति ॥ ब्रह्मनाड्येति** ॥ ९३५ ॥ शतंचैकाचहृदयस्यनाड्यस्ता सांमूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंतीतिश्रुतेः ॥ द्वितीयस्कंधतात्पर्येपि ॥ उदानगत्या ब्रह्मनाड्या ॥ अथैकयोर्ध्वउदानइतिश्रुतेः ॥ प्राणापानाविडायांचपिंगलायांचवर्ततः ॥ व्यानःसिंधुषुसर्वत्रउदानोब्रह्म नाडिगः ॥ सर्वत्रैवसमानस्तुसमंचरतिसर्वगइति ॥ ननुषट्प्रश्नटीकायां एकयानाड्यासुषुम्नयोर्ध्वश्चरतीतिसुषुम्नानाड्योर्ध्वगते रुक्तेःकथंब्रह्मनाड्योर्ध्वगतिरित्यतआह ॥ **सुषुम्नानाडीति** ॥ ९३६ ॥ तथाचसुषुम्नानाड्याएवब्रह्मनाडीतिसंज्ञा ॥ ब्रह्मप्रा प्तिसाधनत्वादितिभावः ॥ तदुक्तंतंत्रसारे ॥ मध्येसुषुम्नाविज्ञेयावज्रिकार्याप्रकाशिनी ॥ वैद्युताब्रह्मनाडीतिसैवपंचप्रभेदिनी ति ॥ भाष्येपि ॥ तत्रश्वेतःसुषुम्नोब्रह्मयानइति ॥ नाड्यादेहादुत्क्रमणंचमस्तकमध्यस्थब्रह्मरंध्रेणबोध्यं ॥ तदुक्तंभाष्ये ॥ हृदिस्थेनैवहरिणातस्यैवानुग्रहेणतु ॥ उत्क्रांतिर्ब्रह्मरंध्रेणतमेवोपासतोभवेदिति ॥ सुषुम्नानाडीस्थानमाह ॥ **सेति** ॥ ९३७ ॥

९३५ प्रारब्धानुभवानंतरंचब्रह्मनाड्यादेहादुत्क्रमंति ॥ ९३६ सुषुम्नानाडीब्रह्मनाडी ॥ ९३७ सामूलाधारमारभ्यमूर्धपर्यंतमृजुरूपे णदीर्घशलाकावद्देहेवर्तते ॥

तदुक्तंतंत्रसारे मूलाधारंसमारभ्यत्वामूर्धानमृजुस्थिता ॥ मध्येसुषुम्नाविज्ञेयेत्यादि ॥ सैवेति ॥ ५३८ ॥ इडाचपिंगलाचैव वज्रिकाधारिणीतथा ॥ सुषुम्नायाश्चतुर्दिक्षुवज्रिकाद्यासुतत्रचेति ॥ इडादिनामभेदेनवज्रिकार्यादीनामेवोक्तेरितिभावः ॥ छांदोग्यभाष्येपि ॥ सएषहृदिनाडीषुपंचरूपःप्रतिष्ठितः ॥ नारायणाख्यंसौषुम्नमध्यस्थंरक्तवर्णकं ॥ शुक्लंतुवासुदेवाख्यंनादिन्यामग्रतःस्थितं ॥ पिंगलायांपिंगलंचरूपंसंकर्षणाभिधं ॥ पश्चिमेवज्रिकायांचपीतंप्रद्युम्ननामकं ॥ इडायामनिरुद्धाख्यंनीलरूपंव्यवस्थितमितिपंचनाडीनांनामांतराण्युक्तानि ॥ द्वितीयतात्पर्येप्येवमेवोक्तंद्रष्टव्यं॥सुषुम्ननाड्योत्क्रांतानांकेषांचित्परमात्मप्राप्तिःकेषांचिद्वायुद्वाराचतुर्मुखप्राप्तिरितिवक्तुंतेषांस्वरूपंविभज्यदर्शयति ॥ तथाज्ञानिनोपीति ॥५३९॥ तत्रप्रमाणंतुपूर्वमेवोक्तं ॥ व्याप्तापरोक्षज्ञानप्रकरणे ॥ तत्कालेहृदयस्येति ॥ तदुक्तंबृहद्भाष्ये ॥ हृदयस्थेनरूपेणतदाजीवोनकिंचन ॥ जानातीति विदुःप्राज्ञास्तदाविष्णोःस्वतेजसा ॥ द्योततेहृदयाग्रंचतेनद्वारेणकेशवः ॥ निष्क्रामेज्जीवमादायप्राणएनमनुव्रजेत् ॥ प्राणमन्ये तथादेवाविद्याकर्मचयोग्यतेति ॥ तथासूत्रेभाष्येच ॥ ॐ तदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतःशताधिकया ॥ उत्क्रांतिकालेहृदयस्याग्रेज्वलनंभवति ॥ तत्प्रकाशितद्वारोनिष्क्रामति ॥ विद्यासाम

५३८ सैवपंचभेदिनी ॥ ५३९ तथाज्ञानिनोद्विविधाः ॥ प्रतीकालंबनाअप्रतिकालंबनाश्चेति ॥ देहादिप्रतीकेऽपरोक्षज्ञानवंतःप्रतीकालंबनाः॥ तदन्यत्रापरोक्षज्ञानवंतोप्रतीकालंबनाः॥ अप्रतीकालंबनानांदेवादिव्यतिरिक्तानांकेषांचित्सुषुम्नानाडीमध्यादुत्क्रमणं ॥ तत्कालेहृदयस्याग्रंप्रद्योतते ॥ तत्प्रकाशितद्वारोनिष्क्रामति ॥ तदाप्राज्ञेनान्वारूढोभवति ॥ तत्परमात्मनोग्रतोवायुर्गच्छति ॥ तथार्चिरादिमार्गेणगमनंभवति ॥

र्थ्यादिति ॥ प्राज्ञेनात्मनान्वारूढउत्सृज्ययातीतिश्रुतेश्च ॥ तत्रतत्रलोकेषुपूजाचेति ॥ ५४० ॥ तदुक्तंबृहद्भाष्ये ॥ इदं मुक्तजीवस्वरूपमायाति ॥ अतोनेनसहेदंपरंब्रह्मायातीतिपरब्रह्मणःपूजार्थंप्रतिकल्पंते ॥ यथाराज्ञोध्वजादिकंदृष्ट्वाऽयंध्वज आगच्छतितस्माद्राजाऽऽयातीतिपूजांप्रतिकल्पंतेतद्वत् ॥ यदामुक्तोव्रजत्यूर्ध्वंतदातत्सहितोहरिः ॥ नियमादृश्यतेदेवैरमुक्तेनियमोनतु ॥ यथाध्वजादिकंदृष्ट्वापूजांराज्ञःप्रकुर्वते ॥ एवंविमुक्तिगंदृष्ट्वाविष्णोःपूजाःप्रकुर्वतइति ॥ वैकुंठलोकप्राप्तिरिति ॥ ५४१ ॥ तदुक्तंभाष्ये ॥ अप्रतीकाश्रयायेहितेयांतिपरमेवतु ॥ स्वदेहेब्रह्मदृष्ट्यैवगच्छेद्ब्रह्मसलोकतामिति ॥ तुरीयनामकभगवत्प्राप्तिरिति ॥ ५४२ ॥ तदुक्तंमांडूकभाष्ये ॥ विष्णुस्तुरीयरूपेणद्वादशांतेव्यवस्थितः ॥ मुक्तानांप्राप्यरूपोसौव्यवहारेनदृश्यतइति ॥ प्रतीकालंबनानांविशेषमाह ॥ प्रतीकेति ॥ ५४३ ॥ अंतकालइति ॥ तदुक्तंगीतायां ॥ अंतकालेपिमामेवस्मरन्मुक्त्वाकलेवरं ॥ यःप्रयातिसमद्भावंयातिनास्त्यत्रसंशयः ॥ यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं ॥ तंतमेवेति कौंतेयसदातद्भावभावितइति ॥ नचांतकालेऽज्ञानिनामपिभगवत्स्मरणमस्त्येवातोनज्ञानिनोविशेषइतिवाच्यं ॥ असिद्धेः ॥ यस्यप्रारब्धकर्मावसानंतस्यैवांतेनारायणस्मृतिः ॥ तत्सत्त्वेज्ञानिनामपिनास्त्येव ॥ तदुक्तंगीताभाष्ये ॥ ज्ञानिनांकर्मयुक्तानां कायत्यागक्षणोयदा ॥ विष्णुमायातदातेषांमनोबाह्यंकरोतिहीति ॥ गीतातात्पर्येपि ॥ ज्ञानिनामप्यंतकालेप्यन्यमनसांप्रारब्ध

५४० तत्रतत्रलोकेषुपूजाचभवति ॥ ५४१ ततःक्रमेणवैकुंठलोकप्राप्तिः ॥ ५४२ तत्रतुरीयनामकभगवत्प्राप्तिश्च ॥ ५४३ प्रतीकालंबनानांत्वंतकालेनियमतोभगवत्स्मरणंजायते ॥

कर्मभावाज्जन्मांतरं ॥ प्रारब्धकर्मनाशकालेनियमेनभगवत्स्मृतिर्भवतीति ॥ षष्ठतात्पर्येपि ॥ अजामिलोपिस्मरणाद्भक्त्या
मृत्योरमुच्यतेति ॥ **सुषुम्नानाडीपार्श्वस्थनाड्येति** ॥ ५४४ ॥ तदुक्तंबृहद्भाष्ये ॥ विष्णोर्लोकंपरंगच्छन्नुत्क्रामेन्मूर्ध्नएवतु ॥
तथैवब्रह्मणोलोकंसुषुम्नायाविभेदतइति ॥ **अर्चिरादिलोकप्राप्तिरिति** ॥ ५४५ ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐ अर्चिरादि
नातत्प्रथितेः ॥ तेर्चिषमभिसंविशंति ॥ अर्चिषोहरह्नआपूर्यमाणपक्षमितिछांदोग्यश्रुतेश्च ॥ उत्क्रांतस्तुशरीरात्स्वाद्गच्छत्यर्चि
षमेवतु ॥ ततोहिवायोःपुत्रंचयोसौनाम्नातिवाहिकः॥ततोहःपूर्वपक्षंचाप्युदक्संवत्सरंतथा ॥ तडितंवरुणंचैवप्रजापंसूर्यमेवच ॥
सोमंवैश्वानरंचेंद्रंध्रुवंदेवींदिवंतथा ॥ ततोवायुंपरंप्राप्यतेनैतिपुरुषोत्तममिति ॥ गीतायामपि ॥ अग्निर्ज्योतिरहःशुक्लःषण्मा
साउत्तरायणं ॥ तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाइति ॥ गीताभाष्येतु ॥ अभिमानिदेवताश्चाग्न्यादयः ॥ दिवादिदेव
ताभिस्तुपूजितोब्रह्मयातिहि ॥ पूजितस्त्वयनेनासौमासैःपरिवृतेनहि ॥ साह्नामध्यंदिनेनाथशुक्लेनचसपूर्णिमा ॥ सविष्वाचा
यनेनासौपूजितःकेशवंव्रजेदिति ॥ वायुरेवचतुर्मुखलोकंनयतीति ॥ तत्पुरुषोमानवः सएनान्ब्रह्मगमयतीतिश्रुतेः ॥ भाष्ये
पि ॥ विद्युत्पतिर्वायुरेवनयेद्ब्रह्मनचापरः ॥ कुतोन्यस्यभवेच्छक्तिस्तमृतेप्राणनायकमिति ॥ कार्यंबादरिरस्यगत्युपपत्तेरितिसू
त्रोक्तेश्च ॥ **सचस्वशरीरेति** ॥ ५४६ ॥ तदुक्तंभाष्ये ॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे ॥ परस्यांतेपरात्मनःप्रविशंतिपरं

---

५४४ सुषुम्नानाडीपार्श्वस्थनाड्याभगवत्प्रकाशयुक्तद्वारागमनं ॥ ५४५ अर्चिरादिलोकप्राप्तिः ॥ क्रमेणवायुलोकप्राप्तिः ॥ वायुलोकप्राप्त्य
नंतरंचवायुरेवचतुर्मुखलोकंनयति ॥ ५४६ सचस्वशरीरलयानंतरंवैकुंठंनयति ॥

पदमिति ॥ तेब्रह्माणमभिपद्ययदैतद्विलीयतेथसहब्रह्मणापरमभिगच्छंतीति ॥ न्यायविवरणेपि ॥ यांतिदेवंपरंकेचित्पूर्वंके
चिल्लयेविभुं ॥ योग्यतातारतम्येनकैश्चिदेवाप्यतेमृतौ ॥ क्रमानुरागीभगवान्क्रमात्पुंभिरवाप्यते ॥ अतःक्रमात्समृद्धेतुज्ञानेब्रह्म
लयेनरैः ॥ प्राप्यतेनियमेनैवकैश्चिदेवाप्यतेमृताविति ॥ द्वितीयतात्पर्येपि ॥ विष्णोर्लोकंतदैवैकेयांतिकालांतरेपरे ॥ आज्ञयै
वहरेःकेचिदापूर्तेःकेचिदंजसा ॥ विहृत्यैवान्यलोकेषुमुच्यंतेब्रह्मणासहेति ॥ एकगुणोपासकानांनोत्क्रमणमित्याह ॥ एवमेक
गुणेति ॥ ५४७ ॥ तदुक्तंबृहद्भाष्ये ॥ केचित्तुमानुषामुक्तिमनुक्रम्यैवदेहतः ॥ देहपातेतुदेहस्यदोषान्भुक्त्वैवसर्वशः ॥ मरणो
च्छूनतादींश्चस्वकीयारब्धकर्मजान् ॥ देहेक्षीणेतुगच्छंतिदृष्ट्वाविष्णुमनुज्ञया ॥ पुनरत्रैवतिष्ठंतिनित्यानंदैकभोगिनइति ॥ भा
ष्येपि ॥ केचिदत्रैवमुच्यंतेनोत्क्रामंतिकदाचनेति ॥ इमामारभ्यपृथिवीमितिच ॥ छांदोग्यभाष्येपि ॥ श्वेतद्वीपंततोगत्वादृ
ष्ट्वाविष्णुंचतेततः ॥ अनुज्ञाताःप्रमोदंतेनिर्दुःखास्तुधरादिष्विति ॥ ७ ॥ ७ ॥ ७ ॥ सर्वेषामपिज्ञानिनामुपदेशनियमंज्ञानवि
शेषनियमंचाह ॥ **सर्वेषामपीति** ॥ ५४८ ॥ चतुर्मुखोपदेशेप्रमाणंतु ॥ उपासनापादीयानुव्याख्यानं ॥ उपदेशोब्रह्मणस्तु
सर्वेषामेवमुक्तयइति ॥ चतुर्थतात्पर्येपि ॥ मुमुक्षवोब्रह्मणश्चशिवादिंद्रादिभिस्तथा ॥ श्रुत्वाज्ञानंपरंगुह्यंमुच्यंतेब्रह्मणासहेति॥
षट्प्रश्नभाष्येपि ॥ प्रणवेनहरिंध्यायन्ब्रह्मलोकंसमेत्यच ॥ ज्ञानंचतुर्मुखात्प्राप्यमुच्यतेनात्रसंशयइति ॥ नन्वेवंप्रणवोपासकाना

---

५४७ एवमेकगुणोपासकानामपरोक्षज्ञानानंतरंनशरीरादुत्क्रमणं ॥ किंतुशरीरस्यश्वैतीभावेनोच्छूनताजायते ॥ ततःक्रमेणशरीरस्यविनाशः ॥ ते
षांचपृथिव्यादावेवावस्थानं ॥ ५४८ सर्वेषामपिसत्यलोकेचतुर्मुखोपदेशः ॥

मेवचतुर्मुखोपदेशोत्रोच्यते नतुसर्वेषामपि ॥ प्रणवोपासनाचयतीनामेव ॥ तदुक्तंमध्वविजये ॥ अनंतमात्रांतमुदाहरंतियंत्रिमा त्रपूर्वंप्रणवोच्चयंबुधाः ॥ तदाभवद्भाविचतुर्मुखाकृतिर्जपाधिकारीयतिरस्यसूचितइति ॥ गीतातात्पर्येपि ॥ बुद्ध्याविहिंसन्पुष्पै र्वाप्रणवेनसमर्चयेत् ॥ वासुदेवात्मकंब्रह्ममूलमंत्रेणवायतिरिति ॥ अतोनसर्वेषांचतुर्मुखोपदेशनियमइतिचेन्न ॥ प्रणवोपासका नामेवेतिनियमेसाधकाभावात् ॥ उपदेशोब्रह्मणस्तुसर्वेषामेवमुक्तयइत्यनुव्याख्यानबलेनगृहस्थानांसन्न्यासिनांचचतुर्मुखोपदे शस्यावश्यकत्वात् ॥ नचापरोक्षज्ञानिनामेवसत्यलोकप्राप्त्याचतुर्मुखोपदेशोवक्तव्यः ॥ अन्यथा ईयुस्त्रीन्कर्मणालोकान्ज्ञानेनै वतदुत्तराननितिगीताभाष्यादिविरोधप्रसंगात् ॥ अपरोक्षज्ञानंचसन्न्यासिनामेवनतुगृहस्थानां ॥ सन्न्यासयोगाद्यतयःशुद्धस त्वाः ॥ तेब्रह्मलोकेतुपरांतकालेपरानृतात्परिमुच्यंतिसर्वइतिश्रुतेः ॥ ज्ञानद्वारोयतोन्यासइत्यादिस्मृतेश्चेतिवाच्यं ॥ ब्रह्माद्या याज्ञवल्क्यांतामुच्यंतेस्त्रीसहायिनः ॥ देवाःसजायामुच्यंतेमानुषास्तूभयात्मकाइतिबृहद्भाष्यादिविरोधप्रसंगात् ॥ गीताभाष्य बृहद्भाष्यादावपिगृहस्थानामपिज्ञानमुक्तं ॥ तस्यपुत्रादायमुपयंतीत्यादिश्रुतेः ॥ यत्याश्रमस्तुप्रायत्यार्थोभगवत्तोषणार्थश्च ॥ आधिकारिकास्तुतत्स्थाएवप्रायत्येसमर्थाः ॥ देवादीनामाधिराज्ञांमहोद्योगेपिनोमनः ॥ विष्णोश्चलतितद्धोगोप्यतीवहरितोषण मित्याद्युक्तं ॥ केचित्तुब्रह्मादिसर्वजीवानामप्येकस्मिन्नेवजन्मनियत्याश्रमोनियतएव ॥ चतुर्मुखस्यवायुत्वावस्थायांनियमेनम ध्वावतारेयत्याश्रमस्यदर्शनात् ॥ शेषस्यरुद्रत्वावस्थायांदुर्वासावतारेसन्न्यासित्वदर्शनात् ॥ अतस्तदन्येषामपियत्याश्रमोनियत

एवेत्याहुः ॥ **श्वेतद्वीपइति** ॥५४९॥ तदुक्तंभाष्यगीताभाष्ययोः ॥ बहुनात्रकिमुक्तेनयावच्छ्वेतंनगच्छति ॥ योगीतावन्नमुक्तः स्यादेषशास्त्रस्यनिर्णयइति ॥ एकगुणोपासकानामपिश्वेतद्वीपेवासुदेवदर्शनमुक्तंछांदोग्यभाष्ये ॥ श्वेतद्वीपंततोगत्वाद्दष्ट्वाविष्णुं चतेततः ॥ अनुज्ञाताःप्रमोदंतेनिर्दुःखास्तुधरादिष्विति ॥ **शिंशुमारदर्शनमिति** ॥५५०॥ तदुक्तंद्वितीयतात्पर्ये ॥ अशेषजग दाधारःशिंशुमारोहरिःपरः ॥ सर्वेब्रह्मविदोनत्वातेयांतिपरमंपदमिति ॥७॥७॥७॥ तमोयोग्यानांमुक्तिप्रकारमाह ॥ **तमोयोग्या नामपीति** ॥ ५५१ ॥ निर्णये मुक्तास्तुमानुषादेवान्देवाइंद्रंसशंकरं ॥ सब्रह्माणंक्रमेणैवतेनयांत्यखिलाहरिं ॥ उत्तरोत्तरवश्याश्च मुक्तारुद्रपुरःसराइति ॥ देवानामुत्तरोत्तरवश्यत्वमुक्त्वादैत्यानामपि असुराःकलिपर्यंताएवंदुःखोत्तरोत्तराः ॥ कलिर्दुःखाधिकस्ते षुतेप्येवंब्रह्मवद्गणाइत्युत्तरोत्तरवश्यत्वोक्तेः ॥ तेषांदेहलयस्यक्वाप्यनुक्तत्वेनोत्क्रांतेरेवसिद्धेः ॥ **कलेस्त्विवति** ॥ ५५२ ॥ प्रति दिनंदुर्योधनादिरूपेणहरिगुरुद्वेषाधिक्यसंपादनेनतमसिदुःखबाहुल्यानुभवायब्रह्मणासहलिंगभंगस्यन्याय्यत्वादित्यर्थः ॥ वा युगदाप्रहारादिति ॥ एतच्चगरुडपुराणादिनावगंतव्यं ॥ संकर्षणमुखज्वालादग्धंभूमंडलंयदा ॥ वायोर्गदाप्रहारेणतदातल्लिंग भंजनमितिविष्णुरहस्ये ॥ अत्रनसर्वेषांपरांतकालएवतमःप्राप्तिरितिनियमः ॥ किंतुब्रह्मणःप्रतिदिनंमंथरादिदैत्यानांतमःप्राप्ते

---

५४९ श्वेतद्वीपेवासुदेवदर्शनं ॥ ५५० ध्रुवलोकस्थशिंशुमारदर्शनंचनियतं ॥ ५५१ तमोयोग्यानामपिद्वेषपरिपाकानंतरंदेहादुत्क्रमणंभवति ॥ सर्वेषांकलिप्राप्तिः ॥ ५५२ कलेस्तुब्रह्मणासहलिंगभंगोवायुगदाप्रहाराद्भवति ॥

र्निर्णयादावुक्तेः ॥ तथाहि ॥ मंथरातुतमस्यंधेपातितादुष्टचारिणी॥तेनचांधतमईयुरासुरायज्ञमाह्वयदसौचमैथिलीमितिसुराण
कदैत्यानांतमःप्राप्तिरुक्ता ॥ जघानगदयायुक्तस्तत्क्षणात्सविडूरथं ॥ विडूरथस्तमोगच्छद्दंतवक्रेचयोसुरइतिविडूरथादेस्तमः
प्राप्तिरुक्ता ॥ अपतत्केशवद्विट् ॥ जरासुतोंधेतमसिक्रमेणेतिजरासंधस्यतमःप्राप्तिरुक्ता ॥ तमाश्रितश्चयोसुरोमहातमःप्रपेदि
वानितिशिशुपालाविष्टासुरस्यतमःप्राप्तिरुक्ता ॥ ततोंधमेवतत्तमोहरिद्विडेतिनिश्चयादितिहंसडिबिकादीनामपितमःप्राप्तिरु
क्ता ॥ वचांसिचास्यस्वीचक्रुराश्वेवजिनादिदैत्याः ॥ तेज्ञानधर्मावपहायपापाविमोहितादेववरेणसर्वे ॥ जग्मुःस्तमोंधंक्षणिकं
समस्तंज्ञानंनसच्चेतिदृढंस्मरंतइतिजिनादिदैत्यानांतमःप्राप्तिरुक्ता ॥ तथा चतुःसहस्रेत्रिदशोत्तरेगतेसंवत्सराणांतुकलौपृथि
व्यां ॥ जातःपुनर्विप्रतनुःसभीमोदैत्यैर्निगूढंहरितत्वमाह ॥ तदैवकृष्णापिभुविप्रजाताप्रीत्यैहरेरंधतमस्यपातयत् ॥ महासुरा
निति ॥ मध्वावतारेद्रौपद्यादैत्यानामंधतमःप्राप्तिरुक्ता ॥ सुयोधनाद्यायदिमेसुपापाआरब्धपुण्यक्षयमाप्यनित्यं ॥ निःशेष
सौख्योज्झितनित्यदुःखेवशाःपतिष्यंतिपुनर्निवृत्ताइतिपुण्यभोगानंतरंदुर्योधनादीनांतमःप्राप्तिरुक्ता ॥ एवमन्येषांतत्रतत्रेदा
नीमेवतमःप्राप्तिरुक्ता ॥ अतोदैत्यानांब्रह्मप्रलयएवतमःप्राप्तिरितिननियमः ॥ नन्वेवंब्रह्मणःप्रतिदिनंरामकृष्णाद्यवताराणा
मावश्यकत्वात्तत्रसुराणकमंथराजरासंधहंसडिबिकशिशुपालदुर्योधनादिजिनादिदैत्यानामुत्पत्त्यभावेऽवतारवैयर्थ्यमेवस्यात्॥
नचान्येकलिजरासंधादयइतिवाच्यं ॥ एकस्मिन्नेवब्रह्मकल्पेनेककल्पादिपदयोग्यानांसद्भावउत्पत्तौचप्रमाणाभावात् ॥ तेप्ये
वंब्रह्मवद्भणाइत्यतिदेशबलाद्ब्रह्मादिवदेवतेषामेकैकस्मिन्ब्रह्मकल्पेएकैकस्योत्पत्तितमःसाधनपूर्तितमःप्राप्तीनामावश्यकत्वात् ॥

किंचभेजेखगेंद्रध्वजपादमूलमितिपरीक्षितोराज्ञोवैकुंठलोकप्राप्तेरुक्तत्वेनतस्यापीदानीमेवमुक्तिप्रसंगात् ॥ तथा केषांचिद्भक्ता
नांयुद्धादिकालेरामकृष्णाद्यवतारदर्शनान्मुक्तिंगताइत्युक्तत्वेनतेषामपिब्रह्मणासहमुक्तिर्नस्यादितिचेत्॥अत्रकेचित् ॥ प्रतिदिनं
मंथराजरासंधाद्याभिन्नभिन्नाएवोत्पद्यंतइत्याहुः॥तन्न॥प्रमाणाभावादित्युक्तत्वात्॥वयंतुब्रूमः ॥मंथरादयएकांशेनतमःप्राप्ताः॥
अन्यांशेनमूलरूपंप्राप्ताःसंतःपुनःपुनःप्रतिदिनमंशेनोत्पत्स्यंतइति ॥ अन्यथातमोंधंगताइतिभूतार्थकक्तप्रत्ययानुपपत्तेः ॥ न
चभेजेखगेंद्रध्वजपादमूलमित्यत्राप्यतीतार्थकलिटापरीक्षिदादीनामपिमोक्षःस्यादितिवाच्यं ॥ तेषांसाधनपूर्तेर्जातत्वेनमोक्ष
स्यनिश्चिततया एष्यत्तुनिश्चित्तंयत्तदतीतत्वेनभण्यतइतिप्रमाणबलेनातीतव्यवहारोपपत्तेः ॥ वैकुंठलोकेऽमुक्तस्थानवासाभि
प्रायेणवातदुपपत्तेश्च ॥ नचमंथरादीनामपिसाधनपूर्त्यभिप्रायेणवाऽनित्यनरकाभिप्रायेणवातद्व्यपदेशःस्यादितिवाच्यं ॥ वि
शेषप्रमाणाभावात् ॥ परीक्षिदादौतुविशेषप्रमाणसद्भावात् ॥ तथाहिनिर्णये ॥ अन्येतुदेवांशभवाःसमस्ताःस्वमूलरूपैक्यम
वापुराशु ॥ देवांशजायेतुसमस्तशस्तेस्वमूलरूपंसमवाप्यकाले ॥ स्वतारतम्यानुसृतांविमुक्तिंप्राप्स्यंतिनात्रापिविचार्यमस्ति ॥
पुनश्चतेस्थानमवाप्यसर्वेस्वीयंपरांतेतुविमुक्तिमाप्नुयुरिति ॥ दैत्यानांतु कर्मक्षयादेवसुरेतरास्तेपुण्यक्षयंप्राप्यभुविप्रजाताः ॥
चतुःसहस्रंत्रिदशोत्तरंगतेसंवत्सराणामनुभूयदिव्यान्॥ भोगान्नरत्वेपिसदेश्वरोहमसज्जगच्चेतिधियाप्नुवंस्तमइति ॥ किंचपरीक्षि
तोवैकुंठलोकात्पुनर्भूलोकप्राप्तिरुक्तानिर्णये ॥ तेषांप्रदत्तेष्वभिवांछितेषुवैचित्रवीर्यःसहभार्ययैव ॥ संमंत्र्यनिःशेषरणेहतानां
संदर्शनंप्रार्थितवांस्तमीशं ॥ ततस्तुतेसत्यवतीसुतस्यसर्वेश्वरस्याज्ञयासर्वएव ॥ समागताःस्वर्गलोकात्क्षणेनदत्ताचदिव्याद्दगमु

ष्यराज्ञः ॥ ऊषुश्चरात्रौपरमाज्ञयैवसर्वेस्वभार्यासहितायथापुरा ॥ तृप्तःसदारोनृपतिश्चतत्रसर्वेपिदृष्ट्वामहदद्भुतंतत् ॥ अथाज्ञ
यैवास्यपरस्यसर्वाःस्त्रियोनिजेशैःसहितायुःस्वः ॥ विनोत्तरांतातकथांनिशम्यपारीक्षितोयाचततातदृष्टिं ॥ तंचानयामासत
दैवकृष्णोह्यचिंत्यशक्तिःसविकुंठलोकात् ॥ दृष्ट्वासपारीक्षितआपतुष्टिंस्वतातमीशेनसमाहृतंपुनः ॥ संपूज्यतंकृष्णमपीशवंद्यं
क्षमापयामासपरीक्षिदात्मजइति ॥ नहिपरीक्षितोलिंगभंगेनवैकुंठलोकप्राप्त्यंगीकारेपुनरागमनंयुज्यते ॥ नचमंथरादीनामंशे
नतमःप्राप्तिसत्त्वेलिंगभंगोस्तिनवा ॥ नेतिपक्षेतमःप्राप्तिर्नस्यात् ॥ लिंगभंगेचांशांतरेणभूमावुत्पत्तिर्नस्यादितिवाच्यं ॥ सांश
जीवानांलिंगशरीरस्यापिसांशत्वेनमंथरादीनांलिंगभंगसंभवात् ॥ अंशांतरेणभूमावुत्पत्तिसंभवाच्च ॥ अन्यथावाय्वादीनाम
पिभीमार्जुनादिरूपेणभूमावुत्पत्तिर्नस्यात् ॥ लिंगशरीराभावात् ॥ अतोमंथरादीनामंशेनतमःप्राप्तिर्युक्तैव ॥ ७ ॥ ७ ॥ ७ ॥
नित्यसंसारिणांमुक्तिमाह ॥ **नित्यसंसारिणामपीति** ॥ ५५३ ॥ केचित्तुनित्यसंसारिणांनलिंगभंगइतिमन्यंते ॥ तान्वि
पक्षेबाधकोक्त्यानिराकरोति ॥ **अन्यथेति** ॥ ५५४ ॥ ननुनित्यसंसारिणांलिंगभंगांगीकारेत्रिदिवनिरयभूगोचरान्नित्यबद्धा
नितिवायुस्तुतिविरोधः ॥ मानुषामध्यमायेतुसृतियोग्याःसदैवहीतिनिर्णयविरोधः ॥ मानुषामिश्रमतयःसृतियोग्याःसदैवही
त्यनुव्याख्यानविरोधः ॥ उत्तमामुक्तियोग्यास्तुसृतियोग्यास्तुमध्यमाइतिगीतातात्पर्यविरोधः ॥ एवंनित्यावर्तास्तुमध्यमा
इतितत्वसंख्यानविरोधः ॥ तथाचबहुप्रमाणविरोधइतिचेत् ॥ उच्यते ॥ लिंगभंगांगीकारेपिनित्यसंसारिणामेवंरूपत्वंयुज्यत

५५३ नित्यसंसारिणामपिलिंगभंगः ॥ ५५४ अन्यथातत्स्वरूपमात्रस्यकदाप्यनुभवाभावप्रसंगात् ॥ साधनानुष्ठानवैयर्थ्यप्रसंगाच्च ॥

एव ॥ तेषांसर्वदासृतियोग्यत्वंनामसंसारावस्थायांयथादुःखमिश्रसुखानुभवस्तथालिंगभंगानंतरमपिसुखमिश्रदुःखानुभवएव ॥
तस्मात्सर्वदासृतिगाइतिव्यपदेशः ॥ कदाप्यननुभूयमानस्वरूपसद्भावेप्रमाणाभावाच्च ॥ मुक्तियोग्यस्यवैकुंठादिलोकवत्तमोयो
ग्यस्यतमोवन्नित्यसंसारिणांनियतस्थानाभावमात्रेणैवसर्वदास्वर्गनिरयभूसंचारित्वेनचनित्यबद्धत्वव्यपदेशोपपत्तेश्च ॥ इयांस्तु
विशेषः ॥ संसारेसुखानंतरंदुःखंदुःखानंतरंचसुखं मुक्तौतुयुगपदेवसुखदुःखमिश्रस्वरूपानुभवइति ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐ
नित्योपलब्ध्यनुपलब्धिप्रसंगोन्यतरनियमोवान्यथा ॥ व्यक्त्यनंगीकारेदेवानांनित्योपलब्धिरानंदादीनामसुराणांनित्यानुपल
ब्धिर्मनुष्याणांनित्योपलब्ध्यनुपलब्धीप्रसज्येतेइतित्रयाणामावरणमभिधायमोचकज्ञानमुक्तं ॥ विज्ञानेनात्मयोग्येननिजरूपे
व्यवस्थितिः ॥ सम्यज्ज्ञातंतुदेवानांमनुष्याणांविमिश्रितं ॥ विपरीतंतुदैत्यानांज्ञानस्यैवंव्यवस्थितिरिति ॥ टीकायामपि यदिजी
वस्वरूपस्यानंदादिरूपत्वमंगीकृत्यावरणाभावाद्व्यक्तिरावरणनिवृत्तिर्मोक्षेनांगीक्रियते तर्हिदेवादीनांमोक्षयोग्यानांनित्यमानं
दाद्यनुभवःस्यात् ॥ असुरादीनांनकदाप्यानंदाद्यनुभवःस्यात् दुःखाद्यनुभवएवभवेत् ॥ मध्यममानुषाणांचनित्यमानंदादी
नामुपलब्धिःकेवलतदुपलब्ध्यभावोदुःखाद्युपलब्धिश्चसमैवस्यात् ॥ आवरणाभावेनुभवाभावायोगादिति ॥ अतोस्त्येवाविद्या
वरणंभगवत्प्रसादेनतन्निवृत्तिश्चेतिभावइति ॥ तत्वप्रदीपिकायामपिनित्योपलब्धिसूत्रेसाधनसंपत्त्याऽऽवरणनिवृत्तिःसंमता ॥
तथाहितद्वाक्यानि ॥ मुक्तियोग्याविनैवसाधनसंपत्त्यानित्यव्यक्तानंदाभवेयुः ॥ तमोयोग्याःसंसृतावपिसुखलेशहीनानित्यदुः
खिनोभवेयुः ॥ सृतियोग्यानित्यमिश्राभवेयुरिति ॥ तथाचावरणनिवृत्तिरभिप्रेता ॥ माघमाहात्म्येशांडिल्यतत्वेपि ॥ नित्यंस

तिस्थाद्विविधाःस्वर्गमात्रैकभागिनः ॥ पतमानास्तथाकेचित्स्वर्गेषुनरकेषुचेति ॥ गरुडपुराणेपिस्पष्टमुक्तोलिंगभंगइति ॥७॥७॥७
नन्वर्चिरादिमार्गेणगतानांपुनरावृत्तिसद्भावेपुनःसंसारित्वापत्त्यासाधनानुष्ठानवैयर्थ्यंस्यादित्यतआह ॥ जनलोकमारभ्येति
॥ ९९९ ॥ स्वर्गगतानांजनानांक्षीणेपुण्येमर्त्यलोकंविशंतीत्यादिश्रुतिभिःपुनरावृत्तिसत्त्वात् ॥ महर्लोकगतानामपिकेषांचित्पुन
रावृत्तिःकेषांचिदनावृत्तिश्चोक्ताद्वितीयतात्पर्ये ॥ मन्वंतरायुषःस्वर्ग्यामहर्लोकेतुकाल्पिकाइति ॥ ईयुस्त्रीन्कर्मणालोकान्ज्ञा
नेनैवतदुत्तरान् ॥ तत्रमुख्याहरिंयांतितदन्येवायुमेवतु ॥ अपक्कायेनतेयांतिवायुंवाहरिमेववा ॥ स्थानमात्राश्रितास्तेतुपु
नर्जनिविवर्जिताइति ॥ एकादशतात्पर्येपि ॥ नित्यशोभगवद्रूपस्यापरोक्षेणदर्शनं ॥ मुहूर्तमात्रंज्ञानंस्यान्महाज्ञानंततोधि
कं ॥ ज्ञानेनब्रह्मलोकःस्यान्महाज्ञानाद्धरेर्गतिः ॥ सदैवाखंडितंध्यानंतपइत्युच्यतेबुधैः ॥ अपरोक्षदृशायुक्तंनित्यंषण्मात्रकाल
या ॥ अपरोक्षदृशानित्यमेकमात्रयुजायुतं ॥ योगनामासमुद्दिष्टंध्यानंनित्यमखंडितं ॥ तच्चतुर्भागयायुक्तमपरोक्षदृशायुतं ॥
पादयोगाख्यमुद्दिष्टंध्यानंनित्यमखंडितं ॥ पादयोगान्महर्लोकोजनोलोकस्तुयोगतः ॥ तपसस्तुतपोलोकःप्राप्यतेनान्यतःक्वचि
दिति ॥ जनलोकंगतानांतुब्रह्मकल्पपर्यंतमवस्थानंनपुनरावृत्तिः ॥ आब्रह्मणोजनाद्यास्तुमहर्लोकेपियेवराइतितात्पर्योक्तेः ॥
नन्वेवंजनलोकमारभ्याप्युपरिविद्यमानालोकानापुनरावृत्तिमंतः ॥ आब्रह्मभवनाल्लोकाःपुनरावर्तिनोर्जुन ॥ मामुपेत्यतुकौंतेय
पुनर्जन्मनविद्यतइतिगीतायांवैकुंठलोकमात्रस्यापुनरावृत्तिमत्त्वोक्तेरितिचेन्न ॥ गीताभाष्येस्यश्लोकस्यान्यथाव्याख्यातत्वात् ॥ ॥१९४॥

९९९ जनलोकमारभ्योर्ध्वलोकंगतानांनपुनरावृत्तिः ॥

तथाहितत्रभाष्यं ॥ महामेरुस्थब्रह्मसदनमारभ्यनपुनरावृत्तिः ॥ तच्चोक्तंनारायणगोपालकल्पे ॥ आमेरुब्रह्मसदनादाजनान्नज
निर्भुवीति ॥ तदर्थःप्रमेयदीपिकायामुक्तः ॥ महामेरुस्थितेतिपरतःस्थितानां ॥ एवंजनलोकमारभ्येत्यपिग्राह्यं ॥ अनेनैवं
व्याख्यातंभवति महामेरुस्थब्रह्मसदनंजनलोकंचारभ्यनपुनरावृत्तिः ॥ आब्रह्मभवनादेवमाजनाच्चार्वाक्भवाएवलोकाःपुनराव
र्तिनःपरेनपुनरावर्तिनइति ॥ नन्वेवंजनलोकादौविद्यमानानांदेवानांभूमावंशेनोत्पत्तिविनाशदर्शनात्कथमाजनान्नजनिर्भुवी
त्युक्तमितिचेन्न ॥ अंशेनोत्पत्तिलयंचविनावाय्वादीनांप्रलयेपुनरावृत्तिंचविनामूलरूपेजन्माभावस्यविवक्षितत्वात् ॥ तदुक्तं
गीतातात्पर्ये ॥ नियमाज्जन्मनोऽभावोमुक्तस्यैवतथापितु ॥ महर्लोकमतीतानांनजन्मांशलयौविना ॥ तत्राप्यवश्यंतत्स्थानंतैः
क्षिप्रंपुनराप्यतइति ॥ नन्वेवंरैवतस्यराज्ञोर्चिरादिमार्गेणसत्यलोकंगतस्यपुनर्भूमिंप्रत्यागमनंनिर्णयोक्तंकथं ॥ ब्रह्मवाय्वादि
देवानांद्वारकायांकृष्णकृतयज्ञेपरिचर्याकरणंनारदादीनांपुनःपुनर्गमनागमनादिकंचनिर्णयोक्तंकथमितिचेदुच्यते ॥ ब्रह्मना
ड्योत्क्रांतानामर्चिरादिमार्गेणगतानामेवपुनरावृत्त्यभावस्यविवक्षितत्वात् ॥ रैवतस्यब्रह्मनाड्योत्क्रांतत्वाभावात् ॥ ब्रह्मवाय्वादी
नामपितथात्वाभावात् ॥ अतोनविरोधः ॥ नन्वेवमपिशुकाचार्योपदेशेनापरोक्षज्ञानवतःसत्संगत्यांतकालेभगवत्स्मरणवतोगंगा
यांस्वकलेवरत्यागवतोर्चिरादिमार्गेणवैकुंठलोकंगतस्यपरीक्षितःकथंव्यासाज्ञयापुनर्भूमावागमनंजनमेजयादीनांसंदर्शनार्थंनिर्ण
योक्तमितिचेन्न ॥ ईश्वराचिंत्यशक्त्यापुनरागमनसंभवात् ॥ अतएवनिर्णये ॥ तदैवकृष्णोह्यचिंत्यशक्तिःसविकुंठलोकादित्यचिंत्य
शक्तिरुक्ता ॥ यद्वाचरमशरीरैर्चिरादिमार्गगतानामेवपुनरावृत्त्यभावोविवक्षितः ॥ परीक्षितस्तुपुनःपुनःप्रतिदिनंकृष्णावतारेभू

मावुत्पत्तेरावश्यकत्वेनतच्छरीरत्यागस्यचरमशरीरात्यागरूपत्वात् ॥ नचब्रह्मणःप्रतिदिनंभिन्नभिन्नएवपरीक्षिद्भविष्यतीतिवा
च्यं॥अनेकेषांपरीक्षिदादीनांकल्पनेप्रमाणाभावादित्युक्तत्वादित्यलं॥देवादिव्यतिरिक्तानांब्रह्मनाड्योत्क्रमणमर्चिरादिमार्गश्चो
क्तः॥देवादीनांतुकथंमोक्षइत्यतआह॥ **देवादीनांत्विति** ॥५५६॥तदुक्तमुत्क्रांतिपादीयानुव्याख्याने॥उत्क्रांतिमार्गौदेवानांन
प्रायेणभविष्यतइति॥नन्विंद्रादिदेवानामर्जुनादिमानुषावतारेउत्क्रांतिमार्गयोर्दर्शनात्कथमित्यतआह॥ **मानुषादिषुजाता
नामिति** ॥५५७॥तदुक्तंतत्रैवानुव्याख्याने॥जातानांमानुषेलोकेदेवानांतुकदाचन ॥ उत्क्रांतिमार्गौभवतोनतदामुक्तिरिष्यत
इति ॥ तर्हिकथंतेषांमुक्तिरित्यतआह ॥ **किंत्विति** ॥ ५५८ ॥ तदुक्तंतत्रैवानुव्याख्याने ॥ स्रष्टृष्वेवतुसृज्यानांप्रवेशोब्रह्मणो
लये ॥ देवानांमार्गउद्दिष्टोनार्चिरादिर्नचोत्क्रमः ॥ लयाच्चैवार्चिरादीनांलोकानामपिसर्वशः ॥ कथंमार्गोभवेत्तेषांविशतामुत्त
मंस्वतइति ॥ कस्यकस्यकस्मिन्कस्मिँल्लयइत्यतस्तदुपपादयति ॥ **देहलयक्रमस्त्विति** ॥ ५५९ ॥ अत्रसर्वेषांदेवानांगरुड
मार्गशेषमार्गाभ्यामेवलयोनत्वव्यवस्थयेत्यभिप्रायेणसुधोक्तमार्गद्वयमनुवदति ॥ **मार्गौद्वाविति** ॥ गरुडमार्गप्रविष्टदेवा
नाह ॥ **तत्रगरुडइत्यादिना** ॥ ५६० ॥ अत्रगरुडमार्गशेषमार्गगतदेवानांसरस्वत्यांसमावेशस्तस्याश्चतुर्मुखेलयइतिविवेकः

---

५५६ देवादीनांतुनोत्क्रमणंनवार्चिरादिमार्गः ॥ ५५७ मानुषादिषुजातानांतूत्क्रमणंमार्गश्चभवति ॥ तदानमुक्तिः॥ ५५८ किंतूत्तमेषुदेहलयानं
तरमेव ॥ ५५९ देहलयक्रमस्तु मार्गौद्वौ गरुडमार्गःशेषमार्गश्चेति ॥ ५६० तत्रगरुडःसौपर्णीइंद्रोगुरुःसूर्योग्निरितिगरुडमार्गः शेषोवारुणीकामोनिरु
द्धःसोमोवरुणइतिशेषमार्गः ॥ अग्नेःसूर्येलयः सूर्यस्यगुरौलयः गुरोरिंद्रेलयः इंद्रस्यसौपर्ण्यांलयः सौपर्ण्याश्चगरुडेलयः एवंवरुणस्यसोमेलयः सोमस्या
निरुद्धेलयः अनिरुद्धस्यकामेलयः कामस्यवारुण्यांलयः वारुण्यास्तुशेषेलयः ॥ ॥१५५॥

गरुडमार्गयोग्यदेवाश्चोक्ताउत्क्रांतिपादीयानुव्याख्याने ॥ सूर्योग्नियुक्तोगुरुमाप्यतेनशक्रंसहैतेनसुपर्णपत्नीं ॥ तयासुपर्णं
सहतेनवाणींब्रह्माणमेतद्गतएवयातीति ॥ शेषमार्गप्रविष्टान्देवानाह ॥ **शेषइत्यादिना** ॥ तदुक्तंतत्रैवानुव्याख्याने ॥ सोम
स्तुवारीशयुतोनिरुद्धंविशत्यसौकाममसौचवारुणीं ॥ साशेषदेवंसगिरंचसैववायुंविशत्यंजइतीहनिर्णयइति ॥ ननुगरुडमार्गे
गरुडादिषड्देवानांशेषमार्गेशेषादिषड्देवानामेवोक्तेरन्येषांदेवानांदेहलयोनस्यादित्यतआह॥ **अन्येषामित्यादिना** ॥५६१॥
तदुक्तमनुव्याख्याने ॥ भृग्वादयोदक्षमवाप्यतेचप्राप्येंद्रमेतेनसुपर्णपत्नीं ॥ विशंतीति ॥ अत्रवसिष्ठमरीच्यादीनांग्रहण
मितिसन्न्यायरत्नावली ॥ **आकाशाभिमानिनइति** ॥ ५६२ ॥ तदुक्तमनुव्याख्याने ॥ आकाशउर्वीचगुरुंप्रविश्यतेनै
वयातःपुरुहूतदेवमिति ॥ **कर्मजदेवानामिति** ॥ ५६३ ॥ तदुक्तमनुव्याख्याने ॥ विशंतियेमनवोराजमुख्यामनुंप्रविश्या
त्रगतामहेंद्रमिति ॥ तदर्थस्तुसुधायामुक्तः ॥ येमनवो वैवस्वताद्या येचराजमुख्याः प्रियव्रताद्यास्तेस्वायंभुवमनुंप्रविश्यात्र
स्वायंभुवमनौगतावर्तमानामहेंद्रंविशंतीति ॥ नयचंद्रिकायांतु ॥ येमनवो वैवस्वतादयः पृथ्वादयोराजमुख्याश्चतेस्वायं
भुवमनुंप्रविश्यतद्द्वारेणमहेंद्रंगताभवंतीत्युक्तं ॥ केचित्तु कर्मजदेवानांपृथ्वादीनांवैवस्वतादिमनूनांचपुष्करावरत्वंमन्यमाना

---

५६१ अन्येषांतुकेषांचिद्गरुडमार्गेकेषांचिच्छेषमार्गेप्रवेशः ॥ तथाहिभृग्वादीनांदक्षेलयः दक्षस्येंद्रेलयः इतिगरुडमार्गप्रवेशः ॥ ५६२ आ
काशाभिमानिनोगणेशस्यपृथिव्यभिमानिन्याधरायाश्चगुरौलयइतिगरुडमार्गप्रवेशः ॥ ५६३ कर्मजदेवानांप्रियव्रतगययोश्चस्वायंभुवमनौलयः स्वायं
भुवमनोरिंद्रेलयः मरुद्गणानांजयादीनामपींद्रेलयः यमस्यमनौलयः निर्ऋतेश्चयमेलयः पितॄणांयमेलयः ॥

देहलयंनांगीकुर्वंति ॥ तउपेक्ष्याः ॥ सुधानयचंद्रिकाविरोधात् ॥ नचानुव्याख्यानसुधानयचंद्रिकासुवैवस्वतादीनांस्वायंभुव मनौप्रवेशमात्रमुक्तं नतुतत्रदेहलयः ॥ यथातत्रैव वर्णाश्रमाचाररतामनुष्याधर्ममनुंसोपिसमेतिकालइतिमनुष्योत्तमानांधर्मे प्रवेशो नतुदेहलयउक्तस्तद्वदितिवाच्यं ॥ तद्व्याख्यानसुधायां उक्तस्यापवादमाह ॥ वर्णाश्रमेति ॥ एतच्चप्रसंगान्मुक्तौप्रवेशमा त्रमुक्तं नतुदेहलयः॥तेषामुत्क्रमणस्यविद्यमानत्वादित्यनेनमनुष्योत्तमव्यतिरिक्तानांदेहलयस्यसंमतत्वात् ॥ किंचकर्मजदेवानां देहलयानंगीकारेपितॄणांगंधर्वाणामाजानजदेवानांचकर्मजदेवावराणांदेहलयोनस्यात् ॥ नवह्यवराणामाजानजादीनांदेहलय स्तदुत्तमानांकर्मजानांनदेहलयइतिवक्तुंयुक्तं ॥ व्याहतेः ॥ नचाजानजदेवानामपिनदेहलयइतिवाच्यं ॥ अग्नौसर्वेदेवाविलीयं तेऽग्नावग्नयइतिभाष्येऽग्निपुत्राणामाजानजदेवतासमानानांलयस्योक्तत्वेनाजानजानामपिलयसिद्धेः॥ अन्यथापरस्परसाम्यस्य निर्णयाद्युक्तस्यानुपपत्तेरित्यलं ॥ मरुद्गणानांजयादीनांचेति ॥ तदुक्तमनुव्याख्याने ॥ प्रयातिधर्मंनिर्ऋतिस्तुशक्रंमरुद्गणाः पारिषदास्तथैव ॥ वर्णाश्रमाचाररतामनुष्याधर्ममनुंसोपिसमेतिकाले ॥ तमेवसर्वेपितरइति ॥ नचमरुतोमारुतइतिभाष्योदाहृ तश्रुतौमरुद्गणस्यप्रधानवायौलयोक्तेस्तद्विरोधइतिवाच्यं ॥ इंद्रद्वारातदुपपत्तेः ॥ अग्निपुत्राणामिति ॥ ९६४ ॥ विशंति शिष्टाअपिहव्यवाहमित्यनुव्याख्यानोक्तेः ॥ अग्नावग्नयइतिश्रुतेश्चेतिभावः ॥ आजानजानांत्वग्नौलयइतिबोध्यं ॥ भाष्येतु पृथिव्यामृभवोविलीयंतेवरुणोऽश्विनावग्नावग्नयइति ॥ तथाकाशएवसाध्याविलीयंतइति ॥ ऋभवः पृथिव्यांवरुणआपोग्नयस्तेज

९६४ अग्निपुत्राणामाजानजादीनामवशिष्टानांदेवानांचाग्नौलयइतिगरुडमार्गप्रवेशः ॥

॥१९६॥

सिमरुतोमारुतेआकाशेविनायकाविलीयंतइत्युक्तं ॥ तत्रयद्यपिपृथिव्यामृभूणांलयोनुपपन्नः॥उभयोरप्युक्तशेषशतस्थांतर्गतत्वे नसमानत्वात् ॥ शतस्थदेवाश्चतत्वप्रदीपिकायांसंगृहीतास्तएवास्मद्गुरुपादैश्चसंगृहीताः ॥ मरुद्रुद्रादित्यवसुविश्वेदेवाबृहस्प तिः॥ भृग्वश्विनौचरोदस्यौपितृपाश्चशतंसुराइति॥तथाप्यृभ्वपेक्षयापृथिव्याःकिंचिद्गुणाधिक्यंचवक्तव्यमेवमरुद्गणवत्॥प्रधा नवाय्वाहंकारिकप्राणप्रवहव्यतिरिक्तानांप्राणादिमरुतामुक्तशेषशतस्थांतर्गतत्वेपि ॥ मरुतश्चसमाःसर्वेसप्ततेषुप्रधानकाइतिद शमतात्पर्ये प्राणादयःपंचमरुत्प्रवीराइतिनिर्णयेचकिंचिदाधिक्योक्तेस्तन्न्यायेनपृथिव्याःकिंचिदाधिक्यमितिनकश्चिद्दोषः ॥पु नःकेषांचिच्छेषमार्गमाह ॥ **गंधर्वाणामित्यादिना** ॥ ५६५ ॥ तदुक्तमनुव्याख्याने ॥ सुरानुगाःसर्वेकुबेरंसचसोममेवैति ॥ **सनकादीनांत्विति** ॥ ५६६ ॥ सनादयोयतयःकामदेवंविशंतीत्यनुव्याख्यानोक्तेः ॥ **विष्वक्सेनस्येति** ॥ ५६७ ॥ स र्वेनिरुद्धंपृतनाधिपाद्यास्तुरश्रुतिर्हीत्थमियंविमुक्तिरित्यनुव्याख्यानोक्तेः ॥ गरुडमार्गशेषमार्गयोरंतिमावधित्वेनोक्तयोर्गरुडशे षयोर्लयमाह ॥ **गरुडशेषयोश्चेति** ॥ ५६८ ॥ तत्रप्रमाणमुक्तमधस्तात् ॥ इदानींचतुर्मुखस्यलयमाह ॥ **चतुर्मुखस्येति** ॥ ५६९ ॥ **लक्ष्मीद्वारेति** ॥ प्राणस्तेजसितेजःपरस्यांदेवतायामितिश्रुतेः ॥ भाष्येपि ॥ प्राणस्यतेजसिलयोमार्गमात्रमुदाहृत मिति ॥ ननुस्वायंभुवमनोर्नदेहलयोयुक्तः॥ईशावास्योपनिषदितद्भाष्येचार्चिरादिमार्गोक्तेः॥ अग्नेनयसुपथारायेअस्मानित्युप

---

५६५ गंधर्वाणांकुबेरेलयः ॥ कुबेरस्यसोमेलयः ॥ ५६६ सनकादीनांतुकामेलयः ॥ ५६७ विष्वक्सेनस्यानिरुद्धेलयइतिशेषमार्गप्रवेशः॥ ५६८ गरुडशेषयोश्चसरस्वत्यांलयः ॥ सरस्वत्याश्चतुर्मुखेलयः ॥ ५६९ चतुर्मुखस्यलक्ष्मीद्वारापरमात्मनिलयः ॥

निषत् ॥ नयनोमोक्षवित्तायेत्यस्तौद्यज्ञंमनुःस्वराडितितद्भाष्यमितिचेन्न ॥ स्वायंभुवमनोर्मूलरूपस्यान्यस्यसद्भावेनतस्यलयो
पपत्तेः ॥ भूमौजातस्यप्रियव्रतपितुःशरीरस्यनाशेप्युत्क्रांत्यार्चिरादिमार्गसद्भावेपिबाधकाभावात् ॥ तदुक्तंतृतीयभागवतता
त्पर्ययोः ॥ कुशकाशमयंबर्हिरास्तीर्यभगवान्मनुः॥अयजद्यज्ञपुरुषंलब्धंस्थानंयतोद्द्ढं॥ सएवंस्वांतरंनिन्येयुगानामेकसप्ततिं॥
वासुदेवप्रसंगेनपरिभूतगतित्रयः ॥ शारीरामानसादिव्याःपर्यासेयेचमानुषाः ॥ भौतिकाश्चकथंक्लेशाबाधंतेहरिसंश्रयमित्यत्र
पर्यासइत्यस्यतात्पर्यं पर्यासेमानुषत्वेनावस्थानेपीति ॥ तथाचनदोषः ॥ अत्रब्रह्मांडांतर्वर्तिनांब्रह्मादीनांब्रह्मांडाद्बहिर्विद्यमा
नानांमहदादितत्वाभिमानिनामंशिनांचदेहलयोविवक्षितः ॥ तथाहि ॥ कालाजयाद्याअपिविष्णुपार्षदायस्मादंडात्परतःसंप्रसू
ताः ॥ नीचाःसुरेभ्यस्ततएवतेखिलाविष्वक्सेनोवायुजःखेनतुल्यइतिनिर्णयोक्तांडांतःसृष्टविष्वक्सेनजयविजयादिसहपाठेनानु
व्याख्यनेब्रह्मादीनांलयमुक्त्वापुनरंडाद्बहिर्विद्यमानतत्वाभिमानिनांदेहलयप्रतिपादकभागवतश्लोकस्योदाहृतत्वात् ॥ तच्छ्लो
कस्तु ॥ क्ष्मांभोनलानिलवियन्मनइंद्रियार्थभूतादिभिःपरिवृतःप्रतिसंजिघृक्षुः ॥ अव्याकृतंविशतियर्हिगुणत्रयात्माकालंपरं
स्वमनुभूयपरःस्वयंभूरिति ॥ द्वितीयस्कंधतात्पर्येचायंश्लोकोव्याख्यातः ॥ ज्ञानिनःप्रलयेसर्वेब्रह्मणासहपार्थिवं ॥ परमात्मा
नमाविश्यवारिस्थंतत्समन्विताः ॥ अग्निस्थंतद्युताश्चैवतेननीताश्चवायुगं ॥ नभोगतंतेननीताःमनःस्थंतद्युतास्तदा ॥ ततोबुद्धि
स्थमीशेशंततोहंकारगंहरिं ॥ ततोविज्ञाननामानंमहत्तत्वगतंहरिं ॥ ततआनंदनामानंमव्यक्तस्थंजनार्दनं ॥ प्राप्यनावृत्तिमा
यांतिशांतीभूतानिरामयाइति ॥ एवंब्रह्मणोरूपविशेषस्यसरस्वत्यांलयः॥महत्तत्वकालाद्यभिमानिदेवेस्वस्वरूपेचलयोबोध्यः॥

तदुक्तमेकादशतात्पर्ये ॥ गायत्रीचैवसावित्रीतथैवचसरस्वती ॥ एवंत्रिरूपाप्रकृतिर्ब्रह्मपत्नीप्रकीर्तिता ॥ महत्तत्वात्मकोत्र
ह्मातज्ज्ञत्वात्तत्रलीयते ॥ गुणाधिकःपतिरपितस्याःसत्त्वादिभेदतः ॥ त्रिविधामूलरूपायांप्रकृत्यांसाप्रलीयतइति॥ प्रकृतिर्मूल
रूपासाब्रह्मपत्नीजगन्मया ॥ पुरुषाभिधेविरिंचेतुसस्वस्मिन्कालसंज्ञिते ॥ कालाभिधोविरिंचस्तुमहालक्ष्म्यांविलीयतइति ॥
लक्ष्म्यास्तु हरेरत्यंतसामीप्यंलयोलक्ष्म्याःप्रकीर्तितइतिलयस्तत्रैवप्रतिपादितः ॥ परमात्मनस्तुनसर्वथालयः ॥ तदुक्तंगी
तातात्पर्ये ॥ अनित्यत्वंदेहहानिर्दुःखप्राप्तिरपूर्णता ॥ नाशश्चतुर्विधोज्ञेयस्तदभावोहरेःसदेति ॥ नन्वेवंब्रह्मादीनांनदेहलयोयु
क्तः ॥ नृसिंहनेत्राग्निनातद्देहभस्मीभावस्यनृसिंहनखस्तुतावुक्तेर्यद्रोषोत्करदक्षनेत्रकुटिलप्रांतोत्थिताग्निस्फुरत्खद्योतोपमविष्फु
लिंगभसिताब्रह्मेशशक्रोत्कराइति ॥ तथा ब्रह्मचर्मशिरःपट्टीदिक्पालोर्ध्वांगभूषणः ॥ द्वादशार्कशिरोदामारुद्रशीर्षैकनूपुरइ
त्यादिपुराणेषुब्रह्मरुद्रादीनांलयंविनापिदेहत्यागोक्तेरितिचेन्न ॥ उत्तमशरीरेषुलयंगतानामेवब्रह्मादीनांप्रलयकालेशरीरांतरंसृ
ष्ट्वानृसिंहस्यतेनक्रीडासंभवात् ॥ तदुक्तमेकादशतात्पर्ये ॥ आग्नेय्यान्येधारणयादग्ध्वादेहंपरंपदं ॥ यांतिदेवाःसमस्ताश्चतेषा
मन्यांतनुंहरिः ॥ नृसिंहरूपीसर्वेषांभित्वाताभिरलंकृतः ॥ नृत्यतेप्रलयेदेवःस्वयंकृष्णादिरूपवान् ॥ अदग्ध्वैवतनुंयातिनित्या
नंदस्वरूपतइति ॥ ननुवायुभारतीरुद्रपार्वतीनांचतुर्णांप्रलयेदेहलयोस्तिनवा ॥ नेतिपक्षेनित्यमुक्तत्वापत्तिः ॥ उत्तरकल्पेब्र
ह्मपदाद्यनवाप्तिश्चस्यात् ॥ लयपक्षेधमेषुलयाभावात्परमात्मन्येवलयोवक्तव्यः ॥ तथाचब्रह्मादिवत्पुनरुत्पत्त्यभावप्रसंगइत्यत

आह ॥ उमायाइत्यादिना ॥ ५७० ॥ तदुक्तमुत्क्रांतिपादीयानुव्याख्यानसुधयोः ॥ उमागिरीशावपिभारतीरावितिस्मवा ग्वेदगताब्रवीतीति ॥ उमारुद्रादिशब्दानामुमादिपरत्वस्याप्युक्तेः ॥ सूत्रभाष्ययोरपि ॥ ॐ वाङ्मनसिदर्शनाच्छब्दाच्च ॐ ॥ वागभिमानिन्युमामनोभिमानिनिरुद्रेविलीयतइत्यादि ॥ वायोश्चप्रकृत्यांलयइति ॥ तदुक्तंसूत्रभाष्ययोः ॥ ॐतदपीतेःसंसा रव्यपदेशात् ॐ ॥ प्रकृतौविलीनःसंसारमेतीति ॥ ननूमादिवाय्वंतानांप्रकृतौलयांगीकारेतदामुक्तिर्नस्यादित्याशंकामिष्टाप त्त्यापरिहरति ॥ तेषामिति ॥ ५७१ ॥ तदुक्तंसन्न्यायरत्नावल्यां उमागिरीशयोर्वारुणीशेषजन्मन्येवमुक्तिः ॥ भारतीमुख्य वाय्वोरपिब्रह्माणीब्रह्मजन्मन्येवमुक्तिरिति ॥ द्वितीयस्कंधतात्पर्येपि ॥ एषांपदांतराकांक्षावाय्वादीनांमहात्मनां ॥ अवर्त्य तेपुनर्यातिज्ञानिनोपिनिरामयाइति ॥ गीताभाष्येरुद्रस्यशेषभावानंतरमेवमुक्तिरुक्ता ॥ स्थितप्रज्ञोपियस्तूर्ध्वःप्राप्यरौद्रपदं पुनः ॥ सांकर्षणंततोमुक्तिमगाद्विष्णुप्रसादतइति ॥ षष्ठतात्पर्येपि ॥ रुद्राद्याःशेषदेहस्थंविष्णुंसंकर्षणाभिधं ॥ शेषांतर्यामिणं ज्ञात्वास्वपदंप्रापुरंजसेति ॥ वायोर्ब्रह्मपदप्राप्तिरित्यादि ॥ तदुक्तंतृतीयस्कंधतात्पर्ये ॥ नियमाद्वायुरेवैकोब्रह्मत्वंयातिनापरः ॥ तस्मात्समानतामुक्तौवायुत्वेकिंचिदूनतेति ॥ बृहद्भाष्येपि ॥ वायुरेवयतोब्रह्मपदंनियमतोव्रजेदिति ॥ निर्णयेपि ॥ एकोब्र

५७० उमायारुद्रेलयः ॥ रुद्रस्यभारत्यांलयः ॥ भारत्याश्चवायौलयः ॥ वायोश्चलक्ष्म्यांलयः ॥ ५७१ तेषांतदानमुक्तिः किंत्वेतद्ब्रह्मकल्पा नंतरमेष्यत्कल्पेवायोर्ब्रह्मपदप्राप्तिः ॥ भारतीसरस्वतीभविष्यति ॥ रुद्रस्यशेषपदप्राप्तिः ॥ उमावारुणीभविष्यति ॥ इत्येवंवाय्वादिचतुर्णांब्रह्मादि भावानंतरंमुक्तिः ॥

ह्माचवायुश्चवींद्रोरुद्रसमस्तथा ॥ एकोरुद्रस्तथाशेषोनकश्चिद्वायुनासमः ॥ वायुर्हिब्रह्मतामेतितस्माद्ब्रह्मैवसस्मृतइति ॥ वायु त्वमाप्तःसहनूमदंशोब्राह्मंपदंप्राप्यवृकोदरश्च ॥ वागीश्वरत्वंगतयैवकृष्णयासहैवमुक्तिंगमिताखिलोत्तमामिति ॥ सन्न्यायरत्नाव ल्यामपियस्मादुमादयएवमहाकल्पांतरेवारुण्यादिपदंप्राप्नुवंतीति ॥ छांदोग्यभाष्यबृहद्भाष्यादावप्येवमेवोक्तमनुसंधेयमिति ॥ ॥ ५ ॥ ५ ॥ ५ ॥ सर्वेषांलिंगभंगप्रकारमाह ॥ **एवमित्यादिना** ॥ **विरजास्नानेनेति** ॥ ५७२ ॥ तदु क्तंन्यायविवरणे ॥ स्वोदयात्फलदंज्ञानमादेहंकर्मवारवेः ॥ प्रारब्धकर्मशेषस्तुविरजातरणावधिः ॥ तथापिप्रकृतेर्बंधोब्र ह्मणासहभिद्यते ॥ शरीरेपाप्मनोहित्वासर्वान्कामान्समश्नुते ॥ सतेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविनिर्मुच्यतएवंहैव पाप्मनाविनिर्मुक्तःसमाप्नोतिविरजांनदींतत्सुकृतदुष्कृतेविधूनतइति॥ विधेर्देहापगमनेलिंगमात्रशरीरिणः ॥ विरजायांकृतस्ना नाब्रह्मणासहसर्वशः ॥ त्यक्तलिंगास्ततःसर्वेस्वरूपेणव्यवस्थिताइतिविष्णुरहस्ये ॥ ब्रह्मणासहलिंगभंगोजायतइति ॥ तदुक्त मुत्क्रांतिपादीयानुव्याख्याने ॥ भगवंतमनुप्राप्ताअपितुब्रह्मणासह ॥ परमंमोक्षमायांतिलिंगभंगेनयोगिनः ॥ प्राप्ताअपिपरं देवंसहैवब्रह्मणापुनः ॥ आनंदव्यक्तिमायांतिपूर्णालिंगस्यभंगतइति ॥ अन्येषामपिसाक्षात्तुमुक्तिःप्राप्यापितंहरिं ॥ सहैवब्रह्म णाभूयादितिशास्त्रस्यनिर्णयइतिच ॥ विरजानदीचकुत्रास्तीत्याकांक्षायामाह ॥ **विरजानदीचेति** ॥ ५७३ ॥ प्रधानपरम

---

५७२ एवंलयानंतरंचतुर्मुखदेहेप्रविष्टानामेतद्ब्रह्मकल्पेलिंगभंगयोग्यानांब्रह्मणासहविरजानदीस्नानेनलिंगभंगोजायते ॥ ५७३ विरजानदीचप्र धानाव्याकृताकाशयोर्मध्येवर्तते ॥ लक्ष्म्यात्मिका ॥

व्योम्नोरंतराविरजानदीतिपुराणवाक्यादित्यर्थः ॥ इदमुपलक्षणं ॥ सैववैकुंठपरिघाकारारूपांतरेणास्तीतिज्ञेयं ॥ तत्रापिपुरा
णवाक्यमेवमानं ॥ लिंगशरीरभंगोजायतइत्युक्तं ॥ तत्कीदृशमित्याकांक्षायांतत्स्वरूपमाह ॥ **लिंगशरीरंचेति** ॥ ५७४ ॥
तदुक्तंचतुर्थस्कंधतात्पर्ये ॥ प्राणेंद्रियांतःकरणभेदेनत्रिविधंमतं ॥ पंचपंचैवतेसर्वेप्राणाबुद्धींद्रियाणिच ॥ कर्मेंद्रियाणिचतथात
स्मात्पंचविधंस्मृतं ॥ लिंगंषोडशकंप्राहुर्मनसासहतत्पुनरिति ॥ चतुर्थभागवतेपि ॥ एकंपंचविधंलिंगंत्रिवृत्षोडशविस्तरं ॥
एषचेतनयायुक्तोजीवइत्यभिधीयतइति ॥ ननुलिंगशरीरस्यकथंभंगः ॥ प्रकृतिरूपत्वेनानादिनित्यत्वादित्यतआह ॥ **तस्यभं
गोनामेति** ॥ ५७५ ॥ सर्वेषांविरजानदीस्नानकालेजीवान्परित्यज्यनद्यांपतंति ॥ नद्यामेवप्लुवंतइत्याहुः ॥ पक्षांतरमाह ॥
स्वरूपतएवनाशइति ॥ ५७६ ॥ अनादित्वेपिप्रागभावाविद्यादिवत्स्वरूपतएवनाशः ॥ तदुक्तंजिज्ञासाधिकरणसुधा
यां ॥ अनादेःकीदृशोविनाशइतिचेत् ॥ स्वरूपध्वंसएवेति ॥ ननुप्रलयेभगवदुदरंप्रविष्टानांमुक्तानांकदाभोगइत्याकांक्षायांप्र
लयेस्वरूपमात्रस्यानुभवः सृष्ट्यनंतरंचविषयभोगइत्याह ॥ **प्रलयकालइति** ॥ ५७७ ॥ तदुक्तंनिर्णये ॥ दृष्ट्वासचेतनगणाञ्ज
ठरेशयानानानंदमात्रवपुषःसृतिविप्रमुक्तान् ॥ ध्यानंगतान्सृतिगतांश्चसुषुप्तिसंस्थान्ब्रह्मादिकान्कलिपरान्मनुजांस्तथैक्षत् ॥
स्रक्ष्येहिचेतनगणान्सुखदुःखमिश्रसंप्राप्तयेतनुभृतांविहृतिंममेच्छन्निति ॥ बृहद्भाष्येपि प्रलयेतुप्रविश्यैवभगवंतंजनार्दनं ॥

५७४ लिंगशरीरंच दशेंद्रियाणिसूक्ष्मरूपाणि पंचप्राणाःसूक्ष्मरूपाः मनश्चसूक्ष्मरूपं आहत्यषोडशकलोपेतं ॥ ५७५ तस्यभंगोनामजीवसंबं
धनाशः ॥ ५७६ स्वरूपतएवनाशइतिकेचित् ॥ ५७७ प्रलयकालेसर्वेषांभगवदुदरेप्रवेशः ॥ तदानभोगः ॥ किंतुपुनःसृष्टचनंतरंसृष्टिकालेभोगः ॥

स्थित्वाज्ञानाविलोपेननिर्गच्छंतिपुनस्ततः ॥ नचज्ञानसुखादीनांतेषांसृष्टौलयेपिवा ॥ विशेषःकश्चिदंतश्चबहिश्चैवरमंतितइति॥
तृतीयतात्पर्येपि ॥ ब्रह्मादेवैःपरिवृतःप्रलयेपरमेश्वरं ॥ प्रविश्यसर्गेतुपुनःश्वेतद्वीपेप्रमोदते ॥ ज्ञानधर्मफलांस्तत्रभोगान्भुक्त्वा
लयंपुनः ॥ नारायणंसमाविश्यज्ञानव्यक्तिनिजंसुखं ॥ भुंजतेत्वेवमेवैषांकालेसंसर्गनिर्गमौ ॥ नित्यौनित्यसुखंचैवसृष्टौभोगा
स्तथोत्तमाइति ॥ मुक्तौसर्वेषांनभोगसाम्यंकिंतुतत्तद्योग्यतानुसारेणेतिवक्तुंमुक्तान्विभजति ॥ **तत्रभोगयोग्याइति**
॥ ५७८ ॥ तदुक्तंभाष्ये ॥ सालोक्यंचसमीपत्वंसारूप्यंयोगएवच ॥ इमामारभ्यसर्वत्रयावत्सुक्षीरसागरं ॥ पुरुषोनंतशयनःश्री
मान्नारायणाभिधइति ॥ ननुतृतीयस्कंधभागवते सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमित्युत ॥ दीयमानंनगृह्णंतिविनामत्सेव
नंजनाइतिसार्ष्टिनामकमोक्षेणसहपांचविध्योक्तेःकथंमोक्षश्चतुर्विधइतिचेन्न ॥ समानैश्वर्यभोगरूपसार्ष्टिमोक्षस्यसायुज्यमोक्षा
वांतरप्रभेदत्वेनाविरोधात् ॥ अत्रसायुज्यंनामभगवंतंप्रविश्यतच्छरीरेणभोगः ॥ तस्याधिकारिणोदेवाः ॥ तदुक्तमुत्क्रांतिपा
दीयानुव्याख्याने ॥ भोगस्तुसर्ववस्तूनांनरादीनांचविद्यते ॥ तत्रप्रवेशोदेवानामुत्तरोत्तरतःक्रमादिति ॥ अत्रदेवानांस्वस्वोत्त
मप्रवेशेनपरमात्मशरीरप्रवेशेनचभोगः ॥ ब्रह्मणस्तुपरमात्मशरीरप्रवेशेनैवभोगः ॥ तदुक्तमणुभाष्ये ॥ उत्तरेषूत्तरेष्वेवयावद्वा
युर्विमुक्तिगाः ॥ प्रविश्यभुंजतेभोगांस्तदंतर्बहिरेववा ॥ वायुर्विष्णुंप्रविश्यैवभोगश्चैवोत्तरोत्तरमिति ॥ नचैवंतत्रैवभोगांगी
कारेनिर्बंधःस्यात् ॥ अन्यत्रतदिच्छायांभोगाभावप्रसंगादितिवाच्यं ॥ स्वेच्छयैवप्रवेशनिर्गमयोरंगीकारात् ॥ तदुक्तंबृहद्भा

५७८ तत्रभोगाश्चतुर्विधाः सालोक्यसामीप्यसारूप्यसायुज्यभोगवंतइति ॥

ष्ये ॥ प्राप्नोतिपरमंब्रह्मप्रलयेप्रलयेसदा ॥ अन्यदास्वेच्छयाविष्णोःस्वरूपाद्बहिरेष्यति ॥ स्वेच्छयांतर्बहिश्चैवरमतेमुक्तआत्मवानिति ॥ अनुव्याख्यानेपि ॥ भुजंतएवासतईशदेहेलयेथसर्गेबहिरेवयांतीति ॥ भाष्येपि ॥ मर्त्यदेहंपरित्यज्यचितिमात्रात्मदेहिनः ॥ चितिमात्रेंद्रियाश्चैवप्रविष्टाविष्णुमव्ययं ॥ तदंगानुगृहीतैश्चस्वांगैरेवप्रवर्तनं ॥ कुर्वंतिभुंजतेभोगांस्तदंतर्बहिरेववा॥ यथेष्टंपरिवर्ततेतस्यैवानुग्रहेरिताइति ॥ सायुज्यभाजांभोगप्रकारश्चभाष्येभिहितः ॥ आदत्तेहरिहस्तेनहरिदृष्ट्यैवपश्यति॥ गच्छेच्चहरिपादेनमुक्तस्यैषास्थितिर्भवेदिति ॥ ननुपरमात्मनासहभोगांगीकारेपरमात्मानंदादिभोगापत्तिरितिचेन्न ॥ परमात्मदेहंप्रविश्यपरमात्मानंदादीन्परित्यज्यस्वस्वरूपानंदादिभोगस्यैवांगीकारात् ॥ तदुक्तंभाष्ये ॥ मुक्ताःप्राप्यपरंविष्णुंतद्भोगाँल्लेशतःक्वचित् ॥ बहिष्ठान्भुंजतेनित्यंनानंदादीन्कथंचनेति ॥ परमात्मातुजीवभोज्यानंदभोक्तापि ॥ तदुक्तंबृहद्भाष्ये ॥ जीवभोग्यस्यभोक्तेशोजीवस्तद्भोगभुङ्न्त्विति ॥ मनुष्योत्तमानांसालोक्यभाजांभोगमुपपादयति ॥ केचनभगवल्लोकइति ॥ ५७९ ॥ तेनभगवल्लोकमात्रावस्थानंविनास्वर्गादिलोकेषुस्थित्वाभगवद्दर्शनेनभोगएवसालोक्यमुक्तिरितिसूचितं ॥ तदुक्तंभाष्ये ॥ केचिदत्रैवमुच्यंतेनोत्क्रामंतिकदाचन ॥ अत्रैवचस्थितिस्तेषामंतरिक्षेतुकेचन॥ केचित्स्वर्गेमहर्लोकेजनेतपसिचापरे ॥ केचित्सत्येमहाज्ञानागच्छंतिक्षीरसागरमिति ॥ सामीप्यमुक्तिभाजआह ॥ केचनेति ॥ तेचऋष्यादयःतत्रापिक्रमयोगेनज्ञानाधिक्यात्समीपगाइतिभाष्योक्तेः ॥ बृहद्भाष्येपि ॥ उपासनाबलान्मुक्तोभोगान्कर्मफलान्सदा ॥ भुंक्तेविष्णोःसमीपस्थः

५७९ केचनभगवल्लोकेयत्रकुत्रचित्स्थितायथेष्टभोगवंतः ॥ केचनभगवत्समीपेयथेष्टभोगवंतः ॥

सर्वदोषविवर्जितइति ॥ सारूप्यभाजांभोगमाह ॥ केचनचतुर्भुजाइति ॥ ५८० ॥ तेचजयविजयादयोद्वारपाः ॥ सर्वेच तुर्बाहवउन्मिषन्मणिप्रवेकनिष्काभरणाःसुपेशसइतिद्वितीयभागवतोक्तेः ॥ सायुज्यभाजांभोगमाह ॥ केचनेति ॥ ५८१ ॥ भगवच्छरीरमिति ॥ तत्रप्रमाणंतूक्तंपूर्वमेव ॥ पुनःसर्वेषांभोगस्थानमाह ॥ केचनक्षीरसागरगाइति ॥ ५८२ ॥ तदुक्तं बृहद्भाष्ये ॥ दुग्धसागरगाःकेचित्केचिदश्वत्थकक्षगाः ॥ अमृतह्रदेषुकेचिच्चपिबंतिस्नातवत्सदा ॥ केचित्पश्यंतितंदेवंसदाके चित्समीपगाइति ॥ ऐतरेयभाष्येपि ॥ क्षीरसागरदध्नास्तुकेचित्तिष्ठंतिमुक्तिगाः ॥ उपस्थिताब्रह्मवनंकेचिदश्वत्थमंडलं ॥ ऐर ह्रदेकेचिदपिदेवाएवसदाहरिं ॥ नागभोगाशयंमुक्तादद्दशेधिकमोदिनः ॥ सागरादिस्थिताविष्णुंपश्यंतिक्कचिदेवहीति ॥ केचनमध्यसरोवरगाइत्यादि ॥ तदुक्तंछांदोग्यभाष्ये ॥ परस्यब्रह्मणोलोकेश्वेतद्वीपाभिधेपरे ॥ अरण्यौचार्णवौदिव्यौचि दानंदरसात्मकौ ॥ यावानुच्चःस्वर्गलोकस्तावानुच्चतयासच ॥ श्वेतद्वीपोदिविष्ठोतस्तत्रमध्यंसरोवरं ॥ सर्वभोज्यात्मकंदिव्यंतत्रा श्वत्थाःसुधास्रवाइति ॥ तत्रबहवोवृक्षाइत्यादि ॥ ५८३ ॥ तदुक्तंश्रुतिपादीयानुव्याख्याने ॥ आचक्ष्वमेपरंमोक्षंधीरायंप्र वदंतितं ॥ इत्युक्ताआहवाग्देवीपरंमोक्षंप्रजापतेः ॥ शाखांशाखांमहानद्यःसंयांतिपरितःस्रवाः ॥ धानापूपामांसकामाःसदापायस

---

५८० केचनचतुर्भुजाःशंखचक्राद्यायुधवंतोयथेष्टभोगिनः ॥ ५८१ केचनभगवच्छरीरंप्रविश्ययथेष्टभोगवंतः ॥ ५८२ एवंकेचनक्षीरसागरगाः॥ केचनाश्वत्थवनगाः ॥ केचनारण्याख्यसुधासमुद्रगाः ॥ केचनवाह्योपवनगाः ॥ ५८३ तत्रबहवोवृक्षाः ॥ तेषुप्रतिशाखंधानापूपाःस्रवंति ॥ तथा पायसकर्दमाः ॥ मांसराशयश्च ॥ तत्रतत्रमुक्तास्तत्तत्पदार्थभोगवंतोभवंति ॥

कर्दमाः ॥ यस्मिन्नग्निमुखादेवाःसेंद्राःसहमरुद्गणाः ॥ ईजिरेक्रतुभिःश्रेष्ठैस्तदक्षरमुपासते ॥ प्रविशंतिपरंदेवंमुक्तास्तत्रैवभोगि
नः ॥ निर्गच्छंतियथाकामंपरेशेनैवचोदिताइति ॥ **केचनस्त्रीभोगमिति** ॥ ५८४ ॥ सतत्रपर्येतिजक्षन्क्रीडन्रममाणःस्त्री
भिर्वायानैर्वाज्ञातिभिर्वाऽज्ञातिभिर्वेतिश्रुतेः ॥ **केचनदिव्याभरणादिमंतइति** ॥ ५८५ ॥ तदुक्तंमध्वविजये ॥ विहरंति
साकमवगाह्यधवैर्जलमड्डुकोत्सवहसद्वदनाः ॥ विविधाविधायविहृतीःसलिलेविकटेषुविद्रुमतटेषुगताः ॥ सुरभिंसुवर्णमथवर्ण
कमाददतेसखीकरगतंमहिलाइति ॥ मणिराजिराजितमहामुकुटंसितकांतकुंतलसहस्रतयं ॥ अलिकार्धचंद्रविलसत्तिलकंश्रव
णोल्लसन्मकरकुंडलयुगितिच ॥ **स्फटिकेंद्रनीलमण्यादीति** ॥ ५८६ ॥ तदुक्तंमध्वविजये ॥ सितसौधसंततिरुचास्फु
रितापरितोरुणाश्मगृहपंक्तिततिः ॥ शबलावलीकघटितस्फटिकद्युतिभिर्हरिन्मणिमयीवलभी ॥ प्रतिसद्मभातीत्यादि ॥ **केचन
ऋगादीति** ॥ ५८७ ॥ ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्करीषु ॥ ब्रह्मात्वोवदतिजातविद्यांयज्ञस्यमात्रांविमि
मीतउत्वइतिश्रुतेः ॥ **केचनसुखोद्रेकेणेति** ॥ ५८८ ॥ इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन्नेतत्सामगायन्नास्तेहावुहावु
हावुइतिश्रुतेः ॥ **केचनपूर्वाभ्यासेति** ॥ ५८९ ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐछंदतउभयाविरोधात्ॐ ॥ स्वेच्छयाकुर्वंतिनवा ॥

५८४ केचनस्त्रीभोगंकुर्वंति ॥ केचनगजतुरगादीन्धावयंति ॥ ५८५ केचनदिव्याभरणादिमंतःस्त्रीभिस्सहजलक्रीडांकुर्वंति ॥ ५८६ स्फ
टिकेंद्रनीलमण्यादिनिर्मितविचित्रसद्मप्रासादेषुरमंते ॥ ५८७ केचनऋगादिवेदोच्चारणेनभगवंतंस्तुवंति ॥ ५८८ केचनसुखोद्रेकेणहावुहावुइत्या
दिशब्दानुच्चरंति ॥ ५८९ केचनपूर्वाभ्यासवशेनयज्ञादिकंकुर्वंति ॥

बंधप्रत्यवाययोरभावात् ॥ कदाचित्कर्मकुर्वंतिकदाचिन्नैवकुर्वते ॥ प्रत्यवायस्यबंधस्याप्यभावात्स्वेच्छयाभवेदिति ॥ टीकायां
संस्कारपाटवादुपासनादीत्युक्तेश्च ॥ **केचनाजन्ममरणमिति** ॥ ५९० ॥ आजन्ममरणंस्मृत्वामुक्ताहर्षमवाप्नुयुरितिछांदो
ग्यभाष्योक्तेः ॥ **केचनेच्छामात्रेणेति** ॥ ५९१ ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐसंकल्पादेवचतच्छ्रुतेः ॐ ॥ सयदिपितृलोकका
मोभवति ॥ संकल्पादेवास्यपितरःसमुत्तिष्ठंतीत्यादिश्रुतेः ॥ **केचनशुद्धसत्त्वनिर्मितेति** ॥ ५९२ ॥ तदुक्तंसूत्रेभाष्येच ॥
ॐभावंजैमिनिर्विकल्पाम्नानात् ॐ ॥ चितावाऽचितावानित्येनवाऽनित्येनवाथानंदीह्येषभवतीति ॥ स्वेच्छयावाशरीराणिते
जोरूपाणिकानिचित् ॥ स्वीकृत्यजागरितवद्भुक्त्वात्यागःकथंचन ॥ ज्योतिर्मयेषुदेहेषुस्वेच्छयाविश्वमोक्षिणः ॥ भुंजतेसुसुखा
न्येवनदुःखादीन्कदाचन ॥ तीर्णाहिसर्वशोकांस्तेपुण्यपापादिवर्जिताः ॥ सर्वदोषनिवृत्तास्तेगुणमात्रस्वरूपिणइति ॥ केचित्तु
मुक्तानांस्वेच्छयापांचभौतिकशरीरग्रहणेनभोगोयुज्यतएव ॥ नचदुःखाद्यापत्तिः ॥ स्वकर्मनिर्मितत्वाभावेनदुःखादेरभावात् ॥
व्रीह्यादिगतजीवांतरवदित्याहुः ॥ **केचनभगवद्गुणकर्माणीत्यादि** ॥ ५९३ ॥ मुक्तगंधर्वादीनांगानादिकर्तृत्वात् ॥ तदुक्तं
बृहद्भाष्ये ॥ केचिद्गानरतानित्यंगंधर्वानर्तकाःपरे ॥ केचिद्वाद्यरतानित्यंचारणादेवचारकाइति ॥ मुक्तावपिसंसारवत्सुखादौ
तारतम्यंब्रह्मादीनामित्याह ॥ **सर्वेपीति** ॥ ५९४ ॥ बृहदारण्यकेतैत्तरीयकेचश्रोत्रियस्यचाकामहतस्येत्यनेनमुक्तावपिता

५९० केचनाजन्ममरणंस्मृत्वाहर्षंप्राप्नुयुः ॥ ५९१ केचनेच्छामात्रेणपित्रादिदर्शनवंतोभवंति ॥ केचनसर्वलोकचारिणः ॥ ५९२ केचनशुद्धसत्त्व
निर्मितलीलाशरीराण्युपादायक्रीडंते ॥ ५९३ केचनभगवद्गुणकर्माणिगायंति ॥ केचननृत्यंतिकेचनवाद्यानिवादयंति ॥ ५९४ सर्वेपितारतम्यवंतः ॥

रतम्योक्तेः ॥ संसारिणांतुश्रोत्रियत्वमकामहतत्वंचानुपपन्नमितिबृहदारंण्यंकंभाष्यएवोक्तं ॥ प्राप्तश्रुतिफलत्वात्तुश्रोत्रियाआ
प्तमोक्षिणः ॥ तएवचाप्तकामत्वात्तथाऽकामहताःश्रुताः ॥ सर्वश्रुतिफलंमुक्तैःप्राप्यंनान्येनकेनचित् ॥ अतस्तुश्रोत्रियोमुक्तो
ह्यन्यःश्रोत्रियकोभवेत् ॥ अदुःखत्वंचतस्यैवकामैराहततातथा ॥ यःकामितंनप्राप्नोतिसकामहतउच्यते ॥ काम्याप्राप्तेश्चपा
पाच्चकामात्कामहतःस्मृतः॥ उभयस्याप्यभावेनमुक्तौकामहतोमतइति ॥ तैत्तिरीयभाष्येपि ॥ यस्यश्रुतिफलंपूर्णंसश्रोत्रियउदा
हृतः ॥ सहिमुक्तोकामहतःसहिकामैर्नहन्यते ॥ यस्यकामास्तुसत्याःस्युःसहिकामैर्नहन्यतइति ॥ ननुश्रोत्रियस्यचाकामहतस्ये
त्यनेनमुक्तोनविवक्षितः ॥ किंतुचतुर्मुखः ॥ तस्यसर्वकर्तुःकामहतेरभावादितिचेन्न ॥ तस्यापिमुख्यतोकामहतत्वाभावात् ॥
तदुक्तंबृहद्भाष्ये ॥ ब्रह्मणोपिह्यमुक्तस्यनाकामहततापरा ॥ यतस्तस्यापिकामस्यक्षणव्यवहतिर्भवेदिति ॥ अतएवनिर्णये ॥ इ
च्छाव्यक्तिःप्रायशोमारुतस्यतदन्येषांव्यक्तताकारणेनेति हनूमद्भीमादेरिच्छायांसत्यामपिक्षणव्यवधानसूचनायप्रायशइत्युक्तं॥
ननुमुक्तानांतारतम्यसद्भावईर्ष्यासूयादिदोषःस्यात् संसारेतथादर्शनादित्यतआह ॥ ईर्ष्यासूयादीति ॥ ९९९ ॥ मुक्ता
नांकामक्रोधादिदोषरहितत्वेनपरस्परस्नेहस्यैवयुक्तत्वात् ॥ तदुक्तंसूत्रेभाष्येच ॥ ॐअक्षरधियांत्वविरोधःसामान्यतद्भावाभ्या
मौपसदवत्तदुक्तमिति ॥ नचासमत्वेनविरोधोभवति ॥ ब्रह्मधीत्वाद्दोषाभावसाम्यादौपसदवच्छिष्यवत् ॥ नानाविधाजीवसं
घाविमुक्तौनचैवतेषांब्रह्मधियांविरोधः ॥ दोषाभावाद्गुरुशिष्यादिभावाल्लोकेपिनासौकिमुतेषांविमुक्तेरिति ॥ अनुव्याख्याने

९९९ ईर्ष्यासूयादिदोषरहितामोदंते ॥

पि ॥ अधिकारविशेषेणभक्तिज्ञानसुखादिभिः ॥ विशेषोदेवतादीनांमोक्षेचैवविशेषतः ॥ नतावताविरोधोस्तिनिर्दोषत्वात्सम
स्तशः ॥ आभासत्वात्परेषांतदवराणांचसर्वशः ॥ यतोवराणांसर्वेपिगुणाःसर्वाःक्रियाअपि ॥ नियमेनैवपूर्वेषांसुप्रसादनिबंध
नाः ॥ यतःसच्छिष्यवत्तेषांनैवेर्ष्यादिःकथंचनेति ॥ मोक्षआनंदातिशयोस्तीत्याह ॥ **अपरोक्षज्ञानानंतरमिति** ॥ ५९६ ॥
पूर्वभाविशुभानांहिज्ञानेनैवकृतार्थता ॥ प्रारब्धानांतुभोगेनतज्ज्ञानोत्तरकर्मणां ॥ मुक्तावनुप्रवेशःस्यादन्यथातत्कृतिर्नहीतिज्ञा
नपादीयानुव्याख्यानोक्तेः ॥ बृहद्भाष्येपि ॥ उपासनाबलान्मुक्तोभोगान्कर्मफलान्सदा ॥ भुंक्तेविष्णोःसमीपस्थःसर्वदोषवि
वर्जितइति ॥ पूर्वमपिबहूनांप्रमाणानामुदाहृतत्वाच्च ॥ **लवणार्णवइति** ॥ ५९७ ॥ तदुक्तंज्ञानपादीयानुव्याख्याने ॥ दश
कल्पंतपश्चीर्णंरुद्रेणलवणार्णवे ॥ त्यक्त्वासुखानिसर्वाणिक्लिष्टेनलवणांभसा ॥ शक्रेणवर्षकोटीश्चधूमःपीतोतिदुःखतः ॥ वर्षायु
तंचसूर्येणतपोर्वाक्शिरसाकृतं ॥ सुदुःखेनसुखंत्यक्त्वाधर्मेणाकाशशायिना ॥ पीतामरीचयोवर्षसाहस्रमतिसादरं ॥ अतिकृच्छ्रे
णकुर्वंतियत्नंब्रह्मविदोपिहि ॥ इत्येतदखिलंमोक्षेविशेषाभावतःकथमिति ॥ ननुजीवानामत्यंताणूनांमुक्तौस्त्र्यादिभोगःकथ
मित्यतआह ॥ **स्वर्णकारइत्यादिना** ॥ ५९८ ॥ तदुक्तंबृहदारण्यकोपनिषद्भाष्ययोः ॥ शरीरंनिहत्याविद्यांगमयित्वान्यन्न

५९६ अपरोक्षज्ञानानंतरमनुष्ठितकर्मोपासनादिवशादानंदातिशयवंतोभवंति ॥ अन्यथातदनुष्ठानवैयर्थ्यापातात् ॥ अनुतिष्ठंतिचरुद्रादयः ॥
५९७ तथाहिलवणार्णवेरुद्रेणदशकल्पंतपश्चीर्णं ॥ शक्रेणकोटिवर्षधूमःपीतः ॥ सूर्येणायुतवर्षमर्वाक्शिरसातपःकृतं ॥ आकाशशायिनाधर्मेणसहस्र
वर्षंमरीचयःपीताः ॥ अतआनंदातिशयः ॥ ५९८ स्वर्णकारःसुवर्णवत्परमात्मामुक्तानांस्वेच्छयैवभोगार्थकल्याणतमंमहद्रूपंकरोति ॥

वतरंकल्याणतरंरूपंकुरुतइत्युपनिषत् ॥ जीवस्यसूक्ष्मरूपंतुप्राप्यस्थूलंपरित्यजेत् ॥ इदंशरीरंभूतेषुविलापयतिकेशवः ॥ अवि
द्यांचैवजीवस्यगमयेज्ज्ञानसर्जनात् ॥ स्वर्णकारोयथास्वर्णमलमग्नौनिहत्यच ॥ शुद्धेनतेनचात्मेष्टंकुरुतेरूपमंजसा ॥ एवंसभग
वान्विष्णुर्जीवस्वर्णस्ययन्मलं ॥ अविद्याकामकर्माद्यमात्माग्नावस्यसर्वकृत् ॥ स्वेच्छयाकुरुतेरूपंयद्योग्यंतस्यमुक्तिगं ॥ पितृ
जीवस्यपित्र्यंचगांधर्वंतस्यचैवहि ॥ दैवंतुदेवजीवस्यप्राजापत्यंप्रजापतेः ॥ ब्रह्मणोब्राह्ममेवेतिनित्यानंदस्वरूपकं ॥ नयोग्यतां
विनाक्वापिपूर्वप्रज्ञाश्रुतेःक्वचित् ॥ अल्पतेजस्तथैवाल्पंजीवरूपंहिसंसृतौ ॥ तथैवसुमहत्तेजःकरोतिभगवान्महत् ॥ अतोनवतरं
चैतद्ब्रह्मादीनांकरोत्यजइति ॥ इदमेववाक्यंज्ञानपादीयानुव्याख्यानसुधासन्न्यायरत्नावलीनयचंद्रिकासूदाहृत्यव्याख्यातमि
ति ॥ ननुमुक्तानामीश्वरकृतंमहत्परिमाणंनित्यमनित्यंवा ॥ नाद्यः ॥ जीवानामणुत्वमेवेतिसिद्धांतविरोधात् ॥ अनित्यत्वेच
तदुपादानंप्रकृतिरेवेतितेषांसंसारित्वापत्तिरितिचेन्न ॥ तेषांस्वरूपतोणुत्वेप्यणिमाद्यष्टैश्वर्यवत्त्वेनमुक्तावीश्वरेणव्यक्तीकरण
संभवात् ॥ ननुवैकुंठलोकस्यप्रलयेविनाशेतद्गतानांमुक्तानामपिविनाशेनसंसारिसाम्यंस्यादित्यतआह ॥ **वैकुंठादाविति** ॥
॥ ५९९ ॥ तदुक्तंगीतातात्पर्ये ॥ शाश्वतंस्थानंवैकुंठादि ॥ श्रीरेवलोकरूपेणविष्णोस्तिष्ठतिसर्वदा ॥ अतोहिवैष्णवालोकानि
त्यास्तेचेतनाअपीति ॥ छांदोग्यभाष्येपि परस्यब्रह्मणोलोकेश्वेतद्वीपाभिधेपरइत्यारभ्य चित्सुवर्णमयंदिव्यंलक्ष्मीस्तत्तत्स्वरूपि
णीत्युक्तं ॥ मध्वविजयेपि ॥ विमलाकृतिःप्रकृतिरेवमहामणिहेममय्यखिलवस्तुमयी ॥ इहसंभवेत्सकलकांतिरसःकथि

५९९ वैकुंठादौविद्यमानाःसर्वेपिपदार्थालक्ष्म्याद्यात्मकाः ॥

तोधिकोक्तिभिरतःकविभिरिति ॥ ननुमुक्तब्रह्मादीनांपुनःसृष्टिकालेसत्यलोकाद्याधिपत्येसतिसंसारित्वापत्त्यामोक्षस्यापुरुषा
र्थत्वंस्यादित्यतआह ॥ **मुक्तब्रह्मादीनामिति** ॥ ६०० ॥ तदुक्तंसूत्रभाष्ययोः ॥ ॐविकारावर्तिचतथाहिदर्शयति
ॐ ॥ विकारावर्तिव्यापारोमुक्तानांनविद्यते ॥ इमंमानवमावर्तंनावर्ततइतिश्रुतेः ॥ नविकाराधिकारस्तुमुक्तानामन्यएवतु ॥
विकाराधिकृताज्ञेयायेनियुक्तास्तुविष्णुनेति ॥ निर्णयेपि ॥ देवानिमान्मुक्तसमस्तदोषान्स्वसन्निधानेविनिवेश्यदेवः ॥ पुनस्त
दन्यानधिकारयोग्यांस्तत्तद्गणानेवपदेनियुंक्तइति ॥ ननुमुक्तब्रह्मादीनामनधिकारेतत्तदुत्तमत्वतत्तन्नियामकत्वादिकंनस्यादित्य
तआह ॥ **मुक्तस्वकीयेति** ॥ ६०१ ॥ तदुक्तंभोगपादीयानुव्याख्याने ॥ मुक्तस्वकीयावरयंतृतास्तिमुक्तावपिब्रह्मपुरःसराणा
मिति ॥ निर्णयेपि ॥ ब्रह्मैवसर्वजीवेभ्यःसदासर्वगुणाधिकः ॥ मुक्तोपिसर्वमुक्तानामाधिपत्येस्थितःसदेति ॥ भाष्येपि ॥
स्वाधिकारेणवर्ततेदेवामुक्तावपिस्फुटं ॥ बलिंहरंतिमुक्तायविरिंचायचपूर्ववत् ॥ पूज्यंतेचावरैस्तेतुसर्वपूज्यश्चतुर्मुखइति ॥ ननुमो
क्षेसुखानुभवानंतरंस्वर्गादिवत्पुनःपातेतस्यमहापुरुषार्थत्वंनस्यात् ॥ तदर्थंमहासाधनानुष्ठानंचनस्यादित्यतआह ॥ **पुनःसंसार
इति** ॥ ६०२ ॥ तदुक्तंसूत्रभाष्ययोः ॥ ॐअनावृत्तिःशब्दादनावृत्तिःशब्दादिति ॐ ॥ ब्रह्मलोकमभिसंपद्यनचपुनरावर्तते न
चपुनरावर्ततइति ॥ छांदोग्यभाष्येपि ॥ दृष्ट्वातंपरमंविष्णुंतल्लोकंप्रतिपद्यते ॥ नावर्ततेपुनस्तस्मात्कदाचित्केनचित्क्वचिदिति ॥
निर्णयेपि ॥ मुक्तिर्नित्यातमश्चैवनावृत्तिःपुनरेतयोरिति ॥ द्वितीयतात्पर्येपि ॥ ततआनंदनामानमव्यक्तस्थंजनार्दनं ॥ प्राप्य

६०० मुक्तब्रह्मादीनांजगत्सृष्ट्यादिव्यापारोनास्ति ॥ ६०१ मुक्तस्वकीयावरनियामकत्वंचास्त्येव ॥ ६०२ पुनस्संसारेनावर्ततेमुक्ताः ॥

मध्वसि० नावृत्तिमायांतिशांतीभूतानिरामयाइति ॥ गीतायामपि ॥ यद्गत्वाननिवर्तंतेतद्धामपरमंममेति ॥ ननुतृतीयस्कंधभागवता सार.
॥१६४॥ दौवैकुंठवासिनांजयविजयादीनांभगवद्द्वारपानामपिसनकादिशापेनपुनर्भूमौरावणकुंभकर्णादिरूपेणोत्पत्तेःप्रतिपादितत्वेनमु
क्तानामनावृत्तिरेवनेतिचेन्न ॥ सनकादिशापविषयाणांमुक्तत्वाभावात् ॥ तत्रजयाद्याद्विविधाः ॥ अधिकारस्थाअनधिकार मोक्षप्र०
स्थाश्चेति ॥ अधिकारस्थानमुक्ताः ॥ किंतुशापादियोग्याश्च ॥ अनधिकारस्थास्तुमुक्ताःशापाद्यविषयाश्चेति ॥ तदुक्तंसप्तम
स्कंधतात्पर्ये ॥ अधिकारस्थिताश्चैवविमुक्ताश्चद्विधाजनाः ॥ विष्णुलोकस्थितास्तेषांवरशापादियोगिनः ॥ अधिकारस्थितामु
क्तिंनियतंप्राप्नुवंतिच ॥ विमुक्त्यनंतरंतेषांवरशापादयोनत्विति ॥ अत्रकेचित् ॥ एतत्कल्पेमुक्तियोग्यानामेवैतत्कल्पेसृष्टिः ॥
नतुकल्पांतरेमुक्तियोग्यानामपि ॥ तेषामेवैतद्ब्रह्मकल्पेसाधनसंपत्तिः ॥ एतद्ब्रह्मणासहमुक्तिश्च ॥ सृज्यसृष्टावीक्षाबभूवपरना
मनिमेषकांतइतिनिर्णयोक्तेः ॥ किंचप्रतिब्रह्मकल्पंसर्वेषांसृष्ट्यंगीकारेसाधनसंपत्त्यासर्वेषामपिमुक्त्यापत्त्यापुनःसृष्ट्यादिकंनस्या
त् ॥ नचकेषांचिदेवसाधनपूर्तिर्नतुसर्वेषामतोनसर्वमुक्तिरितिवाच्यं ॥ समानगणस्थानांमध्येकेषांचिदेवमुक्त्यंगीकारेकेषां
चिद्बहुजन्मांगीकारेचजन्ममरणसुखदुःखक्षुत्पिपासादीनामाधिक्यापत्त्यासमानगणत्वंनस्यात् ॥ किंचअनंतजन्मसुसृष्टाः
साधनानुष्ठानवंतोजाताःपुनश्चैष्यत्स्वनंतजन्मसूत्पत्स्यंतेसाधनान्यनुतिष्ठंतिचपुनश्चनमुच्यंतइत्यस्यानुभवबाधितत्वात् ॥ अ ॥१६४॥
तःप्रतिकल्पंनसर्वेषांसृष्टिः ॥ किंतुयोग्यानामेवेत्याहुः ॥ तन्न ॥ प्रतिब्रह्मकल्पंसर्वेषांजीवानांसृष्टेरावश्यकत्वात् ॥ नियमेप्रमा
णाभावात् ॥ सइदंसर्वमसृजतेतिश्रुतेः ॥ अन्यथासर्वथासृष्ट्ययोग्यानांलक्ष्म्यव्याकृताकाशादीनांवर्णानांचपराधीनविशेषावाप्ति

लक्षणसृष्टिकथनप्रयासवैयर्थ्यापत्तेः ॥ तथाचवियदधिकरणसुधानुव्याख्यानविरोधप्रसंगात् ॥ श्रुतिसंकोचेमानाभावाच्च ॥ यच्चोक्तं ॥ सृज्यसृष्टावीक्षाबभूवेतिनिर्णयवाक्येसृज्यपदंप्रमाणमितितदयुक्तं॥तस्यमुक्तव्यावृत्त्यर्थत्वेनचरितार्थत्वात् ॥ नचमुक्तस्यतत्राप्रसक्तिरितिवाच्यं॥तस्योदरस्थजगतइतिपूर्वश्लोके दृष्ट्वासचेतनगणाञ्जठेरशयानानानंदमात्रवपुषःसृतिविप्रमुक्तानित्युत्तरश्लोकेचमुक्तामुक्तसमुदायस्यप्रलयकालेपरमात्मशरीरप्रविष्टत्वेनप्रसक्तिसंभवात् ॥यच्चोक्तमनेकजन्ममरणसुखदुःखादिबाहुल्यंस्यादिति॥तदपिनसमंजसं॥प्राकृतसुखदुःखादिषुवैषम्यसंभवेपिमोक्षसुखस्यसमानत्वसंभवात् ॥ नचबहुसाधनवतोमोक्षेपिसुखाधिक्यंस्यादितिवाच्यं ॥ स्वर्गादिसुखार्थमेवसाधनानुष्ठानसंभवात् ॥ प्रद्युम्नसृष्टसूक्ष्मशरीराणिस्वीकृत्यकर्माभिमानितयापिस्थितिसंभवाच्च॥ किंचब्रह्माद्याधिकारिकदेवानांशतादिब्रह्मकल्पेषुसाधनस्यापरोक्षज्ञानांतरंपुनःशतादिब्रह्मकल्पेषुप्रारब्धानुभवस्यचोक्तत्वेनतेषामेकब्रह्मकल्पेसृष्ट्यनुपपत्तेः ॥ नचमनुष्योत्तमादीनामेवनसर्वेषांसर्वब्रह्मकल्पेषुसृष्टिरितिवाच्यं ॥ तर्हितेषांकदापिसृष्ट्याद्यभावप्रसंगात् ॥ पूर्वशरीरारंभककर्माभावात् ॥ तेषांपूर्वशरीरसंबंधाभावेनकर्मकरणायोगात् ॥ अनादिपूर्वकर्मणएवनकर्माविभागादितिचेन्नानादित्वादितिसूत्रेहठवादादौचशरीरकारणत्वोक्तेः ॥ अन्यथापरमात्मनोवैषम्यनैर्घृण्यादिदोषप्रसंगात् ॥ नचकर्मणांस्वरूपतएवानादित्वमितिवाच्यं ॥ प्रवाहतएवानादित्वंकर्मणामितिटीकादिविरोधप्रसंगात् ॥ गीताभाष्येपियदिसादिःस्यात्संसारःपूर्वकर्माभावादतत्प्राप्तिरित्युक्तेः ॥ नचानुव्याख्यानेमनुष्योत्तमादीनामन्येषांब्रह्ममात्रतइत्येकब्रह्मकल्पेमोक्षप्रयत्नप्रारब्धयोरुक्त्यनुपपत्तिरितिवाच्यं ॥ नानाकल्पेषुजन्मवतांमोक्षार्थमकृतप्रयत्नानामेवेश्वरेच्छयैनमेतस्मिन्कल्पे

मोचयामीत्येवंरूपयैकस्मिन्नेवब्रह्मकल्पेमोक्षार्थसाधनानुष्ठानस्यप्रारब्धानुभवस्यचोपपत्तेः॥ अतएवऋजूनामपिमोक्षार्थमुत्साहाभावस्य ऋजूनामेकएवास्तिपरमोत्साहवर्जनमित्यनुव्याख्यानोक्तेश्च॥अतःसर्वेषामपिसर्वेषुब्रह्मकल्पेषुसृष्टिरितिसिद्धं॥अपरेतु॥ खगामृगास्तृणादयःपिपीलिकाश्चगर्दभाः॥ तदासुरुत्तमायतोनृवानरास्तुकिंपुनरिति ॥ तथापिपीलिकातृणांतानांददौलोकाननुत्तमान् ॥ वैष्णवान्संततत्वाच्चनाम्नासांतानिकान्विदुरितिरामावतारे एकगुणोपासकानांतृणजीवानांचतुर्गुणोपासकानांमनुष्योत्तमानांरामेणसहगमनेनापुनरावृत्तिकसांतानिकलोकप्राप्तिस्तत्रस्थितिश्चतेषामितिमन्यंते॥ तन्न ॥ तेतृणजीवाअपरोक्षज्ञानिनोनवा ॥ नेतिपक्षेईयुस्त्रीकर्मणालोकान्ज्ञानेनैवतदुत्तरानितिप्रमाणबलेनसांतानिकलोकानामपरोक्षज्ञानसाध्यत्वोक्त्या तद्विरोधप्रसंगात्॥ नाद्यः॥ सातानिकलोकस्थितिःप्रारब्धकर्मफलंनवा ॥ नेतिपक्षेतद्गमनस्थित्योरसंभवः॥ नाद्यः॥ अन्येषांब्रह्ममात्रस्यत्वंतआरब्धसंक्षयइत्यनुव्याख्यानविरोधात् ॥ तत्रब्रह्मणोंतिमदिनएवमनुष्योत्तमानांप्रारब्धसंक्षयस्योक्तत्वेनबहुदिनपर्यंतंतत्रप्रारब्धानुभवासंभवात्॥ नचांतरारब्धसंक्षयइतिपाठः। नत्वंतआरब्धसंक्षयइति॥तथाच॥ अंतराप्रतिदिनं मध्येमध्येब्रह्मणोष्टादशसहस्रात्मकदिनमध्येकेषांचिन्मनुष्योत्तमानांप्रथमदिनएवापरोक्षज्ञानं रामेणसहगमनसांतानिकलोकप्राप्तिप्रारब्धानुभवाइत्यंगीकर्तव्यं॥ केषांचिद्द्वितीयदिने अपरेषांतृतीयदिनइत्यादिक्रमेणप्रारब्धानुभवइतिवाच्यं॥ तथासतिसमानगणस्थानांकेषांचित्प्रथमदिनेप्रारब्धानुभवःकेषांचिद्द्वितीयदिनइतिस्यात्॥ नचेष्टापत्तिः॥ प्रथमदिनानुगतानांबहुकालप्रारब्धानुभवः अंतिमदिनानुगतानांत्वल्पकालप्रारब्धानुभवइतिमहावैषम्यापत्तेः ॥ तथाचांतरेत्यपपाठः अंतआरब्धसंक्षयइतिसप्तम्यंतपाठस्साधुः॥ नन्वेवंसतिखगामृगाइतिनिर्णयस्थश्लोकस्यकोर्थः पक्षद्वयेपिबाधइतिचेदुच्यते॥ खगमृगतृणनृवानराणांदेवर्ष्याद्यवताररूपत्वेनैकगुणोपासकचतुर्गुणोपासकमनुष्योत्तमत्वाद्यभावात्॥ अतएवनृवानराणांस्वांशिप्रवेशस्तत्रैवोक्तः॥तथाहि॥ येतुदेवाइहोद्भूतानृवानरशरीरिणः॥ तेसर्वेस्वांशितामापुस्तान्मैंदविविदावृतइति॥ मनुष्योत्तमादित्वपक्षेतेषांनिरंशत्वेनप्रवेशानुपपत्तिरितिसर्वमवदातं॥ वैकुंठलोकेपरमात्मनःस्थितिमाह॥ परमात्माचेति॥ ६०३॥ सकलभोगयुक्तोमुक्तब्रह्मादिभिरिति॥कृष्णोमुक्तैरिज्यतेवीतमोहैः॥ततोहरिःप्रलयेश्रीसहायः॥ शेतेनिजानंदममंदसांद्रसंदोहमेकोनुभवन्ननंतः॥ अनंतशीर्षास्यकरोरुपादःसोनंतमूर्तिःस्वगुणाननंतान्॥ अनंतशक्तिःपरिपूर्णभोगोभुंजन्नजस्रंपरिपूर्णआस्ते इति॥ संस्थाप्यदूरेसरथंसविप्रंपार्थस्वरूपेद्विचतुष्कबाहौ॥ समस्तरत्नोज्वलदिव्यभूषणेविवेशनित्योरुगुणार्णवेप्रभुः॥ सहस्रमूर्धन्युरुशेषभोगआसीनरूपेऽमितसूर्यदीधितौ॥ रमासहायेतटिदुज्वलांबरेमुक्तैर्विरिंचादिभिरार्चितेसदा॥ स्थित्वैकरूपेणमुहूर्तमीश्वरोविनिर्ययौविप्रसुतान्प्रगृह्येति॥सपूर्वरूपेणसमाप्यचैक्यंविभज्यचेच्छानुसृतोथरेमे॥ हरिःश्रियाब्रह्ममुखैश्चमुक्तैःसंपूज्यमानोमितसद्गुणात्मेत्यादिनिर्णयोक्तेरितिभावः॥ लक्ष्म्यात्मकेविमिताख्येपर्यंकइति॥ तदुक्तंछांदोग्यभाष्ये। तत्रविष्णोःपरंदिव्यमपराजितनामकं॥विमिताख्यंचपर्यंकंविष्णोर्मानेनसंमितं॥चित्सुवर्णमयंदिव्यंलक्ष्मीस्तत्तत्स्वरूपिणीति॥ तत्रप्रियकर्मे

६०३ परमात्माचात्रसकलभोगयुक्तः॥ मुक्तब्रह्मादिभिरीड्यमानोलक्ष्म्यात्मकेविमिताख्येपर्यंकेशेते॥

गायतीत्यादि ॥ ६०४ ॥ तदुक्तंद्वितीयस्कंधभागवते ॥ श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूतिभिः ॥ प्रेंखस्थि
तायाःकुसुमाकरानुगैर्विगीयमानाप्रियकर्मगायती ॥ ददर्शतत्राखिलसात्वतांपतिंश्रियःपतिंयज्ञपतिंजगत्पतिं ॥ सुनंदनंदप्रबला
र्हणादिभिःस्वपार्षदमुख्यैःपरिसेवितंविभुं ॥ भृत्यप्रसादाभिमुखंदृगासवैःप्रयत्नहासारुणलोचनाननं ॥ किरीटिनंकुंडलिनंचतुर्भु
जंपीतांशुकंवक्षसिलक्षितंश्रियेत्यादि ॥ अत्रमहाफलमोक्षाधिकारिणःकइत्याकांक्षायामहोरात्रंपरमादरेणानवरतंश्रीमध्वशास्त्रा
लोडनवंतएवेत्यभिप्रायेणश्रीमध्वविजयश्लोकमंतेनिबध्नाति ॥ महानंदतीर्थस्येति ॥ ६०५ ॥ महतामनुग्रहायैवपद्मना
भेनसूरिणा ॥ मध्वसिद्धांतसारोयंसप्रमाणःकृतोंजसा ॥ ७ ॥ इतिश्रीमन्महाभाष्यरघुनाथाचार्यशिष्येणवेदगर्भानंतप
द्मनाभेनकृतेपदार्थसंग्रहव्याख्यानेमध्वसिद्धांतसारेमोक्षभोगप्रकरणंसमाप्तं ॥ समाप्तश्चायंग्रंथः ॥ श्रीकृष्णार्पणमस्तु ॥ ७ ॥

---

६०४ तत्रप्रियकर्मगायतीबहुधाविभूतिभिर्बहुमानंकरोतिमहालक्ष्मीरित्यशेषमतिमंगलं ॥ ६०५ महानंदतीर्थस्ययेभाष्यभावंमनोवाग्भिराव
र्तयंतेस्वशक्त्या ॥ सुराद्यानरांतामुकुंदप्रसादादिमंमोक्षमेतेभजंतेसदेति ॥ १ ॥ रघुनाथार्यशिष्येणपद्मनाभेनधीमता ॥ कृतःपदार्थसंक्षेपोप्यनुगृह्णंतु
सूरयः ॥ २ ॥ इतिश्रीपद्मनाभसूरिविरचितःपदार्थसंग्रहःसमाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥

इदं पुस्तकं मुंबय्यां जावजी दादाजीनाम्नां निर्णयसागराख्ये मुद्रणयंत्रे कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण
मुद्रयित्वा प्रकाशितम् ॥ शके १८१५ विजयनामसंवत्सरे.

॥ इति मध्वसिद्धांतसारः संपूर्णः ॥